Madras University Sanskrit Series No. 12.

GENERAL EDITOR: DR. C. KUNHAN RAJA
(Head of the Department of Sanskrit)

NAYAVIVEKA

OF

BHAVANĀTHA MIŚRA

WITH THE

VIVEKATATTVA

OF

RAVIDEVA

[*Tarkapāda*]

EDITED BY

S. K. RAMANATHA SASTRI
Junior Lecturer in Sanskrit
University of Madras

DOCTRINA VIM PROMOVET INSITAM

UNIVERSITY OF MADRAS
1937

[Price Rs. 3/-

PRINTED AT
ANANDA PRESS, MADRAS.

यविश्वविद्यालयसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १२.

नयविवेकः

भवनाथमिश्रविरचितः

रविदेवविरचितविवेकतत्त्वसहितः

[तर्कपादान्तः]

संपादकः

शे. कृ. रामनाथशास्त्री

मद्रपुरीयविश्वविद्यालयः

१९३७

TABLE OF CONTENTS

FOREWORD.

It is with great pleasure and not without a sense of pride that I place before scholars this edition of Bhavanātha's Nayaviveka for the first Pāda of the first Adhyāya of the Mīmāṃsā. The work explains the doctrines of the Mīmāṃsā according to the Prābhākara system and is a companion volume to the edition of Bṛhatī already published in this series. The edition is based on the following manuscripts :—

1. Text of the Nayaviveka (Tarkapāda) belonging to the Government Oriental Manuscripts Library, Madras, R. No. 3253.

2. Another copy of the text belonging to the Office of the Curator for the publication of Oriental Manuscripts, Trivandrum.

3. A plam-leaf copy of Ravideva's commentary, belonging to the Government Oriental Manuscripts Library, Madras, R. No. 3603.

4. A paper transcript of the same (Ravideva's commentary) belonging to the Government Oriental Manuscripts Library, Madras, R. No. 4363.

The following manuscripts of Bhavanātha's Nayaviveka and its commentaries have so far been known.

Saraswati Mahal Palace Library, Tanjore:—Nos. 6854, 6855, 6856, 6857, 6858, 6859, 6860, and 6861.

Saraswati Bhavanam Library, Benares:—Nos. 189, 190, 191, 405, 406, 407, 408, 409, and 410.

Adyar Library, Adyar, Madras:—Nos. 1-A 27, 27-H 5, 27-H 6, 29-J 21, 10-I 10, 27-H 4, and 38-G 11.

Government Oriental Manuscripts Library, Madras:—Nos. D 4457, R 1552, R 2712, R 3253, R 3603, R 3643, R 3883, R 3917, R 4176, R 4363, R 4364, R 4379, R 5301, R 5302, R 5303, R 5304, R 5305, R 5306, R 5317 and N. 21-1.

Oriental Library, Mysore:—Nos. 203, A 589, A 590, 759, 1008, 1710, 2392, 2677, 2766, 2871 and 4930.

India Office, London:—Nos. 2184 and 2185.

Granthappura, Trivandrum:—670, 771, 672, 673.

UNIVERSITY OF MADRAS,
7th October 1937.

C. KUNHAN RAJA.

INTRODUCTION.

This edition of the Nayaviveka of Bhavanātha with its commentary called Vivekatattva by Ravideva is a companion volume to the edition of the Bṛhatī of Prabhākara Miśra with its commentary called the Ṛjuvimalāpañcikā of Śālikanātha published as No. 3 in this series in two parts. The present work is one of the most important in the literature dealing with the Prābhākara School of the Pūrvamīmāṃsā system. It occupies in the Prābhākara School more or less the same position which the Śāstradīpikā of Pārthasārathi Miśra occupies in the Bhāṭṭa School. Prabhākara's work called Bṛhatī is a commentary on Śabarasvāmin's Bhāṣya on the Mīmāṃsā sūtras of Jaimini. The present work explains the various Adhikaraṇas in the Mīmāṃsā sūtras. The portion now published is only for the first Pāda of the 1st Adhyāya of the Mīmāṃsā Śāstra (consisting of 12 Adhyāyas)—the same portion for which the Bṛhatī has also been published in the series. In this first Pāda (which is usually known as the Tarkapāda) there are 32 sūtras and seven Adhikaraṇas. The first five Adhikaraṇas correspond to the first five sūtras. The sixth Adhikaraṇa begins from sūtra 6 and goes up to sūtra 23. Sūtras 24 to 32 are covered by the seventh Adhikaraṇa. The author in the third stanza in the beginning says that he has based his work on the works of Śālikanātha[1]. In a

---

1. The stanza is :—

महता प्रणिधानेन शक्यमेव विधान्तरम् ।
लोकानुमतमित्येव शालिकोक्तं प्रसाध्यते ॥

later portion of the work (not included in this edition) the author speaks of the two Pañcikās of Śālikanātha[1].

This again raises the problem of the works of Śālikanātha. Two works of his, called Pañcikās, are well-known and available in print, *viz.*, the Prakaraṇapañcikā published in the Benares Sanskrit Series (it is an independent work dealing with the doctrines of the Prābhākara School) and the Ṛjuvimalāpañcikā which is a commentary on Prabhākara's Bṛhatī (already published in this series). At the end of the Introduction to the Bṛhatī, I have stated in the additional note[2] that in the Prakaraṇapañcikā Śālikanātha himself speaks of what he has already said in the two Pañcikās, which, as is clear from the context, are different from the Prakaraṇapañcikā. Thus from the words of Śālikanātha himself we find that he must have written three works called Pañcikās.

In the Introduction to the Bṛhatī, I have said[3] that according to tradition Prabhākara has written two commentaries on the Śābara Bhāṣya—one called Laghvī or Vivaraṇa and the other called Bṛhatī or Nibandhana—and that Śālikanātha has commented upon both these works. The two Pañcikās (other than the Prakaraṇapañcikā) of which Śālikanātha speaks in his Prakaraṇapañcikā must be these two commentaries. Of course, the commentary on the Bṛhatī is known to us as Ṛjuvimalāpañcikā. In the Introduction to the Bṛhatī I had said[4] that

---

1. The stanza is:—

पञ्चिकाद्वयतन्त्रार्थसम्मोहविनिवृत्तये ।
उद्ग्राहिणी भवेनैषा वक्ष्यते शेषलक्षणा ॥ III. i. 1.

2. P. 28.
3. P. 11.
4. P. 17.

I was very sceptical about Prabhākara having written another commentary on the Śābara Bhāṣya distinct from his Bṛhatī or Nibandhana, in spite of the tradition; but recently, I was able to get a manuscript of a work called Dīpaśikhā, of which I have already made mention in the Introduction to the Bṛhatī[1]. According to tradition, as mentioned there, Śālikanātha's Dīpaśikhā is a commentary on a work of Prabhākara. The manuscript of Dīpaśikhā belongs to a Namboodiri Brahmin house, named Kataṅṅaśśeri, near Irinjalakuda in Cochin State and I was able to secure it through the courtesy of His Highness Rama Varma, (Parīkṣit), the Eighth Prince of Cochin. The manuscript covers the commentary for the second six chapters (*i. e.*, Chapters 7—12), and there are about 7,000 granthas in it. It is an old palm-leaf manuscript written in Malayalam. It is in an extremely injured condition. There is a semi-circular cut in the middle of the leaf extending to about half the width. Thus in every line a large number of syllables are missing for half of every page[2]. This damage has affected a large number of leaves in the beginning; there are many holes in the leaves; some leaves are broken and only one half is retained in the bundle now. As such it is impossible to get a useful copy from the manuscript. I am giving specimens from the work at the end of this Introduction. In the colophons it is sometimes said that the work is called Pañcikā[3]; not even once does the name of Śālikanātha occur. Since the work of Prabhākara, of which this Dīpaśikhā is the commentary, is not

---

1. P. 16.

2. Thus in the first line of the first page there is a break as shown in the extracts at the end of this Introduction.

3. For instance, at the end of the 10th Adhyāya

इति दीपशिखायां पञ्चिकायां दशमस्याध्यायस्याष्टमः पादः । समाप्तश्चाध्यायः ।

available it is not possible to make out this commentary nor is it possible to reconstruct even a tentative text of the original from this commentary. But the discovery of this manuscript confirms the tradition that Prabhākara has written two works and that Śālikanātha has commented on both of them.

But Bhavanātha speaks only of two works of Śālikanātha. It may be that even in his time the other work of Śālikanātha, *viz.*, the Dīpaśikhā along with its original, namely, the Laghvī or the Vivaraṇa, had gone out of currency. [1]

From references, it may be inferred that as between the commentary on the Bṛhatī and the commentary on the Laghvī, Śālikanātha first wrote the commentary on the Bṛhatī and then the commentary on the Laghvī. Besides the manuscript of the Dīpaśikhā, I was able to secure from the same Namboodiri Brahmin house two other bundles of palm-leaf manuscripts in Malayalam. These two bundles contain stray leaves belonging to works on Mīmāṃsā. They are not arranged in order nor are they complete. In one of those sheets, which could be identified as belonging to the Ṛjuvimalāpañcikā of Śālikanātha, there is mention of what Śālikanātha proposes to say in his commentary on the Vivaraṇa.[2] From this it follows that the commentary on the Vivaraṇa was written after he wrote the commentary on the Bṛhatī or the Nibandhana. Thus the order of his works must be (1) the commentary on the Bṛhatī, (2) the commentary on the Laghvī, (3) the Prakaraṇapañcikā.[3]

1. Cf. टीकाकारो (Prabhākara) हि प्रथमं विवरणटीकां कृत्वा पश्चान्निबन्धनटीकां कृतवानिति किंवदन्ती ।........निबन्धनमतस्य अद्यापि शिष्यप्रशिष्यपरंपरया वर्तमानत्वात्... (which suggests that the Vivaraṇa was not current in his time); Varadarāja in his Nayavivekadīpikā, II. i. 1. (Cf. *Journal of Oriental Research, Madras*, Vol. III. p. 282.)

2. The passage is :—एतच्च विवरणपञ्चिकायां वक्ष्यामः

3. For further comments on the order of the three works, refer Sanskrit Introduction pp. xxix and xxx.

In this connection, I may mention another important work belonging to the Prābhākara School which has recently been discovered, and that is a work called Bhāśyadīpa by Kṣīra-sāgara. There is a manuscript of it in the Sṛṅgeri Muṭṭ, and recently a transcript of it has been secured for the Adyar Library.[1] That is a direct commentary on the Bhāṣya of Śabarasvāmin as its name signifies. The manuscript is incomplete. At this stage it is not possible to say whether the work from which extracts have been given at the end of the Introduction to Bṛhatī is identical with this Bhāṣyadīpa; the name is identical. Considering the scarcity of material available on the Prābhākara School, the few discoveries are of great importance in spite of the fact that the works discovered are incomplete.

For the Bṛhatī, there was only one manuscript available when the edition in this series was undertaken and that manuscript belongs to the Asiatic Society of Bengal. It extends up to the sixth Adhyāya. Later on, another manuscript was discovered in the Sṛṅgeri Mutt and I have made mention of it in my Foreword to the Bṛhatī published in the Second Part.[2] The variant readings for the first Pāda in this new manuscript have also been incorporated in the Second Part.[3] A few palm-leaf sheets in Malayalam in the possession of the editor of this present work, contain the Bṛhatī[4] for Adhyāyas 7 and 8. For the remaining four Adhyāyas no manuscript is yet available. For Śālikanātha's commentary on the Bṛhatī, various manuscripts exist in different libraries; but all these manuscripts put together do not give us the work in its entirety. Some portions are still missing. For Bhavanātha's Nayaviveka (which is now

1. Shelf Number 37-B-6.
2. P. 1.
3. At the end of the Volume.
4. See Foreword to the Bṛhatī, Pt. II, p. 1.

edited) and for its commentaries by Ravideva and Varadarāja there are manuscripts in various libraries. For the first Pāda of the first Adhyāya, there is no commentary by Varadarāja and hence that commentary could not be included in the present edition.[1]

Regarding the date and personality of Bhavanātha, the author of the work now edited, very little material is available, and it would be risky to commit oneself to any conclusion. Bhavanātha mentions some previous authors, *viz.*, Śabarasvāmin, Kumārila, Prabhākara, Uṃveka, Śālikanātha, Vācaspati Miśra, Śrīkara, etc. He is quoted by Vedānta Deśika. He cannot be earlier than the 11th century; that is all that we know.

About Ravideva also nothing is known which is worth mentioning. A Varadarāja is well-known as the author of the Tārkikarakṣā and the commentary called Bodhinī on Udayanācārya's Kusumāñjali. Whether Varadarāja, the commentator on Nayaviveka, is identical with the author of the Tārkikarakṣā and Kusumāñjalibodhinī is a problem which has to be further considered. At this stage I do not wish to commit myself even to a hypothesis regarding the dates and personalities of these authors and they are not absolutely necessary in the context.

In publishing these Prābhākara works in the Madras University Sanskrit Series, I, as the Head of the Sanskrit Department and as the General Editor of the Series, entertain a real and deserved sense of gratification. Whereas the literature available in the field of Vedānta and Nyāya Philosophy and even in the Bhāṭṭa School of Mīmāṃsā, is

1. There are two other commentaries on the Nayaviveka of which only fragments are available and hence not included here.

fairly rich, very few works are available in print in the Prābhākara School and not many are known in manuscript or even by citation. But the Mīmāṃsā system, and especially the Prābhākara School of it, deserves far more attention than what it has received.

I do not propose to enter into a detailed discussion on the origin and development of the two Schools of the Mīmāṃsā system. Tradition holds that Prabhākara was a disciple of Kumārila Bhaṭṭa.[1] I content myself by taking this tradition as a mere tradition. It is very likely that the original Mīmāṃsā is more faithfully represented in the Prābhākara School than in the Bhāṭṭa School. Both Kumārila Bhaṭṭa and Prabhākara take Śabarasvāmin's Bhāṣya on the Mīmāṃsā sūtras as their basic text. We cannot decide the question whether Kumārila's interpretation or Prabhākara's interpretation is more faithful to the real doctrines and the spirit of Śabarasvāmin's Bhāṣya with any greater success and satisfaction than we can decide the question whether the interpretation of Srī Śaṅkarācārya or of Śrī Rāmānujācārya or of Śrī Madhvācārya is more faithful to the doctrines and to the spirit of the Upaniṣads, the Bhagavadgītā and the Vedāntasūtras. As such we cannot decide what the original Mīmāṃsā was like and what deviations there are from the original Mīmāṃsā in the Schools founded by Kumārila and Prabhākara. There are certain doctrines in both the systems which are of very great interest to scholars and thinkers and also to students of ancient Indian civilisation.

Whereas in the other systems of Indian Philosophy the emphasis is more on man's destiny after death, in Mīmāṃsā the emphasis is more on the duty of man in life. The

---

1. Cf. Note at the end of this Introduction.

purpose of the other systems is to teach man how to escape permanently from this world. The Mīmāṃsā system teaches man about his rights and duties in life. As such the doctrines of the Mīmāṃsā system must be understood as representing more faithfully the ancient Indian doctrine regarding man and his relation to the world.

Some of the fundamental points of the Mīmāṃsā system which deserve our attention I propose to briefly touch upon. The Mīmāṃsā system is absolutely realistic. In all the other systems there is a cause for the world-process, and there is a final terminus also for it. Perhaps the world was created by a God or it may be an evolution from some primordial matter or it may be an illusory transformation of the Absolute. Whatever it is, the world once was not, and will once cease to be. But according to the Mīmāṃsā Philosophy the world always was, and will ever be. Thus there is no question of a permanent detachment from the world.

While Śaṅkara represents one extreme, in so far as he holds every human experience as illusion, Prabhākara represents the other extreme holding that every experience as such must be valid and no experience can be an illusion. This is realism with a vengeance.

There is an opinion current in modern times that the thought of India in ancient times was dominated and even stunted by the inviolable Vedic authority which curtailed man's freedom. A close study of the Mīmāṃsā system will show that this opinion is the result of ignorance. According to Mīmāṃsā, the Vedas have to be studied, understood and examined; and one accepts the statements in the Vedas only when one's reason and intellect are completely satisfied regarding the acceptability of

these statements. There is absolutely no question of intellect being subservient to authority. Then again the Vedas do not impose any obligation on an unwilling individual. According to either school of Mīmāṃsā, scriptural prescriptions derive their authority not from the reverence due to their source, nor from any external sanction attached to ignoring them, but from their commending themselves to the reason of the individual in respect of their obligatoriness or their instrumentality to what is desirable. Thus there is absolutely no conflict between man's freedom of will and scriptural authority.

What is called a prohibition is even more interesting. One "shall not" simply means that one's mind shall remain absolutely calm in the presence of what usually attracts one's mind and there is no question of putting forth an effort to keep one's mind away from things that usually attract one's mind. There are good things—things that will result in man's ultimate good—in respect of which one must put forth one's effort; and he shall keep his mind in a state of absolute indifference in the presence of things which may ultimately bring about evil to man. A forcible control of the mind against what are called evils is not strictly what is contemplated by a prohibition (technically called "niṣedha"). Here also one finds that man's freedom is not interfered with by scriptural authority. Man is perfectly free to do evil or to abstain from evil. An enforced abstinence from evil is not real abstinence according to Mīmāṃsā, and is not what is contemplated in a "niṣedha." What Mīmāṃsā teaches is that one should always train his mind in the right direction so that the mind of its own accord refuses to be allowed to be deviated from the right path by things that ultimately bring evil. This is a very important factor and students of ancient Indian civilisation have not paid

sufficient attention to the Mīmāṃsā conception of "vidhi" and "niṣedha" (Prescription and Prohibition) and have not interpreted correctly the ancient Indian attitude towards authority and towards the relations of man's intellect to scriptural authority. For a correct understanding of ancient Indian civilisation the Mīmāṃsā system among all the Indian systems is the most important. There are various other points of great interest in the Mīmāṃsā system. I do not propose to deal with them in an Introduction.

So far as the Vedānta system is concerned scholars and students of Indian Philosophy are getting accustomed to the thoughts therein and also to the language employed in standard works on the subject. But the case is different with respect to Mīmāṃsā. The works are difficult and the doctrines are obscure. Prabhākara's own work is extremely terse and difficult to understand. Bhavanātha's work, which is now edited, is perhaps more difficult to understand. It cannot be understood by the ordinary scholar. It is only an extremely select few among Sanskrit scholars who can understand this work. It is hoped that when a sufficient number of standard works on the subject is published and made available, scholars who are fitted for the work would come forward to translate and to interpret these works for the benefit of those who are interested in the subject but who cannot have direct access to the Sanskrit texts dealing with the subject.

C. KUNHAN RAJA.

NOTE.

On p. 199 of the Text is printed as foot-note, a gadya stotra on Śiva, which is found in the Trivandrum Ms. This stotra was unintelligible, until a commentary on the Śivamahimnasstava by Decayāmātya, pupil of Lolla Lakṣmīdhara, preserved in the Madras Govt. Oriental Mss. Library (D. 11120) threw light on it. This interesting commentary records a story on the origin of the Mahimnasstava. It says that during the time of a King named Bilhaṇa, who turned a Buddhist, Buddhism was spread among the people to a large extent; that, consequently, the Gods in heaven made a representation to Śiva; that Śiva ordered his two sons Subrahmaṇya and Vināyaka to put down Buddhism and that the former incarnated as Kumārasvāmī or Bhaṭṭācārya and the latter as Prabhākara or Guru. Meeting King Bilhaṇa in an assembly of scholars, the two sang two hymns on God Śiva and made God appear in person to the King. And in this connection, the commentary records the stotra sung by Prabhākara which happens to be almost the same as this mysterious stotra in the Trivandrum Manuscript of the Nayaviveka. The stotra sung by Bhaṭṭācārya or Kumāriḷa is said to be the Mahimnasstotra.

The commentator adds the further comment that it is wrong to consider that either the Bhāṭṭa School or the Prābhākara School discountenanced belief in a personal God. The commentator refers us also to the Tarkavāda and the Īśvaravāda, but here a gap occurs in the Ms., and we are not able to know the point in reference.

The cultivation of the Prābhākara School in the family of Lolla Lakṣmīdhara, the guru of this commentator, is borne out

by the long colophon at the end of the Saundaryalaharīvyākhyā by Lolla Lakṣmīdhara, from which we understand that Lolla Lakṣmīdhara himself wrote many works on the Guru School like the Nayavivekabhūṣaṇa, that his father, Viśvanātha-bhaṭṭāraka wrote a Nayavivekadīpikā and that his grandfather Lakṣmaṇārya also wrote on the Prābhākara School.

I am obliged to Dr. V. Raghavan, Senior Assistant for the preparation of the Catalogus Catalogorum in the University, for the information contained in this note.

SPECIMEN FROM DĪPAŚIKHĀ MENTIONED IN THE INTRODUCTION.

ओम्. श्रुतिप्रमाणत्वात् पूर्वेणाध्यायषट्केन प्रत्यक्षविहितधर्माणां दर्शपूर्णमासादीना ....
केषुचिदैन्द्राग्नादिषु चिन्तयितुमिष्यत इत्यनेन भाष्येणेदमुच्यते. पूर्वस्मिन् षट्के योऽर्थो निर्णीतः तस्मिन सत्युत्तरस्यार्थ..........................

...............णि नियोगवशेवेव ह्यपेक्षितोपकारसमर्पकतैषामन्यथा ब्राह्मणमात्रविधानापत्तेः। अतो...
वानुमानं यतः कस्मात्सूक्तं वारुणप्रघासिकस्य धर्मस्य ग्रहणमिति ।

इति दीपशिखायां सप्तमस्य प्रथमः पादः ।

वमे संस्कारकर्मगेक्षराणां सामेत्याशङ्कान्तरनिवृत्त्यर्थमिदमधिकरणमारब्धम् । काः पुनस्ता आशङ्काः। न तेऽधिकारमल्पप्रयोगाद्याः किं...............मासामाशङ्कानां निवृत्तौ का...........................मित्यत्राह.........तिदेशवचनं तु य ....इति गीतौ सामशब्द इत्याशङ्कानिराकरणेन दृढीकृतम् ।

इति दीपशिखायां समाप्तः द्वितीयः पादः ।

उपपूर्वस्य तिष्ठतेः समीपवचनत्वमप्यविरुद्धम् । अभिधानेऽपि चोद्यमानेऽभिधानार्थत्वादुपस्थानस्येति दर्शितं भाष्ये ।

इति दीपशिखायां सप्तमस्य तृतीयः पादः ।

इतिकर्तव्यताः यजिचोदनागुणभावोऽपूर्वं कृत्वेति च यत् भाष्यकारेण स्मार्यते तद्विध्यन्तं प्रत्याकाङ्क्षानिमित्तत्वेन । यदापूर्वं कार्यतया प्रतीयते............
.........धानात् नाम्नो बलीयस्त्वम् । लिङ्गादिकल्प्यो विध्यन्तविशेषान्वयः ।

इति दीपशिखायां सप्तमस्य चतुर्थः पादः ।

अथ विशेषः यथा विशेषलक्षणस्यावकाशः तथा दर्शयति—प्रकृतिषु भेदेन कृत्स्नविधानं न स्यात् । एकरूपैव तदा सर्वप्रकृतिष्वितिकर्तव्यता भवेत् ।

इति दीपशिखायामष्टमस्य प्रथमः पादः ।

वाजिने सोम शब्दस्य स्तुत्यर्थत्वात्.

इति वस्तुतोऽहीनत्वेऽनुपपत्तिर्दर्शिता ।

इति दीपशिखायामष्टमस्य द्वितीयः पादः ।

हविर्गणे प्रयोगाभ्यासेन लाघवं मन्वान...............

चोदनायां पुनः श्रवणं तुल्यमित्यव्यक्तत्वसामान्याद्विध्यन्ताशङ्का ।

इति दीपशिखायामष्टमस्य चतुर्थः पादः ।

याभ्यां द्वाभ्यामेति यज्ञसमाप्तिं तयोः प्रणयनमिति गतिसाधनोरुसंस्तुतं मण्डलं कोटि पोय दीपशिखयित् (ल्) वरात्तत सप्तमं तुटङ्ङित्त*...............

अन्यथा ऊहे क्रत्वर्थे आर्षे च पुरुषार्थे इत्येकस्यानेकार्थत्वमन्याय्यं स्यात् ।

इति दीपशिखायां नवमस्य द्वितीयः पादः ।

प्रकृतौ ननु कर्माङ्गतया मन्त्रेण.

अनूहिताभिप्रायेणैव पूर्ववदत्रापि न वृत्तिरुक्ता ।

इति दीपशिखायां नवमस्य तृतीयः पादः ।

षड्विंशतिः. पक्षचतुष्टयमप्येतत्सिद्धान्तभूतसमस्य ।

पूर्वोक्तेनैव न्यायेन कर्मान्तरचोदना स्पृष्टा यतः ।

इति दीपशिखायां नवमस्य चतुर्थः पादः ।

विधे । ऊहो । वृत्तः । बाधाभ्युच्चयमित्यादिनोहलक्षणोत्तर ।

अनारभ्यवादस्य निष्प्रयोजनतां केचिच्चोदयन्ति न तेभ्य उत्तरं दातव्यम् । दिव्यदृशो हि ते येऽन्यतः प्रयोजनमवगम्य वेदवाक्यानि वर्णयन्ति । शब्दार्थविदां पुनः सत्यं विनापि तेन सिद्धिः । अस्ति तु तदिति सर्वत्रातिरेकपरिहारः ।

उभयत्रैकपुरोडाशायां द्विपुरोडाशायां चोपांशुयाज इति सूक्तम् ।

इति दीपशिखायां पञ्चिकायां दशमस्याध्यायस्याष्टमः पादः ।

समाप्तश्चाध्यायः ।

---

* This is a small bit in Malayalam.

प्रयोजनानि सम्बन्धात्। अत्र भाष्यकारेण वृत्तवर्तिष्यमाणानुकीर्तनं कृतम्। तस्य प्रयोजनमाह. वृत्तवर्तिष्यमाणानुकीर्तनमुक्तप्रयोजनम्।

हविः प्रत्युदाहरणमेव भाष्यम्। अतोऽप्युत्पाद्यान्तराभावात् अधिकरणान्तरवर्णनात् तर्हि कथमित्यत्राह—अभ्युच्चयदर्शनाय ह्यधिकरणान्तरवर्णना।

इति दीपशिखायामेकादशस्य चतुर्थः पादः।

तत्रिम् अन्यत्रकृतमङ्गजातमन्यस्योपकरोतीत्युच्यते। कान्यस्मिन् कृतं कस्यान्यस्येति वक्तव्यम्। इदमुच्यते।

न पुनस्तादर्थ्यं क्षत्रियवैश्ययोर्विहन्यते। क्रतौ वर्णनियमाभावात्। तस्मादत्रापि प्रसङ्ग इति सिद्धम्। एवं च दर्शनान्यपि सिद्धानि।

इति दीपशिखायां (न्यायशब्दस्य) द्वादशस्य चतुर्थः पादः।

इति विवरणपञ्चिकायां दीपशिखायां द्वादशाध्यायस्य चतुर्थः पादः॥

श्रीः

प्रास्ताविकम्

प्राभाकरदर्शनानुयायिषु प्रधानग्रन्थेष्वन्यतमोऽयमवतार्यते महोपाध्यायभव-नाथमिश्रप्रणीतो नयविवेकस्तर्कपादात्मको रविदेवविरचितेन विवेकतत्त्वाख्येन व्याख्यानेन सह। प्रकृतग्रन्थं ग्रन्थकर्तारं चाधिकृत्य निरूपणीयेंऽशे नियतप्रसक्तेऽधुना प्रतिपाद्यप्राभाकरदर्शनस्य सामान्यतोऽपि वा प्रादुर्भावादिरूपणं लब्धावसरमेवेति प्रथमं तन्निरूप्यते। तदप्यद्ययावद्विमर्शकलोकैः सप्रमाणं विमृश्य विनिर्णीतानर्थान् स्वरूपत एवोपादाय सम्भावनार्हांस्तत्सम्बन्धपौर्वापर्यादिकानभ्यूह्य क्रियते।

भेदकालप्रारम्भः

कौमारिलं प्राभाकरमितिसमाख्यात एव दर्शनप्रभेदयोर्मूलपुरुषौ क्रमात् कुमारिलः प्रभाकरश्चेति विशदम्। क्रिस्तीयसप्तमशतकप्रारम्भात्प्राक् कुमारिल-प्रभाकरसम्बद्धव्यवहारस्य क्वचिदप्यदर्शनात् बहोः कालात्पूर्वमेव कर्ममीमांसादर्श-नस्य तदाधारभूतजैमिनिसूत्रादीनां शाबरभाष्यपर्यन्तानां स्पष्टसद्भावदर्शनाच्च प्रस्थानभेदस्य परमः पूर्वावधिः सप्तमशतकारम्भो भवति।

भेदकारणं प्रस्थानक्रमश्च

दृश्यन्ते किल दर्शनसूत्रकाराणामेवान्योन्यतन्त्रार्थेषु संप्रतिपत्तिविप्रतिपत्तयः तदुपष्टम्भकयुक्तिप्रतियुक्तयश्च प्रचुरतराः। ताः पुनः क्रमेण तादृशीभिरन्याभि-रन्यैर्भाष्यकारादिभिरुपबृंह्यमाणाः संभूय समस्तमेव दर्शनकुलमंशतो व्याकुलशि-थिलमंशतश्च विविक्तदृढमकुर्वन्। कर्ममीमांसादर्शनमप्येनामवस्थामपरिहार्यामनु-प्राप्य स्वांशवैयाकुलीं दर्शनान्तराणीव सुदूरमपाकर्तुं निर्बद्धमिव बभूव। व्यति-करेऽस्मिन् कर्ममीमांसादर्शनस्य न्यूनतामपोह्य निराक्षेपावकाशं तत् समास्थापयितुं प्रथमं कुमारिलः प्रववृते इत्येवमूह्यते। स्वोद्दिष्टं निर्वहन् कुमारिलः इतरदार्शनिका-नामाक्षेपयुक्तीः प्रबलतराः काश्चन प्रौढिवादैर्निरस्यन् स्वदर्शनाभ्युपेतान् कांश्चन क्षुद्रान् विषयानपवाहयन् कांश्चन तादृशानन्यथयन् उक्तानुक्तदुरुक्तचिन्तनात्मकं वार्तिकं निरवर्तयत्।

मीमांसादर्शनपरिष्करणे कुमारिलादृतः पन्थाः न प्रेक्षावतां हृदयङ्गम इति प्रभाकरः इतरदार्शनिकानां प्रबला युक्तीर्यावच्छक्ति हठादपवदन् स्वदर्शनसिद्धान्तार्थान् क्षुद्रानपि अनपजहत् अन्यथाप्यकुर्वंश्च प्रकृतं कर्ममीमांसादर्शनं परिष्कुर्वन् विवरणं निबन्धनं अथवा लघ्वी बृहती इति ग्रन्थद्वयं विनिर्ममे[1]।

चिरादनुपलभ्यमानं मध्यवार्तिकं (मध्यमटीका) अद्यत्वेऽनुपलभ्यमानं बृहद्वार्त्तिकं (बृहट्टीका) च विना कारिका (श्लोकवार्तिकम्) तन्त्रवार्तिकं (तन्त्रटीका) टुप्वार्तिकं (टुप्टीका) इति तिस्रः कृतयः कुमारिलस्य सन्ति। अनुपलभ्यमानयोः प्रथमयोर्द्वयोः प्रादुर्भावानन्तरमेव षट्सहस्रग्रन्थात्मकं विवरणं प्रभाकरः प्रणिनाय तदनु कारिकादिकं (श्लोकवार्तिकादिकम्) कुमारिलो निबबन्ध, ततश्च प्रभाकरो द्वादशसहस्रग्रन्थात्मकं निबन्धं (बृहती) प्रबबन्धेति अभ्यूहनमनौचित्यानाक्रान्तमिति मन्यामहे। प्रभाकरः प्रथमं विवरणं व्यरचयत् इत्यत्र नयविवेकदीपिका[2]वचनमनुकूलं दृश्यते।

प्रस्थानयोः क्रमविपर्यासम्भवः

कौमारिलप्रस्थानात् पूर्वमेव प्राभाकरप्रस्थानं लब्धप्रचारमिति मन्वानाः केचन किमपि मूलमनास्थाय नैवं वदेयुः। तत्र ते—अविभक्तावस्थे मीमांसादर्शने समुपलभ्यमानान् कांश्चनसिद्धान्तान् प्राभाकरे तथाभूतान् कौमारिले तु अन्यथाभूतान् प्रस्थानविभागात्प्राक्तनैरनूद्यमानान् उपादाय अविभक्तावस्थां मीमांसादर्शनस्यानाकलयन्तः तेषां सिद्धान्तानां प्राभाकरप्रस्थानैकनियततां चाभिमन्वानाः मन्ये तथा वदन्तीति। तथा च भ्रममूल एवैष वाद इति स्फुटम्। इदमत्रैकं निदर्शनम्—

शब्दो[3] दिगाश्रयो द्रव्यात्मको नित्यश्च कौमारिले, आकाशसमवेतो[4] गुणात्मको नित्यश्च प्राभाकरे दर्शने। प्रस्थानभेदप्रादुर्भावसन्निहितपूर्वकालेऽपि समाक्रष्टुमशक्यः

१. सर्वदर्शनकौमुदी P. 121, Oriental Mss. Library I. 38. 42.

२. नयविवेकदीपिका. Adyar Library. Vol. II. P. 3. "टीकाकारो हि प्रथमं विवरणटीकां कृत्वा पश्चान्निबन्धनटीकां कृतवानिति किंवदन्ती।"

३. श्लोकवार्तिकशब्दनित्यताधिकरणे. श्लो. 150—156.

४. प्रकरणपञ्चिका, P. 46. गगनमेव श्रोत्रं तद्गुणश्च शब्द इति.

पंक्षिलस्वामी प्रभाकराभिमतमाकाशसमवेतगुणात्मकत्वं शब्दस्यानुवदति। 'कुमारिलस्य दशपक्षीतः षट्पक्षीतश्च पक्षान्तरं प्रभाकरः लोक इत्यादिशाबरभाष्यस्य प्रतिपादयति' इत्यादि प्रामाणिकवचनैः, 'कुमारिलशिष्यः प्रभाकरः' इत्याद्यैतिह्यैश्च कुमारिलानन्तरसिद्धस्य प्रभाकरस्य प्रदर्शितन्यायभाष्यमवष्टभ्य पक्षिलादपि प्राचीनताकल्पनाया वरं तादृशार्थप्रतिपादकस्य मीमांसादर्शनस्याविभक्तावस्थाङ्गीकारः। सूचयन्ति च तस्य तामवस्थामुभयेऽपि मीमांसकाः "अध्ययनमीमांसा श्रवणयोर्मध्येऽधिकारसिद्धिरिति मीमांसकप्रवादः" इत्येवं वदन्तः। अत्र पक्षिलभाष्ये प्रभाकरस्य प्राचीनतामभिसन्दधत् खद्योतकारः—"आकाशगुण इति जरन्मीमांसकमतमाह" इत्यभिधत्ते प्रभाकरमभिसन्धाय। इयं स्वाभिसंहिताभूतार्थाननुसारिणी स्वानभिसंहितभूतार्थानुसृता च तद्वदननिःसृता भारती अविदितस्वमहिम्नस्तस्य किमप्यसाधारणं माहात्म्यमभिव्यनक्ति। युक्तं चैतत्

"लौकिकानां हि साधूनामर्थं वागनुवर्तते।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति॥" इत्यलम्।

अपरोऽयम्—कुमारिलः प्रत्यक्षगोचरं कालं मन्यते। मानरत्नावलीकारः कुमारिलमतमनुवर्तमानः प्रभाकरं कालाप्रत्यक्षवादिनं मन्यते। गौडब्रह्मानन्दस्तु प्रभाकरं कालप्रत्यक्षवादिनं प्रदर्शयति। अत्र पुराणमीमांसादर्शनस्य प्राभाकरदर्शनस्य च सति सिद्धान्तवैलक्षण्ये विरोधः सुपरिहर इति।

१. "आकाशगुणः शब्दो विभुर्नित्योऽभिव्यक्तिधर्मक इत्येके." न्यायभाष्ये शब्दानित्यताप्रकरणे। Page 361.

२. नयविवेकः. P. 7.

३. प्रकरणपञ्चिका. P. 11.

४. न्यायभाष्यम् P. 361.

५. उत्तररामचरितम्. 1.

६. प्रत्यक्षसूत्रश्लोकवार्तिकम्. श्लोकः. 233.

७. भाष्यपरिशिष्टसंस्कृतप्रास्ताविकम्. P. 32 f. 16.

८. "न सोऽस्ति प्रत्ययो लोके" इत्यादि लघुचन्द्रिका. (गौडब्रह्मानन्दीयम्) आगमबाधोद्धारे भवनाथप्रस्तावे.

शालिकनाथः तत्कृतयश्च

बृहतीव्याख्याया ऋजुविमलापञ्चिकायाः, विवरणव्याख्याया दीपशिखायाः, भाष्यपरिशिष्टस्य, प्रकरणपञ्चिकायाश्च कर्ता गौड[1]देशीयः शालिकनाथमिश्रः प्राभाकरे दर्शनेऽतिनिगूढानि तत्त्वानि विशदीकृत्य तस्य दुरवगाहतां दूरीचकार। यद्यपि [2]पञ्चिकायां 'केचित्' इत्यादि पदैः केषांचन भिन्नाभिप्रायाणां प्रदर्शनेन, [3]नयविवेके क्वचित्क्वचित् भिन्नाभिप्रायाणां नामग्राहं श्रीकरप्रकाशप्रमुखानां निरासेन च शालिकनाथादनर्वाञ्चः केचित् प्राभाकाराः शक्यन्तेऽनुमातुम्, तथापि नातिव्यवधानं सहते प्रभाकरशिष्यतामस्य सूचयत् ऐतिह्यादिकम्। अपि च नयविवेकगृहीतेषु बहुषु कश्चित् वि[4]दग्धो नाम "[5]प्राथम्यादभिधातृत्वात्तात्पर्योपगमादपि" इति पद्यमादाय दूषयति शालिकम्। अतः शालिकादर्वाचीनस्य तस्य, अनिश्चितकालानां श्रीकरादीनां चाभिप्रायेषु लोकाननुमतेस्तेषामनभ्यर्हणीयत्वात् शालिकाभिप्रायस्य लोकानुमतेरभ्यर्हणीयत्वात् तस्यैव मार्गः स्वेनानुगम्यत इति—

"[6]महता प्रणिधानेन शक्यमेव विधान्तरम्।
लोकानुमतमित्येव शालिकोक्तं प्रसाध्यते॥"

इति भवनाथस्तं प्राभाकरे दर्शने सर्वनिर्वाहकं प्रतिजानीते। एवं प्रभाकरदर्शने मुख्यं स्थानमधितिष्ठतोऽस्य शालिकनाथमिश्रस्य ऋजुविमलापञ्चिका द्वादशानामध्यायानां प्रायः प्राप्तैव, यस्या मूलं बृहती पर्यन्ततृतीयांशेन नाद्याप्युपलभ्यते। अलब्धाया यस्या मूलभूतं विवरणं अंशतोऽपि नासादितमिति खिद्यते, तादृशां नः परितोषकारणमिवेदं यत् सा व्याख्या दीपशिखा कथमपि समासादिता समग्रस्योत्तरषट्कस्येति। प्रकरणपञ्चिका मुद्रिता। माधवसरस्वत्या सर्वदर्शनकौमुद्यां निर्दिश्यमानात् शालिकाख्यप्रकरणात् [7]अखण्डानन्देन प्रदर्श्यमाना कारिकैषोपलभ्यते—

"तदिदमुक्तं शालिकायाम्—कृतितत्साध्यमध्यस्थो यागादिर्विषयो मतः। कार्ये सङ्घटिताकारे करणत्वेन संमतः॥" इति।

१. भाष्यपरिशिशिष्टसंस्कृतप्रास्ताविकम्. P. 32 f. 15.

२. प्रकरणपञ्चिका. वाक्यार्थमातृका. २. प. P. 193.

३. नयविवेकः. P. 274.

४. नयविवेकः. P. 274.

५. प्रकरणपञ्चिका वाक्यार्थमातृकावृत्तिः. P. 14.

६. नयविवेकः. P. 2.

७. तत्त्वदीपनम् Benares Sanskrit Series. Page 32. (Printed 1902)

पञ्चिकावाक्येन दीपशिखा प्रकरणपञ्चिकाया अपि कनीयसीति ज्ञायते। एवम् "तस्यां (आमिक्षायाम्) मेव तद्रसप्रत्यभिज्ञानात्। एतच्च विवरणपञ्चिकायां वक्ष्यामः" इति निबन्धनपञ्चिकावचनमपि ततो दीपशिखा कनीयसीत्यत्र प्रमाणम्। एवं च (१) प्रथमा निबन्धनपञ्चिका (२) द्वितीया प्रकरणपञ्चिका (३) तृतीया विवरणपञ्चिकेति क्रमः प्रतिभाति। सोऽयं वाक्यान्तरगम्यक्रमेण व्याहतश्च दृश्यते। प्रकरणपञ्चिकायाम् "एतच्च पञ्चिकाद्वये प्रपञ्चितम्; अत्रापि चानुमानपरिच्छेदे वक्ष्यामः" इतीदं हि वाक्यं तृतीयां प्रकरणपञ्चिकां प्रदर्शयति। न केवलमयं स्वानेकनिबन्धनेष्वेव पौर्वापर्ये व्याहतवचनः, किन्तु एकस्मिन्ननेकेषां प्रकरणानां पूर्वोत्तरभावेऽपि तादृशः परिदृश्यते। अन्येऽपि केचन निबन्धार एवंविधा न दुर्लभाः। युक्तं चैतत् युगपदनेकान्निबन्धान् एकत्र निबन्धे विभागभेदान्वा युगदुपक्रम्य तांस्तान्विषयांस्तत्रतत्र प्रतिपादयन्तस्तत्तद्दशानुगुणं भूततया भावितया च व्यपदिशन्तीति न ते स्वदृष्ट्या क्वापि व्याहन्यते; यदि परमस्मदभ्यूहेनैव तथा प्रतिभासन्त इति।

नयविवेकः।

प्रभाकरदर्शने शालिकनाथात्परं सम्भाव्यमाना अपि केचन ग्रन्था न समुपलभ्यन्ते, उपलभ्यते तु भवनाथमिश्रप्रणीतो नयविवेकः। अधिकरणप्रस्थानात्मायं द्वादशानामप्यध्यायानां प्रायः सुप्रापोऽधुना। प्रभाकरविवरणनिबन्धयोरुभयोरवान्तरविशेषानप्युन्मीलयन् एष प्रभाकराकूतमतिसूक्ष्ममपि विशदं प्रदर्शयति। परं तु—

१. 4. 1. 9. सूत्रम्. 22. (एकनिष्पत्तेः) ऋजुविलापञ्चिका.

२. प्रकरणपञ्चिका. P. 46.

३. a. प्रकरणपञ्चिका. P. 14. ज्ञानस्य व्यभिचारित्वं नयवीथ्यां निवारितम्।
   b. „ „ 23. नयवीथ्यां निर्णीतम्।
   c. „ „ 26. एतदर्थमेव नयवीथ्याम्।
   d. „ „ 40. क्षणिकता च मीमांसाजीवरक्षायां प्रतिक्षिप्तेति।
   e. „ „ 46. गगनमेव श्रोत्रम्; तद्गुणश्च शब्द इति।
   f. „ „ 73. उक्तं तत्त्वालोके।

"विहाय विस्तरं शब्दसौन्दर्यपरनिन्दने ।
व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ॥"[1]

इति प्रतिज्ञामनुरुन्धान एष गाढः प्रौढश्च प्रसन्नगम्भीरेभ्यो व्यावर्तत इति स्वभाव एवैष तादृशस्य । अत एव व्याख्यानसापेक्षताप्यस्य । उक्तं च व्याख्यात्रा रविदेवेन—

"ग्रन्थेऽल्पे विततेऽर्थे व्याख्या नोचेच्छ्रुतैषिणः केचित् ।
गुरुकुल एव जरेयुः श्रुतमर्थं विस्मरेयुर्वा ॥" इति ।[2]

तर्कपादे गुरुग्रन्थोऽविस्तरोऽव्यक्तार्थ इति हेतोस्तदर्थव्यक्तिफलो नयविवेकस्तत्रेति त्रिपादीप्रतिज्ञायामत्रैव दृश्यते—

"त्रिपाद्यामनवद्यं यन्मतं व्यक्तं गुरोः स्वतः ।
विस्तरं सुग्रहं कर्तुं भवः संक्षिप्य वक्ष्यति ॥" इति ।[3]

भवनाथः ।

नयविवेककर्ता नाम्ना भवदेव इति भवनाथ इति च व्यवहृतो दृश्यते। तथा हि-

"व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ।"[4]

इति वचनेन भवदेवनाम्ना स्वयमस्मात्मानं निर्दिशतीति ज्ञायते । अत्र समुपलब्धयोर्द्वयोर्नयविवेकमातृकयोः[5] संवादेन क्वचिन्नयविवेकदीपिकायां[6] तथैव दर्शनाच्च सम्भावनार्होऽप्यस्य भवदेव इति नामनि तौतातितमततिलकस्य[7] (कौमारिलमततिलकस्य) प्रणेतुर्भवदेवादयं भिन्न इति निश्चीयते । स खलु भवदेवः गोवर्द्धनात्मसम्भवो बालवलभीभुजङ्गबिरुदधारी हरिवर्मदेवस्य सचिवो होराशास्त्रे भट्टकुमारिलप्रस्थाने च ग्रन्थकृदिति ताम्रशासनादवगम्यते । विषयोऽयं तत्त्वबिन्दोरुपोद्घाते

१. नयविवेकः. P. 1.

२. विवेकतत्त्वम्. P. 1.

३. नयविवेकः. अ. १. पा. २. in the beginning.

४. नयविवेक. P. 1.

५. Adyar Library Vol. I. P. 2. 247.

६. Oriental Mss. Library R. No. 3735.

७. Annamalai University Sanskrit Series No. 3.

द्रष्टव्यः। तौताततमततिलकः शास्त्रदीपिकादिवदधिकरणप्रस्थानात्मकः, न तन्त्रवार्तिकव्याख्यानरूपः।

कौमारिलाद्भवदेवाद्भिन्नोऽयं नयविवेकप्रणेता प्राभाकरः स्वयं भवनाथसंज्ञयात्मानं व्यवहरति बहवश्चान्ये वरदराजादयो बहुत्र तं तथा व्यवहरन्तीति तथैव सोऽत्र व्यवहारमर्हति।

नयविवेके वाचस्पतिमिश्रमुदाहरन् भवनाथस्ततः क्रिस्तीयनवमशतकपूर्वार्द्धमनतिवर्तमानात् अर्वाचीनः, तमुदाहरतां प्रथमेन शाब्दनिर्णयव्याख्याया न्यायदीपि-

१. नयविवेकः. Oriental Mss. Library. अध्याय. 1. पाद. 2.

त्रिपाद्यामनवद्यंयन्मतं व्यक्तं गुरोः स्वतः।
विस्तरं सुग्रहं कर्तुं भवः संक्षिप्य वक्ष्यति॥

२. a. नयविवेकदीपिका. Adyar Library Vol. I. 2, 1. 104, 8. 327, 1. 527, 6. 540, 1. Vol. II. 287, 12.

b. न्यायकोशः. Oriental Mss. Library 23. 7. 44.

क—भवनाथगुरुं वन्देन्यायोपादानविग्रहम्. P. 1, 14.

ख—अत एव केवलनियमान्वयाददृष्टार्थत्वमुक्तं भवनाथेन. 17, 25.

ग—इदमेवोक्तं भवनाथेन—दृष्टस्यानियमे नियमे चाभेदाददृष्टादेव भेदः. 18. 5.

नयविवेके. 15, 2.

घ—217—21. 227—6. 239—16. 278—1. 279—24.

c. शाब्दनिर्णयदीपिका. Oriental Mss. Library I. 39. 37.

क—"यद्यपि पक्षधर्मताबलान्मेयसिद्धिः तथापि प्रमित्साप्रकारभेदादपि तत्सिद्धिरित्युभयथा व्यवहारः" इत्याह स भवनाथः. 18. 12.
नयविवेकः. 52. 5.

ख—अत भवनाथेन "न च स्वाधिगततत्प्रिय" इत्यादि 82. 8.
नयविवेकः. 44. 11.

d. प्रभाकरविजयः. Published by the Sahityaparishat, Calcutta.

नाथद्वयात्तसारेऽस्मिन् शास्त्रे मम परिश्रमः।
शुक्तिश्रमायते सिन्धौ हरिणोद्धृतकौस्तुभे॥ P. 1.

३. नयविवेकः. 275.

कायाः प्रणेत्रा आनन्दबोधाचार्येणानूद्यमानस्ततः प्राचीन इति च निश्चीयते। "अन्त्यमानन्दबोधजम्" इत्यविद्यानिवृत्तेः पञ्चमप्रकारस्य प्रदर्शकं समामनन्ति यम्, सोऽयमानन्दबोधाचार्यः क्वचिदात्मैवासान्तेवासिनमात्मानं विशेषतः अन्यत्र च सामान्यतः "एतदेवोक्तं गुरुभिः" इति इष्टसिद्धिदृष्टं वचनमुपाददत् व्याहत इव यद्यपि, तथापि मन्ये नामविशेषनिर्देशादव्याहत इति। गोडेमहाशयादीनां संभावयाम्ययमेवाभिप्राय इति। कथमप्येकादशीं क्रिस्तुशताब्दीमयमानन्दबोधो नाति याति इति विमर्शकनिर्णयः। एवं च वाचस्पत्यानन्दबोधाभ्यां सन्दृष्टो नवमोत्तरार्द्धादिरेकादशपूर्वार्द्धान्तः समयो वत्सरद्वयात्मकः सामान्यतो भवनाथस्य भवितुमर्हति॥

नयविवेकव्याख्याश्चतस्रः संदृश्यन्ते:—

१. रविदेवस्य विवेकतत्त्वम्
२. वरदराजस्य नयविवेकदीपिका
३. शङ्करमिश्रस्य पञ्जिका
४. दामोदरस्य नयविवेकालङ्कार इति।

तत्र वरदराजोऽर्थवादपादमारभ्य व्याचक्षाणस्तर्कपादं न व्याचचक्ष इति व्याख्यागमनिकया लक्ष्यते। पञ्जिकालङ्कारयोः प्रथमः पञ्चमाध्यायस्यैव दृश्यते, द्वितीयस्तु तृतीयतुरीयपञ्चमानाम्। विवेकतत्त्वं पुनः समग्रस्यापि संभाव्यते हस्तगतं तु प्रथमाध्यायस्यैव। इयमेकैव तर्कपादस्य दृष्टेति अन्याभ्यो विशिष्टेति चास्माभिः प्रसाधने पर्यगृह्यत प्रथमम्॥

व्याख्याता रविदेवः

स्फोटसिद्धितत्त्वबिन्दुविभ्रमविवेकादीनां व्याख्याता ऋषिपुत्रपरमेश्वरः तत्त्वबिन्दुव्याख्यायां विवेकतत्त्वं कण्ठतः परामृशतीति ततः प्राचीनो रविदेव इत्येतावदेव वक्तुमधुना शक्यम्। see P. 87. प्रस्तावना. Annamalai University Sanskrit Series No. 3.

अधुनावतार्यमाणस्य नयविवेकस्यास्य प्रसाधने मूलं द्वे मातृके, ययोरेका मद्रमण्डलप्राच्यपुस्तकभाण्डागारीया कसंज्ञिता; द्वितीया अनन्तशयनमहाराजभाण्डागा-

१. शाब्दनिर्णयदीपिका. Oriental Mss. Library. I. 39. 37. 18, 12. 82, 8.

२. गौडब्रह्मानन्दीयपञ्चममिथ्यात्ववादान्ते।

३. शाब्दनिर्णयदीपिकान्ते। Ori. Mss. L. 1. 39. 37.

४. प्रमाणमाला. P. 4. 19.

रीया स्वसंज्ञिता। व्याख्यानस्य विवेकतत्त्वस्य मूलं मातृकाद्वयमपि मद्रमण्डलभाण्डागारीयम्। तत्तदधिकृतास्तत्तन्मातृकाः कमपि समयं मयि निक्षिप्तवन्तः सादरबहुमानं स्मर्यन्ते। आवश्यकव्यतिकरसङ्घटनादिषु अनुदासीनौ श्रीलकुञ्जनूराजाचिन्तामणिमहोदयौ स्वयमेव भागिनावत्र प्रसाधन इति अनुक्तसिद्धोऽयमर्थः। आ प्रारम्भात् विषयविवेचनपङ्क्तिशोधनादिषु सहायभूतो विद्यावाचस्पत्यादिबिरुदाङ्कितः श्रीमान् महामहोपाध्यायकुप्पुस्वामिशास्त्री सावशेषेऽस्य प्रसाधने चिदम्बरविश्वविद्यालयाकृष्टो विप्रकृष्टोऽभूत् इत्येतावदेव वक्तव्यमस्माभिः। ततः परमत्र साहाय्यं प्रतिपन्नो यवीयान् मे सुहृत् मद्रपुरसंस्कृतविद्यालयप्रधानः ब्रह्मश्री रामचन्द्रदीक्षितः स्वयं समयं च शक्तिं च विनियुज्य सविशेषमेव निरवहत् प्रतिपन्नमिति तस्मिन् भूयिष्ठं कृतज्ञा भवामः। इदमपीह नूनमभिनन्दनस्थानम् यत् मद्रपुर वेङ्कटेश्वरमुद्रणालयः यावदुचितं आवेक्षणक (Proof) प्रेषणेन यथावदुपस्कारनिर्वर्तनेन रमणीयसंनिवेशसंपादनेन च अनल्पं साहाय्यमाधत्त प्रसाधन इति॥

श्रीमान् मे सुहृत् मानवल्लिरामकृष्णकविः वङ्गप्रान्ते क्वचन दृष्टायां संपूर्णायां बृहतीमातृकायाम् "इति श्री दक्षिणकोसलेश्वरमहामात्यविभाकरमिश्रात्मजस्य प्रभाकरमिश्रस्य कृतौ बृहत्यां द्वादशोऽध्यायः समाप्तः" इत्युपसंहारवाक्यं दृष्टमिति वदति। एतन्निवेदयन्तः प्रतीक्षामहे फलं तत्प्राप्तिमिति शिवम्॥

S. K. Ramanatha Sastri.

॥ श्रीः ॥

नयविवेकः

(भवनाथप्रणीतः)

प्रथमाध्याये प्रथमः पादः

गणाधिपं ग्रहान् वन्दे हरिं हरमुमां गुरून् ।
वाग्देवीं स्वर्धुनीं विप्रान् कर्तुं गुरुनये कृतिम् ॥ १ ॥
विहाय विस्तरं शब्दसौन्दर्यपरनिन्दने ।
व्यज्यते भवदेवेन तत्त्वं नयविवेकतः ॥ २ ॥

विवेकतत्त्वम्

नयविवेकव्याख्या

(रविदेवकृता)

संसिद्धगुरुभावस्य भवस्य पदगोचरे ।
निवेशयन्वाङ्मनसे सुकृती स्यामहं चिरम् ॥ १ ॥
ग्रन्थेऽल्पे विततेऽर्थे व्याख्या नोचेच्छ्रुतैषिणः केचित् ।
गुरुकुल एव जरेयुः श्रुतमर्थं विस्मरेयुर्वा ॥ २ ॥

ननु गणाधिपं ग्रहान्वन्द इत्येतद्वाचिकवन्दनं किं स्वार्थं क्रियते उत परज्ञापनार्थं किमुभयथापीति चेत्; स्वार्थवन्दनत्वेऽन्यं प्रति ज्ञापकत्वाभावात् किमर्थमिति तस्यापेक्षाभावात् अपेक्षिततत्समर्पकतया 'कर्तुं गुरुनये कृतिम्' इत्यस्यानन्वयापत्तिः । ज्ञापकत्वपक्षे तज्ज्ञापनानर्थक्यम् । शिष्याणामपि तत्क्रियानियमार्थमर्थवदिति चेत्, तर्हि लाघवात् स्वकीयस्य वाचिकवन्दनस्य ग्रन्थनिवेशमात्रं करणीयम्, तदनुकीर्तनेनैव तेषामपि मङ्गलसिद्धेः तदनुकीर्तनान्महामङ्गलाभ्युपगमात् फलाधिक्याच्च । स्वोक्तिविरुद्धं च स्वानुष्ठानमन्यथा स्यात् । उच्यते—किमर्थमित्यपेक्षापूरकतया कर्तुमित्यस्यान्वयो नाङ्गीक्रियते । तदपि

महता प्रणिधानेन शक्यमेव विधान्तरम् ।
लोकानुमतमित्येव शालिकोक्तं प्रसाध्यते ॥ ३ ॥

ग्रन्थकरणप्रतिज्ञापरं वाक्यान्तरमेव तात्पर्यतः । वस्तुनो हि वन्दनस्य तत्प्रयोजनत्वादनुवादमात्रतया तुमुनन्वयः सौर्यादौ निर्वपत्याद्यन्वयवत् इति वाचिकवन्दनत्वान्न स्वोक्तिविरोधोऽपि । नन्वेवं ग्रन्थविस्तरणहीननयतत्त्वविवेकमात्रविषयग्रन्थकरणप्रतिज्ञा 'कर्तुं गुरुनये कृतिम्' इत्यनेनैव कृतेति कं विशेषं वक्तुमुत्तरश्लोकारम्भः? उच्यते—विस्तरशब्दसौन्दर्यपरनिन्दनहानरूपं वक्तुमिति ब्रूमः । तदयुक्तम्, विस्तरस्यापेक्षिकतया हेयविशेषाप्रतिपत्तेः सौन्दर्यस्य च काव्यादिवर्तिनोऽत्राप्रसक्तेः तन्निवृत्तिपरिभाषानर्थक्यात् प्रसक्तानाञ्चानुगुणतया अहेयत्वात् व्यङ्ग्यार्थतायाश्च व्यज्यत इति स्वीकृतत्वाद्विवक्षितार्थाभिव्यक्त्याङ्गस्यरूपस्य चाहेयत्वात् परनिन्दनस्य च विप्रतिपन्नार्थनिर्धारणार्थमवर्जनीयत्वात् । न; विवक्षितार्थाभिव्यक्त्याङ्गस्यरूपग्रन्थसौन्दर्यार्थं यो ग्रन्थविस्तरः प्राप्तः तद्धानोक्तेर्न विशेषाप्रतिपत्तिदोषः । स्वपक्षस्थापनोपयोग्यधिकपरदोषाविष्करणप्रयुक्तविस्तरहानञ्च विवक्षितम् । एकवाक्येन हि प्रतिविशेषणमवान्तरवाक्यभेदापेक्षया बह्वर्थप्रतिपादने ग्रन्थसौन्दर्याभावो व्यक्तः । प्रत्यर्थं वाक्यभेदेन तत्प्रतिपादने तत्सौन्दर्यं च व्यक्तम् । विस्तरस्तु तदा आवश्यकः । स च महान्दोषः । तद्धारणसमर्थपुरुषहीने काले ग्रन्थस्थितिभङ्गापत्तेः । तेन तत्परिहारार्थं तत्सौन्दर्यपरनिन्दनत्यागेनापि न्यायविवेकमात्रमत्र क्रियत इत्युच्यते । नच तत्सौन्दर्याभावेऽर्थाप्रतिपत्तेर्ग्रन्थारम्भवैयर्थ्यापत्तिः, तदर्थानुपपत्त्यभिज्ञश्रोतृजिज्ञासासहायापेक्षयापि विस्तरापेक्षस्यैवास्यैव ग्रन्थस्य सर्वानुपपत्तिहीनार्थनिर्णयोपायत्वसम्भवात् । एवञ्च तदर्हश्रोतॄन् प्रति तदर्हजिज्ञासा कर्तव्या इत्येतदर्थमेतत्परिभाष्यते ; पराधीनतदपेक्षया त्वितरान् प्रति तत्समर्थासमर्थसाधारणत्वात् ग्रन्थस्य, सर्वस्याप्यधीतवेदस्य न्यायज्ञानापेक्षार्थज्ञानाधीनानुष्ठानस्याध्ययनविधिसिद्धत्वात् । एवञ्च सति ग्रन्थविस्तरे यादृगवधारणं तादृगवधारणं तत्तदधिकरणव्युत्पाद्यन्यायानां निबन्धनविवरणभेदेन पूर्वपक्षसिद्धान्तभेदेन च यावन्न स्यात् तावद्वाक्यवृत्त्यनार्जवेनापि ग्रन्थजिज्ञासापरैरेव तदर्थिभिः शिष्यैर्भवितव्यम् । तेनैव तदवधारणं स्यात् इत्येतदर्थैवैषा परिभाषा द्रष्टव्या ।

ननु गुरुग्रन्थे ग्रन्थगतिरपि दुर्ज्ञानेति तद्विवरणमुखमेव तदर्थतत्त्वं वचनार्हमिति कथं तत्त्वमात्रविषयग्रन्थकरणप्रतिज्ञा इत्याशङ्क्य गुरुग्रन्थस्य बहुमुखतया गत्यन्तरार्हत्वेऽपि शालिकोक्तगत्यभिमुखत्वाच्छिष्याणां तदपेक्षितार्थानुपपत्तिपरिहारार्थोऽयं यत्न इति युक्तं तत्त्वमात्रविषयत्वमित्याह—महता प्रणिधानेनेति ।

ग्रन्थेऽस्मिन् विस्मयो भावी नवा किं तस्य दुष्करम् ।
यो ददाति हि सर्वस्वं सहस्रोत्पत्तिशासनम् ॥ ४ ॥

अथातो धर्मजिज्ञासा ॥ १ ॥

देवगुरुपूजास्तुतिनमस्कारादिरूपं मङ्गलमुच्यते ।
"मङ्गलाचारयुक्तानां विनिपातो न विद्यते" ॥

इत्यादिस्मृतेश्चाभिमताविनिपातोऽस्य फलम् ।. ग्रन्थारम्भे च पक्षप्राप्त-

सौन्दर्यादिविरहे ग्रन्थापरिग्रहाशङ्कां निरस्यति—ग्रन्थेऽस्मिन्निति । विस्मयः शुश्रूषा, सा भवत्येवेत्यभिप्रायः । नवेत्यसंशये संशयोक्तिः "शास्त्राणि चेत्प्रमाणम्" इतिवत्, यो ददातीति कृत्स्नशास्त्रवर्त्यपेक्षिताशेषार्थव्यञ्जकत्वरूपविस्मयहेतुवचनात् । तेन ह्येकैकाधिकरणप्रतिपाद्यान्योन्यव्यावृत्तसहस्रन्यायप्रतिपादकाधिकरणसहस्रव्यापिशासनपदोक्तशास्त्रात्मकाभीष्टभोगयोग्यधनदातृत्वं स्वग्रन्थस्योच्यते। तथाविधगृहादिदाने यथा तद्योग्यानेकावयवान् सम्पाद्य सर्वावयवसम्पूर्णमेव तदर्थिभ्यो ददाति तथायमपीति सर्वस्वमपीत्युक्तम् । स्वीयाशेषावयवयुक्तमिति सर्वेषां तदर्थिनां स्वं यथेष्टव्यवहारयोग्यं इदं शास्त्राख्यं धनम्, नेतरवदेकोपभोगमात्रोपक्षीणमिति च सर्वस्वमित्यनेन सूच्यते । तेन सर्वकालं सर्वैरपि अर्थोपन्यासव्याख्यानादिभिरुपभोगयोग्यमिति सर्वशुश्रूषोत्पत्तिसिद्धिः ।

पञ्चिकोपक्रमस्थदेवगुरुस्तुतिनमस्कारसमर्थनार्थं शिष्टाचारसमर्थनात् स्मृतिमूलतया समर्थनस्य सौकर्यं मन्वानः तस्य मङ्गलेऽन्तर्भावं तावदाह—देवगुरुपूजेति । मङ्गलस्य च विघ्ननिरासफलत्वं स्मृतिसिद्धमित्याह—मङ्गलाचारेति । नन्वेवं ग्रन्थादौ मङ्गलाचारो नापेक्षितः, विनिपातप्रसङ्गाभावात्; पुरुषान्तराभिलषणीयधनादिलाभार्थप्रवृत्तौ हि तदापाद्यविनिपातप्रसङ्गः इत्याशङ्क्य पाक्षिकविनिपातशङ्कयापि तदाचारो युक्तः, फलनियमस्यानपेक्षितत्वादिति परिहरति-ग्रन्थारम्भे चेति । नन्वदृष्टद्वारफलकमङ्गलाचारप्रवृत्तेर्वैधत्वान्निवृत्तिफलकविधेश्च प्रायश्चित्तविधाविव प्रसक्तविघ्नविशेषनिवृत्त्यर्थ्यधिकारित्वादतादृशग्रन्थकर्तुरनधिकारात् न

विघ्नहेतुपापक्षयापेक्षया यन्मङ्गलं युक्तम्, तन्निवेशनं च ग्रन्थे युक्तम्, महापुरुषकृतस्तुत्याद्यनुकीर्तनाच्छिष्याणां महामङ्गलार्थम् । तदिह सूत्रभाष्यटीकासु न निवेशितम् । तद् दृष्ट्वा न कृतमित्यपि भाति । मैवम्, नित्यं मङ्गलाचारयुक्तत्वात् सूत्रकारादीनाम् । सूत्रे चाथादिपदं तत्कालमङ्गलमपि सूत्रकृतः; तन्निवेशिनानुकीर्तनाच्छिष्याणां भाष्यकारादीनामपि मङ्गलं सिद्धम् ।

विषयप्रयोजनपरमिदं सूत्रमिति परमतम् । तन्मन्दम्; वेदाध्ययनस्याविवक्षितार्थतया हि नाध्ययनविध्याक्षिप्तं शास्त्रमित्यारम्भहेत्वभावादनारभ्य-

मङ्गलार्था प्रवृत्तिर्युक्तेति शङ्काहानार्थं—पापक्षयापेक्षयेत्युक्तम् । प्रसक्तविघ्नविशेषस्यापि हि स्वरूपनाशो नेच्छाविषयतयाधिकारहेतुः, सहकार्यलाभादविघातकत्वमात्रेणापि इष्टफलप्राप्त्यविरोधात्, तदाक्षेपकपापाविनाशेऽन्याक्षेपेणापि विघातापत्तेरिति तत्पापक्षय एवेष्टतयाधिकारहेतुः; पापस्य च विशेषतः प्रसक्त्यवगमायोगात् शङ्कितविघ्नहेतुपापक्षयार्थ्येवाधिकारीति ग्रन्थारम्भेऽपि तत्क्रिया युक्तेत्यर्थः । नन्वेवमपि तदाचारः किमर्थं ग्रन्थे निवेशित इत्यत्राह — तन्निवेशनञ्चेति । ननु महापुरुषकृतस्तुत्याद्यनुकीर्तनान्महामङ्गलं स्यादिति किंप्रमाणकमेतत्? उच्यते— "महापुरुषकीर्तितमनुकीर्तयेच्छ्रेयस्कामः" इति विधिरेवात्र प्रमाणम्, मानान्तरानर्हत्वादाप्ताचरितत्वाच्च । द्वैपायनवचनञ्चात्र लिङ्गम् । स हि "व्यासेन कीर्तितम् । पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च" ॥ इत्यवोचत् । एतच्च विशेषनिष्ठं सामान्यविध्यपेक्षम्, विशेषनिष्ठस्येदंप्रथमतया विधित्वभङ्गप्रसङ्गात् । नन्वेवं सूत्रादिष्वपि तदाचारः प्राप्तः; तदभावादकार्यं इत्याशङ्क्य स्वतः प्राप्तग्रन्थनिवेशादर्शनात् तदभावशङ्कामात्रं स्यात्, न तदभावनिश्चयः शक्य इति परिहरति—तदिहेति । ग्रन्थानिवेशः शङ्काहेतुरपि न स्यात्सूत्रकारादिषु इत्याह—नित्यं मङ्गलाचारेति । ग्रन्थनिवेशौचित्यं हि तन्मात्रार्थागन्तुकस्यैव, न नित्यस्येत्यन्यथासिद्धस्तन्निवेशाभाव इत्यर्थः । ग्रन्थनिविष्टमङ्गलाभावमभ्युपेत्य तथापि स्वरूपाभावो नास्तीत्युक्तम्; वस्तुतस्तु ग्रन्थानिवेशोऽपि नास्तीत्याह — सूत्रेचेति । आत्मतुष्ट्यधिकत्वान्मङ्गलस्य पञ्चिकादावधिकाचारोऽप्युचित एवेत्यभिप्रायः ।

पूर्वव्याख्ययैव व्याख्यातार्थस्य भाष्यस्य व्याख्यान्तरानपेक्षत्वात् गुरुकृतेरनारभ्यतां निवर्तयितुं प्रथमं तदनुवादेन तन्मान्द्यं च दर्शयति—विषयप्रयोजनेति । शास्त्रारम्भविरोध्युपस्थितन्यायाभासनिवर्तकतया तत्साधकत्वमधिकप्रयोजनं परोक्तप्रकारादित्यर्थः । ननु परमतेऽपि विषयप्रयोजनपरत्वं तदभावव्यावृत्त्यैवेति तद-

तां निवर्तयितुं युक्तम्; विषयस्त्वापातप्रतीतोऽपि वेदार्थोऽस्तु; प्रयोजनं चाननुष्ठानरूपमेवास्तु । न चाननुष्ठानमाद्यपूर्वपक्षनयमात्रादिति न शास्त्रारम्भः, अविवक्षाया अपि विनियोगोपादानादिलक्षणापेक्षत्वात् । यथारिप्सितमप्रयोजनमितिचेत्, तन्न शास्त्रारम्भस्तात्तदाक्षेप्तुमशक्यः ।

'बहुविद्यान्तराश्रितत्वान्मीमांसायाः प्रयोजनापेक्षा शुश्रूषूणाम्' इत्यपि

भावापादकपूर्वपक्षन्यायनिरासकत्वमस्त्येवेति कथं प्रयोजनमान्द्यमित्यत्राह — विषयस्त्विति । तन्मते स्वाध्यायस्यार्थपरत्वोक्तयार्थानुष्ठानं शास्त्रारम्भफलमाद्यसूत्रसाध्यमिष्यते; न स्वमत इव स्वपरिगृहीतार्थज्ञानसहायत्वेनार्थविचारस्याध्ययनविधिप्रयोज्यत्वम् । ततश्चापातसिद्धिमात्रेणाद्यविचारविषयत्वमर्थस्य न निश्चिततात्पर्यतया इति तथैव कृत्स्नविचारविषयत्वसम्भवात् न विषयसाधकत्वमाद्यस्य; तात्पर्यसंशयप्रयुक्तविचारप्रयोजनत्वं च तत्संशयनिरासमात्रसाध्यम्, तच्चेदमात्रमनुष्ठानाननुष्ठानविधाद्वयेनेति तदपि न सूत्रसाध्यमिति न तदभावव्यावर्तकत्वमपीत्यर्थः । नन्वाद्यविचारांशमात्रस्यायं विषयप्रयोजनलाभो न शास्त्रस्य, तस्यानेकाध्यायसमुदायात्मकत्वात् । तेन परमतेऽपि शास्त्रारम्भविरोधिन्यायनिवर्तकत्वमस्त्येवाद्यसूत्रस्येत्यत्राह—न चाननुष्ठानमिति । न शास्त्रारम्भनिरोधसमर्थोऽयं पूर्वपक्षः, स्वयमारब्धशास्त्रसाध्यत्वात् । विध्यवरुद्धाया भावनायाः पुरुषार्थो भाव्य इत्येतदधिकारलक्षणसिद्धम् । आर्थवादिकफलस्य भाव्यत्वमुपादानलक्षणसिद्धम् । स्वाध्यायस्याध्ययनशेषत्वं शेषलक्षणसिद्धम् । अध्ययनविध्यन्तरादर्थवादातिदेशः सामान्यविशेषातिदेशलक्षणसिद्धः । तत्राध्ययनविध्यन्तरं प्रकरणान्तरादभ्यासाद्वा नानाकर्मलक्षणसिद्धमित्यविवक्षापि शास्त्रसाध्यैवेत्यर्थः । नन्वनुष्ठानमेव सूत्रकृदभिलषितं प्रयोजनम्, तदभावे निष्प्रयोजनत्वात् । प्रयोजनसाधनार्थमेव सूत्रमित्याशङ्क्य परिहरति—यथारिप्सितमिति । एवं हि शास्त्रारम्भोपोद्घातत्वं त्यक्त्वा तत्प्रकारविशेषोपोद्घातत्वाङ्गीकारात् प्रयोजनमान्द्यमेवाश्रितं स्यात् । स्वपक्षे तु अध्ययनविधिप्रयुक्तमेव शास्त्रं न पुरुषजिज्ञासामात्रप्रयुक्तमिति शास्त्रोपोद्घातत्वसिद्धिरिति भावः । पुरुषार्थोत्तमभूतधर्मप्राप्तिप्रयोजनोक्तिशुश्रूषोत्पादनेन बहुप्रयाससाध्यशास्त्रश्रवणप्रवृत्त्यपेक्षिता चेत्येतदपि अयुक्तमित्याह—बहुविद्यान्तरेति । सर्वेषामपि तावदध्येतॄणामध्ययनान्तरमर्थविचारप्रवृत्तिः सूत्रे विवक्षिता । तदुपक्रमात्प्राग्भा-

१. निराकर्तुं. ख.
२. ज्ञानाधिकारादि. ख.
३. तावत्सिद्धत्वादा. ख.

मन्दम्, आप्तप्रवर्त्यत्वादेव प्रयोजनवत्त्वनिश्चयात्तेषाम्। अथ विषयप्रयोजनोक्त्यैव तत्प्रवर्त्यता, तन्न; साङ्गवेदाध्येतुः स्वोपयुक्तार्थधीर्मनाक् इति तत्सम्यक्त्वेच्छोस्तदुपायोन्मुखस्यानर्थपरत्वधिया विमुखतापत्तावर्थपरत्वोक्त्या[1] च[2] तन्निवृत्त्यर्थं विषयप्रयोजनज्ञं प्रत्येव सूत्रम्, न त्वाद्यप्रवृत्त्यर्थम्। अस्तु वानुषङ्गाद्विषयप्रयोजनधीः; अतो न विषयप्रयोजनपरमिदं सूत्रम्।

वि च तज्ज्ञानं प्रवृत्त्यङ्गम्; सूत्रोत्थज्ञानं च तदा नास्तीति न तदधीनस्तदुपक्रमः। ततः पित्राद्याप्तप्रवर्त्यास्ते; ततस्तत्प्रेरणालिङ्गकस्तदा प्रयोजनसामान्यनिश्चयस्तेषामिति न तदुक्त्युपयोग इत्यर्थः। नन्वध्ययनादिप्रवृत्तेः प्रायेण तथात्वेऽपि अर्थाविचारप्रवृत्तिः प्रायेण फलविशेषधीपूर्विकैवेति तत्प्रवर्त्यतापि सूत्रितप्रयोजनज्ञापनेनैवेत्यर्थवती तदुक्तिः इति शङ्कते—अथ विषयप्रयोजनेति। परिहरति—तन्न साङ्गवेदाध्येतुरिति। अधीतसाङ्गवेदो विचाराधिकारीति तावत्तन्मतेऽपि सम्मतम्। तस्य च नानाकार्यत्वान्नित्यनैमित्तिकतया च स्वानुष्ठेयकर्मरूपार्थधीः वेदादेव बहुविधसंशयग्रस्ताप्यस्त्येवेति तन्निर्णयेच्छोस्तदुपायन्यायविचारोन्मुखस्य "अधीत्य स्नायात्" इति स्मृतिप्राप्तगुर्वधीनत्वनिवृत्तिसामर्थ्यसिद्धानर्थपरत्वधिया तत्प्रवृत्त्युपरमप्रसङ्गेऽर्थपरत्वोक्त्या तदुपरमनिवृत्त्यर्थं सूत्रमिति विषयप्रयोजनोक्तिर्नाधिकार्यपेक्षितेत्यर्थः। ननु ग्रन्थारम्भे वृद्धसम्मता विषयप्रयोजनोक्तिरिति कथमिह तन्निरास इत्याशङ्क्य विषयान्तरे तत्सम्मतिः नात्रेत्येतदर्थं तदुक्त्यपेक्षप्रवर्तकत्वमस्य नास्तीत्याह—न त्वाद्यप्रवृत्त्यर्थमिति। प्रवृत्तिप्रतिबन्धकन्यायाभासधीबाधनेनैवास्य प्रवर्तकत्वमिति नास्य प्रवर्तकत्वे प्रयोजनादिज्ञापनं द्वारं प्रथमप्रवृत्तिहेतोरेव तद्द्वारमिति तत्परग्रन्थारम्भे तदुक्तिरर्थवती नात्रेत्यर्थः। ननु धर्मो जिज्ञासितव्य इति विषयप्रयोजनोक्तिः सूत्रसामर्थ्यसिद्धा प्रवृत्त्यनुवृत्त्युपयोगेनापेक्षिता चेति कथमविवक्षिता स्यादित्यत्राह—अस्तु वानुषङ्गादिति। अजिज्ञास्यत्वनिषेधानुषङ्गसिध्या तदुक्तिरस्तु फलवती; तत्परतैव सूत्रस्य निवार्येत इत्यर्थः। उपसंहरति—अतो न विषयेति।

१. विरुद्धता. क. २. Omited. ख.

अत्र च यद्यपि परमते 'लोके' इत्यादिभाष्यस्य षडर्थानुक्त्वा दशपक्षी चापरोक्ता ; तथाप्यथशब्ददूषणार्थमौचित्यानुभाषणपरत्वमेव स्वीकृतम् । तदपि मन्दं मत्वा गुरुः सप्तदशमर्थमाह । मन्दता चोचितानुवादमात्रपरत्वाद्वाक्यान्तरार्थत्वात् अथपदमात्रदोषपरत्वात् अतःपदस्य लौकिकार्थताननुकीर्तनात् । अत उक्तम्—"अथात इत्येतस्मिन् पदद्वयेऽलौकिकार्थाशङ्कानिवृत्तिः प्रयोजनम्" इति । "नाध्याहारादिभिरेषां कल्पनीयोऽर्थः—" इति । अस्यार्थः—शब्दशक्तिर्न कल्प्या, न त्वध्याहारादि सूत्रे वार्यते । न चैतावन्मात्राच्छङ्का न निवृत्तेत्येतावता नास्य निवृत्त्यर्थता । शङ्का चेत्थम्—

भाष्यतात्पर्यमपि परोक्तं मन्दमिति दर्शयितुं तद्व्याख्याप्रकारमाह— अत्र चेति । परव्याख्यानमथशब्ददूषणार्थमिति पञ्चिकोक्तं दर्शयितुमुक्तम्—तथाप्यथशब्ददूषणार्थमिति । तन्मन्दतानिमित्तं गुरोरर्थान्तरपरत्वव्याख्यानमित्याह—तदपि मन्दं मत्वेति । तन्मान्द्यं विवृणोति—मन्दता चेति । व्याख्येयानुपपत्तिशङ्कानिवृत्तिपरत्वसम्भवे सति न स्वतःप्राप्तानुवादपरता युक्ता, दूष्यानुवादार्थतया दूषणोपयोगोऽपि नास्तीत्येतदर्थं मात्रपदम् । "तत्र लोकेऽयम्" इत्यनेनैवानुवादसिद्धेरिति मान्द्यातिशयो दर्शितः । स्वार्थपरत्वसम्भवे वाक्यान्तरार्थता चायुक्ता । पदद्वये तुल्यशङ्केऽन्यतरदूषणार्थता चायुक्ता । तन्मात्रदूषणताभिप्रायोऽन्यानुक्तिगम्य इत्येवं मान्द्यदूषिता पूर्वव्याख्येत्यर्थः । तत्प्रकटनार्थं प्रयोजनमुखमेव व्याख्यान्तरमारभ्यत इत्याह—अत उक्तमिति । ननु "नाद्ध्याहारादिभिरेषां कल्पनीयोऽर्थः" इत्यध्याहाराद्यपेक्षार्थकल्पनानिषेधोऽनुपपन्नः, विवक्षितैकदेशोक्त्या सूचकेषु सूत्रेषु तदपेक्षितार्थविवरणस्यानिषेध्यत्वात् ; यथासम्भवं सति चाप्रसक्तत्वात् ; पदार्थस्वरूपकल्पना त्वप्रसक्ता ; तत्र चाध्याहारादेः हेतुत्वञ्चाप्रसक्तमित्यप्रतिपत्तिशङ्कायामाह—अस्यार्थ इति । नाध्याहारादयो निषेध्यकोटितया ग्राह्याः; अर्थकल्पनोक्त्या तद्विषयशक्तिकल्पना निषिध्यते । तत्कल्पनाप्रसङ्गहेतुतया चाध्याहाराद्यन्वय उपेयः । अध्याहारादिहानार्थं न शक्तिः कल्प्येति । तेनाध्याहाराद्यपेक्षयापि प्रसिद्धार्थग्रह एव न्याय्य इत्यर्थः । भाष्यस्यैवमलौकिकार्थत्वनिषेधसामर्थ्ये सत्यपि तच्छङ्कोत्पादकहेत्वनिवृत्तौ तन्निवृत्त्यसिद्धेः कथमस्य तदर्थतेत्यत्राह—न चैतावन्मात्रादिति । सर्वत्र प्रतिज्ञायाः साध्यासिध्यनङ्गत्वप्रसङ्गात् इति प्रसिद्धोऽत्र हेतुः । केन हेतुना तच्छङ्केत्यत्राह — शङ्का चेत्थमिति । स्वाध्यायस्याविवक्षितार्थत्वमाशङ्कमानस्य प्रसिद्धार्थत्वासम्भव-

स्वाध्यायाध्ययनविधेराचार्यकविध्यधिकारपरत्वेनाध्ययनस्यानर्थपरत्वादविवक्षितार्थो वेद इति नाध्ययनानन्तरा तद्धेतुका वेदार्थजिज्ञासा युक्तेति सामयिकार्थं पदद्वयमिति । दृष्टश्च पाणिनिपिङ्गलादिग्रन्थे समयः । अनुक्ते च कस्मिंश्चित्किमपेक्ष्य "अथातः" इति? न चार्थादुपस्थितं वेदाध्ययनमपेक्ष्येति वाच्यम्; अनर्थपरत्वाद्वेदस्येति तन्निवृत्त्यर्थं लोक इत्यादि यत्नगौरवं प्रसज्येतेत्येवमन्तं भाष्यम् । अध्ययनविधेरर्थबोधाधिकारपरत्वादर्थबोधस्य च मीमांसाधीनत्वादध्ययनविधिरेवानन्तर्यं शास्त्रारम्भाक्षेपक इति लौकिकार्थं पदद्वय-

शङ्कामूलालौकिकार्थत्वशङ्का स्यादित्यर्थः । नन्वेवमप्यानर्थक्यशङ्कैव स्यात् कथमलौकिकार्थत्वशङ्केत्यत्राह—दृष्टश्चेति । ननु ग्रन्थान्तरे शब्दान्तरस्य समयदर्शनेऽपि इहादर्शनादविवक्षितार्थत्वशङ्कयाप्यसम्यङ्न्यायमूलतैवाधिकरणान्तरेष्विव शङ्कार्हा, किमितीह सामयिकार्थताशङ्क्यते इत्यत्राह—अनुक्ते च कस्मिंश्चिदिति । व्युत्पन्नार्थधीपूर्विका हि असम्यङ्न्यायमूलताशङ्का; सैवेह नास्ति, सापेक्षार्थशब्दादपेक्षितानुक्तौ श्रुत्यैव तदबोधादध्याहारापेक्षयाप्यर्थसामर्थ्यासिद्धावसम्भवात् । तेनागत्यार्थवत्तासमयाद्यपेक्षयैव शङ्कार्हेति युक्ता तच्छङ्केत्यर्थः । ततस्तन्निवृत्त्यर्थता युक्तेत्याह—तन्निवृत्त्यर्थमिति । तन्निवृत्त्यर्थत्वमेव भाष्यसामर्थ्यप्राप्तम्, नोचितानुवादमात्रमित्येतद्दर्शयितुमेव मन्दमित्युक्तम् । अनुवादमात्रत्वे "तदर्थानीत्यवगन्तव्यम्" इत्येतदन्तमेव स्यात्; नाध्याहारादिभिरिति । व्यावर्त्यं प्रदर्श्य तदुपगमे सूत्रकरणप्रयोजनाभिमतपरप्रतिपत्त्यन्यथानुपपत्तिमूलस्वपदार्थव्याख्यानरूपयत्नगौरवापत्तिरूपबाधकावसायि न स्यात् इति । नन्वन्तालोचनया तन्निवृत्त्यर्थत्वभानेऽपि तावतैव विवक्षितार्थत्वानुक्तेः वाक्यापरिपूर्तिस्तुल्येति तदर्पकभाष्यान्तरशेषतोपगमस्यावश्यकत्वात् तत्समर्थनस्य चानन्तरवर्तिनो भावात् अगत्या अनन्तरभाष्याक्षेपकशेषत्वं पारिशेष्यसिद्धमित्याशङ्क्यान्यशेषत्वमेवास्य नास्ति; स्वातन्त्र्यासम्भवे हि तत्स्यात् न त्वस्य तदसम्भवः । विपक्षे बाधकं प्रदर्श्य लौकिकार्थत्वमावश्यकमित्युक्त्यैव तदुपपादकार्थावबोधाधिकारपर्यवसाय्यध्ययनविधिप्रदर्शिताध्ययनानन्तरत्वस्य तद्विध्याक्षेपहेतोश्चावगतत्वात्तन्मुखेन सूत्रवाक्यतात्पर्यविषयोऽपि प्रदर्शित इति स्वतन्त्रार्थमेवेदं भाष्यमिति परिहरति—अध्ययनविधेरिति । ननु

१. तादिति. क.
२. तदध्ययन. ख.
३. अनन्तरशास्त्रा. ख.

मिति शास्त्रारम्भप्रतिज्ञासूत्रं लोकइत्यादिना लौकिकार्थत्वमुक्त्वोपपादितम् । धर्मजिज्ञासापदे तु नालौकिकार्थताशङ्का, अदृष्टार्थतयापि कथंचित्तदुपपत्तेः । यद्यपि प्रतिज्ञामुखेन शास्त्रान्तर्गतो न्याय एवोच्यते, तथापि शास्त्रारम्भसिध्यर्थत्वाच्छास्त्रोपोद्घातेनाद्यम् । नन्वेवं तर्हि कृत्स्नमेव प्रमाणलक्षणमुपोद्घातः स्यात्; प्रामाण्ये हि शास्त्रारम्भोऽर्थवान् । मैवम्; शास्त्रारम्भो ह्यध्ययनविधेः; ततोऽनाक्षेपेऽनारम्भो युक्तः; प्रामाण्यादिभिस्तु न साक्षादाक्षेप इति तेषां शास्त्रतैव । नन्वर्थाविवक्षायामध्ययनमपि नानुष्ठेयम् । सत्यम्; मुखमात्रं शास्त्रानारम्भः । ननु अस्वाध्यायरूप[1]नित्यानुमेयवेदार्थविचारार्थं शास्त्रं युक्तम् । मैवम्;

पूर्वपक्षाभिप्रायेण धर्मजिज्ञासापदेऽप्यलौकिकार्थत्वं तुल्यम्, आपातप्रतीतिमात्रविषयस्याविचार्यत्वादित्यत्राह—धर्मजिज्ञासापदे त्विति। तत्तावन्न सापेक्षार्थमिति नेतरवदगमकम्; निर्णयफलासम्भवात्तु लक्षणयाप्यदृष्टार्थविचारविधिपरमस्त्वित्यर्थः । ननु प्रमाणज्ञानमेवाध्ययनप्रयोजनतया विधिग्राह्यमिति तत्प्रामाण्यसाधकोऽध्यायः कृत्स्नोऽप्युपोद्घातः स्यात्; नाद्यमात्रम्, अनुष्ठानार्थत्वाच्छास्त्रारम्भस्येति चोदयति—नन्वेवं तर्हीति । परिहरति—मैवमिति । यद्यप्यनुष्ठानान्त एवार्थावबोधोऽध्ययनप्रयोजनतया विध्यनुज्ञातः, तथापि तत्प्रामाण्यनिश्चयात्प्रागेव तस्य विधिस्वीकारः, तत्स्वीकारप्राप्ततात्पर्याधीनत्वात्प्रामाण्यस्य । तेन प्रथमभावी विधिरेव सर्वविचाराक्षेपक इति विधिस्वीकारसाधकविचार एव शास्त्रानन्तर्गतः प्रामाण्यतद्भेदाधिकारविचाराणामपि अनुष्ठानस्थापकतया तन्निर्वाहोपयोगेऽपि स्वयं विचारानाक्षेपकत्वात् विध्याक्षिप्तविचारान्तर्गतिरेव तदनुवृत्तिनिमित्तता चेति न तेषामुपोद्घाततेत्यर्थः । ननु पूर्वपक्षेऽध्ययनस्याप्यनारभ्यत्वसाम्ये केन विशेषेणाद्यस्य शास्त्रोपोद्घाततैवोक्तेति चोदयति—नन्वर्थाविवक्षायामिति । परिहरति—सत्यमिति । प्रथमं ह्यध्ययनविध्यतिरिक्तवाक्यवर्त्यविवक्षितार्थत्वं स्फुरति, तद्विधिपूर्वकत्वात्तत्प्रसक्तेः; पश्चात्तस्यापि स्वाध्यायान्तर्भावधिया तद्धीरित्युपक्रममात्रं तदित्यर्थः । ननु नास्त्याद्यस्य शास्त्रोपोद्घातत्वम्, अध्ययनस्यार्थज्ञानप्रयोजनत्वाभावात् स्वाध्यायेऽनर्थपरेऽपि स्मृत्यनुमेयवेदस्यार्थपरत्वाविज्ञातान्न्यायापेक्षत्वाच्च स्मृत्यर्थनिर्णयस्य तदर्थं शास्त्रारम्भप्राप्तेरिति चोदयति—नन्वस्वाध्यायरूपेति । एतद्भ्राद्धान्तपूर्वकं स्मृतिमूलवेदानुमानमिति परिहरति—मैवमिति । पुराणादेरपि धर्मस्थानत्वमेतत्पूर्वक-

१. स्वाध्यायरूपं नित्या. क.

प्रत्यक्षवेदेऽनर्थपरे नार्थपरवेदानुमा स्मृतितोऽपि युक्ता, अयोग्यस्याननुमानात्। वेदे चानर्थपरे तन्मूलानीतिहासपुराणादीनि धर्मस्थानान्यपि नार्थपराणीति न तदर्थमपि शास्त्रं युक्तम् । ननु मानान्तरविषयार्थे लौकिकवाक्येऽर्थपरे न्यायापेक्षे शास्त्रमर्थवत् । मैवम् ; अभिप्रायाधीने वाक्यार्थे नातीव शास्त्रापेक्षा । अथवा नाध्ययनविध्याक्षेपाच्छास्त्रारम्भ इत्येतावन्मात्रमत्र निरस्यते, हेत्वन्तरादारम्भोऽत्र न चिन्त्यते ।

अत्र परैरेवं चिन्तितम्—विध्यवरुद्धाया भावनाया नापुरुषार्थमध्ययनं भाव्यम् ; स्वाध्यायार्थबोधौ च विध्यानर्थक्यापत्तेरभाव्यौ । अतोऽतिदेशागतार्थवादोक्तपितृतृप्तिद्वारकं सार्वकाम्यं भाव्यं कल्प्यम् । नच शास्त्रातिदेशानुपगमादर्थवादानतिदेशः, शब्दभावनायाः स्तुतिरूपोपकारजनकतया तदतिदेशात् । अतः फलभावनाकरणाध्ययनार्थत्वात् स्वाध्यायस्यानर्थपरतया विषयप्रयोजनाभावादनारभ्यं शास्त्रम्—इति पूर्वः पक्षः ।

मित्याह—वेदे चानर्थपर इति । ननु मानान्तरगम्यार्थलौकिकवाक्यमपि न्यायाधीनवचनव्यक्तिकमिति तन्निर्णयार्थं शास्त्रमस्तु इति चोदयति—ननु मानान्तरेति । वक्त्रभिप्रायपूर्वकेऽर्थबोधे तदुचितान्वयव्यतिरेकानुसन्धानं प्रधानहेतुः, वाक्यवृत्त्यनुसन्धानन्त्वप्रधानमिति न तदर्थमारभ्यमित्यारम्भहेत्वभावादनारभ्यतां निराकर्तुं युक्तमित्युक्तमिति परिहरति—मैवमिति । एतच्च परमताङ्गीकारेणोक्तम्; वस्तुतस्तु अध्ययनविध्याक्षिप्तशास्त्रारम्भमात्रमत्र साध्यते तदनाक्षेपनिराकरणेन, हेत्वन्तराधीनारम्भो न चिन्ताविषय इत्याह—अथवेति ।

न्यायोक्तावपि परपक्षे मान्द्यं दर्शयितुं तदीयां गतिमाह—अत्र परैरेवमिति । तत्रार्थवादातिदेशोक्तिः दशमाद्ये शास्त्रातिदेशनिरासान्न सिद्धान्ततया पञ्चिकाकारेण तन्मुखं तत्पूर्वपक्षोपपादनम्—इति केनचिदुक्तम्, तत्परिहारार्थमाह—नच शास्त्रातिदेशानुपगमादिति । उपकारजनकतयैव मन्त्रवत्तदतिदेशवर्णनं नान्यथेति न तद्विरोध इति । एवमार्थवादिकफलस्य भाव्यत्वेऽध्ययनस्य तदर्थत्वात् स्वाध्यायोऽध्ययनशेष इति अर्थपरत्वाभावेन पूर्वपक्षिते तव्यश्रुत्यवगतकर्मस्वभावस्य स्वाध्यायस्य व्युत्पत्तिसिद्धार्थपरत्वबलाद्भाव्यत्वे शीघ्रलब्धे तदुपस्थापितक्रत्वनुप्रवेशकल्पनया नियमविधिविषयत्वसम्भवादार्थवादिकफलकल्पनानवकाशादर्थपरतैवेति ।

सिद्धान्तस्तु तव्यावगतकर्मत्वस्य स्वाध्यायस्यैव भाव्यता व्युत्पन्ना, अर्थपरत्वानुरोधात्; क्रत्वनुप्रवेशकल्पनया भावनया विधेरर्थवत्त्वात्। एवमर्थपरतया विषयप्रयोजनलाभादारभ्यं शास्त्रम्—इति।

तदयुक्तम्; लिङाद्यर्थो हि भावना अपूर्वभाव्यैव श्रुतेति न पूर्वपक्षे भाव्यान्तरकल्पना। राद्धान्तेऽप्यनीप्सिततकर्मणः स्वाध्यायस्य न भाव्यता; अपूर्वस्य भाव्यत्वात् स्वाध्यायस्यानीप्सितता। नच दूरस्थविध्यनुवादः। नचानारभ्याधीतत्वेऽपि कर्मबोधकतया कर्माव्यभिचारात् कर्मविध्यनुवादः,

तदयुक्तमिति। स्वमतसिद्धेन विधितत्त्वेन दूषयति। भावना हि कृत्यात्मिका अपूर्वभाव्यैव श्रुता इत्याकाङ्क्षाभावान्न पूर्वपक्षे भाव्यकल्पना। सिद्धान्तेऽपि इत्यपिशब्द आकाङ्क्षाभावानुषङ्गार्थः। अनीप्सितकर्मण इति दूषणान्तरम्। तदुपपादयति—अपूर्वस्य भाव्यत्वादिति। "सुवर्णं भार्यम्" इतिवत् इत्यर्थः। ननु हन्त्यादाविवापूर्वानुवादेन कर्मण ईप्सितत्वमेवास्तु इत्यत्राह—नच दूरस्थेति। साधिकारविधिसन्निधानात्तत्र तदर्थत्वावगतेस्तदनुवादेन तद्द्वारतया कर्मेप्सितं गम्यते; दूरस्थत्वादिहानुवादायोगान्न तत्साम्यमित्यर्थः। पर्णतादावस्त्येव विधिसन्निधिः पदार्थमुखेनेत्येतावान्विशेषः। तथाधानेऽपि "अद्भ्योदिते सूर्ये आहवनीयमादधीत" इत्यादिवाक्यान्तरसमभिव्याहारादग्निपदस्याहवनीयाद्यर्थत्वावगमात्, तेषां चेप्सिततयैवान्वयार्हत्वादगत्या भाविविनियोगप्रतिसन्धानेनेप्सितत्वावगमे तत्साध्यक्रतुविधीनां तदुपाधाधानप्रयोजकत्वेन सन्निधानात्तद्विध्यनुवाद इति भावः। नन्वेवं जुह्वादिमुखेनेव स्वाध्यायमुखेन क्रतुविधिसन्निधेस्तदनुवादसम्भवात् ईप्सितत्वं स्वाध्यायस्य स्यात् इत्यत्राह—न चानारभ्याधीतत्वेऽपीति। बोधकत्वेनैव हि स्वाध्यायस्य क्रतुसंस्पर्शः; तत्र च द्रुमादीनामबोधकत्वेन व्यभिचारात् जुह्वादिवैषम्यात् स्वाध्यायस्य न विध्युपस्थापकत्वम्। नच तेषां सामान्तर्भावात्तद्द्वारेण क्रतुसम्बन्धसिद्धेरव्यभिचारः, सामान्तर्भावेऽपि तेषां सामकार्यस्पर्शो नास्ति; सामपरिच्छेदमात्रकार्यतया तेषां नवमप्रसिद्धत्वात् तस्य च दृष्टत्वात् अध्ययनगृहीतैरेव कार्य इति नियमविधिविषयत्वं नास्तीत्यध्ययनेप्सितत्वानुपपत्तेः स्तोभेतरमात्रस्य च तद्व्याप्यध्ययनेप्सितत्वायोगात् स्वाध्यायस्येप्सितत्वनिवृत्ति-

१. रा. क. ३. परत्वात्. क.
२. कं भावमा ख. ४. भाव्यकल्पना. क.

हुमित्येवमादीनां स्तोभाक्षराणामकर्मबोधकत्वेन व्यभिचारात् । तात्पर्यसंन्देहे चार्थपरत्वस्याननुरोध्यत्वान्न शास्त्रारम्भः । तन्मते च क्रतुविधिप्रयुक्तमध्ययन-

रेवेति स्वसम्बन्धिविध्युपस्थापकत्वमपि नास्तीति अभिप्रायः । एवं तव्यावगते-प्सितत्वबलात् क्रत्वनुप्रवेशकल्पनेत्येतदयुक्तम्, अनीप्सितत्वनिश्चयादित्युक्तम् । व्युत्पन्नार्थानुरोधादित्येतदप्ययुक्तमित्याह— तात्पर्यसन्देहे चेति । प्रतिवाक्यावसेय-तात्पर्यनिर्णयोपाधिकमेव च लोकेऽर्थबोधकत्वं शब्दानां व्युत्पन्नम्; न सर्ववाक्य-साधारणपदशक्तिमात्रात्, अत्यन्तव्यावृत्तवाक्यार्थविषयत्वादभिधानस्य । तच्च तात्पर्यं वेदे सिद्धान्तस्थितेः प्राक् सन्दिग्धम्, पूर्वपक्षिणाध्ययनस्यान्यार्थतोक्त्या-पादिताविवक्षितार्थत्वशङ्कानुवृत्तेः । तेन सन्दिग्धतात्पर्यनिर्वाहार्थं क्रत्वनुप्रवेश-कल्पनाद्ययुक्तम्, "सुवर्णं भार्यम्" इत्यत्रापि तदापत्तेः इति परोक्तविधया शास्त्रारम्भो दुस्साध इत्यर्थः। केनचित् क्रत्वनुप्रवेशकल्पनां विना नियमविधिपरत्वासंभवेऽपि तत्फ-लमध्ययनव्यतिरिक्तोपायेन स्वाध्यायग्रहणरूपमुपायान्तरेण ग्रहणे प्रत्यवायकल्पनया समर्थितम्; तत् निरासादरमपि नार्हति, कल्पकाभावात् । सत्यामपि कल्पनायां क्रत्वसिद्धिरूपश्चेत्प्रत्यवायः सोऽध्ययनस्य क्रत्वङ्गत्वं विना दुरुपगम इति न विधान्तरं स्यात् । नरकादिप्राप्तिरूपश्चेत्तत्प्रापकक्रियानिषेध एव ततो वाक्यार्थः स्यात्, नाध्ययनविधिरिति न तदनन्तरं जिज्ञासाहेतुस्तद्वाक्यार्थ इति नेयं चिन्ता स्यादिति अनादृत्यमेव तत् । अपशूद्राधिकरणव्याघाताच्च परसिद्धान्तो न सूत्रभाष्यानुमत इत्याह—तन्मते चेति । ननु स्वमतेऽप्युपनयनप्रक्रमेणाम्नातोऽध्ययनविधिरुपनीत-कर्तृकाध्ययनविषय इत्यनुमतमेवेत्यनुपनीतशूद्रस्य यथाश्रुतमशक्यमिति क्रतु-विधयोऽपि न प्रयुञ्जत इति तेऽपि विद्वत्त्रैवर्णिकविषया एव स्युरिति शङ्कानिवृ-त्त्यर्थमनुपनीतस्यापीत्युक्तम् । अयमर्थः—आचार्यकरणविधिप्रयुक्ताध्ययनपक्ष एवा-ध्ययनविधेरुपनीतकर्तृकाध्ययनविषयत्वसिद्धिः । तदाहि तदङ्गमुपनयनं स्वाधि-कारसिद्ध्यर्थमाचार्यः करोति; तदङ्गत्वं च सामर्थ्यादुपनेयासत्तिद्वारकमित्युप-नेयस्याध्ययनोपयोगिक्रियापेक्षास्तीति तद्बलादेव प्रक्रमावगतोपनीतकर्तृकत्वधीः, न श्रुतिबलादेव; न ह्युपनेयस्य कर्मणोऽचेतनसमस्यान्यतन्त्रस्याविदुषः स्वकर्तृक-क्रियापेक्षास्ति । न चाध्ययनस्यापि गुणकर्मणो गुणिवशेनान्यार्थस्य तत्कर्त्रनु-ष्ठेयतयोपस्थितस्य स्वनिष्ठकर्त्रपेक्षेति साक्षाच्छ्रुतिमन्तरेणान्योन्यसम्बन्धो न स्या-दिति; तन्मतेऽनुपनीतस्यापि क्रतुविधिप्रयुक्तमध्ययनमनिवार्यमिति । नन्वेवमनुप-

१. र्यस्य सं. क.

मनुपनीतस्यापीति शूद्रस्याप्यधिकारो विद्यासाध्ये कर्मणि स्यात् । उपनेयस्यैव ह्यनुपनीतावस्थस्य निषेधः, नानुपनेयस्यापि शूद्रस्य । यस्तु शूद्रोल्लेखेन[1] निषेधः, नासौ क्रत्वधीनप्रवृत्तिविषयः । गुरुनये त्वाचार्यकरणविधिप्रयुक्त-विद्वत्त्रैवर्णिकलाभे क्रतुप्रयुक्त्युपरतेर्निर्विद्यः[2] शूद्रः; रागाधीनप्रवृत्तिस्तु निषिद्धेति न शूद्राधिकारप्रसङ्ग इत्याचार्यकरणविधिप्रयुक्तिपूर्वकमेव पूर्वोत्तरपक्ष-वर्णनम् ॥

ननूपनीयाध्यापके लोक आचार्यपदप्रयोगात्तत्कर्तृतैव लोकसिद्धाचार्य-

नीतस्य वेदाभिव्याहरणनिषेधाच्छूद्रस्याध्ययननिवृत्तिरित्यत्राह—उपनेयस्यैवेति । यं हि भावो विशिनष्टि तमेव तदभावोऽपि श्रुत्या इति त्रैवर्णिकविषय एव सः,अकिशोरशब्दात् अनश्वाप्रतिपत्तेरित्यर्थः । नन्वेवमपि शूद्रशब्दप्रयुक्तनिषेधात्तन्निवृत्तिरित्यत्राह—यस्तु शूद्रोल्लेखेनेति । वैधप्रवृत्तिविषयत्वं हि निषेधस्य स्वतो न युक्तमिति रागप्राप्तविषयत्वसम्भवे तद्विषय एव सः; प्रायश्चित्तश्रुत्यनुरोधाच्चेति भावः। स्वमतेऽपि तर्ह्ययं विरोधो निरधिकाराध्ययनविधेः क्रतुविधिप्रयुक्त्यनिवारणात् तुल्य इत्यत्राह—गुरुनये त्विति । तत्रोपनयनस्याचार्यकरणाध्यापनाङ्गत्वात् स्वाङ्गोपनयन-द्वारभूताध्ययनस्याचार्यकरणविधिरेव प्रयोजकः; स चोपनीताध्ययनमेव प्रयुङ्क्ते; तत्प्रयुक्तविद्याधिकारिलाभान्न क्रतुविधयोऽध्ययनप्रयोजकत्वगुरुव्यापारेण शूद्रादिविषया इति तेषां न तद्विधिप्रयुक्ताध्ययनप्राप्तिः;रागप्रवृत्तेश्च निषिद्धत्वादविद्वत्तया विद्यासाध्ये कर्मण्यशक्तास्ते इत्यपशूद्राधिकरणविरोधाभावादाचार्यकरणविधिप्रयुक्तिपूर्विकैव सूत्रगतिर्भाष्यकाराद्यभ्युपगतेत्यर्थः । पूर्वोत्तरपक्षवर्णनमित्यनेन तत्प्रयुक्त्यनङ्गीकारेण कथञ्चित्पूर्वपक्षसम्भवेऽपि विधिवृत्त्यसम्भवात् उत्तरपक्षासम्भवो व्यक्त इति दर्शितम् ॥

नन्वाचार्यत्वस्याहवनीयादिवदलौकिकत्वे सति तत्करणाध्यापनविधिः स्यात्; तस्य तु लौकिकत्वान्न तद्विधिरित्याक्षिपति—ननूपनीयाध्यापक इति । तदभिप्रायो विवृतः—

"लोके क्वाप्यप्रयुक्तत्वाद्विधिसाध्ये प्रयोगतः ।
अलौकिकार्थं यूपादिपदं कामं प्रसिध्यतु ॥
नालौकिकार्थमाचार्यपदमेतद्द्वयात्ययात् ।
मुखं गुरुमतस्येत्थं खण्डितं किल पण्डितैः ॥" इति ।

१. उल्लेखेनैव. क.

२. क्रतुविधिप्र. क.

तेति न तत्र विध्यपेक्षा। मैवम्, स्मृतौ "उपनीयाध्यापयेत्" इति विधिमुक्त्वा विधिप्रसिद्धमर्थं "यस्तु" इति निर्दिश्याचार्यलक्षणं कृतम्। अतो वचोभङ्ग्या विहितानेकनियमकोपनयनयुक्ताध्यापने कृत आचार्य इत्युक्तम्।

परिहरति—मैवमिति। श्रुतिस्मृतिप्रयुक्ताचार्यपदार्थसंशयनिवर्तकमात्रैस्तल्लक्षणमिदं कृतमिति तावदास्थेयम् "उपनीयतु यश्शिष्यम्" इत्यादि। तत्र लक्ष्यलक्षणतद्वाचिवाक्यस्वभावालोचने यदि विध्यनपेक्षमेव तल्लक्षणं सुवचं स्यात्, तदा माभूत्तद्विधिः; तद्वाक्ये तावदध्यापयेदिति विधिरुक्तः। नच सोऽनुपयोगी, तल्लभ्यत्वाल्लक्षणभूतस्यार्थस्य। न ह्यध्ययनानुष्ठानानुपपत्त्या तावत्तदाक्षेपमात्राद्विनापि विधिं तदनुष्ठानसिद्धिः, निरधिकारतया स्वविषयानुष्ठानेऽपि तद्विधेरशक्तत्वात् क्रत्वनुप्रवेशकल्पनायाश्चापाकृतत्वात्, विश्वजिद्वदधिकारकल्पनायाश्चार्थपरत्वभङ्गेन विधेरेवासिद्ध्यापत्तेः, अर्थबोधार्थितायाश्च द्रव्यार्थितया द्रव्यार्जनविधाविव तात्पर्यसिद्धेः प्रागयोगात्। सति त्वध्यापनविधौ तस्य चाचार्यभावफलावसायित्वात् अध्ययनप्रयोजकत्वसम्भवात् तत्प्रयुक्ताध्ययनविधेश्च वक्ष्यमाणन्यायेनार्थज्ञानाधिकारपर्यवसायितयाध्येत्रर्थतयाचार्यदक्षिणादानादिकरत्वात्तल्लाभार्थं तदर्थ्यध्यापयेदिति अध्यापनविधिसिद्धिः। लक्षणमात्रविवक्षायाञ्चासंशयार्थम्—'उपनीय तु यश्शिष्यं द्विजोऽध्यापयति श्रुतिम्' इति लक्षणमवक्ष्यत्। तदनुपयोगिविध्युक्तेरनाञ्जसत्वादनाप्ततांश्च वक्तुरापादयेत्। विधेयस्य तु लक्षणत्वे विवक्षिते विध्युक्तिराञ्जसीति विधिसिद्धमेवाध्यापनरूपन्निर्दिश्य यस्तु इत्यादिना लक्षणमपि कृतमित्युपेयम्। नच वाक्यभेदापत्तेरुभयविवक्षानुपपत्तिः, वक्तृतन्त्रे वाक्ये वाक्यभेदस्य चोदनालक्षणसूत्रेऽर्थपदं प्रयुञ्जता सूत्रकारेणैवादोषतया ख्यापितत्वात्। लक्षणञ्चेहोपाध्यायलक्षणात् केवलाध्यापनरूपाद्यस्तीति तुशब्देन व्यावर्त्योपनयनसमानकर्तृकत्वमुक्तम्। समानकर्तृकता च विध्यविवक्षायां च न स्यात्, स्वतन्त्रयोस्तदनर्हत्वेनाङ्गाङ्गिभावापेक्षत्वात्। एवंलक्षणतद्वाक्यात्तावत्तद्विधिरवभाति। लक्ष्यमुखेनापि विधिं वक्तुं लक्षणस्यानेकनियमापेक्षतया अभूततया च लक्ष्ययोगं दर्शयति—अतो वचोभङ्ग्येति। यतो विधिप्रसिद्धं लक्षणं कृतम्; अतोऽविहितस्यानेकनियमायोगात्तद्युक्तमेव लक्षणं गम्यते। तेन क्रमभावित्वादुपनयनवेदकल्परहस्याध्यापनानां सहत्वासम्भवात् अकृतस्य च शब्दवाच्यत्वानुपयोगात् भूततयैव तद्धेतुत्वमुक्तं स्यात्। न ह्येकफलावच्छिन्नैकधातूपात्तक्रियाणामेकदेशोपयोगेऽपि तत्फलोपनीतकृत्स्ननिमित्तव्यपदेशवदनेकधातूपात्तानेकक्रियाणामप्रसिद्धैकफलानामेकयोगमात्रेऽपि तत्फलोपनीतकृत्स्ननिमित्तव्यपदेशसिद्धिरिति भूततयैव सर्वं तदुत्तरकालानुवर्तमानसर्वसाध्यफलव्यवधानेन तन्निमित्तमित्युक्तं स्यादित्यर्थः। ननु

तद्यदि क्रियागर्भोऽध्येत्रध्यापकसम्बन्धोऽप्यनुवर्तते, तथापि न तावन्मात्रे शब्दः, दृष्टस्यानियमे नियमे चाभेदाददृष्टादेव भेद इत्यलौकिके शब्दः ; तदलौकिकं विध्यर्हं फलम् ; इयमेव यूपाहवनीयादिविधौ । उपाध्यायशब्दस्तु नियमानपेक्षोऽध्यापकमात्रे स्मृत इति लौकिकार्थो न विध्यर्हार्थ इति भेदः ।

इयं वा विधा—अध्यापनक्रियानिवृत्तौ तत्कारकत्वेऽतीत एव "आचार्याय वरो देयः" इत्यादिश्रुतेस्तदासावाचार्यो वाच्यः । नच भूतपूर्वगत्योपलक्षणेन तदासावाचार्यः[1] । नच लौकिकं किञ्चित्तद्वृत्तं रूपमुपलभ्यते । अतोऽलौकिके तद्वृत्ते रूपे सति दानविध्यर्थः श्रौत इत्यलौकिकार्थता भाति । सा च तदुत्पत्ति-

गतिक्रियाफलसंयोगवदध्यापनोत्थः संबन्धः प्रसिद्ध एवानुवृत्त्यर्ह इति नेह विधिकृतः समस्तीत्यत्राह—तद्यदि क्रियागर्भ इति । सकर्मकक्रियामात्रन्तावन्न गतिक्रियादृष्टान्तेन कर्तृकर्मसम्बन्धकरमिति अनुमानार्हम्, भूतादिसकर्मकक्रियास्वसम्भवात् तेनानन्यथासिद्धफलान्तरविशिष्टसकर्मकक्रियानुवर्तिन्येव तत्फलकत्वव्याप्तिर्ग्राह्येति इह तद्विशेषणसत्त्वैव न निश्चिता । यद्यपि तद्भावात्सम्बन्धानुवृत्तिः स्यात् तथापि नाचार्यशब्दस्तन्निर्वचननिमित्तः स्यात्, तद्वृत्तेरुपनयनाध्यापनवत्त्र्यशेषनियमनिमित्ततया स्मृतिसिद्धत्वात् । अनुमितसम्बन्धस्य च तदभावेऽपि भावात् । तेन तदतिक्रमेण तन्नियमसाध्यादृष्टनिमित्ता तद्वृत्तिरुपेया इत्यर्थः । तेन तदर्थो विधिरुपेय इत्याह—तदलौकिकमिति । संप्रतिपन्नादृष्टार्थाहवनीयादावपि विधिप्राप्तिनियमातिक्रमेण तत्तत्क्रियामात्रे पदप्रयोगाभाव एवादृष्टार्थत्वहेतुरित्याह—इयमेव यूपाहवनीयेति । नियमानपेक्षत्वमुपाध्यायपदे विशेष इत्याह—उपाध्यायशब्दस्त्विति ।

कार्यैक्यात् कर्मणो योगोऽयोगश्चेत् कल्प्यमेव तत् ।
दृष्टाभावेऽप्यदृष्टं स्यादिष्टं चेत्तद्विधेः फलम् ॥ इति सङ्ग्रहः ।

यद्यपि लक्षणस्मृतेरविधिपरतयाप्यन्वितार्थता संभवेत् तथाप्यतीत एव तल्लक्षणे तल्लक्ष्यार्थसंप्रदानकदानादिविधिस्तदा तत्सत्तां ज्ञापयंस्तत्कारकत्वातिरिक्तादृष्टार्थतां शब्दस्यापादयन् तज्जनकताञ्च लक्षणस्य कल्पयन् तद्विधिपरतामपि गमयेदित्याह—इयं वा विधेति । स्मृतेश्च लोकव्यवहारमात्रफलानर्हत्वात् आचार्यपदार्थनिर्णयापेक्षवरदानाद्यनुष्ठानफलतैवोपेयेति तद्विधिवाक्यवत्त्याचार्यपदार्थज्ञापनपरत्वनिश्चयात्तस्य च संप्रदानावस्थार्थत्वसिद्धेस्तदवस्थस्य चोपलक्षणयोगाभावादनव-

१. Added वाच्यः क.

विधेर्निर्वहतीत्युत्पत्तिविध्यपेक्षायां स्मृतेरपेक्षितविधिपरता लक्षणान्वाख्यानरूपाया अपि निश्चीयते । "योऽध्यापयेत्" इति च यत्पदस्यावधृते तात्पर्ये न विध्युपघातकता "यदाग्नेयः" इतिवत् । एवमुपनीय वेदाध्यापनेनाचार्यकं भावयेत्—इत्येवंरूपवेदानुमानसिद्धिः । यूपाहवनीयादावप्येवमेव; तत्र[1] विहिततक्षणाभ्यञ्जनादिकारकतातिवृत्तावपि यूपाहवनीयादि-

गतस्य च तदुपलक्ष्यानर्हत्वात्तज्ज्ञापनप्रवृत्तायाः स्वोपास्यलक्षणसाध्यतदवस्थानुवृत्त्यर्हफलापेक्षयैव तज्ज्ञापनार्थत्वात्तद्विधिपरत्वं विना च तदयोगात् तदर्थं विधिपरतापि स्पष्टैव; अन्यथास्य व्याख्येयश्रुत्यर्थबाधकत्वापत्तेश्चेत्यभिप्रायः । यथोक्ततात्पर्यसिद्धेर्विधौ यच्छब्दोऽपि न तद्विरोधीत्याह — योऽध्यापयेदिति चेति । यत्पदगतिरुक्ता समासाद्यन्तरेणापि वाक्यार्थस्य पदार्थतां कर्तुं वाक्यान्तरे श्रुत्या प्रसिद्धे यत्पदं स्मृतमिति । नन्वाचार्यकरणविधिप्रयुक्तत्वमध्ययनस्य साधयितुं आचार्यत्वकामोऽध्यापयेदिति अधिकारविधिरूपवेदानुमानं साधयितव्यम्, किमिति विनियोगमात्ररूपवेदानुमानमुक्तमिति शङ्कामुक्तोपजीवनेन परिहरति— एवमुपनीयेति ॥ वरदानादिविधिगताचार्यपदार्थान्वाख्यानार्थं तदपेक्षितविधितात्पर्यकस्मृत्यनुमेयत्वमाचार्यकरणविधेरेवमित्युक्तम्; तदनुमेयस्य साधिकारदानासिध्यवगाहित्वावगमात्तदपेक्षितालौकिकाचार्यपदार्थोत्पादकक्रियाविनियोगोपक्षीणता स्मृतेर्न्याय्या; न तद्विषयाधिकारविधिपरता, गौरवादपेक्षाभावाच्च; तन्मात्रपरता प्रत्यक्षवेदेऽप्याधानादिविधेः सिद्धैवेति नानुमेये काचिदनुपपत्तिः । स्मृतिवाक्यस्यापि विधिश्रुतिर्नापूर्वनियतेति नाधिकारापेक्षा । न चैवमाधानवदध्यापनस्यापि दानविधिप्रयोज्यत्वापत्तेरध्ययनप्रयोजकत्वासिद्धिः; विनियोगमात्रविषयस्याप्याचार्यकस्य दक्षिणादिलाभकरतयाध्यापकाभीष्टत्वादध्यापकाधिकारापादकत्वं वस्तुवृत्त्यास्त्येवेति तदर्थमध्ययनप्रयुक्त्यवसायितापि युक्तैवेति न काचित्क्षतिः । न चैवमृत्विक्त्वस्यापि क्रतुप्रयोजकत्वापत्तिः, तस्य यजमानाधिकाराधीनतत्कर्तृकवरणादिसाध्यतया स्वातन्त्र्याभावादिति भावः । भावस्त्वयं ग्रन्थे न प्रकटीकृतः, अधिकारपर्यन्तत्वेऽपि स्वसिद्धान्ताविरोधादिति मन्तव्यम् । प्रकरणोक्तयूपाहवनीयादिसाम्यं विधाद्वयेऽपि तुल्यमित्येतदर्थमाह—यूपाहवनीयादावपीति । ननु स्मृत्यादौ लोकाप्रसिद्धपदार्थलक्षणतयोक्तस्यापि विधियोग्यार्थस्य तदर्थविधिविषयत्वोपगमे 'यस्योपनयनकालोऽतिपतेत् स व्रात्यः' 'य आ तृतीयात्पुरुषात् सोमं न पिबेत्स

१. तत्रापि तक्षणाभ्या(ञ्ज)नादि. ख.

पदप्रयोगस्य वेदेऽदृष्टरूपाविशेषेऽपि कदाचिद्दर्शनादलौकिकार्थता । व्रात्यता तु निन्दिता न विध्यर्हा सोमपानश्रुतिविरुद्धा चेति न तत्स्मृतेर्विध्यनुमा । उपाध्यायपदे तु यदि कारकतातिवृत्तावपि वेदे निर्देशोऽस्ति, तदा तत्पदमप्यलौकिकार्थं यूपादिवत्; अथ न, तदा लौकिकार्थम् । लोके तु तत्पदप्रयोगोऽभिप्रायवशात् भूतपूर्वगत्यापि युक्तः, अवेदाध्यापकेऽप्युपाध्यायपदप्रयोगवत् । एवमाचार्यपदमपि लोके भूतपूर्वगत्या । भ्रान्तिमूलश्च कौलादावपि तत्पदप्रयोगः ।

यत्तु विधित एवालौकिकार्थाश्रयणम्, तथाङ्गान्वयात्; तन्मन्दम्, प्राग्विधित्वासिद्धेः । सिद्धावपि संस्कारविधिमात्रता प्रोक्षणादिविधेरिव व्री-

दुर्ब्राह्मणो व्रात्यः' इत्यत्रापि तदर्थविधिः स्यादित्यत्राह—व्रात्यता तु निन्दितेति । ननु लक्षणवाक्यस्य विधिपरत्वं विना स्वतात्पर्यविषयासिद्धिः, अतो विधिपरत्वे हेतुरुक्तः; व्रात्यलक्षणवाक्यस्य तदभावात् कथं तत्परत्वापत्तिः शङ्क्यते? उच्यते—तद्भावोपगमेनापि निन्दाविषयत्वेन विध्यनर्हत्वान्न विधिपरतोच्येतेत्येतदर्थं तद्द्रष्टव्यम् । तर्ह्युपाध्यायलक्षणवाक्यस्य विधिपरतापत्तिरित्याशङ्क्य अस्त्वस्मिन् प्रकारे, पूर्वोक्तप्रकार एव तन्निवृत्तिरिति विशेषमाह—उपाध्यायपदे त्विति । तत्र तत्र तत्स्मृतेः स्यात् विध्यनुमा; कारकत्वातिवृत्तावपि वेदे तत्पदप्रयोगे सति तद्वददृष्टार्थत्वाहानादित्यर्थः । ननु कारकत्वेऽतीते लोकप्रयोगोऽप्यदृष्टार्थगमक एव, केन विशेषेण वेद इति विशेषग्रहणमित्यत्राह—लोके त्विति । तत्राभिप्रायव्यवहितः प्रयोगस्यार्थयोगः, वेदे त्वव्यवहित इति तत्रैव स्वतोऽर्थतन्त्रता; लोके त्वनन्यथासिद्ध्या—इति विभागाद्विशेषोक्तिरित्यर्थः । लौकिकप्रयोगस्याभिप्रायतन्त्रतयार्थानपेक्षत्वमपि पारस्पर्येण दृष्टमिति दृष्टान्तच्छलेनाह—अवेदाध्यापक इति । एतदाचार्यपदेऽपि तुल्यमित्याह — एवमाचार्यपदमपीति । निमित्तान्तरमप्याचार्यपदेऽस्तीत्याह—भ्रान्तिमूलश्च कौलादावपीति । "यद्रोचते तत् असेव्यं लोकवर्जितं न वर्जयेत्, आनन्दरूपमात्मानं भोगाभ्यासेन पश्यन्ति" इत्येवंजातीयकग्रन्थार्थनिष्ठाः कौलादयो वेदबाह्याः; तेषु वैदिकप्रयोगस्य मूलतयाप्यस्पर्शाद्विप्रलम्भार्थप्रणीतग्रन्थतदुक्तकुमन्त्रग्रस्तचित्तेषु तदुत्थापितभ्रान्तिमूलस्तत्पदप्रयोग इत्यर्थः ।

एवं विधाद्वयेनालौकिकार्थत्वं समर्थ्य परमतमनूद्य दूषयति—यत्तु विधित एवेति । "अध्यापयेत्" इति विधेयाध्यापनकर्तर्याचार्यपदप्रयोगात् अदृष्टकार्यार्थतया

१. Omitted अपि. क.

ह्यादौ; न हि व्रीहिपदमप्यलौकिकार्थम्। अङ्गान्वयोऽप्यसिद्ध एव, लौकिके हि पुरुषार्थता प्राङ्मुखतादेरिव भोजनाद्यन्वयेऽपि इत्यभिसन्धायोक्तम्—आचार्यत्वस्य यूपादिवदलौकिकत्वात्तदुत्पत्तिविधानं युक्तम्—इति।

श्रौतो वा आचार्यकरणविधिः उपनयन आचार्यकरणप्रयोजनक आत्मनेपदस्मृतेरध्यापनविधिरपेक्षिताचार्यकरणविधिरेव, न त्वयं प्रयोज्यव्यापाररूपाध्ययनविधिः। "एतयान्नाद्यकामं याजयेत्" इति तु कामिन एव विद्धयपेक्षेति याजनमनुवादो युक्त एवेत्युपनयनाङ्गकश्रौताचार्यकविधिसिद्धिः।

च विधिसम्भवात् तज्जन्यमदृष्टं तत्पदवाच्यमित्येकं मतम्, "उपनीय" इति क्त्वातोऽध्यापनाङ्गत्वावगमात् अदृष्टकार्यार्थमेवाङ्गापेक्षेत्यदृष्टमेव साङ्गाध्यापनसाध्यमाचार्यत्वमिति मतान्तरम्। तत्र चाद्यमदृष्टार्थत्वनिश्चयात् प्राग्विध्यसिद्धेरयुक्तम्, वृत्त्यर्थतयाप्राप्तस्य फलान्तरानिश्चये विध्यवगमायोगात्। तदवगमेऽपि तज्जन्यादृष्टवाचिताचार्यपदस्य न स्यात् प्रोक्षणादिविधाविव व्रीहिपदस्य, कर्तृवाचितयैव प्रसिद्धत्वात्। द्वितीयमप्यविधेयेऽध्यापनेऽङ्गत्वासिद्धेरयुक्तम्, भोजनाद्याश्रितप्राङ्मुखत्वादेरिव पुरुषार्थतापत्तेः। तेनालौकिकत्वसाधनपूर्वकत्वात्तदर्थाध्यापनविधेर्युक्तं ग्रन्थे तथैव तत्प्रसाधनमित्याह—इत्यभिसन्धायोक्तमिति।

एवं प्रकरणोक्तमुपपाद्य विवरणमतानुसारतोऽपि आचार्यकविधिसमर्थनार्थमाह—श्रौतो वेति। सम्माननसूत्रगताचार्यकरणपदेनोपनयनमेवाचार्यकरणप्रयोजनकं निर्दिश्यते; तत्र वर्तमानान्नयतेरात्मनेपदं स्मृतमित्यात्मनेपदयुक्तोपनयनविधिना आचार्यत्वफलकोपनयनविध्यवगमे "तमध्यापयेत्" इति तदुपरितनवाक्यं तदपेक्षितस्मृत्यवगतस्य[स्व]द्वारभूताचार्यकरणाध्यापनविधायकमेव स्यात्, नाध्यापनमात्रविधायकम् "तम्" इति तदेकवाक्यत्वावगमादित्यर्थः। ननु "एतयान्नाद्यकामं याजयेत्" इतिवत् प्रयोज्यव्यापारविधिनैवार्थप्राप्तत्वात्प्रयोजकव्यापारस्याविधेयत्वादित्याह—न त्वयमिति। अयमिति पूर्वोक्तापेक्षितविधिरूपविशेषपरः। तत्राप्यपेक्षितविधिबलेनैव श्रुतत्यागेनाश्रुतविधिः, श्रुतस्यैवापेक्षितत्वे तत्त्यागशङ्कापि नेत्याह—एतयान्नाद्येति। ननु अध्यापकफलाध्यापनविधौ "णिचश्च" इत्यात्मनेपदापत्तेः परस्मैपदश्रुतिरतत्फलतां गमयेदिति शङ्कानुवादेन तत्स्मृतेरतद्विषयतां तदपवादक-

१. पुरुषधर्मता. क.
२. Omitted याजयेत्. ख.
३. सिद्धयपेक्षेति. ख.
४. र्यकरणविधि. क.

न च "अध्यापयेत्" इति परस्मैपदान्नाचार्यकफलता, कर्त्रभिप्राये "णिचश्च" इत्यात्मनेपदापत्तेः इति वाच्यम्, कर्त्रभिप्रायेऽपि ण्यन्तादिङः "बुधयुध" इत्यादिना विशेषतः परस्मैपदविधेः। वृत्तिश्च "अणावकर्मकात्" इति प्राप्तेरकर्मकेष्वचित्तवत्कर्तृकार्थतामाह, नेङि। न च इङि गत्यर्थे सूत्रम्, "माणवकमध्यापयति" इत्युदाहरणात्, चलनार्थसूत्राच्च प्राप्तेः। ननु क्त्वातोऽङ्गता कथञ्चिदस्तु, न त्वात्मनेपदादङ्गता; आचार्यकरणे ह्यात्मनेपदमकर्त्रभिप्राये स्मृतम्। आचार्यकविध्यङ्गं चोपनयनं कर्तृरूपाचार्यगतफलजनकं स्यात्। मैवम्; क्रियाफलं तदुच्यते, यत्कारकावस्थायां जात-

प्रदर्शनेन प्रदर्श्यपरस्मैपदाविरोधमाह—न चाध्यापयेदिति। ननु "अचित्तवत्कर्तृकार्थोऽयमारम्भः" इति वृत्तिग्रन्थविरोधात् न चित्तवत्कर्तृकाध्ययनार्थेङ्विषयापवादार्थता बुधयुधस्मृतेरित्याह—वृत्तिश्चेति। सा वृत्तिरण्यन्तावस्थायां चित्तवदचित्तवत्कर्तृयोग्यनश्यत्याद्यकर्मकधातुष्वेवाचित्तवत्कर्तृकार्थतामाह; चित्तवत्कर्त्रवस्थायाम् "अणावकर्मकाच्चित्तवत्कर्तृकात्" इत्यनेनैव सूत्रेण परस्मैपदप्राप्तेरस्मिन् सूत्रे तत्पाठानर्थक्यापत्तेस्तत्परिहारार्थमचित्तवत्कर्तृविषयतोक्तेः। तेन सकर्मकाध्ययनार्थेङि बुधयुधसूत्रेण परस्मैपदप्राप्त्युक्तेः न वृत्तिविरोध इत्यर्थः। ननु बुधयुधसूत्रपठितेङ्धातुर्गत्यर्थः कस्मान्न स्यादित्यत्राह—न च इङि गत्यर्थे सूत्रमिति। गत्यर्थस्य आययतीतिरूपमिति व्याख्यातृसङ्ग्रहोऽध्ययनार्थस्यैवेति नान्यः शङ्कनीय इत्यर्थः। "निगरणचलनार्थेभ्यश्च" इति सूत्रान्तराद्गत्यर्थात्तत्प्राप्तेश्चेहान्य एव ग्राह्य इत्याह—चलनार्थेति। समानकर्तृकतादिव्यवधानेन क्त्वोऽङ्गतोपस्थापकत्वमङ्गीकृत्य आचार्यकरणस्मृतात्मनेपदस्य तदशक्तिमकर्त्रभिप्रायविषयतया परोद्भावितां चोदयति—ननु क्त्वातोऽङ्गतेति। परिहरति—मैवमिति। आचार्यत्वफलापेक्षया तावदुपनयनस्य कर्त्रभिप्रायफलत्वं न शङ्कार्हम्, कारकावस्थागतस्यैवेप्सिततया श्रमादिविलक्षणस्य कर्त्रभिप्रायतया विवक्षितत्वादुपनयनकारकत्वस्य च तत्कालेऽतीतत्वात्। न चैवमपि कर्तृनियतकर्माश्रितफलजनकाधानादिवदुपनयोऽप्यङ्गत्वादुपनेतृनियताङ्गयनु-गुणकर्मासत्तिफलत्वात्तत्कर्त्रभिप्रायफलक इति वाच्यम्, दृष्टमात्रस्य तस्य भङ्गित्वात् स्वरूपमात्रेण दीर्घकालानुवृत्त्यङ्गयुत्पत्त्यननुगुणत्वात् तदुत्थसंस्कारस्यैव स्थिरस्याङ्गयनुगुणतयोपेयत्वात् स एव कारकावस्थागतोऽनुज्ञेयः; स तूपनेयवर्त्यैव, नाहवनीयादिवत् कर्तृनियतः; उपनेयनियतोपकारस्यापि भूयसो वक्ष्यमाणत्वात्; तेनाकर्त्रभिप्राय-

मीप्सितं च। न चोपनयनात्कारकावस्थायामाचार्यकरूपफलोत्पत्तिः। उपनेये तु कारकावस्थायामेव संस्कारः, ईप्सितश्चासौ इति कर्मगतमेवात्र फलमित्यकर्त्रभिप्रायतैव। "स्वर्गकामो यजेत" इत्यत्राप्याख्यातोपसन्दानात् ब्राह्मणतर्पणादिपर्यन्तस्य यज्यर्थस्य फलमपूर्वं कारकावस्थायां जातमेव। स्वर्गः परं न क्रियाफलमिष्यते। एवं लोकप्रयोगे सर्वत्रानुसन्धेयम्। यत्तु—एकस्यैव "उपनयीत" इत्यस्य वैदिकपदस्य साधुत्वं कर्त्रभिप्रायाकर्त्रभिप्रायलक्षणद्वयेन—इति, तन्मन्दम्; यदि उपनेतुपनेययोः स्वफलार्थम्—यदा माणवकोपयोगेनोपनयने प्रयुज्यते, तदा कर्त्रभिप्रायलक्षणतः साधुता; यदा त्वाचार्योपयोगेन, तदा अकर्त्रभिप्रायलक्षणतः—तर्हि

तायुक्तैवेत्यर्थः। ननु कारकावस्थागतस्यैवात्मनेपदनियन्तृत्वे यजेतेत्यात्मनेपदं न स्यात्; स्वर्गादेस्तावत्तदवस्थत्वं नास्ति; न च नियोगस्य, यागोत्तरकालाङ्गसाध्यतया यागानन्तर्यायोगादिति लोकवेदव्यवहारोच्छेदः स्यादिति शङ्कां परिहरति-स्वर्गकामो यजेतेत्यत्रापीति। आख्यातप्रयोगे कृतिविषयावस्थधात्वर्थधीनियमादिष्टफलावच्छेदेन च तद्विषयत्वधीरिति तज्जनकावस्थसाङ्गधात्वर्थवृत्तिस्तत्र धातुरित्यङ्गानन्तरजस्यापि कारकावस्थाश्रितत्वं स्यादेव; स्वर्गस्यैव तदभावात्तन्नियन्तृत्वासिद्धिरित्यनयैव दिशा लोके वेदे चोहनीयमित्यर्थः। केचित्तु कारकाकारकदशोत्पत्तिभेदानुद्भावनेन फलद्वयापेक्षया लक्षणद्वयेनाप्यस्य साधुत्वं द्वितीयाया इवेप्सितानीप्सितलक्षणद्वयेनाहुः। तदनुवदति—यत्त्वेकस्यैवेति। एकस्य सकृत्प्रयुक्तस्येत्यर्थः। प्रयोगभेदेनैव लक्षणद्वयविषयत्वं स्यात् नान्यथेति विरोधसूचनार्थस्तदनुवादः। वैदिकत्वं तदुपपादकम्। तन्मन्दमिति दूषयति—यद्युपनेतुपनेययोः स्वफलार्थमिति। प्रयोक्तृत्वावस्थाभेदापेक्षया व्यवस्थया लक्षणद्वयं साधुत्वे हेतुः तदा सकृत्प्रयुक्तं पदं तत्कालावस्थाभेदेन भिन्नार्थं व्युत्पत्तिविरुद्धमाश्रितं स्यात्, पदप्रवृत्तिभेदं विना साधुत्वे व्यवस्थानुपपत्तेः। यदि पुनर्व्युत्पत्त्यबाधार्थं नित्यमेवोभयप्रयोजनमिति सहैव लक्षणद्वयस्य साधुत्वं नियच्छेत्, तदा बहुविषयतयावश्यंभाविकर्त्रभिप्रायलक्षणेनैव साधुत्वसिद्धौ लक्षणान्तरारम्भानर्थक्यापत्तिरित्यर्थः। अधिकारशास्त्रस्यैव तन्निमित्तावृत्तिकस्य वैकल्पिकाङ्गापेक्षया कर्त्रशक्त्यपेक्षया च नानार्थत्वम्, नावृत्तिहीनविनियोगशास्त्रस्य; तस्याप्यौपादानिकप्रयुक्तवृत्त्यपेक्षया, नाभिधानावस्थापेक्षयेति नेह तदाश्रयणीयमिति

१. लोकवेदप्रयोगे. क.

सकृत्प्रयुक्तं पदं कालावस्थाभेदेन नानार्थं स्यात् । अथ नित्यमेवोभयार्थम्, तदा कर्त्रभिप्रायतयैव सिद्धमात्मनेपदमिति व्यर्थं लक्षणान्तरं स्यात् । शाब्दप्रक्रियाविरुद्धश्चायं प्रकारः । नन्वङ्गत्वे सत्युपनयनजन्यसंस्कारः प्रयोगापवर्गी स्यात्; पुरुषार्थसंस्कारान्तर्भावश्च संहितासु न दृश्येत । मैवम्; "द्विजातीनामध्ययनमिज्यादानम्" इत्यादिस्मृतेः पुन-

भावः । सूत्रव्याख्यातृसम्मत्यभावाच्च लक्षणद्वयसमावेशो नोपेय इत्याह—शाब्दप्रक्रियाविरुद्धश्चेति । ननु स्वपक्षेऽप्यङ्गजन्यः संस्कारः कर्त्राश्रितोऽप्यग्न्यादिसंस्कारवत् प्रयोगापवर्गी स्यादिति कर्त्रभिप्राय एवेत्यतद्विषयलोक्तिर्मानहीनेति चोदयति—नन्वङ्गत्वे सतीति । गर्भाधानादिपुरुषार्थसंस्कारमध्यपाठश्च श्रुतिषूपनयनस्याङ्गत्वेऽनुपपन्न इत्यङ्गत्वपक्षे दूषणान्तरमाह-पुरुषार्थसंस्कारेति । परिहरति—मैवम्; द्विजातीनामिति । स्यादेतदेवं प्रयोगापवर्गित्वे, तत्तु स्मृतिबलाद्यावज्जीवानुवृत्त्यवगमान्नास्तीत्यर्थः । ननु कथं स्मृतेः श्रौताङ्गत्वानुषङ्ग्यर्थविरोधित्वम्, मूलप्रमाणाभावात्? उक्तं च—श्रौतप्रयोग एवाचार्याद्यर्थस्येतरकालानुवृत्तौ हेतुः, न लौकिक इति । उच्यते—अधिकारश्रुतिस्तावदध्यापनविधावपि नास्ति, अनियोगफलत्वादाचार्यत्वस्येत्युक्तम् । तेनार्थबललब्धस्तत्राप्यधिकार इति स्थितम् । स चार्थो दक्षिणादिलाभान्ताचार्यत्वम्; अर्थलाभश्च अर्थबोधाधिकारान्ताध्ययनविध्यधिकार्यध्येत्रधीनः; अर्थबोधश्च स्वाध्यायार्थविषयस्वकर्तव्यप्रमितिरूपोऽधिकारकर इति तदनुष्ठानान्तः; तेन तत्सर्वोपकारकत्वधीगर्भमेवोपनयनस्याध्यापनशेषत्वमवधार्यते; न श्रुतिमात्रात्, साधिकारनिरधिकारबुद्ध्यधीनत्वाच्छेषतायाः । न चैवमन्तरङ्गाध्ययनशेषत्वमेवास्तूपनयनस्येति वाच्यम्, श्रुत्यवगताध्यापनसम्बन्धद्वारतयैवाध्ययनसम्बन्धोपस्थितेः, अध्यापनाधिकारप्रयुक्ताध्ययनानुष्ठानधीपूर्वकत्वाच्चाध्ययनविध्यधिकारस्य; न हि द्रव्यार्जननियमविधाविव द्रव्यार्थप्रवृत्तस्य, अर्थज्ञानार्थप्रवृत्तस्याधिकारलाभोऽध्ययनविधौ, विधिज्ञाप्यार्थतात्पर्यावधारणात् प्राक् तदर्थप्रवृत्त्ययोगात् । विधिश्च तात्पर्यज्ञापकोऽन्यो नास्तीति अध्यापनाधिकारधीरेव पूर्वभाविनीति तदङ्गमेवोपनयनमुपेयम् । नन्वेवमध्ययनादिक्रियानिर्वृत्तिमात्रेणास्तु तदुपकारकत्वमुपनयनस्य, तदुत्थसंस्कारस्तु शेष्यपवर्गान्त एवाङ्गत्वे स्यात् । मैवम्; शेषिनिर्वृत्तिद्वारतयापि अध्ययनस्योपनयनसम्बन्धे ह्युपनेयगतसंस्कारस्यापि तद्द्वारकमेव तन्निर्वर्तकत्वमिति संस्कृतकर्तृकाध्ययनसाध्यमेवाध्ययनापूर्वं स्ववाक्येनावगतमिति संस्कारस्यापि तदपूर्वनिष्पादकत्वमनिवार्यम्; 'ममेदं कर्त-

१. तथा. क. २. अनर्थकं विधानान्तरं. क.

रुपनयनान्तरास्मृतेश्चोपनयनसंस्कार इज्याद्यधिकारानुवृत्तावनुवर्तेत इति कल्प्यते। अत[1] एव पुरुषसंस्कारैस्तुल्यत्वात्तदन्तर्भावः। आचार्यकविध्यर्थता तु तदुपकारजननोत्तरकालमनुवृत्तावपि न विरुद्धा। नन्वध्यापने धनायन्नधिकारी, नाचार्यीबुभूषुः। मैवम्; धनायन्नध्यापनोपायेनाचार्यीबुभूष-[2] तीति तदवस्थस्यैवाधिकारान्तरम्, धनमनिच्छन्नपि वा शिष्योपास्यता-

व्यम्' इत्येवंरूपस्वाध्यायार्थयागाद्यपूर्वविषयप्रमितिरूपार्थज्ञानञ्चाध्ययनापूर्वस्याध्येत्रधिकारमापादयतीति यावज्जीवमुपनयनसंस्कारानुवृत्तिरध्यापनाधिकारासिद्धैव; अन्योपकारकत्वमन्यशेषस्यापि प्रसङ्गविषये प्रसिद्धमेव; तदुपरितनेज्यादिष्वप्यग्नीषोमीयार्थानुष्ठितयूपधर्माणां सवनीयादिष्विव नानुपपन्नम्। न चाधिकारभेदादिहानुपपत्तिः, क्रत्वर्थकृतवरणस्य याजनापूर्वनिष्पत्ताविवाविरोधात्। एवं न्यायप्राप्तिसूचनार्थं न्यायवित्स्मृतिवचनमुदाहृतमिति मन्तव्यम्। पुनरुपनयनान्तरास्मृतेश्चेति। परस्मैपदयुक्तोपनयनाभाव उक्तः। यदि तादृशो विधिः स्यात्, तदा तत्संस्कारविनियोगार्थेयं स्मृतिः स्यात्; तदभावान्न्यायप्राप्तिसूचनार्थेवेत्यर्थः। अथवा अन्यार्थोत्पन्नसंस्कारस्य कार्यान्तरविनियोगपरश्रुत्यनुमापकतया विध्यर्थैवास्तु; तत एव स्थिरत्वासिद्धिः। एवं संस्कारान्तरसहपाठश्चोपपन्न इत्याह—अत एव पुरुषसंस्कारैरिति। ननु संस्कारस्य स्वभावप्राप्तशेष्युपकारावधित्वबाधापत्तेः तदुत्तरकालानुवृत्त्याश्रयणमयुक्तम्; तत एव स्मृतेर्विधिपरत्वाश्रयणमप्ययुक्तमिति संस्कारमुखेन स्मृतिः स्वयमेवोपनयनान्तरविध्यर्थाश्रीयतामित्यत्राह—आचार्यकविध्यर्थता त्विति। तदवधित्वस्वभावत्वं न प्रमाणसिद्धम्; अनुवृत्त्युपलब्ध्यभावादेवाङ्गान्तरेषु तद्विनाश्यत्वमिष्यते; न तदभावेऽङ्गत्वविरोधात्, दृष्टकार्येष्वनुवृत्तिदर्शनात्। तेनेहोपनयनसंस्कारवदध्येतृगतानुष्ठानान्तार्थबोधाध्ययनफलदर्शनात् स्वाधिकारनिर्वाहकतया तस्याचार्यकविध्यपेक्षितत्वाच्चेहानुवृत्तिरविरुद्धेत्यर्थः। ननु श्रुताधिकारधनार्जनविधिप्रयुक्ताध्यापनप्रतीतौ नाधिकारान्तरकल्पनया तद्विधिरिति नोपनयनस्याङ्गतापीति चोदयति—नन्वध्यापने धनायन्निति। परिहरति—मैवम्; धनायन्निति। यथोक्तविधया विधेरवर्जनीयत्वादधिकारान्तरकल्पनायाश्चावश्याश्रयणीयत्वात् प्राप्ताधिकारप्रतीतिर्गुणफलाधिकार इवाश्रयतयानुगृह्यताम्, "आचार्याय प्रियं धनमाहृत्य" इत्यादिना तद्विषयहेतुतया तदन्तर्भावसम्भवात्। "आचार्यदेवो भव" इत्यादिविधिसिद्धोपास्यत्वकामस्यार्जनाधिकारनिरपेक्षाधिकारपरतया वा तदुपपत्तिः; आचार्यस्य

१. तस्य च पुरुष. क.   २. धनायन्न(न्ना)ध्यापनोपायेन नाचार्यी. ख.

मिच्छन्नाचार्यीबुभूषुरेव ; यशस्यन्नप्याचार्यीबुभूषुतावस्थोऽन्य एवाधिकारीति—उक्तम् "अर्थादाचार्यीबुभूषोरेवाधिकारः" इति । एवमुपनयनस्य स्थिते साधिकाराचार्यकविध्यङ्गत्वे द्वारोपनेयासत्तिद्वारेणाध्यापनोपयोगिकर्मापेक्षायां सन्निधिश्रुतं स्वाध्यायाध्ययनं कर्मावगतम् ; अध्ययनादेवाध्यापनरूपतासिद्धेस्तदुपयोगिद्वारलाभः । एवं च स्वाङ्गोपनयनप्रयुक्तिर्द्वारभूताध्ययनप्रयुक्तिपूर्विका, न तु तत्पूर्विकाध्ययनप्रयुक्तिरिति नाङ्गेन स्वद्वारं प्रयुक्तं स्यात् इत्यनुयोगः । न चाध्ययनाङ्गप्रयुक्त्यनुयोगः, विहिताध्ययनविशेषदेहनिवेशादध्ययनसन्निपातिनामनध्यायादरादीनां प्रयुक्त्यन्तर्भावो दुर्वारः । आरादुपकारि त्वध्ययने नास्त्येव । किञ्च स्मृतौ "शिष्यम्" इत्युक्तेः साङ्गाध्ययनप्रयुक्तिः । शासनाद्धि शिष्यः, हिते प्रेरणं च शासनम् ; हितं च साङ्गमिति साङ्गप्रयुक्त्या विधिप्रयुक्तिः । स्मृत्यन्तरे च व्यक्तो विधिः, साङ्गादाचार्यकं च व्यक्तम्—

"नाश्लीलं कीर्तयेत्" इत्यादिविधिप्राप्तयशःकामनयाप्यधिकारान्तरोपपत्तिः, तेनाङ्गतापीत्यर्थः । यथोक्ताधिकारभेदपरः प्रकरणग्रन्थोऽपीत्याह—इत्युक्तमर्थादाचार्यीबुभूषोरेवाधिकार इति । उक्ताधिकारभेदफलभूताङ्गत्वफलमनङ्गाध्ययनप्रयुक्तिप्रतिपादनार्थमाह—एवमुपनयनस्येति । यथोक्ताधिकारिभेदफलमुपनयनाङ्गत्वं तत्फलं तद्वारापेक्षाबलोपस्थाप्यं विहिताध्ययनस्याध्यापनशरीरनिवेशित्वमित्यर्थः । तच्छरीरनिवेशित्वाच्च परापादितानुपपत्तिनिराससिद्धिरित्याह—एवञ्च स्वाङ्गोपनयनेति । सा त्वनुपपत्तिः—उपनयनस्याध्यापनाङ्गत्वाङ्गीकारादध्ययनस्य तदनङ्गीकारादतत्प्रयोज्यत्वेऽङ्गस्यार्थमुपनयनप्रयोज्यत्वं स्यादिति साधनस्य साध्यप्रयोक्तृत्वं स्वपक्षे विपरीतं स्यादिति । तन्निरासस्तु—अध्ययनस्वरूपप्रयोक्तृत्वं तावदध्यापनस्य स्वभावसिद्धम् ; अत्र द्वाराकाङ्क्षायां विहिताध्ययनविशेषे द्वारतया गृहीते तस्यैव स्वरूपान्तर्भावोऽपीति करणप्रयुक्त्यन्तर्भूतैव विहिताध्ययनप्रयुक्तिः ; तदुत्तरकाला तूपनयनप्रयुक्तिरिति । नन्वेवमप्यध्ययनाङ्गानां तदन्तर्भावासिद्धेस्तत्प्रयुक्त्यभावाद्विध्यसिद्धिरिति चोद्यं परिहरति—न चाध्ययनाङ्गेति । सर्वस्यापि तदङ्गस्य करणोत्पत्तिमात्रोपक्षीणत्वाद्यथाश्रुतोत्पत्तिनियतत्वाच्चादृष्टार्थोत्पत्तेर्नाङ्गप्रयुक्तिशङ्कापि इत्यर्थः । शिष्यशब्देन स्पष्टीकृतं चैतदित्याह—किञ्चेति । उदाहृतस्मृतेर्लक्षणपरमुखत्वादस्पष्टं विधिपरत्वम् ; स्पष्टविधिकञ्च स्मृत्यन्तरमस्ति, तत्राङ्गप्रयुक्तिश्च स्पष्टेत्याह—स्मृत्यन्तरे चेति ।

१. द्वारानुसारेणासन्नस्या. क.
२. प्रवृत्ति. क.
३. अनध्यायादादीनां. ख.
४. साङ्गाध्ययन. क.
५. व्यक्तोऽपि. क.

"उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥" इति ।

इहोपनीयाध्यापको गुरुभेद आचार्य एवोक्तः, "आचार्यः श्रेष्ठो गुरूणाम्" इति स्मृतेः । शौचाचारानिति[1] च भिक्षादिशिक्षकताप्याचार्यकहेतुरुक्त इति साङ्गाध्ययनप्रयुक्तिः; तत्प्रयुक्तिरेव तद्विधिप्रयुक्तिः । एतेन परोक्तं निरस्तम्—विधेरध्यापनानुपायस्याप्रयुक्तेः साधकनरापेक्षायामधीतादर्थबोधोत्पत्तेरर्थबोधार्हो नियोज्यः—इति; अर्थपरत्वे ह्यर्थबोधार्हो नियोज्यः, ततश्चार्थपरता— इत्यन्योन्याश्रयम् । न च करणान्वयार्थो

ननु विधिमात्रस्य व्यक्तत्वेऽप्याचार्यसम्बन्धानुक्तेः कथं साङ्गादाचार्यकं च व्यक्तमित्युक्तमित्यत्राह- इहोपनीयेति । गुरुपदस्य बह्वर्थत्वात्तद्विशेषाकाङ्क्षायां विधेयबलोपनेयाचार्यार्थता व्यक्तैवेत्यर्थः । गुरुत्वाधिक्याच्च तद्धीरेव स्वत इत्याह— आचार्यः श्रेष्ठ इति । साङ्गप्रयुक्तेर्व्यक्ततामुपपादयति — शौचाचारानिति । आचार्यकसाधनोक्तवेदाध्यापनवत् "शिक्षयेत्" इति विध्युक्तेराचारशिक्षणसहितस्यैवाध्यापनस्य साधनत्वं गम्यत इत्यर्थः । एवं साङ्गाध्ययनप्रयुक्तिः, तावतैव विधिप्रयुक्तिः सिद्धेत्याह—एवं साङ्गध्ययनेति । एवं चाङ्गाप्रयुक्तिमूलविध्यप्रयुक्त्या द्रव्यार्जनवद्विषयभेदोपस्थाप्यार्थबोधार्हनियोज्यकल्पनापादनेनाध्ययनविधेः विध्यन्तरप्रयोज्यत्वासम्भवः परापादितो निरस्त इत्याह — एतेनेति । यथोक्तनियोज्यप्राप्तिरन्योन्याश्रयदुष्टेत्याह — अर्थपरत्वे हीति । नन्ववश्याश्रयणीयोऽत्र नियोज्यः करणान्वयाङ्गीकारात्, तस्य च कार्यशेषतोपगमात्; न हि साधनमात्रं करणम्, कार्यार्थप्रवृत्तकर्तृव्यापारविषयस्यैव करणत्वान्नियोज्याधीनत्वाच्च तस्य । न चान्योन्याश्रयापत्तिः । निषेधविधेर्निषेध्यानुष्ठाननिमित्तप्रत्यवायाकल्पकत्वेऽपि तत्परिहारार्थिनः प्रायश्चित्तविधौ नियोज्यत्वमभ्युपेत्य तद्बलात्तत्कल्पनाङ्गीकारात्तत्तुल्यत्वाच्चार्थबोधार्हाङ्गीकारस्येत्याशङ्क्य करणत्वं तावन्न नियोज्यनिर्वाह्यमित्याह—न च करणान्वयार्थेति। नियोज्यानङ्गीकारेऽप्यधिकारिणोऽङ्गीकारात्तावतैव करणस्य कार्यार्थत्वनिर्वाहात् न नियोज्यापेक्षेत्यर्थः । प्रत्यवाय-

१. नितिभिक्षा. ख. २. प्रवृत्ति. क.

सनियोज्यता, साधिकारतयापि हि तदन्वयात्। पापमोकार्थिनस्तु श्रुतौ निषेध्यात् पापोत्पत्तिर्युक्तेत्याचार्यकविधिप्रयुक्तोऽध्ययनविधिः । क्रतुविधयस्तु विद्याङ्गकाः स्वाङ्गोपायेऽध्ययने द्राङ्न प्रयोजकाः; उपायात् कार्यस्याभ्यर्हितत्वादङ्गकार्यत एव द्राक् प्रयुक्तिः । तथा प्रयोज्यापेक्षयैवाध्यापनविधेः प्रयुक्तिः । प्रयोज्यफलाद्यपेक्षया[1] क्रतुविधीनां विलम्बितता। नन्वेवमाचार्यकविध्यङ्गमध्ययनं स्यात्, विधिप्रयोज्यतया विधेयत्वात्। मैवम्; विधिगृहीतं सद्विनियोगादङ्गम्। न च प्रयोज्यतया विधिस्पर्शो ग्रहणम्, आधानादेरपि ग्रहणापत्तेः । पश्वेकत्वमपि विधिना गृहीतं साधनाव[2]-

परिहारार्थिप्रायश्चित्तविधिनियोज्यवैषम्यमाह — पापमोकार्थिनस्त्विति । निषेध्यक्रियाकर्त्रनुवादेन तावत्सर्वत्र प्रायश्चित्तविधिः । तत्कर्ता च तत्र नियोज्यः; प्रायश्चित्तपदं च प्रत्यवायनिवर्तककर्मवाचीति तन्नियोज्यस्तन्निवृत्त्यर्थ्यैवार्थादिति निषेध्यक्रियोत्थप्रत्यवायहानार्थिपरस्तत्कर्त्रनुवाद इति निषेध्यानुष्ठानस्य प्रत्यवायकरत्वमप्याक्षिप्यैव तद्विधिर्विश्राम्यति । इह त्वर्थपरत्वकल्पकं किञ्चिन्नास्तीति वैषम्यमित्यर्थः । तेनान्यप्रयुक्तत्वं युक्तमित्याह — इत्याचार्यकविधिप्रयुक्त इति । नन्वन्यप्रयोज्यत्वे क्रतुविधिप्रयोज्यत्वं किमिति नाश्रीयत इत्याशङ्क्याचार्यविधेः शीघ्रत्वमाह—क्रतुविधयस्त्विति । नन्वाचार्यकविधिप्रयोज्यत्वे तदङ्गतापि स्यात्; स्वोद्देशप्रवृत्तकृतिसाध्यत्वापादनं हि तस्य तत्प्रयोक्तृत्वम्, तत्साध्यतया तदुपकारकत्वमेव चाङ्गत्वमित्यङ्गतया प्रयोजनान्तरानर्हत्वादर्थपरत्वहानिश्चेति चोदयति — नन्वेवमिति । विधेयत्वादिति । विध्यापाद्यस्वकृतिजन्यत्वादित्यर्थः । परिहरति—मैवं विधिगृहीतमिति । विधिसाधनत्वाधीनमङ्गत्वम्; तच्च विधिग्रहणपूर्वकविनियोगप्रमाणकम्; विधिग्रहणं चेह नास्तीति नाङ्गत्वमित्यर्थः । ननु प्रयोज्यत्वासिद्धौ विधिग्रहणमवश्यम्भावीत्यत्राह— न च प्रयोज्यतयेति । क्रतुविधिप्रयोज्यत्वं ह्याधानारम्भणीययोरप्यङ्गीक्रियते, नाङ्गत्वम्; क्रतूपयोग्यग्न्यादिस्वरूपप्रयोज्यत्वमेव हि तत्र क्रतुप्रयोज्यत्वम्, न साक्षात्क्रतुकृतिसङ्क्रान्त्या; तथैवाचार्यकविधिप्रयुक्तिरपीति नाङ्गत्वापत्तिरित्यर्थः । ननु पश्वेकत्वादौ विनियोगो नास्ति, अविनियुक्तप्रातिपदिकार्थगतत्वात् । तच्च[त्र] करणत्वैकत्वयोर्युगपद्विभक्त्युक्तत्वेनान्योन्यानन्वयात् ततश्च विनियोगनिर्वाह्यग्रहणमपि नास्तीत्यभिधानावगतसंख्यावच्छिन्नप्रयोगविधिमात्रकृतं तदङ्गत्वमित्यध्ययनस्यापि प्रयुक्तिमात्रेणाङ्गत्वापत्तिरित्यत्राह—पश्वेकत्वमपीति । विभक्त्यर्थस्याप्यन्वया[व्य]तिरिक्तस्य कार्यान्वया-

१. फलाद्यपेक्षयैव. ख. २. साधनस्थतां. ख.

स्थास्थतां नीतं वस्तुलिङ्गसचिवेनोपादानेनाङ्गं कृतम् । न चेदमपि विध्यगृहीतं लिङ्गमात्रादङ्गम् । न च णिच्छ्रुत्याङ्गम्, प्रयोज्यव्यापारस्यैव तच्छ्रुत्या साध्यत्वावगतेः । न चानधिकारं साधिकारादन्वयादङ्गम्; "अध्यापयेत्" इति द्वयानवगतेर्न द्वयान्वय इत्यनङ्गमध्ययनमध्यापनस्य । अस्मिन् प्रक्रमे पञ्चिका "मैवम्" इति । ऐक्येऽपि परिहारः—इति तदर्थः । पारार्थ्यमेवाङ्गता—इत्येवमैक्येऽप्युक्ते विनियोगात् पारार्थ्ये चोद्यवादिनोऽप्यनुमते प्रयुक्तितोऽङ्गत्वपरिहारसिद्धिरिति, "अतः प्रयोज्यं न चाङ्गम्" इत्यनङ्गत्वे स्थित एव विचारो गुरोरभिमतः; "सर्वो हि विधिरधिकारपर्यवसायी"—इत्यपि स्थिते ।

नन्वनुष्ठानार्थमधिकारापेक्षा; तच्च विध्यन्तरप्रयुक्त्या लब्धम् । मैवम्; विधौ

काङ्क्षिणो ग्राहकग्रहणमस्त्येव; तन्निर्वाहोऽपि विधिनैव साधनीभूतप्रातिपदिकार्थाश्रिततां नीत्वा विनियोज्यलिङ्गसचिवेन तदङ्गत्वापादनात् स्यादिति न कचिदपि प्रयुक्तितोऽङ्गत्वमित्यर्थः । नन्वेवमिहापि तद्वल्लिङ्गादेवास्त्वित्यत्राह—न चेदं विध्यगृहीतमिति । तद्ग्रहहेतोः सान्निध्यादेरभावान्न तत्साम्यमित्यर्थः । श्रुतिस्तर्हि हेतुरित्यत्राह—न च णिच्छ्रुत्येति । तस्याः सत्या अपि विपरीतसाध्यसाधनभावार्पकतयाध्ययनस्याध्यापनाङ्गत्वापादनसामर्थ्यं नास्तीत्यर्थः । नन्वन्वयावगमे साधिकारनिरधिकारव्यवस्थाप्यमस्तु शेषत्वमित्याशङ्क्य णिजर्थविशेषणतया तदेकतापन्नोऽत्र धात्वर्थः, पृथगुक्तयोरन्वयोक्त्यधीनं च श्रौतं शेषत्वमिति इह वस्तुतः शेषत्वार्पिका श्रुतिरेव नास्तीति परिहरति—न चानधिकारमिति । पञ्चिकाग्रन्थस्यार्थाप्रतिपत्तेः तदनुवादेनार्थमाह — अस्मिन् प्रक्रम इति । इहाङ्गत्वं पूर्वपक्ष्यभिमतं राद्धान्ती निराकरोति—इत्येकदेशिमतम्, तन्न स्वाभिमतमिति प्रकटयितुम्—अनङ्गत्वे स्थित एवेत्युक्तम् । अनङ्गत्वेऽपि पूर्वपक्षसम्भावनार्थं सर्वविधीनामधिकारपर्यवसायित्वस्थितिरपि विचारविषयापादकतयोक्ता राद्धान्तहेतुतया च ।

नन्वनुष्ठानार्थाधिकाराकाङ्क्षा इत्यन्यप्रयुक्तिविषये न स्यादिति पृच्छति—नन्वनुष्ठानार्थमिति । परिहरति-मैवं विधौ हीति । स्यादेवमनुष्ठानमात्रार्थत्वे, विधिस्वभावभूतपुरुषार्थत्वप्रयुक्ता त्वत्र तदाकाङ्क्षेत्यन्यप्रयुक्तिविषयेऽपि स्यादेवेत्यर्थः । ननु ग्रन्थस्याधिकारपर्यवसायिपदस्य लोकप्रसिद्धविधिस्वभावभूतपुरुषार्थत्वपरत्वाङ्गीकारेण तत्पर्यवसायित्वस्यान्यप्रयुक्तविषयव्यापित्वोपगमेऽधिकारदोषापत्तिरनिवार्या;

१. व्यवहार. क. २. रिति-प्रयोज्यं. ख. "अतः प्रयोज्यं न चाङ्गम्" इति बृहती.

हि लिङादयः; विधिश्च पुरुषार्थ एव प्रथितो लोके । अयं भावः—विधिर्हि प्रवृत्तिहेतुः कार्यरूपः; कार्यं च कृतिप्रयोजनं पुरुषार्थः; तत्प्रयोजनता च स्वसाधने नैश्वर्यहेतुतया[1]; तद्धेतुतैव प्रवृत्तिशक्तिरिति[2] विधित्वायाधिकारापेक्षान्यप्रयुक्तेऽपि । क्रियाकार्ये च लौकिके विधौ पुरुषार्थता

लोकप्रसिद्धं हि विधेः पुरुषार्थत्वमिष्टसाधनत्वमेवेति नापूर्वस्य विधित्वं स्यात् । 'अपूर्वस्यापि लोकवत्फलसाधनतापेक्षे प्रवर्तकत्वे प्राधान्याभ्युपगमहानिः, परप्रयुक्तानुष्ठानस्य तदाकाङ्क्षाहानिश्च' इत्येवं वदतो ग्रन्थकारस्य कोऽभिप्राय इत्यपेक्षायामाह—अयं भाव इति । प्रवृत्तिहेतुतया लिङाद्यर्थभूतस्य यदि स्वरूपतया पुरुषार्थत्वमुपगतं स्यात्, तदेष्टसाधनरूपतापत्त्या अपूर्वत्वहानिः; तत्स्वरूपन्तु कार्यमित्येव; तेन न तद्धानिरित्यर्थः । एवं तर्हि तदधिकपुरुषार्थत्वहानिरित्यत्राह—कार्यश्चेति । कृतिरनेन प्रयुज्यत इति कृतिप्रयोजनम्, कार्यरूपस्यापि कृत्युत्पत्तिहेतुत्वार्थं पुरुषार्थत्वमाश्रीयत इत्यर्थः । तत्र कः पुरुषार्थतोपयोग इत्यत्राह—तत्प्रयोजनतेति । यद्यपि कृत्युद्देश्यतया श्रुतिप्रमाणसिद्धत्वात् उद्देश्यान्तरं नापेक्षते, तथाप्यव्यापारतया साक्षात्कृत्यगोचरत्वात् स्वसाधने पुरुषं प्रवर्तयितुं स्वस्य पुरुषार्थत्वमापादयन् स्वयं सुखादिवत् पुरुषाश्रिततया 'मत्प्रयोजनसाधनत्वात् मदर्थम्' इत्येवंरूपं स्वसाधनैश्वर्यमापाद्यैव शक्नोतीत्यस्त्येवोपयोग इत्यर्थः । ननु प्रवर्तकत्वे सत्येवेदं स्वसाधनैश्वर्यापादनं विधिना कार्यम्, नान्यप्रयुक्तेनेति नाध्ययनविधिना तत्कार्यमित्याशङ्क्य अन्यतः प्रवृत्तिफललाभेऽपि तच्छक्तिरस्यापि लिङाद्यर्थतोपाधिः तदभिधेयतार्थमपेक्षिता, पुरुषविशेषं प्रति स्वसाधनैश्वर्यापादनमेव चाव्यापारात्मनो विधेः प्रवृत्तिशक्तिरित्यस्त्येवास्यापि तदापादनाकाङ्क्षेत्याह—तद्धेतुतैवेति । ननु लोकप्रसिद्धमेव विधेः पुरुषार्थत्वं ग्रन्थेऽभिहितम्; विधिश्च पुरुषार्थ एव प्रथितो लोके इति न त्विदं लोकप्रसिद्धमित्यत्राह—क्रियाकार्ये चेति । कार्यमित्येतद्विधेः प्रवृत्तिहेतुस्वरूपमुभयत्रानुगतम्; तस्य पुरुषार्थत्वश्चानुगतम्, तदधिष्ठाननानात्वकृतं तद्वैषम्यम्; लोके क्रियाधिष्ठानतया तदनुसारिफलसाधनत्वरूपं तत्; वेदे त्वपूर्वं तदधिष्ठानमिति प्रमाणमुखं वस्तुमुखं वा फलसाधनत्वं नान्तर्भवतीति उद्देश्यत्वरूपं कृतिप्राधान्यं साधनानुष्ठानापाद्यमिति तदनुष्ठातुस्तद्विषयपुरुषार्थसाधनत्वाधीनकार्यत्रिविधिसम्पादनशक्तं स्वयमेव सुखदुःखनिवृत्तितुल्यस्वभावं श्रुतिप्रसिद्धं तदाश्रितं स्यादिति स्वसाधनद्वारमेव तत् । एवं प्रकारभेदेऽपि प्रवृत्त्युपयोगिपुरुषार्थत्वं तुल्यमेवेत्यर्थः । यदि विधित्वायाधिकारा-

१. हेतुकतया. ख. २. प्रवृत्तिः शक्तिरिति. क. ख.

फलसाधनतया; वेदे स्वफलसाधनेऽपूर्वे कार्ये स्वप्रधाने स्वसाधनद्वारेणैव पुरुषैश्वर्यापादनात् पुरुषार्थतालाभः। विध्यन्तरेषु चानुष्ठानार्थेऽधिकारे लब्धे विधितासिद्धिः। इह त्वन्यतोऽनुष्ठाने लब्धे विधितार्थमेव पुरुषविशेषपर्यवसानाकाङ्क्षा।

तत्राचार्यमाणवकरूपनरद्वयैश्वर्यदर्शनादेकनरैश्वर्यपर्यवसाने च विधितासिद्धेः कतरनरपरता—इति चिन्ता; न तु विधेः कार्यस्य सम्बन्धिरूपत्वात् सम्बन्ध्यन्तरनरपर्यवसायित्वं मतम्। यदि हि स्वकार्ये बोद्धा सम्बन्धी, तर्हि नियोज्यपर्यवसानं स्यात्; अथ कृतिसमवायी सम्बन्धी, तर्हि कर्तृपर्यवसानं स्यात्। न चान्यतः कृतिसाध्यत्वे सिद्धेऽपि कृतिप्रधानत्वायाधिकारापेक्षा,

पेक्षा, तर्हि विधीनामपूर्वरूपत्वाविशेषे सति केन विशेषेणाध्ययनविधावेव तद्व्युत्पत्तिरुक्तेत्यत्राह—विध्यन्तरेष्विति। विध्यन्तरेषु कृत्याश्रयविशेषस्यापि कृत्युद्देश्यधीसिद्धत्वात्तत्प्रयोजनत्वसिद्धेः पृथक् तदाकाङ्क्षा नास्ति; इह तु कृत्युद्देश्यत्वोक्तौ कृत्याश्रयविशेषानुक्तेः प्रवृत्तिशक्तकार्याभिधानार्थमेव पुरुषविशेषापेक्षोक्तिर्युक्तेत्यर्थः।

एवं विषयं परिशोध्य तत्र संशयमाह—तत्राचार्यमाणवकेति। नरद्वयकृत्यधीनसिद्धेऽध्ययने द्वयोरपि स्वातन्त्र्यसम्भवात् विधेश्चैकाकाङ्क्षत्वात् विधिः कमधिकरोति इति संशय इत्यर्थः। केचित्त्वन्यथाधिकारपर्यवसानाकाङ्क्षामाहुः—विधेः कार्यत्वं तद्वाचिलिङादिसिद्धम्; कार्यञ्च पुरुषसम्बन्धीति तद्विशेषाकाङ्क्षीति। तन्मतं निरस्यति—न तु विधेः कार्यस्येति। कृतिनिरूप्यस्य तस्य कृतिगर्भ एव तावत्पुरुषसम्बन्धः। तत्र स्वकृतिसाध्यकार्यबोद्धृतया तत्सम्बन्धाभ्युपगमे सनियोज्यं कार्यमभिहितं स्यात्, नाधिकारान्वितम्; निष्पत्त्युपक्षीणसमवायिविशिष्टतयाभिधाने कर्त्रन्वितमिति नाधिकारान्वयोक्तिसिद्धिरित्यर्थः। ननु द्वेधास्ति कार्यस्य कृतिसम्बन्धः—कृतिजन्यतया कृतिप्रधानतया च। तत्रान्यविधिप्रयुक्त्या जन्यत्वमात्रं लब्धम्। तत्र मा भूत्पुरुषविशेषणाकाङ्क्षा, प्रधानत्वं तु नान्यप्रयुक्तिलब्धमिति तद्विशेषार्थमध्ययनविधेरधिकाराकाङ्क्षेति शङ्कां परिहरति—न चान्यतः कृतिसाध्यत्वे सिद्धेऽपीति। प्रयोजकविधिस्तावत्साक्षादध्यापककृतिप्रेरकः तद्द्वयवधानेनार्थान्माणवककृतिनिष्पत्त्यन्तः। तेन तत्प्रयुक्तकृतिसाध्यतया धीस्थोऽध्ययनविधिः स्वतोऽध्यापककृतिसाध्यतया भातीति उद्देश्यतापि तत्कृत्यैव शीघ्रं भानार्हा,

१. सिद्धे. क.

२. नापेक्षा. क.

३. यदि कार्यबोद्धा. क.

विधेराचार्यकृतिप्रधानत्वसिद्धेः । साधिकारविध्यतिक्रमाद्व्रात्यतेति तन्मुक्तिरधिकारान्तरपूर्विकेति न ततः साधिकारता । नन्वैश्वर्यपर्यवसानं स्वसाधनेऽप्यध्ययने सिद्धम् । सत्यम्; तदेव तु कस्य नरस्येति चिन्ता । ननु यन्नरैश्वर्यं प्रकारान्तरेणाध्ययने दृष्टम्, तदनुज्ञायात्मसाधनतयापि तन्नरैश्वर्यं लाघवादनुमानात्, न नरभेदबुभुत्सा । सत्यम्; प्रतीतत्वादुपनेयेऽर्थबोधस्य उपनेतर्यध्यापनासिद्धेर्दृष्टस्यैव नरद्वयगतेः सन्देहः ।

न तदुत्थाप्यान्यकृत्या; स्वज्ञात्रैव चोद्देश्यं स्यात्, नाज्ञेन माणवकेन—इत्याचार्यकृतिप्रधानत्वसिद्धेर्न तत्राकाङ्क्षेत्यर्थः । ननु वेदाध्ययननिवृत्तेर्व्रात्यतादोषकरतोक्तेः तत्परिहारफलत्वमध्ययनस्य सिद्धमिति तदर्थिनोऽधिकारसिद्धेर्न तज्जिज्ञासेत्यत्राह—साधिकारविध्यतिक्रमादिति । विधिप्राप्तानुष्ठानस्यातिक्रमस्यैव दोषकरत्वम्, अनधिकारविधेश्च न तत्प्रापकत्वमिति साधिकाराध्ययनविधिना तत्प्राप्तिं पूर्वभाविनीमपेक्ष्यैव तदतिक्रमोक्तदोषविशेषोक्तिर्नैयेत्यध्ययनलभ्यदोषनिवृत्तिरध्येत्रधिकारापादनशक्तापि पूर्वप्राप्ताधिकारापेक्षतया न स्वयमेव तदधिकारापादनार्हेत्यर्थः । ननु स्वोक्तविधयापि संशयो दुष्करः; अध्ययनमेव ह्यध्ययनविधेः साधनम्; तत्सम्बन्धिनरवत्यैव सः स्वनिमित्तमैश्वर्यमापादयेत्; माणवकसमवायि च तत्फलमिति तदधिकारपर्यवसायित्वसिद्धेरित्याक्षिपति — नन्वैश्वर्यपर्यवसानमिति । यावदुक्तं गृहीत्वा परिहरति—सत्यमिति । पुनराक्षेप्ता स्वाभिप्रायं विवृणोति—ननु यन्नरैश्वर्यमिति । क्रियोत्पत्त्यपेक्षयाध्येत्रध्यापकनरद्वययोगेऽपि तदुत्थफलमध्येतृवत्यैव वेदग्रहणपूर्वकतदर्थाधिगमरूपम्; स्वाश्रयाधिकारोपस्थापकविधिप्रयुक्ताधिकारजिज्ञासायां च दृष्टफलाधीनाधिकारानुवर्त्यैवा[व]दृष्टफलाधीनाधिकारश्च सुगमः गतपूर्वमार्गगमनवत्; तदभावे तु कस्यात्राधिकारयोग्यतेति न्यायैरन्विष्यानेकपुरुषयोगे तद्विशेषपरीक्षया विशेषं निर्धार्यान्यतराध्यवसायः प्रयाससाध्यः; तद्भावात्त्विहानायासेनैवाध्येत्रधिकारावगम इति न संशयावकाश इत्यर्थः । समाधत्ते — सत्यं प्रतीतत्वादिति । यद्यप्यध्ययनमात्रमालोच्यमानं नरद्वयगतफलं नोपस्थापयति तथाप्युपनीतकर्तृकत्वात्तस्योपनयनस्याप्यध्यापकवशत्वात्तदीप्सिताध्यापनसिद्धिरप्युपनयनमुखेन तत्फलमुपनीयते, तथोपनेयगतमपीति संशयोपपत्तिरित्यर्थः । ननूपनयनस्याध्यापनाङ्गत्वे सतीत्थं संशयः स्यात्, तत्तु त्रैवर्णिकस्य नित्यकर्तव्यतया स्मृतिप्राप्तमिति न काम्यविध्यङ्गमुपेयम्; तत्प्राप्तिः तदभावे वैदिककर्मभ्यः पतनस्मृतेः;

१. नेऽध्ययने. क.   २. तया तत्रैश्वर्यं. क. तत्रैश्वर्यं. ख.

नन्वसत्युपनयने पातस्मृतेस्तन्नित्यम्; न काम्यविध्यङ्गम्, नित्यानित्यसंयोगदोषात्। मैवम्। तदङ्गतयैवोपनीतकर्तृकाध्ययनेऽर्थबोधाधिकारात्

तेनोपनेता परार्थ इति न स्वतन्त्रतयान्वयार्ह इति उपनयनमुखेनापि न संशयः। ततश्चोपनीतकर्तृकाध्ययनस्य "यस्य वेदश्च वेदी च" इत्यादिस्मृत्या वेदविच्छेदहेतुकदुर्ब्राह्मणत्वप्रसिद्धेः नित्यत्वमाश्रित्य तदङ्गतयोपनयनस्यापि नित्यत्वमुपेयमित्यभिप्रायेण चोदयति—नन्वसत्युपनयने पातस्मृतेरिति। परिहरति—मैवं तदङ्गतयैवेति। यद्युपनयनं काम्याध्यापनविध्यङ्गं न स्यात्, तदोपनीतकर्तृकमध्ययनमित्यत्र न किञ्चित्प्रमाणमस्ति; तदङ्गत्वे तु तद्द्वारतयाध्ययनं संबध्यत इति तत्कर्तृकमेवेति प्रागेवोक्तम्; तत्कर्तृकत्वे चाध्यापनविधिप्रयुक्तिलाभमूलकार्थबोधाधिकारापेक्षया नित्यत्वसिद्धिरिति नाङ्गत्वं नित्यत्वबाध्यम्; अर्थबोधाधिकारात्स्वाध्यायस्यार्थपरत्वे श्रुतिस्मृतिप्रामाण्यसिद्धौ तद्बलात्स्वाध्यायान्तर्गतगायत्र्यादिग्रहणनित्यतापत्तिः, तदन्यथानुपपत्त्योपनयनस्यापि साचार्यकफलस्याध्ययनविधिनैवार्थबोधाधिकारपर्यवसितेनाक्षेपप्राप्तिरिति नित्यत्वाविरोधः। ननु गायत्र्यादिग्रहणविषयनित्यविधिर्नोपनयननित्यतापादकः, तस्योपनयनसम्बन्धाभावादुपनयनं विना अनुपपत्त्यभावात्; स्वाध्यायाध्ययनस्य ह्युपनीतः कर्तावगतः; ततोऽस्यान्यत्वात्—इति शङ्कानिवृत्त्यर्थं स्वाध्यायान्तर्गतेत्युक्तम्। तत्रापि तावद्ग्रहणमुखेन ग्रहणोपायाध्ययनमेव विवक्षितम्; तेन स्वाध्यायाध्ययनान्नान्यत्वमस्य, तदेकदेशमात्रविषयत्वेनान्यत्वभानेऽपि ग्राह्यमुखेन तदंशप्रत्यभिज्ञया विध्यन्तरप्रतीत्यभावात्। यद्यपि नित्यत्वधर्मवत्तया विधेयत्वमस्ति, तथापि सकर्मकक्रियायाः कर्मप्रत्यभिज्ञायां स्वरूपभेदो नास्तीति प्रसिद्धम्, सोमक्रये बहुभिर्वाक्यैः नानाद्रव्यगुणविशिष्टक्रयविधानेऽपि क्रयैक्योक्तेः; तेन स्वाध्यायवाक्यविहितस्यैव विषयविशेषावच्छेदेन नित्यत्वमात्रमत्र विधेयमित्यस्यैवोपनयनं विनानुपपत्तिरित्यर्थः। ननु तदंशमात्रनित्यत्वं न कृत्स्ननित्यताक्षेपकम्, ततश्चाचार्यकविध्याक्षेपासिद्धेस्तदङ्गोपनयनविध्याक्षेपोऽपि नेति कथं तन्नित्यतापादकत्वम्? उच्यते—मा भूत् कृत्स्नाध्ययनस्य नित्यताक्षेपकः; तदवच्छिन्नाध्ययनार्थमेव तदाक्षेपः स्यात्। तथाहि—कृत्स्नशाखाविषयस्याध्ययनस्याध्यापनस्य चैकत्वं तावन्नास्ति, वक्ष्यमाणशास्त्रभेदात् कर्मभेदे क्रियाभेदस्यावर्जनीयत्वात्; तेन यावत्कर्मभेदं भिन्नानामेवाध्ययनाध्यापनक्रियाणामुभयत्र विधिविषयत्वम्, तथैव च स्वकार्यकरत्वम्; तत्र चाध्येत्रधीनाध्यापकाभीष्टप्राप्तिरिति क्रियाफलनिरूपणमप्यध्ययनक्रियानुसारीति ब्राह्मणे शास्त्रभेदाभेदाभ्यामध्यापनेऽपि भेदाभेदावुपेयौ; विनियोज्यमन्त्रेषु यथाविनियोगं मन्त्रस्वरूपभेदाभेदाभ्याम्; तत्र स्वाध्यायशब्देन कृत्स्न-

स्वाध्यायान्तर्गतगायत्र्यादिग्रहणविधेर्नित्यत्वादुपनयनं नित्यमङ्गं सदेवेत्याचार्यकविधेरप्यध्ययनाधिकारतः प्रयुक्तेर्मूलमाचार्यकविधेरेव प्रयुक्तिरुक्ता । न च पावनार्था मीमांसा—"यश्च मीमांसतेऽध्वरम्" इति स्मृतेर्वाच्या ; न्यायमूलमीमांसायाः कार्यान्तरमिदमिति न तद्विधिप्रयुक्ता मीमांसा युक्ता ।

स्वशाखाविषयाध्ययनप्रतीतेरेकैकशास्त्रार्थबोधस्य चानुष्ठानार्थस्यानारभ्याधीतप्रकरणान्तराधीताद्युपसंहारानुपसंहारविचारपूर्वकावधारणाधीनत्वाच्च स्वतः[क]कृत्स्नशाखाविषयाध्ययनक्रियाचय एवाध्येत्रधिकारसाधनमित्यध्यापनमपि तदनुसार्येव स्वफलसाधनं स्यात्; ततश्चार्थज्ञानोपयोग्यङ्गपर्यन्ततदनुष्ठानोपयोगिकल्पादिविनियुक्तस्वशाखानन्तर्गतरहस्यमन्त्राध्यापनान्तश्च तत्स्वतः स्यात्; तदशक्तिविषयेऽपि यथाशक्त्युपनयनानन्तरप्राप्तावश्यकर्तव्यसन्ध्याग्निपरिचरणाद्युपयुक्तगायत्र्यादिग्रहणान्ताध्ययनस्यावश्यकत्वं विधीयते; सोमाशक्तौ पूतीकानुष्ठानवत् तेनैव चाध्ययनापूर्वसिद्धिरपि तत्र स्यात्; कृत्स्नसाध्यस्य च कार्यस्य कदाचिदल्पसाध्यत्वमसान्नाय्यिन इव नानुपपन्नम्; तेन क्रियानिरूपकं दृष्टरूपकार्यांशमात्रमेव तत्र न भवति, परमकार्यन्तु शास्त्रसिद्धमविशिष्टमेवेत्यध्यापनकार्यमपि तथैव स्यात्; तदपेक्षितार्थबोधपर्यवसायित्वं त्वितरत्रापि तत्कालेऽङ्गाध्ययनाभावात् स्वतन्त्राचार्यवाक्याक्षेपापेक्षमुपेयम्; तच्च "शौचाचारान्" इति स्मृत्युदाहरणेनैव सूचितम्; तत्रावान्तरभेदभिन्नाध्यापनक्रियाचयजन्यादृष्टसमुदायस्याचार्यपदार्थत्वेऽपि एकैकातिरिक्तसमुदायवस्त्वसिद्धेरेकैकस्यैव शब्दशक्तिविषयत्वान्निरुपाधिकप्रयोगाविषयत्वमात्रं सर्वजन्यसमुदायस्य; निमित्तबलादल्पाध्यापनकरणेऽप्याचार्यपदवाच्यत्वमस्त्येव, यथा पवमानेष्टिषु "आहवनीये जुहोति" इति शास्त्रार्थसिद्धिः स्वजन्यसंस्काराभावेऽपीति । अध्ययनापूर्वसिध्यैवाचार्यत्वकराध्यापनरूपशेषित्वसिद्धेरुपनयनाक्षेपोऽपीति तन्नित्यतेत्याभिप्रायः । एवमध्ययनविधेरप्याचार्यकरणविधिप्रयोजकत्वसम्भवे तत्प्रयोज्यत्वोक्तिर्ग्रन्थेऽर्थबोधाधिकारपर्यवसानापादनेन तत्प्रयोजकत्वमूलत्वाभिप्रायेणेति मन्तव्यम्, न वाजिनादितुल्यताभिप्रायेणेत्यविरोधः । नन्वनर्थकमिदं संशयसमर्थनम्, पाङ्क्तिपावनत्वफलकस्मृत्यनुमितमीमांसाविधिप्रयुक्तत्वाद्विचारप्रवृत्तेः; तदनुषङ्गसिद्धस्त्वर्थनिर्णयः; तन्निर्णयप्रयुक्तत्वे संशयपूर्वकत्वात् तत्प्रवृत्तेस्तत्समर्थनमर्थवत्, न त्वानुषङ्गिकत्वे ; तदानुषङ्गिकत्वं तूक्तप्रकारविधिमूल[लप्र]वृत्तेः शीघ्रभावित्वादिति पार्श्वस्थशङ्कां परिहरति—न च पावनार्था मीमांसेति । पङ्क्तिपावनत्व-

१. पङ्क्तिपावनार्थां. क.

तत्र पूर्वः पक्षः—पूर्वमेवाध्यापनसिद्धेराचार्यनराधिकारपरता विधेः, अनर्थपरता च वेदाध्ययनस्य । नन्वध्ययनकर्तृगतमैश्वर्यमन्तरङ्गत्वादध्ययनानन्तरं[1] बुद्धमपि विधिरनुजानातु । नैवम्, अध्ययनविध्यवगमसमये नोपनेयैश्वर्यधीरित्यन्तरङ्गमप्यधीस्थं दुर्बलम् । अतो वेदाध्ययनस्यानर्थपरत्वे नार्थनिश्चयार्थो गुरुगेहवास इति तन्निवृत्तौ सकलब्रह्मचारिधर्मास्नानादि[2]निवृत्तिरेव स्नानमुखेन स्मृता । दृष्टे च पूर्वपक्षनये मूले सति नादृष्टार्था स्नानस्मृतिः

फलमध्वरकर्ममीमांसासाध्यतया स्मृतमिति अर्थनिर्णयार्थप्रवृत्तमीमांसाया वेदतदर्थसंपर्कलब्धपूजितावस्थाया इतरतर्कसाधारणार्थनिर्णयोपजीवनेन तत्पूजाप्रयुक्तफलान्तरमेतदिति स्मृतिसामर्थ्यसिद्धमित्यर्थनिर्णयार्थैव तत्प्रवृत्तिरित्यर्थः ।

एवं संशयं संशोध्य पूर्वपक्षमाह—तत्रेति । पूर्वसिद्धा तावदवगतिरध्यापनरूपविषयफलस्याध्ययनप्रवृत्तिप्रयोजकतया लभ्यतैवेति तत्प्रयुक्ताध्येतुः परतन्त्रस्य स्वफलावगत्यपेक्षा नास्तीति तदुपजीवनेन विध्यधीनोऽप्यधिकारोऽध्यापकस्यैवेति नार्थपरता अध्ययनस्येत्यर्थः । ननु क्रियाफलं तत्कर्तुरेव स्वतो युक्तम्, ऋत्विक्क्रियास्वप्यङ्गत्वाद्यजमानस्यैव व्यवधानेनापि कर्तृतेत्यध्येतुरेवानङ्गाध्ययनफलं युक्तम्, नातत्कर्तुरध्यापयितुरिति पश्चात्प्रतीतमपि कर्तृगतमर्थबोधमेव विधिरनुवर्तेत इति चोदयति—नन्वध्ययनकर्तृगतमिति । परिहरति—नैवमिति । विधिपरिकरस्य स्वविषयैश्वर्यापादनस्य विध्यवगमकाल एवापेक्षितत्वात् प्रवृत्तेः प्रागेव च कर्तव्यमित्यवगमकाल इत्याचार्यस्यैव तत्कालेऽधिकारयोग्यता नोपनेयस्येति तत्स्थफलस्यान्वयानर्हत्वादनङ्गत्वेऽपि वस्तुशक्त्यान्यार्थतैवाध्येतुरित्यर्थः । ततश्च "अधीत्य स्नायात्" इति स्मृतेर्यथावगतार्थहानमित्याह—अतो वेदाध्ययनस्येति । "ब्रह्मचारी न स्नायात्" इति गन्धस्नानप्रतिषेधे कृते प्रतिषेधविषयकालानन्तरकालावच्छिन्नं स्नानमुच्यमानं प्रकृततद्विशेषनिष्ठमेव भातीति नाप्राप्तस्नानविध्यर्हमिति तदनुवृत्त्यनुज्ञापरं वाक्यं सर्वब्रह्मचारिधर्मावधिपरं प्रथमप्रतिषिद्धस्नानेनोपलक्ष्य सर्वावधिवाच्येव स्वतो युक्तमिति गुरुकुलस्थितेरप्यवधिरध्ययनसमाप्तिरनेनावगम्यत इति तदनुग्रह एव स्यादित्यर्थः । नन्वेवं मुख्यवृत्तिबाधापत्तेस्तदबाधार्थं विध्याश्रयणमेवोचितमित्यत्राह—दृष्टे च पूर्वपक्षनय इति । गत्यन्तराभाव एवात्यन्तादृष्टविधिमूलकल्पना, न न्याय-

१. नादनन्तरं. ख. २. नियमनिवृत्ति. क.

श्रुतार्थानुरोधायुक्ता । दृष्टा च पूर्वपक्षनयमूलापि पितृयज्ञस्य दर्शाङ्गतास्मृतिरिति नाध्ययनविध्याक्षिप्तं शास्त्रम् ॥

राद्धान्तस्तु—अन्यप्रयुक्तस्य पश्चादवगतफलद्वाराध्यैश्वर्यधीपूर्वकमधिकारपरत्वमित्यतुल्यकालत्वेऽप्यन्तरङ्गं बलीय इत्यर्थपरत्वमध्ययनविधेर्युक्तम् । विवरणे तु प्रयोजकविधेः प्रयोज्यविधेश्च शाखान्तर्गतत्वादनर्थपरता स्यात् ; तत्पर्यवसाने च पूर्वावगतप्रयोजकत्वविरोधान्न तत्पर्यवसानं युक्तम् ; अतः पश्चाद्भाव्यर्थावबोधपर्यवसानम् । अर्थपरत्वव्युत्पत्तिनिर्वाहार्थं त्वर्थबोध-

मूलत्वसम्भवेऽपीत्यर्थः । ननु न पूर्वपक्षन्यायमूलता युक्तेत्यत्राह—दृष्टा चेति । स्पष्टे क्वचित्तन्मूलत्वेऽन्यत्रापि तत्सम्भवे तदनादरेणादृष्टमूलादृष्टार्थविध्याश्रयणमन्याय्यम् । तेनाध्ययनविधिर्न शास्त्राक्षेपक इत्यर्थः ।

सिद्धान्तमाह— राद्धान्तस्त्विति । प्रयोजकविधिः स्वापेक्षितप्रयोज्यस्वरूपविशेषप्रतीत्यतिरिक्तं तदीयाधिकारपर्यवसानं तत्प्रयुक्त्यर्थं नापेक्षते; प्रयोज्यविधिरपि स्वापेक्षिताधिकारं कथञ्चिदप्यलभमानः स्वप्रयोजकविध्यन्तरलाभे तत्प्रयोज्यत्वार्थं न तदपेक्षीत्यपेक्षाबलमात्रोपनेयाधिकारधीः प्रयोज्यत्वधीकाले तावन्नास्तीति न तत्काले तत्पर्यवसानत्वसिद्धिः । तदुत्तरकालभाविप्रयोज्यविध्यधिकारापेक्षाकाले कर्तृगतफलातिरिक्तफलधीरेव नास्तीति विषयमात्रोपस्थाप्यार्थबोधाधिकारपर्यवसानं निष्प्रतिबन्धकमिति विध्यधीनोऽप्यधिकारः तदनुसार्यैवेत्यध्ययनविधेः हेतोरर्थपरत्वमेव स्वाध्यायस्य स्यादित्यर्थः । लघ्व्यां पूर्वप्राबल्यमेव सिद्धान्तयुक्तिरिति विशेषमाह—विवरणे त्विति । निबन्धने तु अध्यापनविधिस्वीकारपूर्वकत्वादनर्थपरत्वस्यापि, न स्वत एवात्मनोऽनर्थपरत्वधीः, तदन्तर्भावप्रतिसन्धानात् पश्चादेव तद्धीः । विवरणे तु आचार्यकविधेरपि शाखान्तर्भावात् प्रथममेव स्वस्यार्थपरत्वहानिधीरिति पूर्वप्राबल्ययुक्तिरभ्यर्हिता, इतरत्रान्तरङ्गत्वयुक्तिरिति भेदः । नन्वेवं ततोऽपि पूर्वतराान्विताभिधानव्युत्पत्त्यबाध एव कस्मादर्थबोधाधिकारपर्यवसानहेतुतया नाङ्गीक्रियत इत्यत्राह—अर्थपरत्वेति । तद्व्युत्पत्तेर्निरुपाधिकत्वसिद्धौ हि स हेतुः स्यात्, प्रतिवाक्यावधारणीयतात्पर्योपाश्रितस्तु तद्व्युत्पत्तिः ; न हि सुप्तोच्चरितानां वाक्यनामुन्मत्तायुच्चरितानां गानविशेषाभिव्यक्त्यर्थं गायकोच्चरितानां प्रकरणाद्यनवधारितार्थविशेषवृत्तीनामनेकार्थाभिधानसमर्थानां शक्तिविषयार्थबोधकत्वं दृश्यते । तेन तदुपाधित्वनिश्चयादर्थबोधाधिकारपर्यवसानात् प्राक् सन्देहानुवृत्तेस्तदनङ्गीकार इत्यर्थः ।

१. श्रौतार्थान्तरोपाधियुक्ता. ख.
२. मूला पितृ. क.
३. प्रयोक्तृत्व. ख.
४. सान.......... र्थबोध. क.

पर्यवसानं नोक्तम् । तात्पर्यतो ह्यर्थपरत्वव्युत्पत्तिः; तदेव चेत् सन्दिग्धम्, कथं तद्बलेनार्थबोधपर्यवसानम्?

एवं च विधिपर्यवसानार्थमध्ययनात्परतो मीमांसातः पूर्वमवगतस्य

यथोक्तसिद्धान्तिगतिविधयैव परापादितानुपपत्तिपरिहारोऽपि सिद्ध इत्याह— एवञ्च विधिपर्यवसानार्थमिति। यदुक्तम् "अध्ययनमीमांसाश्रवणयोर्मध्येऽधिकारः" इति प्रकरणे तत्रानुपपत्तिरुद्भाविता—वृथा अनुष्ठानोत्तरकाले विधेरधिकारापादनायास इति; नानुष्ठानार्थं तदिति तावत्सम्मतम्, न चार्थपरत्वार्थम्, तदनपेक्षार्थपरतयैवाध्ययनविधेस्तत्प्रयोजकविधेश्च कृतानुष्ठानत्वात्तद्देशान्येषामपि तत्सम्भवात्; न च स्वोत्तरकालमीमांसाश्रवणहेतुतयार्थवत्त्वसंशयनिवृत्त्यर्थम्, सर्वविधीनामपि तद्धेतुत्वसम्भवात् तत्तदर्थधीहेतोर्लौकव्युत्पत्तेश्च सर्वसाधारणत्वादिति — सा परिह्रियते । तत्र "एवम्" इत्यनन्तरोक्तव्युत्पत्त्यतन्त्रत्वमर्थपरत्वस्योक्तम्; तेन विध्यधीनार्थबोधाधिकारो न वृथा । न चाध्ययनविधेरध्यापनविधेश्च पूर्वभावितया तदनपेक्षार्थपरत्वलाभ इति शङ्कनीयम्; माणवकप्रवृत्तौ तावद्विधिर्न साक्षाद्धेतुः, तस्याचार्यप्रवर्त्यत्वात्; आचार्यप्रवृत्तेश्चार्थबोधाधिकारपर्यवसानधीपूर्वकत्वात्; विचारकाले त्वध्येतुः स्वप्रवृत्तेरपि विधिमूलत्वावगमेऽपि तस्य मिथ्यात्वशङ्काग्रस्ततया तदशक्तत्वम् "विधिपर्यवसानार्थम्" इत्यनेनोक्तमिति न तदनपेक्षप्रवर्तकत्वं क्वचिदपि विधेरिति दर्शितम्; मध्याधिकारोक्त्या च लब्धाधिकारस्याध्ययनविधेः साक्षादेव मीमांसाप्रवृत्तिहेतुतया आनर्थक्यपरिहारो दर्शितः । ननु तात्पर्यं नाम वाक्योच्चारणस्यार्थबोधप्रयोजनत्वं प्रामाण्यहेतुतया लोकसिद्धम्; तत्कथमध्ययनविधिज्ञाप्यं स्यात्? विधिर्हि स्वगृहीतस्य द्वाराकाङ्क्षिणः स्वसाधनोपकारकत्वगर्भं तदर्थत्वमापादयेत्, न तु स्वकरणीभूतस्याध्ययनस्य स्वांतरस्य लक्षणार्थबोधार्थत्वमिति न विधिप्रमाणकं तात्पर्यं युक्तम्; न च स्वापेक्षितपुरुषविशेषावच्छेदकतया व्युत्पत्तिमात्रसिद्धार्थबोधस्य सङ्ग्रहमात्रं तात्पर्यापादकम्, तस्य सर्ववाक्यसाधारणपदशक्तिमात्रनिमित्ततया तात्पर्यबाह्यत्वात्—इति शङ्कानिवृत्त्यर्थम् "अवगतस्य स्वीकारात्" इत्युक्तम् । लोकेऽधिकारधीजननोद्देशेन वाक्योच्चारणात् तदर्थत्वसिद्धावपि पुमायासस्वभावप्रयुक्तं तदिति तन्मूलको वाक्यविषयाधिकारधियः तत्प्रमितिशक्तिग्रह एव सर्वव्यापी तात्पर्यावगम इति अध्ययनविधिनापि अर्थबोधकत्वमध्ययनस्य दर्शयता तात्पर्यं प्रमितमेव स्यात् । यद्यपि पदव्युत्पत्तिमात्रं निमित्तम्, संनिहितविशेषोपसंहृतं योग्यान्वयस्मृतिमात्रमध्ययनानन्तरभावि स्वापेक्षितपुरुषविशेषावच्छेदकतया विधिग्राह्यं न तात्पर्यस्पृक्, तथापि तदुपसंहृत-

स्वीकारान्मध्येऽधिकारो न[1] वृथा। एवं च न यदा आचार्यीबुभूषुः, तदा माणवकः स्वसंस्कारं द्विजातिकर्मानुगुणं प्रबुद्धः प्रयुङ्क्ते तद्धितार्थी वेत्याचार्यकविधि-

विषयस्मृतिग्रहे तात्पर्यविषयोऽपि स एवेति स्मृतिमात्रावस्थायां वाक्याध्ययनास्पृष्टतया विध्यस्पृष्टोऽपि सोऽर्थस्तद्ग्रहावस्थायामधीतस्वाध्यायमेयतया स्वीकृतः स्वीयतया कृतः स्वविषयाध्ययनमेयतया ज्ञापितः; सर्वत्रापि हि पदव्युत्पत्तिमात्रनिमित्ताभिधानयोग्यार्थस्मृतिविषयस्यैव वाक्यतात्पर्यविषयतया ग्रहणनियमात् नेह स्मृतिविषयत्वं तद्विरोधि। विधिवाक्येषु चानुष्ठानोपाधिसम्पूर्तिकाल एवाधिकारिविशेषनिष्ठकर्तव्यताप्रमितिः; ततः प्राक् तत्प्रतिसन्धायिसामान्यस्मृतिमात्रम्; तस्य तत्प्रमितिकरसामान्याभिधानतुल्याकारत्वेहाध्ययनसाध्यत्वव्यवहारः; फलतश्च विशेषाभावात् तस्य विधिग्रहो विधिप्रमितिकालानुवृत्त्या तत्करत्वज्ञापनं तदर्थाभिधेयत्वान्तम्। लोकेऽपि हि कालव्यवहितानुष्ठानविधिपरवाक्यानां प्राक् स्मर्यमाणार्थानामेव तत्काले तदभिधानम्; तन्निमित्तासिद्धौ सामान्यमात्राभिधानस्य निष्फलतया तात्पर्यहीनत्वात् स्मृतिमात्रस्य च तत्फलत्वासम्भवादिति—इहापि वाक्ययोग्यार्थस्मृतिमात्रं पूर्वोत्पन्नं तत्कालप्रमितिकरमध्ययनफलतयाधिकारिविशेषणतया विधिग्राह्यं राद्धान्तिनोच्यत इति तत्स्मृतेरपि तच्छक्तिर्विधिज्ञापिता लौकिकवाक्यवत्त्वयनताद्र्थ्याभावेऽपि स्यादिति। यावदर्थमध्ययनभेदापत्त्या पूर्वोक्तानेकविधिभेदापादनेनवार्थस्य विध्यवच्छेदकत्वं स्वतन्त्रम्, तन्निरूप्यतयाध्ययनस्येति तत्स्वीकारोक्त्या निरूपणेऽपि तत्प्राधान्यमुक्तम्। तथा च तत्तत्क्रतुविधिरूपार्थावच्छिन्नाध्ययनविध्यधिकार एव तत्तत्क्रत्वधिकारोऽपीति मध्याधिकारस्य वृथात्वशङ्का दूरनिरस्तेत्यर्थः। यत्पुनरध्ययनविधिप्रयोज्यतयाप्याचार्यविधिस्पर्शानाश्रयणेन केवलाध्ययनार्थमुपनयानुष्ठानम् "इममेव तावदधिकारमालोच्य" इत्यादिना प्रकरण उक्तम्, तदनुपपत्तिरप्युक्ताध्ययनविधिस्वीकारपरतन्त्रार्थपरत्वेनैव परिहृता इत्याह—एवञ्च न यदाचार्यीबुभूषुरिति। प्रयोज्यत्वेनाप्याचार्यालाभे स्वाध्यायाध्ययनविधिः तदशक्तिविषयोक्तनदशगायत्र्यादिविषयविधिश्च तत्प्रयोजकः, उपनीतकर्तृकोक्ताध्ययनरूपप्रयोज्यसिद्ध्यै स्वानङ्गत्वेऽपीति नानुपपन्नम्; स्वाध्यायस्य स्वतोऽर्थपरत्व एव हि उपनयनस्याध्यापनाङ्गत्वेऽध्ययनं तदनपेक्षं स्यात्; विधिस्वीकारापेक्षे त्वध्यापनविधिप्रयुक्तिमूलस्तत्स्वीकार इति उपनीतकर्तृकाध्ययनानुवर्तित्वम्, सर्वविधीनामपि तदपेक्षत्वाद्विधित्वस्येति द्विजातीनामिज्या अध्ययनं दानमित्यादि स्मृतिसिद्धम्। तेन तदर्थमप्युपनयनप्रयुक्त्यवगमो युक्त इत्यर्थः।

१. Omitted. न. क.

प्रयुक्तिमूलकः शास्त्रार्थ इत्युक्तम् । [1]यदाचार्यविध्यप्रयुक्तं सोपनयनमध्ययनम्, तदा साधिकाराध्ययनविधिप्रयोज्यमिति न कामश्रुतिप्रयोज्यम् । अतो न शूद्रस्याप्यध्ययनप्रयुक्तेर्विद्यासाध्येष्वधिकारापत्तिः । ननु येषामेवाध्ययनं [2]श्रुतं तेषामेव तच्छास्त्रप्रसङ्गादधिकारः क्रतौ । युक्ता ह्यलौकिकार्त्विज्ये स्वशास्त्राद्वर्णभेदाश्रुतौ शास्त्रप्रसङ्गापेक्षा; क्रत्वधिकारस्तु न तथा । एवं च धर्मजि[3]ज्ञासया यत् प्रक्रियते शास्त्रं तद्धर्मजिज्ञासाप्रकरणमारभ्यम् ॥

इति प्रथमसूत्रं समाप्तम् ॥

नन्वाचार्यकरणविधिप्रयुक्तिबलेनैवापशूद्राधिकरणविरोधः पूर्वं परिहृतः । तस्य पाक्षिकत्वेऽपि तन्निवृत्त्यवस्थाया स्वपक्षेऽपि विरोधः परपक्ष इव स्यादित्याशङ्क्य परिहरति—यदाचार्यविध्यप्रयुक्तमिति । स्वाध्यायस्य स्वत एवार्थपरत्वोपगमेनाध्ययनस्य क्रतुविधिप्रयुक्तत्वाङ्गीकार एव तद्विरोध उक्तः; तस्याध्ययनविधिस्वीकारापेक्षत्वे तु साधिकाराध्ययनविधिप्रयुक्तं तदिति न क्रतुविधिप्रयोज्यत्वम्, तेषां तत्प्रयुक्तविद्योपजीवनेनोपनीतत्रैवर्णिकविषयताश्रयणेनाध्ययनप्रयोजकत्वं विनापि स्वविषयाध्ययनानुष्ठापकत्वोपपत्तौ गुरुव्यापारेण तत्प्रयुक्त्या वर्णान्तरविषयत्वं न स्यादित्यर्थः । क्रतुविधिप्रयुक्तत्वेऽपि तद्ध्युपनयनश्रुतवर्णानामेव "तमध्यापयेत्" इत्यध्ययनकर्तृत्वश्रुतेस्तदुपजीवनेन क्रतुविधयोऽपि तच्छास्त्रप्रसङ्गात्तद्वन्निर्णायकाः स्युरित्याशङ्कते— नन्विति । परिहरति— युक्तेति । द्रव्यार्जनश्रुतवर्णनियतं शास्त्रैकमेयाश्रयमिति तत्र शास्त्रप्रसङ्गो युक्तः; क्रत्वधिकारे तु तद्वदन्यापेक्षायां न हेतुरिति तद्विधायकवाक्योपात्तविशेषणाधिकसङ्कोचहेतुर्विद्याप्रयुक्तिगौरवपरिहारातिरिक्तो नास्तीति परपक्षे तद्व्याप्तिरित्यर्थः । वेदवाक्यार्थनिर्णयसहायन्यायपरत्वाविशेषात् प्रथमसूत्रस्यापि शास्त्रान्तर्भावः परापादितोऽप्येवं सूत्रेणैव निरस्त इत्याह—एवञ्च धर्मजिज्ञासयेति । धर्मपदेन हि वेदार्थः सूत्रे उक्तः; अर्थजिज्ञासा च तात्पर्यनिर्णयात् प्राङ्नास्ति, ज्ञेयविषयत्वाज्जिज्ञासायाः तात्पर्यविषयस्यैव च ज्ञेयत्वात् । तेन नार्थनिर्णयार्थं प्रथमसूत्रप्रणयनम्; सर्वस्वाध्यायविषयतात्पर्यजिज्ञासायां तन्निर्णयार्थन्तु तदुपेयम्; तदुत्तराण्येवार्थनिर्णयार्थानीति तत्तुल्यत्वाभावान्न तदन्तर्भावः । ततस्तदनन्तरभाविन्या अर्थविषयजिज्ञासया शिष्यवर्तिन्या यत्तद्विषयसर्वसंशयनिरासनसमर्थं तन्निरासार्थिनाचार्येण प्रस्तुतं सूत्रजातं शास्त्रपदोक्तं तदारभ्यमित्यनेन सूत्रेण समर्थितमित्यर्थः ॥

इति प्रथमसूत्रव्याख्या ।

१. यदाच सोपनयन. क.

२. Omitted. श्रुतं क.

३. ज्ञासाया यत्क्रियते. क.

चोदनालक्षणोऽर्थो धर्मः ॥ १-१-२ ॥

"तदभिधीयते" इति। यदारम्भतया साधितम्, तच्छास्त्रमभिधीयत इत्यर्थः। अत्यान्तरङ्गत्वात् प्रथमं वेदार्थजिज्ञासा—इति तत्स्वरूपमेव प्रतिज्ञारूपेण सूत्रयितुं चोदनाप्रमाणकताद्वारा शक्यमित्यर्थात् तत्प्रमाणतापि सूत्रिता। प्रतिज्ञासम्भवार्थं च कार्यव्युत्पत्त्यर्थसंस्पर्शित्वे अपीहान्तर्भूते।

चोदना। "तदभिधीयते—चोदनालक्षणोऽर्थो धर्मः" इति भाष्येणोक्तार्थपरत्वं सूत्रस्योच्यत इति प्रतिभाति, तच्चायुक्तमसामर्थ्यादिति कोऽस्यार्थ इत्यपेक्षायामाह—यदारभ्यतयेति। पूर्वसूत्रतात्पर्यविषयस्य तत्पदोपादानम्; तदिदानीमारभ्यत इत्युच्यते। सूत्रपाठस्त्वनन्तरपदविवरणविवक्षयेति भावः। कथमेतन्मुखत्वं शास्त्रस्य कार्येऽर्थे वेदस्य प्रामाण्यं दर्शयतीत्यर्थद्वयपरत्वाङ्गीकारप्राप्तवाक्यभेदपरिहारश्च कथमित्यत्राह— अत्यान्तरङ्गत्वादिति। बहुविषयत्वेऽपि शास्त्रस्य वेदार्थजिज्ञासयैव सर्वेषां तद्विषयत्वमिति प्रधानतया तदर्थस्य प्रथमोक्त्यर्हत्वम्, न तद्विशेषणतया तदन्तर्भूतानामिति कार्यरूपं तदिति चोदनालक्षणपदेन प्रथममुच्यते। न च गौरवात् तत्पदोक्तिरयुक्ता, तत्पदेनैव स्वरूपोक्तेः शक्यत्वात्; तत्पदोपलक्ष्यव्युत्पाद्याभिमतकार्यरूपं हि न कार्यपदोक्त्यर्हम्, लौकिककार्यधिया तद्व्यावृत्तस्वरूपसूत्रणासिद्धेरिति पदद्वयोक्तिरदुष्टा; लक्षणमुखेनैव स्वरूपोक्तावर्थात्तत्प्रामाण्यस्यापि विवक्षितत्वापत्तेः गुरुपदोक्तिकृतः सूत्रदोषोऽपि परिहृतः, प्रामाण्योक्तेरार्थत्वात् सूत्रे वाक्यभेददोषश्च परिहृतः। न चेदानीं चोदनाप्रामाण्यस्यासिद्धत्वात् तल्लक्ष्यवस्त्वप्रतिपत्तेः स्वरूपोक्त्यनुपपत्तिः शङ्कनीया, प्रतिज्ञारूपेण तत्सूत्रणसम्भवात्; विप्रतिपन्नार्थनिर्धारणस्य पक्षप्रतिपक्षवत्यशेषसाधनदूषणसामर्थ्यानुसन्धानाधीनतया दीर्घकालसाध्यस्यैकैकधीवृत्त्या निराकाङ्क्षसिद्ध्यभावेऽपि तदनुगुणा काचित्सिद्धिः सर्वसम्मतेति प्रतिज्ञामात्रेणापि तत्स्वरूपोक्तिर्भाविनिर्धारणसमर्थैवेति युक्तमर्थस्वरूपपरतया शास्त्रादित्वमस्येत्यर्थः। नन्वेवमुभयत्रापि प्रतिज्ञोपक्षीणमेवैतत्सूत्रं न न्यायोपदर्शकमिति तदुपदर्शकसूत्रान्तरैकवाक्यत्वमस्याश्रयणीयम्, न्यायपरत्वनियमान्मीमांसासूत्राणाम्; तच्चाशक्यम्, तदर्हस्यानन्तरभाविनोऽभावादित्याशङ्क्य प्रतिज्ञोपयोगिन्यायद्वयपरतास्यैवास्तीति परिहरति—प्रतिज्ञासम्भवार्थं चेति। प्रवर्तकवाक्यज्ञाप्यं तत्स्वरूपमित्येतावत्युक्ते तज्ज्ञाप्यविशेषनिर्णयसमर्थन्यायनिरूपणाधीनस्तन्निर्णय इति तत्परत्वमपि स्वरूपनिष्ठस्य स्यात्; चोदनालक्षणपदयोरन्योन्यान्वितार्थधीश्चार्थासंस्पर्शित्वनिरासापेक्षेति तन्न्यायपरत्वं चेति नान्यशेषतापेक्षेत्यर्थः। ततश्चैकस्य

तदेवम् "को धर्मः, कथंलक्षणश्च" इत्येतद्द्वयं[1] स्येदमुत्तरं सूत्रम् । धर्मशब्दश्च पूर्वत्वात्र च वेदार्थमात्रपरः, तद्विशेषानिषिद्ध[2]फलपरश्च । यस्य च वाक्यस्यार्थपरिज्ञानत् क्रियाप्रवृत्तिः, तद्वाक्यमपि स्वार्थद्वारा प्रवर्तकत्वात् प्रवर्तनारूपविवक्षया चोदनेत्युच्यते । सा च कार्यार्थैव । तच्चैतत् कार्यमलौकिकम्, तत्प्रमाणकमेवेत्युक्तम्[3]—"कार्येऽर्थे वेदस्य प्रामाण्यं दर्शयति" इति ॥

ननु यदि कार्यधीतः प्रवृत्तिः, तदा चोदना कार्यार्था भवेत्; सा त्विष्टोपायताधीत एवेति परमतम् । कार्यधीतोऽपि प्रवृत्तौ न कार्यमेव[4] वेदार्थः, "आनन्दं ब्रह्म" इत्येवमादिवेदान्तवाक्यानां[5] सिद्धार्थावगतेः । मैवम्; कार्यधीत एव प्रवृत्तिः । वेदान्तानामपि कार्यपरतैवेष्टोपायता; इष्टोपायता[6]धिया हि 'ममेदं कार्यम्' इति बुद्ध्वा स्वतन्त्रः प्रवर्तते । इष्टोपायताधीमा-

सूत्रस्यार्थद्वयपरत्वं भाष्योक्तमपि समर्थितमित्याह—तदेवमिति । नन्वर्थपदसमभिव्याहाराच्छ्रेयेनाद्यन्यपर एवेह धर्मशब्द इति कथं वेदार्थस्वरूपोक्तिपर इत्यत्राह—धर्मशब्दश्चेति । पूर्वसूत्रे तावत् अर्थपरत्वव्युत्पत्त्यर्थत्वाद्वेदार्थमात्रपरत्वं व्यक्तम् । तत एवात्रापि तत्स्वरूपोक्त्यर्थत्वात्तत्परत्वमावश्यकमित्युभयपरत्वसिद्धेः पूर्वत्रापि जिज्ञासोत्थापकतया मुख्यार्थपरत्वमप्युपेयमेवेत्यर्थः । ननु चोदनापदं भावव्युत्पत्तिनियतमिति कथं प्रवर्तकवाक्यवाचितया तदर्थपरमित्यत्राह— यस्य च वाक्यस्येति । "चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः" इति भाष्ये वाक्यविषयो वृद्धप्रयोगो दर्शितः । क्रियाप्रवर्तकत्वं च प्रवर्तमानपुरुषस्यैव दृष्टम्, तदुत्पादकत्वात्; तत्र वाक्योत्थधीपूर्वकक्रियाप्रवृत्तौ परम्परया वाक्यमपि प्रवर्तकम्, क्रियोत्पादकत्वादेव; तद्विषयैव चोदनापदवृत्तिः प्रयोगसिद्धा; तेन भावव्युत्पत्तिर्वैवक्षिकी होपेया, वाक्यद्वारेण चोदकाचार्यादिव्यापारतया विवक्षार्हत्वात्—इति तदुक्तिरविरुद्धैवेत्यर्थः । केन सामर्थ्येनैतद्भाष्यम् "कार्येऽर्थे वेदस्य प्रामाण्यं दर्शयति" इति गुरुणोक्तमित्याह—सा च कार्यार्थैवेति । कार्यार्थत्वं तावन्न्यायसिद्धम्; तस्य वक्ष्यमाणमलौकिकत्वमपेक्ष्य प्रामाण्योक्तिरित्यर्थः । न्यायसिद्धत्वं तस्य नास्तीति परमतावलम्बनेन चोदयति—ननु यदीति। तदुपेत्य तन्नियतं वेदप्रामाण्यमित्ययुक्तमिति दूषणान्तरं चाह—कार्यधीतोऽपीति । एतद्द्वयनिरासाभिप्रायेण तद्व्याख्याभिप्रायाभिधानं गुरोरित्याह—मैवमिति । तत्र प्रथमनिरासे हेतुमाह—इष्टोपायता-

१. द्वयस्यैतदुत्तरं. क.
२. फलनिषिद्ध. ख.
३. तत्प्रमाणमेवे. ख.
४. Omitted. एव. क.
५. वेदान्तानां. ख.
६. Omitted. इष्टोपायता. क.

त्वात् प्रवृत्त्यनुज्ञानेऽतीतानागतेष्टोपायताधीतोऽपि प्रवृत्तिः स्यात् । नन्वयमनुयोग इष्टोपायतायाः कार्यधीजननेऽपि समः । मैवम्; कृत्युद्देश्यतैवेष्टोपायस्यातीतादिव्यावर्तिका; द्वयी ह्युपायधीः—अतीताद्याकारा, कार्याकारा च । तत्र कार्याकारतः प्रवृत्तेः कार्यधीतः प्रवृत्तिरित्युच्यते । नन्वेवमिष्टोपायताधीवेद्यमेव कार्यं स्यात्, नेष्टोपायताज्ञाप्यम् । मैवम्; इष्टोपायताकारोल्लेखादेव कार्यपर्यन्तं वेद्यमिति तज्ज्ञाप्यत्वमुक्तम्, यथैकधीवेद्यत्वेऽप्याकृतिनो व्यक्तिधीरुक्ता । कृत्या भावी इष्टोपायः— इत्येवंधिया

धिया हीति । यद्यपीष्टोपायता लोके प्रवृत्त्यव्यभिचारिणी, तथापि कार्यधीव्यवधानेनैव सा तद्धेतुः; साक्षाद्धेतुत्वोपगमेऽतीतादावपि तदापत्तेरित्यव्यवहितहेतोः कार्यस्यैव लिङ्गाद्यर्थतेत्यर्थः । ननु तद्व्यवधानोपगमेऽपि यथा कार्यधीजनने तदापत्तिस्त्वया निवार्यते, तथा परैरपि प्रवृत्तिजनने निवार्या इति समत्वान्नेदं नियोगासक्षममिति चोदयति—नन्वयमनुयोग इति । समत्वनिरासेन परिहरति—मैवमिति । कार्यधीजननार्थमिष्टोपायताया अतीतादिव्यावर्तकविशेषोपगमेन कार्यस्य प्रवर्तकत्वोपगमे हि साम्यं शक्यापादनम्; न तु तथाभ्युपेतम्, कार्यशरीरान्तर्भूतकृत्युद्देश्यतयैवातीतादिव्यावृत्त्युपगमादिति न साम्यमित्यर्थः । ननु कार्यमेव कारणव्यावर्तकतया कारणमपीत्युन्मत्तभाषितमिदमित्याशङ्क्य धीभेदेन कार्यकारणभावोपगमे ह्ययं विरोधः, एकधीस्थयोरेव तदुपगमान्न विरोध इत्याह—द्वयी ह्युपायधीरिति । लोके हीष्टोपायधीरेव तस्य कृतिजन्यत्वावमर्शे कार्यधीत्वेन प्रवृत्तिहेतुः, अतीतादिरूपधियान्यथा वा तदनवमर्शे कार्यग्राहित्वाभावान्न—इत्येवं व्यभिचाराव्यभिचाराभ्यां हेतुत्वाहेतुत्वव्यवस्था, न धीभेदेनेति न व्यावर्तकापेक्षेत्यर्थः । नन्वेकधीस्थतोपगमे हेतुहेतुमत्तोक्तिर्विरुद्धेति चोदयति—नन्वेवमिति । परिहरति— मैवमिति । लोके ह्यन्वयव्यतिरेकावगम्यो हेतुहेतुमद्भावः। तत्रेष्टोपायत्वकार्यत्वयोरेकधर्मिधर्मयोरेकधीस्थत्वेऽपि कार्यत्वस्येष्टोपायत्वव्यतिरेकेण भानाभावात्तद्भानोपाधिकं कार्यत्वभानं निश्चीयते, कृतिजन्यत्वमात्रावमर्शेऽपि तदुद्देश्यत्वाभानात् इति, एकधीस्थत्वेऽपि व्यक्तेराकृतिज्ञाप्यत्वादशाब्दत्वोपगमवत्, एकधीस्थत्वेऽपि ज्ञाप्यज्ञापकभावो न विरुध्यत इत्यर्थः । नन्वाकृतेर्व्यक्तिव्यतिरेकेण भानायोग्यत्वात्तदाक्षेपकत्वं युक्तम्; इष्टोपायता कार्यव्यतिरेकेणापि भानार्हेति कथमेकधीस्थतया तद्भानहेतुरित्यत्राह—कृत्या भावीष्टोपाय इत्येवंधियेति । न केवलेष्टोपायता

१. अतीतवर्तमानानागत. ख.
२. कार्यान्तरा. क.
३. इत्येवसिद्धा. क.

कृत्युद्देश्यताबुद्ध्युत्पादादिष्टोपायताधीतः कार्यधीः । न च '[1]कृत्या भावी इष्टोपायः' इत्येवंधिया प्रवृत्तिरस्तु, अलं कृत्युद्देश्यतया इति वाच्यम्; इष्टकोटाविष्टोपाये हि कृतियोगस्तदुद्देश्यतयैव धीस्थः, नान्यथा; कार्यता च कृतीप्सितकर्मता इत्युक्तम्—"कृत्यधीनसिद्धि यत्कृतेः प्रधानम्, तत् कार्यम्" इति । "कृतिभावाभावानुविधानाच्च कृत्यधीनसिद्धित्वमनुमानवेद्यम्, कृतिप्रयोजनता च [2]प्रधानत्वं मानसवेद्यम् ।" ननूत्पन्नायां कृतौ तद्भावभाविता मानसवेद्यता चेति न तद्धीतः प्रवृत्तिः । मैवम्; मूलभूतमानद्वयमिदमुक्तम्, प्रवृत्तिहेतुस्तु कार्यतास्मृतिरेव । [3]नन्विमं व्यक्तिभेदमुररीकृत्य प्रवृत्तिः, न तत्कार्यतास्मृतेः । मैवम् । मानसानुमानाभ्यामन्यव्यक्तिष्वपि कार्यतामनु-

तद्धेतुरङ्गीक्रियते, कृतिजन्यत्वसहितैवेत्याकृतितुल्यतया हेतुत्वमविरुद्धमित्यर्थः । नन्वेवं कृत्युद्देश्यतेवेष्टोपायस्यातीतादिव्यावर्तिकेति हेतुत्वोपपादनं बाधितं स्यात्; कृतिसाध्यत्वस्याप्यङ्गीकारे तेनैवातीतादिव्यावृत्तिसिद्धेस्तत्सहितमिष्टोपायत्वमेव प्रवृत्तिहेतुः स्यात्; तदतिरिक्तोद्देश्यतोपगम एवानर्थक इत्याशङ्कां निराकरोति—न च कृत्या भावीति । यद्युद्देश्यत्वं विनापि इष्टोपायस्य कृतिसाध्यत्वधीः स्यात्, तदा एतद्बोध्यं भवेत्, तत्सहत्वानियमात्तु विशेषणानपेक्षत्वलाघवात्तदेव प्रवृत्तिहेतुरुपेय इत्यर्थः । ननु तदपि सविशेषणमेवोक्तं प्रकरणे "कृत्यधीनसिद्धि यत् कृतेः प्रधानं तत्कार्यम्" इत्यनेनेत्यत्राह—कार्यता चेति । नोद्देश्यत्वस्य कृतिजन्यत्वविशेषणापेक्षत्वं प्रवृत्तिजनने वक्तुं तदुक्तम्, किन्तु कार्यपदार्थस्य कृतिजन्यरूपस्यानीप्सितश्रमादावप्यनुगतत्वात्तद्व्यवच्छेदेन विवक्षितेप्सितकर्मप्रतिपत्त्यर्थमित्यविशिष्टस्य प्रवृत्तिहेतुत्वोपगमो न तद्विरुद्ध इत्यर्थः । कार्यग्राहकप्रमाणसामर्थ्यविरुद्धं कार्यस्य प्रवर्तकत्वमित्याक्षेप्तुं ग्रन्थोक्तं तद्ग्राहकप्रमाणद्वयमनुवदति—कृतिभावाभावेति । तदाक्षेपमाह—ननूत्पन्नायामिति । परिहरति—मैवमिति । मानविषयावस्थं न कार्यं प्रवृत्तिहेतुर्लौकिकप्रवृत्ताविष्यते, स्मर्यमाणतयैव तद्धेतुत्वात्; तन्मूलानुभवहेतुतया मानद्वयमुक्तम्; पृथगनुभूतयोरपि सहत्वस्मृतिरविरुद्धेत्यभिप्रायः । ननु स्मृतिरतीतव्यक्तिविषया इति प्रवृत्त्युत्पाद्यापूर्वव्यक्तिविषयप्रवृत्तिहेतुर्न युक्तेति चोद्यपूर्वकं तदुपपत्तिमाह—नन्विमं व्यक्तिभेदमिति । व्यक्त्यन्तरवर्त्यनुभूतकार्यत्वस्याननुभूतव्यक्तिसम्बन्धितयापि स्मृतिस्तज्जातीयत्वावमर्शानुषङ्गसिद्धानु-

१. कृत्यानुभावी. ख.

२. प्रधानमानस. क.

३. नन्विदं व्यक्ति. क, ख.

भूय तज्जातीयतामवधारयतोऽनागतव्यक्तिभेदेऽपि स्मृतिर्युक्ता । नन्वाद्यप्रवृत्तावनुभवाभावान्न स्मृतिहेतुता । मैवम्, तस्यामपि प्राग्भवीयवासनोद्बोधो जीवनादृष्टादिष्टोपायेऽपि—इत्युपेयत्वात् । कृतिकर्मतावस्था चेयं कृतियोगकालमात्रे न प्राङ् न पश्चादित्यस्थिरत्वात् सिद्धावस्था नास्त्येवेति कदा साध्यता इति नायमनुयोगः ॥

भूतांशस्पर्शान्ता नानुपपन्ना, वाक्यार्थावगमोपायभूतव्यक्त्यन्तरनिष्ठान्वययोग्यतास्मृतिवदित्यर्थः । नन्वेषापि गतिः जातमात्रस्य स्तनपानादिप्रवृत्तावसिद्धेति परिचोद्य तन्निर्वाहकं मतान्तरानुवर्तनमाह—नन्वाद्यप्रवृत्ताविति । यत्पुनरिष्टसाधनधीरेव प्रवृत्तिहेतुरिति परिशेषयितुं मतान्तरनिरासाभिप्रायेणोक्तम्—

"अर्थिता व्यापृतिः पुंसो नियमः किंनिबन्धनः ।
फलसाधनता कर्म निश्चेया साध्यता कदा ॥" इति ।

तत्र फलकार्ययोस्तन्त्रेण निरासमभिप्रेत्य "साध्यता कदा" इत्युक्तम् । कृत्या अन्येन वा साध्यता हि विधाद्वयेऽपि प्रवृत्तिहेतुः; सा न तत्समर्था । न तावत्साध्यवस्तूत्पत्तेः प्राक् सा तद्धेतुः, धर्मिण्यसति तदाश्रितधर्मानुत्पत्तेः; असत्याश्च हेतुत्वासम्भवात्; न च पश्चात्, तदा सिद्धत्वाद्धर्मिणः साध्यत्वास्पर्शात्; सहोत्पत्तौ च धर्मधर्मिभावानुपपत्तिः-इति साधनत्वमेव साध्यजननशक्तिमत्त्वं प्रवृत्तिहेतुः; साध्यपदन्तु धीस्थतामात्रेण साधनशक्तिनिरूपकतयासाधनव्यावर्तकमात्रं नाम; न तु तन्नाम किञ्चित्सत्तया स्वनिरूपितत्वमस्तीति । तत्कार्यनिरासे न क्षमत इत्याह—कृतिकर्मतावस्था चेयमिति । तत्स्वरूपं विवृतं कृतिकर्मतावस्थेति जन्यजनकत्वयोगगर्भकृतिविशिष्टत्वात्मकम् । इयमित्यनन्तरोक्तप्रमाणद्वयप्रसिद्धत्वपरम् । कृतियोगेत्यादिना सहस्थितेरेकक्षणमात्रवर्तित्वेन प्रसिद्धत्वात् "कदा" इति प्रश्नानवकाशो दर्शितः । तस्य भाविन एव स्मृतिविषयतया प्रवृत्तिहेतुत्वप्रकारः प्रागेव दर्शित इति न परोक्तदूषणस्पर्श इत्यर्थः । ननु कृतिप्रधानत्वं मानसमित्ययुक्तम्; कृतेर्मानसत्वेऽपि तत्साध्यवर्तिप्रधानत्वं न मानसत्वार्हम्; कृतिसमानकालतापि नास्ति कृतिजन्यभावार्थव्यवहितस्यापूर्वस्य फलस्य चेति दूरापेतं तत्प्राधान्यस्य मानसत्वमिति चोद्यपूर्वकं

१. जातीयत्व. क. २. पायेऽप्युपेय क.

ननु न कृतिकालेऽपूर्वादिप्रधानतेति न मानसता । मैवम्; तस्यापि प्रधानता कृतेरेव धर्मः; तन्निरूपणीयतया 'तस्य' इति व्यपदिश्यते ॥

ननु 'ममेदं कार्यम्' इति न धीः; किन्तु सङ्कल्पोऽयं चिकीर्षारूपः । मैवम्; यावदियं धीर्नोत्पद्यते, तावद्बुद्धिपूर्वकारिणश्चिकीर्षैव नोत्पादिता

तदुपपत्तिमाह–ननु न कृतिकाल इति । 'कृतिसाध्यं प्रधानम्' इति व्यपदेशमात्रम्; विषयवर्तितया प्रधानत्वसिद्धिस्तु कृतिधियैव, कृतिविषयत्वानन्यत्वात् प्राधान्यस्य; ज्ञानेच्छाविषयत्वमपि अर्थधर्मतयैव व्यपदिश्यते; तथापि विषयिसिद्ध्यविभक्तैव तत्सिद्धिः, तदर्थयत्नान्तराभावस्य प्रसिद्धत्वात् । विषयधर्मत्वे हि व्यवहितविषयत्वे तदुत्पत्त्युत्तरकालं विषयविशेषपरिच्छेदार्थं यत्नान्तरं स्यात्; तेनानुभवसिद्धमेव विषयत्वस्य विषयिसिद्धिमात्राधीनत्वं ज्ञानादिष्विति कृतिविषयत्वं मानसप्रत्यक्षमेव । कृतेस्तु स्वजन्यायासदुःखविदुत्पाद्यत्वाद्विषयस्यानुकूलत्वमनुसन्धायैव तदुत्पाद्येति स्मर्यमाणविषयप्राधान्यान्ता विषयत्वसिद्धिरिति युक्ता मानसतेत्यर्थः । यथोक्तं मानसत्वं कृतिप्रधानत्वस्य कृत्यभेदापादकमिति तस्य लिङर्थतोक्तिर्भावनाया एव तदर्थत्वं नयेदिति स्वोक्तकार्यार्थत्वविरोधीति केचिदाक्षिपन्ति, तदुक्तमानसत्वप्रकाराविवेकनिमित्तमित्यनादृत्यम् । तत्प्रकारस्तु " न चेष्टोपायतैव कार्यता " इत्यनन्तरग्रन्थार्थोक्त्योच्यते । तत्र ह्यनुकूलतया स्मर्यमाणं साध्यं मानसप्रत्यक्षकृत्यवच्छेदकमित्युच्यत इत्यवच्छेद्यावसायित्वरूपं तद्विषयत्वमपेक्ष्य मानसत्वोक्तिः, न कृत्यभेदापेक्षयेति नोक्तदोषः; तत्साध्यत्वानुवादेन तद्विनिवेशोक्तावभेदापादनं त्वातिबालतयेत्यनवद्यम् । ननु कृतिविषयस्यानुकूलत्वमिष्टोपायत्वमेवेति तद्धीफलेच्छाविषयत्वान्तं कृतिविषयत्वं कृतिप्रधानरूपं कार्यत्वं स्यादिति चिकीर्षाविषयत्वमेव तत्, न मेयरूपमिति न शाब्दमिति परिचोद्य तदाह — ननु ममेदं कार्यमितीति । बुद्धिपूर्वं कृतिजन्मेति तावत्प्रसिद्धम्; सा च बुद्धिः कृतिसमानविषया; कृतिश्च साध्यविषयेति कृतिसाध्यत्वधीपूर्विकैव कृत्युत्पत्तिः; तदुत्पादिका चिकीर्षा च कृतिसाध्यत्वधीपूर्विका, नेष्टसाधनत्वधीमात्राधीना; कृतिविषयत्वहीनेच्छामात्रस्य चिकीर्षारूपत्वाभावात्—इतीष्टसाधनत्वकृतिसाध्यत्वधीपूर्विका चिकीर्षा कार्यत्वप्रतीतिपूर्विकैव, कृतिसाध्यत्वधिय एवेष्टोपाय-

स्यात्, इष्टोपायताधीमात्राच्चिकीर्षानुत्पत्तेरित्युक्तम् । सङ्कल्पकार्यधियो- स्तुल्याभिलापादभेदाभिमानः । न चेष्टोपायतैव कार्यता, उपायोपेययो- र्भेदादिष्टस्यापि कार्यतादृष्टेः; इष्टोपायताधीत एव क्लेशरूपस्य कार्यतेति नित्यप्रत्यासत्तेरभेदाभिमानः । बालस्य च स्तनपानान्तस्प्रवृत्त्यनुसन्धाने शब्दतद्व्यापारमित्यसम्भवान्न तयोर्हेतुता शङ्किता । शब्दवाच्यतार्थं च प्रवृत्तिहेतुनिरूपणे सङ्कल्परूपेच्छानन्तरत्वेऽपि प्रयत्नस्य नेच्छायाः प्रवृत्ति- हेतुतोक्ता । उत्पन्ना हि सा तद्धेतुः, न बोधिता । तदेवं पार्श्वस्थो

विषयाया उद्देश्यत्वग्राहित्वादिति न तदसिद्धिरित्यर्थः । कृतिसाध्यत्वधिया वि- नैव चिकीर्षोत्पत्त्युपगमे चातीतादीष्टोपायधियापि सा स्यादित्युक्तमित्यभिलापैक्य- मात्रनिमित्तोऽयमभेदभ्रम इत्याह—इष्टोपायताधीमात्रादिति । ननु चिकीर्षायाः कृतिसाध्यत्वधीपूर्वकत्वनियमेन कार्यतायास्तदन्यत्व इष्टोपायताव्यतिरेको दुर्लभः, तदा हि तदुद्देश्यतार्थं तदुपायत्वस्यावश्यकत्वात् । न चोद्देश्यत्वहेतुतया प्रवृत्त्यहेतु- त्वम्; न ह्युद्देश्यत्वं कृतिस्वभावप्रयुक्तं न च साध्यप्रयुक्तमिति तन्निरूपकतयेष्टोपायत्व- स्यावश्यकत्वे तद्धेतुत्वानिवृत्तेरिति नामान्तरेणेष्टोपायत्वमेवाभ्युपगतं स्यादिति शङ्कां परिहरति—न चेष्टोपायतैवेति । उपायत्वस्यापि तन्निरूपकत्वायोगादुपेयभूतेष्टस्यै- वोपायताद्वारेण तन्निरूपकतेत्युपायत्वं न तन्निरूपकतयापि कार्यशरीरानुप्रवेशि, तद्व्यतिरेकेणोपेयभूतेष्टस्यैव कार्यत्वदृष्टेश्च । तेन कर्मस्वभावप्रयुक्ता तत्रोपायतानु- वृत्तिः, न कार्यप्रयुक्तेति वेदे तदन्यकार्यसिद्धौ तत्प्रामाण्यादनुकूलस्वभावमात्राधीना तत्कार्यतेति फलितं स्यात् । लोके तु शब्दस्य स्वातन्त्र्याभावात् मानान्तरानुसारितेति न शब्दस्य साधनत्वस्पर्श इत्यर्थः । हेतुशक्तिविवेकासमर्थानामुपायत्वव्यतिरे- कादर्शनमात्रमूलोऽयमभेदभ्रम इत्याह—इष्टोपायताधीत एवेति । शब्दतद्व्या- पारयोः प्रवृत्तिहेतुतया परोक्तयोरप्यनिरासे बृहत्युक्तनिरासस्मरणार्थं यथाबृहत्येव कारणमाह—बालस्य चेति । नन्विष्टोपायतायाः कार्यताव्यवहितत्वात् प्रवृत्त्य- हेतुत्वे कार्यताया अपि चिकीर्षाव्यवहितत्वेन तत्तुल्यत्वाद्यत्नरूपप्रवृत्त्यनन्तरकारणे- च्छैव हेतुरिति वक्तव्यम्, न कार्यतेति शङ्कां परिहरति—शब्दवाच्यतार्थमिति । शब्दबोधिततया हेतुत्वार्हप्रवृत्तिहेतोरेवेह प्रस्तुतत्वाद्युक्ता तदुक्तिरित्यर्थः । प्रवृत्ति-

१. सा प्रवृत्तिहेतुः. ख.

व्युत्पित्सुः शब्दश्रुत्यनन्तरं चेष्टां दृष्ट्वा तद्विषयां प्रयोज्यगतां शब्दजां कार्यधियमवधारयन्नावापोद्धारभेदात् कार्यान्वितस्वार्थाभिधानेऽन्येषाम्, लिङादेस्तु कार्याभिधाने व्युत्पद्यते । वेदे च प्रसिद्धार्थनियोज्यपरकामिपदसमभिव्याहारात् स्थायिकार्ये मानान्तरागोचरे[1] व्युत्पद्यते । तेन कार्येऽर्थे वेदस्य प्रामाण्यं युक्तम् ।

यदुक्तम् वेदान्तानां सिद्धार्थपरता[2] इति, तन्न; नाद्या व्युत्पत्तिः सिद्धार्थे युक्ता । ननु 'पुत्रस्ते जातः' इति पदनिचयसमधिगममनु परनरगतविदितवदनविकसनगमकगमितसमभिलषित[4]तनयभवनमितिमनु[3] वचनजनितमतिरियमिति सुखमनुभवति । तन्न, सुतजन्मैवानेनावगतम्—इति विशेषानवधारणात् । न च 'तदेवास्य प्रियम्' इति पारिशेष्यादनुमानाद्विशेषधीः; न हि कस्यचिज्जन्तोरेकमेव प्रियम् । न च स्वाधिगततत्प्रिये

हेतुविचारोपसंहारमुखेन तत्फलभूतां कार्यव्युत्पत्तिं विविच्य दर्शयति—तदेवं पार्श्वस्थ इति । 'कार्येऽर्थे वेदस्य प्रामाण्यम्' इत्येतदर्थं तदपेक्षितापूर्वव्युत्पत्तिमाह—वेदे चेति ।

'कार्यमात्रे वेदस्य प्रामाण्यम्' इत्यस्य पूर्वोक्तविरोधमनूद्य आद्यव्युत्पत्तेः कार्यैकविषयतया परिहरति—यत्तु वेदान्तानामिति । तदेकविषयत्वं नास्तीति चोदयति—ननु पुत्रस्ते जात इति । परिहरति—तन्नेति । मुखविकासलिङ्गस्य सुखोत्पत्तिमात्रगमकत्वात्तदुत्पादकविशेषाप्रतिपत्तेः न विशिष्टार्थवाचित्वव्युत्पत्तिस्ततः स्यात्; प्रियधीकरत्वधीनं व्युत्पत्तिः, प्रियाप्रिययोः देशकालभेदेनानियतत्वात् अर्थविशेषवाचित्वासिद्धेः अनियतधीहेतुत्वस्य च स्मृतिकरतया सर्वविषयतया सर्वस्य सम्भवान्न व्युत्पत्तिरूपतेत्यर्थः । ननु निवृत्तप्रियान्तरपुरुषान्तरवर्तित्वविशेषणापेक्षया मुखविकासस्य प्रियविशेषलिङ्गत्वसम्भवात् अर्थविशेषविषयव्युत्पत्तिर्भवेदिति शङ्कां निवर्तयति—न च तदेवास्येति । संनिकृष्टविप्रकृष्टप्रीतिकराणामियत्तानवधारणादन्यनिवृत्तिनिश्चयायोगान्न विशेष -

१. अगोचरेऽपि उत्प. क, ख.
२. सिद्धार्थत्वम्. क, ख.
३. इतिवदनियमसमधिगममनुवरनरतें - विदित. क.
४. लषितेनय. ख.

तद्धीरिति क्लृप्तत्वादवधृतिः, तत्रैवानेकस्य सम्भवात्—सुतो जातः, सुता ते सुखं प्रिया—इत्येवमादेः क्लृप्तत्वात्, क्लृप्ताचातीतादेरपि स्वहर्षहेतुतेति परहर्षेऽपि तद्धीर्भवति[1]; चेष्टा तु नियतैव दृष्टेति भेदः। न च चेष्टाधीरपि न शब्दजा[2] इति शङ्का, दृष्टे हेतौ कल्पनानुपपत्तेः। अतः सूक्तं व्यवहारत एवाद्या व्युत्पत्तिरिति। ननु व्यवहारतोऽपि[3] व्युत्पत्तौ न कार्यार्थतासिद्धिः, निधिमानेष भूभागः—इति श्रुत्वा निध्यर्थितया तद्ग्रहणकार्यतां बुध्वा कार्यार्थशब्दाभावेऽपि प्रवृत्तेः। तन्न; शब्दादस्य धीः[4]—इति बुध्वा कार्यार्थशब्दाश्रुतेरध्याहृत्य कार्यं शब्दस्य तत्परतामवधारयति। निधिमत्ताकथाविवक्षाया-

विषयत्वसिद्धिरित्यर्थः। ननु विशेषजिज्ञासा स्वावगतप्रियविशेषे पर्यवस्यतीति तद्विषयत्वसिद्धिरित्यत्राह— न च स्वाधिगततत्प्रिय इति। स्वोदाहृतविशेषे तावदनेकप्रसक्तिरपरिहृता; तदुदाहरणान्तरेऽपि अतीतानागतानन्तप्रियार्थनिमित्तसुखोपपत्तेः स्वस्मिन्ननुभवसिद्धत्वात् पुरुषान्तरेऽपि तच्छङ्कानिरासेन विशेषावधारणमशक्यम्; तेन सिद्धार्थवाक्ये व्युत्पत्तिर्दुर्लभा; कार्येऽर्थे तु सुलभेति तदनुसार्येव निर्णय इत्यर्थः। ननु चेष्टायाः स्वकार्यधीहेतुकत्वनियमेऽपि तद्धियः स्ववृत्तौ हेत्वन्तरोत्थत्वदर्शनादशब्दजत्वशङ्कया व्युत्पत्त्यसिद्धिः तुल्यैवेति शङ्कां परिहरति – न च चेष्टाधीरिति। तस्यापि हेतुत्वमन्वयव्यतिरेकावगम्यमिति शब्दस्याप्यत्रान्वयव्यतिरेकसिद्धे हेतुत्वे तावतैव कार्योपपत्तावनुपलब्धहेत्वन्तरशङ्कानवकाशान्न साम्यमित्यर्थः। उपसंहरति—अतः सूक्तमिति। तथापि कार्यार्थत्वनियमः शब्दार्थस्य न सिध्येदिति चोदयति ननु व्यवहारतोऽपीति। वाक्यानन्तरभाविविशिष्टार्थविषयप्रवृत्तिमात्रं हि व्युत्पत्त्युपयोगि, तावतैव प्रवृत्तिविषयार्थधीशक्त्यवगमसिद्धेः; कार्यधीस्त्वशब्दोत्थापि प्रवृत्तिहेतुः स्यात् स्वतन्त्रप्रवृत्ताविवेति तद्विषयधीमात्रं शाब्दमस्तु, कार्यार्थशब्दाभावादित्यर्थः। परिहरति— तन्न शब्दादस्येति। तत्रापि बालः प्रवृत्त्यनुमितधीकरत्वं शब्दस्य कल्पयन् विशिष्टकार्यधीशक्तिमेवावधारयेत्; न तदंशमात्रधीशक्तिम्, तन्मात्रधियः प्रवृत्त्यहेतुत्वात्। पश्चात्प्रतिपदव्युत्पत्त्यनन्तरं तद्विरोधानुसन्धानेऽपि अध्याहारेण तदविरोधमेव कल्पयेत्, न पूर्वावगत-

१. भवत्येव. ख.
२. पि शब्दजा. क.
३. तोऽपि न कार्यार्थ. क.
४. दस्यधीः ख.

मपि वक्तुः कार्यार्थस्यैव सिद्धार्थपरतालक्षणेति धीः । नन्वर्थान्तरान्वितपरत्वकल्पनयापि कार्यपरतार्धीसिद्धेर्मया कार्यरूपविशेषे शक्तिगौरवं च । मैवम्; कार्यान्विते धीनियमात्तत्रैव शक्तिः, न त्वर्थान्तरान्विते; महाविषयत्वे हि गौरवमुक्तं स्यात् । न हि वह्निजातीयनियते पाकफले द्रव्यमात्रे

विपरीतमित्यर्थः । यदि तु मानान्तरेण वक्तुः कथामात्रविवक्षामवधारयेत् तथापि पूर्वावगत्यबाधेन प्रयोगविशेषनिष्ठलक्षणोपकल्पनया तदुपपत्तिं नयेत् कार्यार्थशून्यार्थविशेषधीमात्रस्य शब्दकार्यतावगत्यशक्त्यनुसन्धानेनेत्याह—निधिमत्ताकथाविवक्षायामपीति । ननु सान्निध्याद्युपाधिमदन्यान्वितस्वार्थाभिधानशक्त्युपगमेनापि कार्यसन्निधौ तदन्वयधीसिद्धेः कार्यान्वितार्थशक्तिकल्पना मानशून्या गौरवदूषिता च सिद्धार्थप्रयोगलक्षणाकल्पनान्ता कथमाश्रीयत इति चोदयति — नन्वर्थान्तरान्वितेति । परिहरति—मैवम्, कार्यान्विते धीनियमादिति । शक्तिकल्पकशाब्दधीकार्यस्य व्युत्पत्तिभूमिवर्तिनः कार्यान्वितनियतत्वान्न सामान्यमात्रे शक्तिकल्पनावकाशः । न च कार्यांशत्यागेनान्वितधीशक्त्युपगमे शक्तिलाघवं तद्धेतुः, गौरवकरत्वात्तदुपगमस्य; विषयाधिक्यं हि गौरवापादकम्; कार्याकार्यान्वितोक्तौ च तदाधिक्यमिति गौरवहानायैव कार्यान्विते शक्तिराश्रितेत्यर्थः । एतदेव दृष्टान्तोक्त्योपपादयति — न हि वह्निजातीयेति । ननु पाककार्यनियमस्य प्रत्यक्षत्वात्तच्छक्तिरपि तत्र नियतैवोपेया, न तथा शक्तिकार्याभिधाननियमः प्रसिद्ध इति न दृष्टान्तसाम्यम्; तत्कार्यव्याप्तिरेव चेह प्रसिद्धा; न च कार्यव्याप्तिः शक्तिकल्पनापेक्षा, सर्वपदानां कार्यान्वयावस्थायामन्वयशक्तेः क्लृप्तत्वादन्यान्वयेऽपि पदानां भेदाभावात् तद्वर्तिशक्त्यनुवृत्तेरवारणीयत्वात्; ततश्च कार्यानुत्पत्तिपक्ष एव कल्पनागौरवम्, शक्तिप्रतिबन्धककल्पनापेक्षत्वात्तन्निवृत्त्युपगमस्येति कार्यान्विते धीनियमादित्यादिग्रन्थो न प्रेक्षापूर्वक इति प्रतिभाति । उच्यते—"सिद्धापदेशेषु वक्त्रभिप्रायादेव वाक्यार्थधीः, नान्विताभिधानात्" इति ग्रन्थेनानन्तरमेव कार्यान्वितनियततयैवाभिधानोक्तेः न दृष्टान्तसाम्यासिद्धिः । न च पदाभेदमात्रात् क्लृप्तशक्तित्वं सिद्धापदेशकवाक्यस्य, प्रतिवाक्यावधारणीयतात्पर्यशक्तेरभिधानेऽन्तरङ्गहेतोरक्लृप्त-

१. परतासिद्धेः. क. २. Omitted च. क.

शक्तिः । होळाकमूलवेदस्य तु यत्र प्राच्यविषयत्वम्, तत्तत्रैव वाच्यम् । कार्यपरत्वद्वारतयैव परस्परान्वयोऽपि व्युत्पन्न इति न प्रतिपदं धर्मः । न च लोकवद्वेदान्तेषु परस्परान्वयमात्रपरता लक्षणया युक्ता, विवक्षाभावात् । अतः कार्यपरतानुपगमेऽबोधकतैव तेषां स्यात् । ननु यदि लोके लक्षणया सिद्धान्वयपरता, तदानभिधानं वाक्यस्य स्यात्; मुख्यार्थस्यैव हि वाक्येऽन्विताभिधानमिष्यते । मैवम्; सिद्धापदेशेषु वक्त्रभिप्रायादेव वाक्यार्थधीः,

त्वात्तत्कल्पनापत्त्या गौरवदोषोऽपि व्यक्त एव; तदसिद्ध्यैवाभिधाननिवृत्तिरपि युक्तेत्यभिप्रायः । ननु सङ्कुचितदृष्टकार्यकल्प्यकारणस्य तदधिकव्याप्त्यसम्भवे प्राच्यमात्रानुष्ठितहोळाककर्मविधेस्तदाचारकल्प्यस्य सर्वविषयत्वाश्रयणमयुक्तमित्याशङ्क्य तदुपपत्तिस्तत्रैव वाच्येत्याह— होळाकमूलवेदस्येति । ननु कार्यान्विताभिधानपक्षे सर्वेषामपि तदन्वयाद्विषयत्वापत्तेः प्रतिपदं कर्मभेदः स्यादित्यत्राह—कार्यपरत्वद्वारतयेति । परस्परान्वयोक्त्यविरोध्येव कार्यपरत्वं व्यवहारव्युत्पन्नम्, न साक्षादेवेति यथाविनियोगमेव तदित्यर्थः । ननु कार्यं विनापि लक्षणया लौकिकवाक्यानामर्थबोधाङ्गीकाराद्वेदान्तवाक्येष्वपि तदापत्तेः 'कार्येऽर्थे वेदस्य प्रामाण्यम्' इति नियमोक्त्यनुपपत्तिरिति शङ्कां परिहरति—न च लोकवद्वेदान्तेष्विति । वक्तृविवक्षानुमानोपक्षीणा सा लक्षणा, नाभिधानानुप्रविष्टेति न वेदप्रामाण्यापादनक्षमेत्यर्थः । ततस्तेष्वपि कार्यपरतैव प्रामाण्यनिर्वाहिकेत्याह — अतः कार्यपरतानुपगम इति । ननु विवक्षानुमानमप्यभिधानान्तरमेव, व्युत्पत्तिसिद्धाभिधानविरोधहानार्थत्वाद्विवक्षानुमानस्येति कार्यनियतशक्त्युपगमेन लक्षणया लौकिकवाक्यगत्युपगमोऽप्यशक्यः, मुख्यार्थनियताभिधानभङ्गापत्तेरिति कार्यनियतशक्त्युपगम एव हेय इति चोदयति—ननु यदि लोक इति । परिहरति—मैवं सिद्धापदेशेष्विति । विवक्षानुमानस्याभिधानपर्यवसायित्वनियमो नाभ्युपेयते, सिद्धापदेशानामनुमानमात्रोपनेयार्थत्वादिति न कार्यनियतत्वं सिद्धान्तान्तरविरोधीत्यर्थः । ननु लौकिकवाक्येषु अभिधाननियमाभ्युपगमसूचकम् "वाक्ये सर्वाण्येवामुख्यार्थानि न प्रयुज्यन्ते" इति अभिधानोपयोगिमुख्यार्थपदसद्भावनियमप्रसाधन

१. नुगमे. क.

नान्विताभिधानात् सङ्केतपदेभ्य इव । "न च वाक्ये सर्वाण्येवामुख्यार्थानि" इति यदुक्तम्, तदन्विताभिधायके कार्यार्थे वाक्ये, न तु सिद्धार्थेऽपि । लिङादिरेव तु कार्यार्थो लाक्षणिकः । न चामुख्यार्थपरे लिङादावन्येषामन्विताभिधानाभावः; न ह्यपूर्वकार्यान्विते स्वार्थेऽन्येषां व्युत्पत्तिः, लोकवेदव्यापितया मुख्यामुख्यकार्यान्वितस्वार्थ एव व्युत्पत्तेः । सिद्धार्थे तु प्रसिद्धार्थाभिव्याहारात् व्युत्पत्तिर्व्युत्पत्तिपूर्विकैव, नाद्या व्युत्पत्तिः ।

मित्याशङ्क्य तदपि कार्यार्थवाक्याभिप्रायम्, न सिद्धार्थाभिप्रायमिति परिहरति—न च वाक्ये सर्वाण्येवेति । ननु लोके कार्यार्थशब्दस्य लक्षणावृत्त्युपगमात् कार्यार्थाभिप्रायमपि तत्समर्थनमशक्यमित्याशङ्क्य लिङादिमात्रं तत्र लक्ष्यार्थम्, पदान्तराणि मुख्यार्थानीति नाभिधानानुपपत्तिरिति परिहरति—लिङादिरेवेति । ननु तत्तन्त्रतोपगमवदन्येषामप्यमुख्यार्थतेत्यत्राह—न चामुख्यार्थपरे लिङादाविति । नान्येषां लोकसिद्धव्युत्पत्तेर्विचलनहेतुरस्तीति तेषां मुख्यामुख्यकार्यान्वितस्वार्थशक्तिरविहतेति तेषां लोकेऽप्यन्विताभिधानं स्थितमेवेत्यर्थः । नन्वन्येषां सिद्धार्थप्रयोगेऽपि समभिव्याहारमूला व्युत्पत्तिरस्तीति कथं कार्यान्वयनियमाङ्गीकार इत्यत्राह—सिद्धार्थे त्विति । आद्यव्युत्पत्तेः कार्यान्वितविषयत्वनियमे तद्व्युत्पन्नपदसमभिव्याहृतानां तत्समानस्वभावत्वावगमात्तन्नियतविषयत्वाच्च व्युत्पत्तेर्विषमस्वभावाप्रतिपत्तेस्तेषामपि शक्तिः कार्यान्वितनियतैवेत्यर्थः । यत एवम् "चोदनेति क्रियायाः प्रवर्तकम्" इति भाष्यं वक्ष्यमाणानपेक्षत्वार्थकार्यैकविषयप्रामाण्यसाधनपरम्, तस्मात्कार्यैकविषयत्वविरोधितया सिद्धरूपेणावभासमानस्य मन्त्रार्थवादार्थस्यापि कार्यार्थविधिभागैकवाक्यत्वप्राप्तकार्यान्वितरूपापेक्षया कार्यत्वाह्वानादन्वितरूपेणैव च शब्दमेयत्वादतात्पर्यविषयस्वरूपमात्रस्य तद्विरोधित्वं नास्तीति तदर्थोऽपि कार्य एव; तात्पर्यबहिर्भूतस्य सिद्धरूपस्य मानान्तरग्राह्यत्वेऽपि अन्वितरूपस्य नेन्द्रियादिग्राह्यतेत्युक्तार्थसमर्थनार्थमेव "चोदना हि भूतम्" इत्यादिभाष्यम्; "नान्यत्किञ्चनेन्द्रियम्" इति चार्थवदेव, न परपक्षव-

१. Omited अपि. क. २. Omited. एव. क.

अतो मन्त्रार्थवादार्थः स्वरूपतः सिद्धोऽपि कार्यान्वितरूपेण कार्य एव, न च तद्रूपे मानान्तरगम्यतेति "चोदना हि" इति भाष्यम्, "नान्यत् किञ्चनेन्द्रियम्" इति च; अतो न प्रतिज्ञाहानिः कार्यरूप एव वेदार्थ इति ॥

"नन्वतथाभूतम्" इति भाष्यं प्रतिज्ञादोषमाह—न चोदनालक्षणं किञ्चिदिति, पुंवाक्ये व्यभिचारदर्शनोत्थं संशयरूपमर्थासंस्पर्शित्वं शब्दस्य ध्रुवत्। न च प्रत्यक्षादिवत् भेदाग्रहसमाधेयो व्यभिचारः; तत्र हि दोषादग्रहः, इह तु शाब्दधीहेतोः शब्दस्य न दोषः; नरगतस्तु दोषो न धीहेतुः, किन्तु शब्दव्यक्तिहेतुदोष इति। इदमेवोक्तं गुरुणा—"अन्तरा बाधकेऽप्य[1]-दित्याह—अतो मन्त्रार्थवादार्थ इति। प्रकृतमुपसंहरति—अतो न प्रतिज्ञाहानिरिति ॥

"नन्वतथाभूतम्" इति चोदनाया अर्थव्यभिचारशङ्का न युक्ता, मानान्तरगम्यव्यभिचारस्यातद्गोचरार्थस्य चोदनायामशङ्कनीयत्वादित्याशङ्क्य तदभिप्रायमाह—नन्वतथाभूतमिति। न चोदनामात्रस्यार्थव्यभिचारोऽनेन चोद्यते; पुंवाक्यव्यभिचारदर्शनमूलं शब्दमात्रस्य अर्थनिश्चयजननासामर्थ्यमाशङ्क्यत इति चोदनालक्षणप्रतिज्ञादोषपरं भाष्यमिति नानुपपत्तिरित्यर्थः। ननु क्वचिद्व्यभिचारेऽप्यन्यत्र प्रामाण्यं प्रत्यक्षादाविवास्तु इत्यत्राह—न च प्रत्यक्षादिवदिति। न च तत्रापीन्द्रियादिजज्ञानस्य व्यभिचारमङ्गीकृत्यान्यत्र प्रामाण्यमिष्यते; व्यभिचारविषये हि शुक्तिरजतादौ विवेकाग्रहादन्येच्छयान्यविषयप्रतिपत्तिमात्रं भवति; तच्च भेदग्रहान्निवर्तत इति प्रवृत्तेस्तदुद्देश्याभीष्टार्थप्राप्तिफलनिवृत्तिमात्रं व्यभिचारः, न ज्ञानस्यार्थव्यभिचार इति न प्रामाण्यहानिः; शब्दोत्थज्ञानव्यभिचारे तु विवेकाग्रहः प्रवृत्तिहेतुर्न युक्तः, तदग्रहस्य ज्ञानहेतुदोषनिमित्तत्वाच्छब्दे च दोषस्वभावत्वायोगात्। शब्दप्रयोक्तृनिष्ठस्तु दोषो न शाब्दधीहेतुदोष इति प्रत्यक्षाद्यतुल्यत्वाद्विषयशून्यज्ञानहेतुदोषत्वमेव शब्दस्यापादयेद्व्यभिचारदर्शनमिति प्रतिज्ञानुपपत्तिरुक्तेत्यर्थः। ननु बाधितविषयेऽपि शाब्दबोधानुवृत्तिः व्यभिचारहेतुरुक्तो गुरुणा, न दोषाभाव इत्याशङ्क्य दोषाभावफलोक्त्या दोषभावद्वारकाग्रहसमाध्यसम्भव एव विवक्षित इत्याह—इदमेवोक्तमिति। नन्वाप्तवाक्यमूलकलोकव्यवहारबाधितमिदमनिश्चाय-

१. बाधकेऽपि दृष्टे ख. ख.

दुष्टशब्दोत्था धीर्व्यभिचरत्येवेति नाग्रहोऽयम्" इति । आप्तवाक्याद्व्यवहारः सन्देहान्मानान्तराद्वा । वेदार्थे तु मानान्तरानुमानादपि[१] न निश्चयः, मानान्तरामेये[२] वेदार्थे वक्तुरनुपगमात् ।

उच्यते—न हि ज्ञानं व्यभिचरति वेद्यम्, तदारूढस्यैव[३] वेद्यत्वात् । नरगिरान्त्वियं गतिः[४] । अबुद्धबोधनायापि[५] हि वाक्यं प्रयोक्तुं शक्यम् । अतो नराभिप्रायानुविधायि नरवाक्यमिति न स्वतोऽर्थधीः । तथा[६] च नरानसत्यप्यर्थे भूयोवाक्यरचकान् दृष्ट्वा न वाक्यमात्रादर्थनिश्चयः; यदा तु 'मानान्तरादर्थं बुद्ध्वा तद्विवक्षया निजशक्त्यप्रमादाभ्यां तद्वाचकमुच्चारितवान्' इति धीः, तदार्थनिश्चयः । नन्वेवमपि वक्तुरेवंरूपतां बुद्ध्वा तद्वाक्यादेवार्थनिश्चयोऽस्तु । तन्न; एवंरूपताबोधे हि मानान्तरान्तर्भावो

कत्वोपपादनमित्याशङ्क्य तदविरोधोक्त्या वेदमात्रवर्त्यैवेदमिति परिहरति—आप्तवाक्यादिति । उच्यत इत्यादिना समाधानमाह । क्वचिज्ज्ञानस्य विषयव्यभिचारसिद्धौ हि वाक्यजन्यस्य तच्छङ्का स्यात्, तदवच्छेदकतया स्फुरत एव वेद्यत्वात्तद्विधुरस्य च ज्ञानस्याभावान्न तत्सिद्धिरिति शाब्देऽपि न तच्छङ्केत्यर्थः । ननु शाब्दे व्यभिचारो दर्शित इत्याशङ्क्य पुंवाक्ये व्यभिचाराभावमुपपादयति—नरगिरामिति । गृहीतशक्त्यपि हि पुंवाक्यं तद्ग्रहानन्तरमेवासदर्थवाक्यप्रयोगशक्त्यवमर्शजतत्संशयप्रतिबद्धशक्तिकं न श्रुतमात्रमर्थधीकरम्; भूयोऽर्थशून्यवाक्यप्रयोगदर्शनाच्च वाक्ययोग्यार्थविषयवक्तृप्रमित्यनुमाननिवारिते प्रतिबन्धके पश्चाद्वाक्याभिधानमिति न व्यभिचारावकाश इत्यर्थः । ननु वक्तृप्रमित्यनुमानं विनापि प्रतिबन्धकनिवृत्तिर्व्यभिचारप्रयोजकभ्रमादिचतुष्टयनिवृत्त्यवगत्यैव सिद्धेति वाक्यमेवार्थनिश्चायकमस्त्विति पृच्छति—नन्वेवमपीति । परिहरति—तन्न, एवंरूपताबोधे हीति । वक्तुरसदर्थवाक्यप्रयोगप्रयोजकशून्यत्वमेव प्रमितिकारणत्वनिश्चयाधीननिश्चयमिति नार्थविषयं तत्र वाक्यस्य स्वातन्त्र्यमस्तीत्यर्थः । तदेवोपपादयति—

१. मानानुमानादपि. क.
२. Omitted. वेदार्थे. ख.
३. वेद्यं तदारूढम्, तस्यैव. क.
४. सङ्गतिः. क.
५. Omitted. हि. ख.
६. Omitted. च. ख.

दुर्वारः; यदर्थधीयोग्यं यद्वाक्यम् तन्मानधीर्हि तद्वाक्याद्यावन्न जाता,[1] तावद्व्यभिचारशङ्का नास्ति; तच्छङ्का हि 'अमानबुद्ध्यर्थविषयं वाक्यम्' इत्येवम्; सा च तन्मानतद्विवक्षातदुच्चारणाविसंवादादपैतीति बलान्मानान्तरान्तर्भावः। नन्वेवमाप्ततावधारणान्तर्गता मानान्तरधीरिति नाप्तवाक्याल्लिङ्गादन्यमवशिष्यते । मैवम्; वाक्ययोग्यार्थे निरस्तभ्रमादिचतुष्टयोऽयम्—इत्येवंरूपमाप्तत्वमवधार्य, 'तत्प्रयुक्तमिदं[2] वाक्यम्' इति चानुसन्धाय मूलमाननिश्चयः। ननु वाक्यं बुद्ध्वैव तद्योग्यतां च, आप्तत्वानु-

यदर्थधीयोग्यमिति । यदि व्यभिचारशङ्कायामर्थसाधकप्रमाणाभावस्य व्यभिचारप्रयोजकतयान्तर्भावो न स्यात्, तदा तन्निवृत्तौ तत्प्रमाणान्तर्भावोऽपि न भवेत्, शङ्काहेतुनिवृत्तिमात्रस्यापेक्षितत्वात् । तच्छङ्का तु न तद्रहिता, व्यभिचारहेतूनां बहुत्वादर्थसद्भावप्रयोजकविपरीतरूपेणैकीकृत्य व्यभिचारप्रयोजकतया शङ्काहेतुत्वादर्थसत्तासाधकप्रमाणेतररूपेणैव भ्रमादीनां व्यभिचारशङ्कानिवेश इति तत्प्रमाणनिश्चयादेवावगमार्हता; व्यभिचारप्रयोजकेयत्तानिश्चयाधीनश्च सर्वनिवृत्तिनिश्चयः; तदियत्ताधीश्च प्रमाणमेवैतद्व्यतिरिक्तं वाक्यप्रयोगकारणमिति निश्चयपूर्विका; तन्निश्चये व्यभिचारहेतुनिवृत्तिधीरेव प्रमाणनिश्चयान्तेति प्रतिबन्धकनिवृत्त्यपेक्षया वाक्यमेवार्थनिश्चायकमित्यसम्भावितमेतदित्यर्थः । नन्वेवं वक्तृज्ञानलिङ्गत्वमपि वाक्यस्य न स्यात्; तदुपगमे च यादृशं लिङ्गमिष्टं तादृशमपेतान्यकारणशङ्कमभिधायकमस्त्वित्यभिप्रायेण चोदयति — नन्वेवमिति । परिहरति — मैवमिति । योग्यार्थस्मृत्यनन्तरं तदभिधानार्थमेवार्थशून्यत्वशङ्कानिवर्तकमूलमाननिश्चयापेक्षा; तदनुमानार्थन्तु तदितरकारणनिवृत्तिधीमात्रमपेक्षितम्; तावतैवावशिष्टकारणानुमानाविरोधादित्याप्तताद्वैविध्योपगमान्न विरोध इत्यर्थः । उक्ताभिप्रायमेव स्पष्टयितुमनुमानसामग्रीलाभात् प्रागेवाभिधानसामग्रीलाभान्न लिङ्गतेति चोदयति — ननु वाक्यं बुद्ध्वेति । दोषनिवृत्त्यनुसन्धानानन्तरमेवाभिधानसामग्रीसिद्धेः तदेवास्तु, मा भूत्पुनर्निवृत्तदोषवक्तृप्रयुक्ततानुसन्धानापे-

१. ता, न तावद्व्यभिचारशङ्कापैति तच्छङ्का हि मान. ख.

२. Omitted इदं वाक्यम्. क.

सन्धानमिति नाप्ततां बुद्ध्वा पुनर्वाक्यलिङ्गानुसन्धानम्। मैवम्; नाप्तता नरधर्मो मानस्य कार्यम्; किन्तु वाक्यप्रयोग इति कार्यं वाक्यमनुसन्धाय तत्कारणमानानुमा, ततो निःशङ्काद्वाक्यादर्थधीः। या च मानात्तन्मेयानुमोक्ता, सा मानमात्रस्यैव, तत्कारणत्वात्; मानादेव तु मेयसिद्धिः। यद्यपि पक्षधर्मताबलान्मेयसिद्धिः[1], तथापि प्रमित्साप्रकारभेदादपि तत्सि-

क्षमनुमानमित्यर्थः। परिहरति—मैवं नाप्तता नरधर्म इति। वक्तृप्रमित्यनुमानात् प्राक् दोषविषयबाधकावगमेऽपि वाक्यप्रयोगस्यान्यथासिध्यनवगमात् दोषवत्त्वसंशयो न निवर्तेत, तत्कारणस्यावश्यकत्वात्। प्रमितिकारणे बाधकाभावानुसन्धानेन तज्जन्यतयान्यथासिद्ध्यवमर्शोत्तरकाले वा इतरबाधकाधीना प्रतिबन्धकनिवृत्तिः; तत्र यद्यनन्तरावगतदोषविषयबाधकाधीनदोषनिवृत्तिरूपाप्तता मानकार्यतया मानानुमानसमर्था स्यात्, तदैव दोषनिवृत्त्यनुसन्धानानन्तरं तद्विशिष्टवक्तृप्रयुक्तत्वानुसन्धानविलम्बं नापेक्षेतार्थाभिधानम्; सा तु न मानकार्यमिति न तदनुमानशक्ता; तेन तत्कार्यतया तच्छक्तवाक्यप्रयोगं दोषनिवृत्तिविशिष्टवक्तृकार्यतयानुसन्धायापि वक्तृप्रमित्यनुमानमुत्पाद्यैव वाक्येन वाक्यार्थं प्रतिबन्धकहीनं प्रतीयादित्यर्थः। वाक्यलिङ्गकं मूलमानानुमानमुक्त्वा यन्मानलिङ्गकं मेयानुमानमुक्तं प्रकरणे तदयुक्तम्, मानस्य मेयावच्छिन्नतया मेयस्यापि मानानुमानविषयत्वादित्याशङ्क्य तदभिप्रायमाह—या च मानात्तन्मेयानुमेति। कार्यकारणभावपुरःसरेऽनुमाने मेयस्य वाक्यप्रयोगकारणत्वाभावान्मानमेव तदनुमेयम्। मेयं तु श्रुतिस्मृतिविषयतया तदवच्छेदकमात्रम्, पश्चाद्वयाप्त्यन्तरात्तदनुमानमिति। ननु निवृत्तभ्रमादिकारणकवाक्यप्रयोगकारणानुमानं पक्षधर्मताबलान्मेयमपि विषयीकुर्यादित्याशङ्क्य कारणविशेषजिज्ञासायां मानावच्छेदकतया मेयस्यापि कारणत्वाविशेषादेवं भवेत्; यदा तु वक्त्राश्रितकारणविशेषजिज्ञासा, तदोक्तप्रकारेणानुमानभेद इत्युभयथा व्यवहारश्चोपपन्न इति परिहरति—यद्यपि पक्षधर्मताबलादिति। एवं मानानुमानान्तर्भावेनैव मेयनिश्चयः सामर्थ्यसिद्धः; कचिज्जिज्ञासाभेदाच्छेदमात्रसिद्धावपि अर्थस्य ज्ञानावच्छेदकत्वेन भाननियमादसिद्धत्वव्यवहारस्तत्रापि नास्तीति माना-

१. मानसिद्धिः. क.

द्धिरित्युभयथा व्यवहारः; एवं च मेयनिश्चयात् पूर्वं वाक्यादर्थधीरस्त्विति[1] न वाच्यम्। न चैवं व्यवहारावसितशक्तिबाधः; शक्तिविषय एवार्थे व्यभिचाराशङ्का निश्चयश्च, लिङ्गता च शक्तिमत एव, वाक्यस्यानुवादकता[2] च। नन्वनुवादकधीर्न मितिः, न च स्मृतिः, न च विधान्तरमनुज्ञातमिति न निरूप्यते। मैवम्; मितिरेवेयम्; किन्तु अस्यां दशायां मितिरूपानभिव्यक्तेर्न 'मितिः' इति व्यपदिश्यते। अनभिव्यक्तिश्च शङ्कोत्थाननिरसनाय मानान्तरधीपूर्वकतापत्तेरौपाधिकसापेक्षताभिमानात्[3]। शब्दशक्तिस्तु मितिजनन एवावधृता लोके, वेदे तु उपाधिविरहात् फलिता[4]।

नुमानस्य पूर्वभावित्वेऽपि मेयानुमानात्पूर्वमेवाभिधानमस्त्विति चोद्यमप्यनवकाशमित्याह—एवं च मेयनिश्चयादिति। नन्वेवमभिधानशक्त्यभाव एवोक्तः स्यात्, अनुमानेनैवार्थज्ञानसिद्धौ तत्कल्पनाहेत्वभावात् इति तद्बाधकमनुमानाश्रयणमित्यत्राह—न चैवं व्यवहारावसितेति। प्रथमं तावत्प्रवृत्तिविषयज्ञानकरतैव वाक्यस्यावधारितेति तद्योग्यशक्तिरेव कल्पिता; तदनन्तरं तत्प्रयोगस्यातन्त्र्यशङ्कया व्यभिचारशङ्का तदुपजीविनी न तन्निवृत्तिशङ्कावसायिनी; व्यभिचारदर्शनोत्थस्तन्निश्चयश्च तदुपजीव्येव; तदनन्तरभावि लिङ्गत्वमपि पूर्वसिद्धार्थशक्त्युपजीव्येव, शक्तिविषयार्थविषयज्ञानं प्रत्येव लिङ्गत्वात्। न च लिङ्गतयैवार्थनिश्चायकत्वावधारणात् पूर्वकल्पितार्थाभिधानशक्तिबाधः, तदनन्तरार्थानुवादात् तदबाधसिद्धेरित्यर्थः। शक्तिमत एवानुवादकता चेत्येतत्समर्थनार्थमनुवादस्वरूपमेव दुर्निरूपं स्वपक्ष इति चोदयति—नन्वनुवादकधीरिति। परिहरति—मैवं मितिरेवेति। ननु 'तत्' इतिस्मृतितुल्याकारा कथमनपेक्षप्रमितिताहेत्याशङ्क्य तदनवभासहेतुमाह—किन्त्वस्यां दशायामिति। कथमनवभासमानस्य तात्त्विकत्वं अवभासमानस्यौपाधिकत्वं च निश्चीयत इत्यत आह—शब्दशक्तिस्त्विति। लोके स्मृतितुल्यरूपत्वभाननियमेऽपि शाब्दधीहेतुः शब्दशक्तिग्रहस्तद्विपरीतरूपस्य स्वाभाविकत्वं गमयति। न च कार्यानुभवविरोधात्तद्भावबाध उपेयः; तदनुभवानुगतोपाधिवियोगेन वेदे शक्तिविषयतावगतरूपानुभवादिति तदेव स्वाभाविकमिति निश्चीयते। स्मृतिहेतो-

१. वाक्यार्थधी. क.
२. वादता. ख.
३. सापेक्षत्वा. क.
४. फलितसंस्कार. ख.

संस्कारमात्रस्य तु नापरिच्छिन्ने शक्तिः कॢप्ता[1], न च क्वचित् फलितेति स्वभावत एव तस्य सापेक्षधीजनकतेति तत्रापि धीः सापेक्षस्वभावा स्मृतिः प्रमोषेऽनभिव्यक्तस्वरूपापि हेतुशक्तिनिरूपणात्; एवमिहापि शब्दशक्तिधीतः प्रमितित्वेव निरूप्यते । एवं वैदिकानुवादेऽपि द्रष्टव्यम्। यदि तु 'स्मृतिरियम्, संस्कारोद्बोधकाच्छब्दात्' इत्युपेयते, तदाशङ्कापगमेऽपि मित्यनुत्पत्तेस्तच्छक्त्यनुपगमोऽपि निर्बीज इति वेदादपि मितिर्न स्यात्; अन्वितविशेषे च स्मृतिरिति नान्विताभिधानव्युत्पत्तिः स्यात्।

स्तुल्यत्वाभावात् कार्येऽप्यसाम्यमिति प्रमोषविषये सापेक्षत्वानुभवाभावेऽपि हेतुशक्त्या तदुपगम एव न्याय्यः । एवं शाब्दबोधेऽनपेक्षत्वानुभवाभावेऽपि तदुपगम इत्यर्थः । उक्तामनुवादगतिं वेदानुवृत्त्युक्त्या स्थिरीकरोति—एवं वैदिकानुवादेऽपीति । विधान्तरोपगमे तत्रानुपपत्तिः स्यादित्यर्थः। शब्दस्य संस्कारोद्बोधकमात्रहेतुत्वेनानुवादस्य स्मृतित्वाश्रयणं परकीयमनूद्य दूषयति — यदि तु स्मृतिरियमिति । तदुपगमे लोके शब्दस्य प्रमितिजनकत्वासिद्धेः तदनुमेयशक्तेरप्यसिद्ध्यापत्तेर्वेदप्रामाण्यासिद्धिरित्यर्थः । ननु व्युत्पत्तिकाले तत्पक्षेऽप्यन्वितार्थप्रमितिशक्तिरेव गृहीतेति पश्चादनुमानान्तर्भावावगमादभिधानकार्यनिवृत्त्यवगमेऽपि पूर्वगृहीतशक्त्युपजीवनेन तद्विषयेऽन्वितार्थे ज्ञानानुमानमिति तच्छक्त्यबाधादभिधानप्रतिबन्धकहीनाद्वेदादभिधानमुखेनैवार्थधीरिति न तत्प्रामाण्यासिद्धिरित्यत्राह— अन्वितविशेषे च स्मृतिरिति । न तद्विषयज्ञानानुमानार्थमेव पूर्वगृहीतशक्त्यबाधो युक्तः; आवापोद्धाराभ्यां पदपदार्थभेदसिद्धावाकाङ्क्षादिमत्प्रतियोग्यन्वितार्थविशेषस्यैकैकपदबोध्यतया पूर्वग्रहात्तद्रूपे तावत्स्मृतिः शक्तिविषयतया शक्त्यबाधेऽपि इष्टेति सैव संनिहितविशेषनिष्ठा तद्योग्यतानुसन्धानोपकारिणी तदन्विताभिधाननिवृत्त्या तच्छक्तिबाधेऽप्यनुमानोपकारिणी स्यादिति लोकेऽभिधानाभावनिश्चये तत्कल्पिता शक्तिर्न परिशेषार्हेत्यर्थः । ननु स्वपक्षेऽपि लोकव्युत्पत्तिप्राप्तं वेदस्यार्थाभिधानमिति तदभिधानतुल्यार्थाभिधानार्थं वाक्यत्वलिङ्गानुमितवेदकर्तृज्ञानानुमानपूर्वकमेवाभिधानं स्यादित्यनपेक्षत्वाधीनप्रामाण्यासिद्धिस्तुल्ये-

१. तासु न. क.
२. स्वत एव. ख.
३. Omitted. अपि. क.
४. शक्त्युप. ख.

न च कर्त्रनुमानतो वेदादप्यव्यक्तमितिरूपा धीः, पूर्वमपूर्वकार्यस्य बुद्धावारोपयितुमशक्तेः, कर्त्रयोग्ये वेदे कर्तुरननुमानात् । यत्तु "अपि च पौरुषेयाद्वचनात्" इति भाष्यं व्याख्यातम् 'पूर्वं मानान्तरपूर्विका पुंवाक्यादर्थधीरुक्ता; अधुनानुमानादेवार्थधीरित्याह' इति, तदनुवादानादरात्; न त्वनुवादाभावात् । तदेवं पुंवाक्यमव्यभिचारि, लिङ्गाभासादनुमाव्यभिचाराभिमानः—इति न प्रतिज्ञा दुष्टा ॥

"नन्वतथाभूतम्" इति भाष्यं परैरेवं व्याख्यातम्—प्रामाण्याप्रामाण्ये द्वे स्वतः, द्वे परतः, अप्रामाण्यं स्वतः, प्रामाण्यं परतः इति पक्षत्रयेऽप्यतथाभूतताशङ्का; प्रामाण्यं स्वतः अप्रामाण्यं परतः इति पक्षेणोत्तरम् । यदा द्वे स्वतो निश्चयाकारे, तदा चिह्नाभावादविवेक इति चोदनार्थे

त्याशङ्क्य मानान्तरायोग्यार्थत्वात् कर्त्रनुमानासिद्धेः तद्योग्यार्थवाक्यनियतपौरुषेयत्वाप्राप्तेरनपेक्षत्वाधीनप्रामाण्यच्युतिर्नास्तीत्याह—न च कर्त्रनुमानत इति । ननु "अपि च" इति भाष्यं व्याचक्षाणेन गुरुणा पुंवाक्यस्यार्थाभिधायकत्वनिवृत्तिपरतयैव तद्व्याख्यातम्, तद्विरुद्धोऽयमभिधानोपगम इत्याशङ्क्य अविरोधमाह—यत्त्वित्यादिना । एवं "नन्वतथाभूतम्" इति भाष्यं प्रतिज्ञाक्षेपतत्समर्थनपरतया व्याख्यायोपसंहरति—तदेवमिति ॥

परव्याख्याप्रकारं तन्मान्द्यकथनार्थमाह—नन्वतथाभूतमिति भाष्यमिति । कथं पक्षत्रये चोदनार्थस्यातथात्वमित्याशङ्क्य तदुपपादयति—यदा द्वे स्वत इति । लोके तावन्निश्चयाकारमेव ज्ञानं किञ्चिदयथार्थं किञ्चिच्च यथार्थं प्रसिद्धमेव; तेन चोदनार्थेऽपि तत्संशयनिरासापेक्षो व्यवहारः; तदर्थं तद्द्वयप्रयोजकं विवेक्तव्यम्; तत्र साकारज्ञानपक्षे निश्चयाकारत्वं नार्थकृतमिति तदाकारज्ञानस्यापि द्वयसाधारणत्वात् द्वयोरपि स्वतः प्राप्तेः संवादविसंवादनिमित्ताद्व्यवस्थेति तदयोग्यचोदनार्थे व्यवस्थापादकाभावान्न संशयनिवृत्तिः । निराकारज्ञानपक्षे अर्थापेक्षं तदिति स्वरूपेण ज्ञानं द्वयास्पृष्टमिति द्वयोरपि परप्रयुक्तत्वे ज्ञानस्य द्वयसाधारणत्वेन

१. रूपधीः. ख. २. नुमानव्यभि. क.

सन्देहः । यदा द्वे परतः, तदा गुणवत्सामग्रीजन्यत्वान्निश्चयः दोषवत्त्वादनिश्चय इति गुणदोषानवगमाच्चोदनार्थे सन्देहः । यदा परतः प्रामाण्यम् स्वतो ज्ञानस्य सन्देहग्रस्तत्वम् तदा पराभावाद्वेदार्थे सन्देहः । स्वतः प्रमाण्यात्तु वेदार्थे निश्चय एव, ज्ञानस्य स्वतोनिश्चयाकारत्वात्; परतस्तु शङ्कया सन्देहः । न च सर्वत्र शङ्का; किंन्तु[1] यादृशे व्यभिचारदर्शनम्,

कारणगुणदोषप्रयुक्ता ह्यव्यवस्थेति चोदनार्थे साधारणधर्मप्रयुक्तः संशय एव स्यात्, शाब्दज्ञानार्हगुणदोषयोर्वक्तृनिष्ठत्वाद्वक्तृहीनचोदनार्थे निर्णयहेत्वभावात्तदनिवृत्तेः; तत्र दोषोत्थमिथ्याज्ञानस्यैकाकारावच्छिन्नतया संशयासाम्ये निश्चयसाम्ये च सत्यपि गुणप्रयुक्तनिश्चयासिद्ध्यपेक्षमनिश्चयवचनं द्रष्टव्यम् । यदा तु ज्ञानस्यार्थसत्तातदभावानुवृत्तिदर्शनात् स्वतः संशयग्रस्तत्वम् कारणगुणकृतस्त्वर्थनिश्चय इति पक्षः, तदापि गुणाभावादनिश्चय इति पक्षत्रयापेक्षमतथाभूतत्वापादनमित्यर्थः । कथं चतुर्थपक्षेण तन्निरास इत्यत्राह—स्वतः प्रामाण्यात्त्विति । यदा प्रामाण्यमुत्पत्त्यर्थं ज्ञप्त्यर्थं वा ज्ञानाधिकहेत्वपेक्षं न भवति, तदानपेक्षवेदोक्तेऽर्थे नियतो निश्चयः संशयहेत्वभावादित्यर्थः । ज्ञानस्याप्रामाण्यसहचारसिद्धौ कथं निश्चय एवेत्यत्राह—ज्ञानस्य स्वत इति । विषयसत्तावच्छिन्ने ज्ञाने तद्विरुद्धतदसत्तास्पर्शस्य स्वतोऽसम्भवात् तदाकारज्ञानान्तरे तद्बाधदर्शनात्तन्मूलक एव तावत्संशयस्तदर्हः; न ह्यूर्ध्वत्वमपि स्थाणुपुरुषान्यतरदर्शनदृष्टं तद्बाधशङ्कां विनैव तत्संशयकरमित्यप्रामाण्यसंशयोऽपि बाधसंशयमूल एव स्यादित्यर्थः । भवतु ज्ञानान्तरदृष्टव्यभिचारमूलशङ्कावगममप्रामाण्यम्, तथापि संशयस्तुल्य इत्याह—न च सर्वत्र शङ्केति । क्वचिद्व्यभिचारं निश्चित्यैव ह्यन्यत्र व्यभिचारः शङ्कनीयः; तन्निश्चयविषये च सर्वत्र तद्व्यवस्थापकैकरूपोपलब्धेस्तन्नियतैव तच्छङ्का, न ज्ञानमात्रव्यापिनीत्यर्थः । कुत इत्यत्राह—सर्वत्रेति । परतः प्रामाण्यमपि स्वतः प्रामाण्योपजीव्येव, व्यभिचारनिश्चयस्य तदपेक्षत्वात्तत्पूर्वकत्वाच्चान्यत्र तत्संशयस्य; संशयनिवर्तकाभिमतसंवादकज्ञानस्य च स्वतः प्रामाण्यापेक्षमेव परतया प्रामाण्यापादकत्वमिति व्यभिचारिज्ञानमात्रवर्तिदृष्टदोषप्रयुक्तमेवाप्रामाण्यमुपेय-

१. Omitted किन्तु. क.

तादृशे ; सर्वत्र शङ्कायां हि परतोऽपि प्रामाण्यं न स्यात् । न च चोदनार्थे शङ्काहेतुरस्तीति ततो निश्चय एव इति ।

परव्याख्यान[1]मिदं मन्दम् , वृत्तिकारग्रन्थे स्वतःप्रामाण्यस्थितेः । अर्थासंस्पर्शिता तु न क्वचिन्निरस्तेति गुरुरर्थासंस्पर्शितानिरासार्थं भाष्यमाह ।

ननु कार्यरूपो न धर्मः, तीर्थिकविमतेः—शुभा चित्तवासनेति सौगताः, पुण्याः पुद्गला इत्यार्हताः, बुद्धिगुण इति सांख्याः, सिद्धरूप एवात्मगुण इति योगाः । मैवम् ; श्रेयस्करो धर्म इति सर्वसिद्धम् । श्रेयस्करं चापूर्वमित्यर्थः । नन्वेवमपि परप्रयुक्तसंशयनिरासः कथमित्याशङ्क्य परस्य शङ्काहेतोरपौरुषेयचोदनार्थेऽवताराभावात् तन्नियतं प्रामाण्यमित्याह — **न च चोदनार्थे** इति ।

तद्व्याख्यादोषमाह — **परव्याख्यानमिदमिति** । अनुक्तार्थपरतया गुरुव्याख्यानस्य सम्यक्त्वमाह—**अर्थासंस्पर्शिता त्विति** । भाष्ये "तस्माच्चोदनालक्षणः श्रेयस्करः" इत्युपसंहृत्य पुनश्च "एवं तर्हि श्रेयस्करो जिज्ञासितव्यः; किं धर्मजिज्ञासया?" इति चोद्यपूर्वकमभेदोपपादनप्रयत्नगौरवाश्रयणं किमर्थमिति शङ्कां निवर्तयितुं प्रथमं सूत्रगतपदद्वयस्य सामानाधिकरण्यानुपपत्तिं चोदयति—**ननु कार्यरूपो न धर्म इति** । पुरुषार्थावतारस्थानतया पृथक्पृथग्वादिपरिगृहीतान्योन्यविरुद्धार्थग्रन्थपरस्तीर्थशब्दः; तत्परिगृहीतृवादिविप्रतिपत्तेः न सामानाधिकरण्यसिद्धिरित्यर्थः । विप्रतिपत्तिप्रकारमाह — **शुभा चित्तवासनेति** । इष्टफलचित्तवासनेत्येके; तद्भोगास्पददेहेन्द्रियारम्भका अवयवा इत्यन्ये ; बुध्यवस्थान्तःकरणधर्म इत्यपरे ; निष्पन्नावस्थ आत्मगुण इति वैशेषिकादयः । एवं विवादे तन्निरासार्थः पदान्तरोपक्षेप इति दर्शयंस्तामनुपपत्तिं परिहरति—**मैवं श्रेयस्कर इति** । दुःखनिवृत्तिसुखप्राप्तिकार्यको धर्म इत्यत्र विवादाभावात्तद्रूपोक्तिमुखेन विप्रतिपन्नस्वरूपनिर्णयार्थं गौरवाश्रयणमिति भाष्याभिप्रायोऽनेन दर्शितः । कथं तर्हि विप्रतिपत्तिनिरासापेक्षस्वरूपानिर्णयासिद्धिरित्यत्राह — **श्रेयस्करं चेति** । तत्तदभिमतस्वरूपस्य श्रेयस्साधनत्वं तत्प्रमितिसमर्थप्रमाणापेक्षमेव तावन्निर्धार्यम् ; तत्कारणं तु

१. Omitted. इदम्. क.

कार्यमेव नानानयसिद्धमित्यस्यैव धर्मता । अधिकृतकर्तृकयागादपूर्वसिद्धेर्यागकर्तरि धार्मिकव्यपदेशादप्यपूर्वमेव धर्मः[1] ॥[2]

वेदार्थोऽपि श्येनाद्यपूर्वं निषिद्धफलत्वादधर्म इति वक्तुमर्थपदं सूत्रे कृतम्; तद्धि कार्यत्वेन पुरुषार्थमपि सन्निषिद्धफलहेतुतया विपरीतमपीति द्विरूपम् । अर्थपदं च पुरुषार्थपरमिति तदतद्रूपमर्थपदादानान्निवर्त्य धर्मपदेनोक्तं वेदार्थमेव द्विधा विवेक्तुम् । परानुमतं तु निषिद्धक्रियाया अधर्मत्वं

चोदनातिरिक्तं तच्छक्तं नास्ति; तस्यास्तु वक्ष्यमाणानेकन्यायापेक्षया सिद्धं तत्सामर्थ्यमिति तत्प्रतिसन्धानेन तन्निर्णय इति धर्मपदेन वेदार्थाभिधानप्रयोजनप्रकटनं भाष्यप्रयोजनमित्यर्थः । ननु पदार्थनिर्णयकरवृद्धप्रयोगप्रदर्शनेन क्रियाया एव वाच्यतोक्ता, यागकर्तरि धार्मिकपदप्रयोगदर्शनादिति कथमपूर्वकार्यस्यैव धर्मतेत्यत्राह — अधिकृतकर्तृकयागादिति । यागमात्रनिमित्ते तत्पदप्रयोगेऽनधिकृतेऽपि यागकर्तरि प्रयोगः स्यादित्यधिकृतनियतप्रयोगदर्शनात्तत्कर्तृकयागादपूर्वसिद्धिरेव तत्पदप्रयोगनिमित्तम्, न यागमात्रसिद्धिरिति कर्तृनिष्ठप्रयोगोक्त्यापि तद्वाचितैव दर्शितेत्यर्थः ॥

उभयमिह चोदनया लक्ष्यते वेदार्थस्य सुखादिवत् कृत्युद्देश्यस्वभावं स्वरूपमिति चोदनालक्षणपदेन ज्ञाप्यते—इत्युक्ते, धर्मपदेन तद्ग्रहणात् सर्ववादिसम्मतश्रेयःसाधनत्वरूपमपि तस्यैव, चोदनाया एव तल्लक्षणत्वसम्भवात्—इति सूत्रतात्पर्य उक्ते, श्येनाद्यपूर्वस्यापि रूपद्वयप्रसङ्गे श्रेयःसाधनत्वरूपं धर्मपदाभिप्रेतं व्यावर्तयितुं सूत्रेऽर्थपदमुपात्तमिति तत्प्रयोजनमाह—वेदार्थोऽपीति । ननु सुखादितुल्ये स्वरूपप्रयुक्ते पुरुषार्थत्वे सति तेनैवाधिकारिणं धारयत्यनुकूलरूपतयेति धर्मत्वसिद्धेः कथमधर्मतया व्यावर्त्यतेत्यत्राह—तद्धि कार्यत्वेनेति । स्वतः पुरुषार्थत्वेऽपि फलापेक्षया विपरीतरूपसंस्पृष्टत्वात् केवलपुरुषार्थार्थपदोक्त्यनर्हमिति व्यावर्त्यते शुद्धाशुद्धार्थत्वेन चोदनार्थस्य द्वैविध्यज्ञापनार्थमित्यर्थः । पराभ्युपेतां क्रियामात्रव्यावृत्तिं दूषयति—परानुमतं त्विति । तस्य चोदनालक्षणपदेनाप्रसक्तत्वान्नार्थपदव्यावर्त्यतेत्यर्थः । ननु निषिद्धक्रिया निषेधशास्त्रविषयतया वेदार्थ इति प्रसक्तेर्व्या-

१. कशब्दप्रयोगाद. क. २. व्जहाराग्माम्भोधेर्यो धर्मामृतमञ्जसा । न्यायैर्निर्मथ्य भगवान् स प्रसीदतु जैमिनिः ॥ ख.

वक्तुमर्थपदमित्ययुक्तम्, तस्या अवेदार्थत्वेनैव विवेकात् । न च[2] निषेध्यस्यापूर्वकार्यतानालीढस्य वेदार्थता । न च नञ्विधेः प्रत्यवायपरिहारकल्पनया निषिद्धफलस्याप्यपुरुषार्थतेति वाच्यम्; नञर्थे नरैश्वर्यसिद्धेरेव नरार्थता यथा श्येनापूर्वसाधनैश्वर्यमेव नरार्थता । ज्योतिष्टोमादावपीयमेव निःश्रेयससिद्धिरनुज्ञाता; सैव हि कामिनियोज्यान्वयात् फलपर्यन्ता;

वर्त्यतेत्यत्राह — न च निषेध्यस्येति । निवृत्तिविषयापूर्वप्रतिपादकं निषेधशास्त्रं तदपूर्वकृतिविषयनिवृत्तिमात्रविषयम्, निषेध्यस्य तत्कृत्यस्पृष्टत्वाल्लोकसिद्धानिवृत्त्यवच्छेदमात्रोपक्षीणत्वान्न शास्त्रस्पर्श इत्यर्थः । ननु निवृत्त्यवच्छेदमात्राद्वेदमेयत्वाभावेऽपि पुरुषार्थत्वपर्यवसानार्थं निषेधविधेः स्वोचितप्रत्यवायपरिहारफलावसायित्वात् प्रत्यवायकरतया निषेध्यक्रियाविषयतापि स्यात्; तदपेक्षमेव च निषिद्धफलश्येनादेरप्यपुरुषार्थतयार्थपदव्यावर्त्यत्वमुपेयम्, अनिष्टफलत्वाभावे विहितस्य पुरुषार्थत्वाहानात्; ततश्च साक्षादनिष्टफलानिषिद्धक्रियैव द्रागर्थपदव्यावृत्त्या गम्येत, न व्यवहितश्येनादीति परमतमाशङ्क्य निरस्यति—न च नञ्विधेरिति । स्यादेवं फलायत्ते विधेः पुरुषार्थत्वे, निरुपाधिककृत्युद्देश्यं तु तत्स्वरूपमुक्तमिति न फलायत्तं तत् । अतः स्वयं पुरुषाश्रिततया स्वविषये नञर्थे पुरुषैश्वर्यसाधकतैव निषेधविधेः पुरुषार्थता, न फलापेक्षेति प्रत्यवायपरिहारकल्पकता नेत्यर्थः । एतदेवावश्यं श्येनादिविधावुपेयम्, फलस्य प्रत्यवायकरत्वात् तदपेक्षत्वे विधिव्याघातापत्तेरित्यभिप्रेत्य दृष्टान्तमाह—यथा श्येनापूर्वेति । किमिति तर्हि ज्योतिष्टोमादौ फलापेक्षं तदाश्रितमित्यत्राह—ज्योतिष्टोमादावपीति । प्रधानतया श्रुत्यभिप्रेतं पुरुषार्थत्वं तत्राप्यपूर्वकार्यायत्तम्; तदधिकफलान्तत्वं नियोज्यविशेषणश्रुत्यधीनम् । क्वचिन्निषेधे नरकनिरासान्तत्वं तदर्पकार्थवादश्रुत्यधीनमिति तदभावे फलकल्पनानवकाशेत्यर्थः । ननु निषेधविध्यतिक्रमनिमित्तप्रायश्चित्तविधिज्ञापितं निषेधविधेर्नरकनिरासान्ततया पुरुषार्थत्वम्, प्रायश्चित्तपदस्यानिष्टपरिहारसाधककर्मनामत्वात् तत्परिहारस्य च प्राप्तिपूर्वकत्वान्निषेधविधेरेव च प्रापकत्वसम्भवात् । सर्वनिषेधेषु च सामान्यतः विशेषतो वा प्रायश्चित्तश्रुति-

१. Omitted. इति.   २. च निषिद्धस्य. क.

सैव च शंयुनयान्नरकनिरसनान्ता । न च निषिद्धाचरणे सर्वत्रैव प्रायश्चित्ताम्नानात् सामान्यतो विशेषतश्च नरकनिरसनान्ततया नरार्थता, नञ्विधेस्तदयोगात्; प्रायश्चित्तविधेस्तदन्ततैवेति निषिद्धफलतामात्रान्नञ्विध्यसिद्धेरेवानर्थत्वमुक्तम् । ननु हिंसा निषिद्धा; न चापूर्वाद्धन्तृव्यापारोत्पत्तिरिति न निषिद्धफलता । मैवम्, आयुर्भाग्यविच्छेदान्मरणापत्तेः; भाग्यविच्छेदं कर्तुकामो हन्ता "अभिचरन्"—इत्युच्यते; लक्षणे हेतौ च शतुरनुशासनादयमेवार्थः । तदेवं तद्विच्छेदं श्येनापूर्वद्वारमाचरन्निषिद्धफलमनर्थकं कुरुते ।

नियतेति सर्वनिषेधविधीनां तदन्ततयैव पुरुषार्थपर्यवसायित्वं निश्चीयत इति शङ्कां निवर्तयति—न च निषिद्धाचरण इति । नञ्विधेस्तदयोगादिति तत्र हेतुः। यद्यप्येवं निषेधापूर्वविषयनिवृत्तेः नरकनिवृत्त्यन्तत्वमावश्यकम्, तथापि न नञ्विधिज्ञाप्यं तत्, तस्य तदनपेक्षत्वस्योक्तत्वात् । तज्ज्ञाप्यत्वपक्ष एव च विधितात्पर्यविषयतया चोदनार्थत्वप्रसङ्गात् अर्थपदव्यावर्त्यत्वं स्यात्, न प्रायश्चित्तविधिज्ञाप्यत्वे। तद्विधेर्हि 'प्रायश्चित्तं नरकनिवर्तकम्' इत्यत्रैव तात्पर्यम्; तदन्यथानुपपत्त्या निषिद्धक्रियायाः प्रत्यवायकरत्वं स ज्ञापयेत्, न तत्परतया; निषेधविधिस्तु निवृत्तिपरः स्वविषयस्य पुरुषार्थत्वार्थमिति भेदात् । प्रायश्चित्तविधिनियतनरकनिरसनान्तता तु स्वाक्षेपेणैव स्वस्य तदन्तता स्यादिति न निषेधविधिज्ञापनोपजीविकेति निवर्त्यताहश्येनादेःनिषिद्धफलतयैवाधर्मत्वमुक्तम्; तस्य स्वरूपेण धर्मत्वादधर्मत्वाभानेऽपि तदुक्तिर्नासम्भविनी धर्मात्मकनञ्विध्यसिद्ध्यपेक्षयैव तदुक्तिः, न स्वरूपापेक्षया; धर्मविरोधित्वमात्रेणाप्यधर्मपदवृत्तेरिति नानुपपत्तिरित्यर्थः । ननु निषिद्धफलत्वमसिद्धम्, हन्तृव्यापारात्मकहिंसाया अपूर्वादनिष्पत्तेरिति चोद्यपूर्वकं लोकसिद्धहिंसानुत्पत्तावपि मरणहेतुक्रियानिष्पत्त्यविशेषाद्धिंसाफलत्वसम्भवे निषिद्धफलत्वमविहतमिस्याह—ननु हिंसा निषिद्धेति । नन्वेवं यागोऽपि हन्तृव्यापार एवेति साक्षादेव निषेधविषय इति कुतो निषिद्धफलत्वेनाधर्मतोक्तेति चोद्यपूर्वकं तदभिप्रायमाह—

१. फलत्वमात्रा. क.
२. अधर्मत्व. ख.
३. अनर्थं कुरुते. ख.

ननु श्येनस्यापि तदनुकूलत्वान्निषिद्धता; न तु फलमात्रं निषिद्धम् । मैवम्; अपूर्वानुकूलत्वायाभिचारानुकूलत्वादपूर्वांशे मुख्ये[1] न निषिद्धतेति न निषिद्धकरणतोक्ता[2] श्येनापूर्वस्य; फलतस्तु तत्र प्रवृत्तेस्तत्काले निषिद्धताभिव्यक्तेः "हिंसा हि सा, सा च प्रतिषिद्धा"—इत्युक्तम् । न च आततायिहिंसा न निषिद्धा इति वाच्यम्, "अभिचरन्" इत्यविशेषश्रुतेर्निषिद्धफलान्तर्भावात् । यत्तु समर्थनम्—घ्नत एवाततायिनो वध्यत्वात्, तदा च श्येनाशक्तेर्न तद्विषयतेति; तन्न, दिनान्तरेऽपि[3] निश्चित्य घ्नतः श्येनवध्यत्वसम्भवात् । न च ज्योतिष्टोमोऽपि निषिद्धपशुहिंसाङ्गकत्वादधर्मः; अङ्गे हि वैधी प्रवृत्तिः । न च स्वतन्त्रनिषेधस्तद्विषयः; तथात्वे हि निषेधः क्रत्वर्थः स्यात्, रागप्रवृत्तिविषयस्तु[4] पुरुषार्थः । न च द्विकरः, न च क्रत्वर्थ एवेति

ननु श्येनस्यापीति । यदि शस्त्रप्रयोगादिवल्लोकप्रसिद्धं यागस्य मरणफलत्वं स्यात्, तदा यागेऽपि निषेधस्तुल्यः स्यात्; श्रुत्या त्वपूर्वकर्तव्यतोक्त्यन्तर्गतं यागस्य फलकरणत्वमापाद्यत इति तत्प्राप्त्यपेक्षो निषेधावतारस्तन्निरुद्धद्वारक इति न करणतापेक्षस्तत्प्रवेशः । न चैतावता तत्प्रवेशासम्भवः, तदुत्तरकालप्रवृत्तिसमये तत्सम्भवात्; तदा हि फलप्रयोज्यत्वादपूर्वविभक्तावस्था बुद्धिस्थेति तत्प्रवेशाविरोधात् । अत एव भाष्ये प्रवृत्त्यनुवादेन तदवतार उक्त इत्यर्थः । नन्वाततायिविषयतया निषिद्धफलत्वेनाप्यनर्थत्वाभावाद्यावर्त्यत्वमेव नास्तीत्याशङ्क्य सामान्यश्रुतेस्तन्मात्रविषयत्वाप्रतिपत्तेः तदन्यविषयापेक्षया तदुक्तिरित्याह — न चाततायीति । परोक्तमाततायिनः श्येनवध्यत्वासम्भवमनूद्य दूषयति — यत्तु समर्थनमिति । ननु "न हिंस्याद्भूतानि" इति सर्वहिंसानिषेधश्रुतेः पशुहिंसाङ्गकज्योतिष्टोमादेरपि अधर्मता स्यादित्याशङ्क्य अङ्गस्य विधिप्रवर्त्यत्वान्न निषेधविषयत्वम्, तन्निषेधस्य पुरुषार्थत्वादिति परिहरति— न च ज्योतिष्टोमोऽपीति । ननु पदशक्त्या क्रत्वङ्गहिंसाया अप्यवगमाद्रागप्राप्तनिषेधः कस्मात्तद्विषयोऽपि न स्यात्; एकमात्रविषयत्वेऽङ्गमात्रविषयो वेत्यत्राह—न च द्विकर इति । अन्योन्यविरुद्धाङ्गत्वानङ्गत्वापत्ति-

१. Omitted मुख्ये. क.
२. निषिद्धकारण. क.
३. Omitted. अपि. क.
४. प्रवृत्तिस्तु. ख.

वाच्यम्; स्वनन्तरविधेर्या स्वतः प्रयोजकताधीः, सा बाध्येत। एतच्च कर्त्रधिकरणे स्थितम्। न च प्रधानेऽपि विधिकरणे वैधी प्रवृत्तिः; फलकरणीभूतस्य च विधिकरणत्वात् फलेऽपि वैधी—इति वाच्यम्; काम्ये फलं प्रति करणीभूतस्य विधिविषयत्वधीपूर्वकविधिकरणत्वधीक्रमादुत्कटा फलतः प्रवृत्तिः; अङ्गे त्वफलार्थेऽपूर्वमात्रार्थे तादर्थ्यादुत्कटा विधेरेव प्रयुक्तिः। तदिदं लिप्सासूत्रे निपुणतरमुक्तम्। न च विध्यनाक्षिप्तत्वात् प्रधानमविधे-

दोषेणैकस्य निषेधविधिद्वयविषयत्वनिरासे पूर्वग्रन्थसिद्धेऽपि अङ्गमात्रविषयत्वशङ्का-निरासहेतोः क्रत्वसन्निधिश्रुतिहेतुकप्रयोजकत्वबाधस्यापि द्वयविषयत्वनिराससमर्थ-त्वात्तदभिव्यक्त्यर्थं तदप्यत्र शङ्काविषयतयोक्तमिति द्रष्टव्यम्। ननु स्वकरणप्रधा-नोपकारार्थमङ्गस्य विधिप्रवर्त्यतया निषेधानर्हत्वे ततोऽन्तरङ्गे प्रधाने विधिप्रवर्त्य-त्वाहानात् फलकरणत्वादपृथक्त्वाच्च विधिकरणत्वस्य फलप्रवृत्तेरपि वैधत्वापत्तेः फलेऽपि न निषेध इति न तन्निमित्तमनर्थत्वं श्येनादेरिति शङ्कां परिहरति—**न च प्रधानेऽपीति**। प्रधानस्य विधिप्रवर्त्यत्वे सत्येवं स्यात्, तदेव नास्ति; विधिविषयत्वयोग्यत्वार्थं फलकरणत्वाक्षेपात्तदुत्तरभाविविषयत्वानन्तराक्षेप्यकरण-त्वव्यवहितो विधेः प्रवृत्त्याक्षेप इति पूर्वभाविफलकरणत्वानन्तरमेव कामिनो लोक-वदनुष्ठेयत्वधीप्राप्तेस्तत्तदतिरिक्तविषय एव विध्याक्षेपतदुपजीवीति प्रधाने स्यात्, तत्कालेऽङ्गान्वयहेत्वभावात्; विध्यैदमर्थ्यान्वयोत्तरकाले विध्युपकारोपजीवित्वे फलस्यावगते तदुपकारकत्वमात्रमङ्गानाम्, नैदमर्थ्यमिति विधिरेव तत्प्रवर्तकः; ततो न निषेध इत्यर्थः। नन्वेवं प्रधानस्य विध्युपात्तत्वाभावादविधेयत्वापत्तिरित्य-त्राह—**न च विध्यनाक्षिप्तत्वादिति**। यद्यपि प्राक् फलप्राप्त्यनुष्ठानमेव प्रधानं विध्यन्वय्यभिधीयते, तथापि योग्यतया वाक्योपस्थापितो विधिरेवाधिकारी-कृतिसाध्यस्याभिधानार्थं काम्यवस्तुतत्कृतेस्तद्विषयाभिधेययागादिव्यवधानेन स्वघट-नापेक्षया तस्य तत्काम्यफलकरणत्वं स्वव्यवधानेन प्रकल्प्य तत्प्रयोज्यतां नीत्वा तद्घटिततत्कृतिसाध्यतयाभिधानयोग्यमात्मानं करोतीति फलाक्षिप्ततया अपि

१. स्वताप्रयोजकता. क

यम्; फलकरणीभूतत्वापादनेन च विधिमूलकमेव फलाक्षिप्तं प्रधानं विषयतया स्वीकृतम्। अतो विधेयमेव। शेषं सुगमम्॥

इति द्वितीयसूत्रं समाप्तम्॥

विध्यापादितत्वान्न विधेयत्वहानिरित्यर्थः। यदि फलार्थविधेयगोदोहनादेः क्रतुविध्यनापाद्यक्रतुसम्बन्ध इव क्रतुसम्बन्धो विषयस्य स्यात्, तदैव तदविधेयत्ववत्प्रधानस्याविधेयत्वापत्तिः; तदतुल्यत्वात् स्याद्विधेयत्वमिति भावः॥

श्येनयागनियोगस्य लक्षणं चोदनैव हि।
निषिद्धफलसम्बन्धादनर्थ इति कथ्यते॥

इति द्वितीयसूत्रव्याख्या॥

---

१. Omitted. च. ख.

तस्य निमित्तपरीष्टिः ॥ १-१-३ ॥

ननु द्वितीयसूत्रेण श्रुत्यर्थाभ्यामर्थस्वरूपप्रमाणे प्रतिज्ञाते । तत्र श्रुतिप्रतिज्ञातं प्रधानं भेदाभेदरूपेण वाच्यमिति तदवसरोऽयम् । अथानपेक्षशास्त्रावगम्यसाध्यानुबन्धभेदहेतुकशास्त्रभेदात्तदर्थभेदधीरिति प्रामाण्यहेत्वनपेक्षत्वावसरोऽयम्; तन्न; प्रधानं ह्यनागतापेक्षणनयादनपेक्षतामादाय भेदेन वक्तुं युक्तम् ।

मैवम्; आर्थी हि प्रामाण्यप्रतिज्ञैव श्रौतालौकिककार्यप्रतिज्ञासम्भावनार्थेत्यनपेक्षत्वेऽनुक्ते प्रामाण्यानवगमे कार्यस्यैवासम्भावितत्वमित्यनपेक्षतां साधयित्वैव कार्यं स्थिरीकृत्य शास्त्रभेदतस्तदर्थभेदो वाच्य इत्युक्तम्—'प्रामाण्यहेत्वनपेक्षत्वावसरः कथ्यते' इति ।

विवरणे तु शङ्का—प्रतिज्ञानन्तरं हेत्वभिधानं युक्तम् । शिष्यशिक्षार्थ-

"तस्य हेत्वभिधानावसरः कथ्यते" इति सूत्रप्रयोजनोक्तितस्तद्व्यावर्त्यपूर्वपक्षापेक्षिणीं न्यायपरत्वार्थं किं तद्व्यावर्त्यार्थमिति शङ्कां तदुक्त्यापाकरोति—ननु द्वितीयसूत्रेणेति । तात्पर्यविषयार्थस्वरूपप्रतिज्ञापरतया प्रमाण्यप्रतिज्ञेति प्रधानभूतार्थविचारोत्तरकालमेव प्रामाण्यसमर्थनं युक्तमित्यस्ति व्यावर्त्यशङ्केत्यर्थः । तामेव दृढीकर्तुं प्रमाण्यसमर्थनस्य प्राथम्यमाशङ्कते—अथानपेक्षेति । अर्थविचारस्य भेदोपक्रमत्वात् तस्य शास्त्रैकगम्यानुबन्धाद्यधीनत्वात्तदनपेक्षप्रमाणत्वसमर्थनापेक्षास्तीति तस्यैव प्राथम्यमिति परिहरति—तन्न प्रधानं हीति । प्राप्तक्रमबाधसामर्थ्यं नास्त्यपेक्षामात्रस्य, वक्ष्यमाणापेक्षयापि प्राप्तसमर्थनसम्भवादित्यर्थः ।

सिद्धान्तमाह—मैवमिति । वक्ष्यमाणशेषतयानपेक्षत्वविवक्षायामेवमेव स्यात्; मानान्तरामेयकार्यार्थत्वप्रतिज्ञाविरोधपरिहारार्थं हि लक्षणपदोपक्षेपेण प्रामाण्यप्रतिज्ञायास्तन्निवेशनम्; तत्परिहारस्तत्समर्थनहेतूक्त्यधीनस्तदुपपत्त्यवगमापेक्षत्वाद्विरोधधीनिवृत्तेरिति तद्धेतूक्त्यवसर एवायमित्यर्थः ।

विवरणे सूत्राक्षेपतत्समर्थनमुखेन तत्प्रतिपाद्याधिकमुच्यत इति वक्तुं तदुक्ताक्षेपमाह — विवरणे तु शङ्केति । निबन्धनोक्तप्रामाण्यसमर्थनार्थप्राथम्य -

१. त्वभिधानाव. क.
२. नयादप्यन. ख.
३. त्वाभिधानाव. ख.

मपि 'हेत्ववसरोऽयम्' इति वाच्यम्; न तु 'हेतुपरीक्षा' इति वाच्यम्। मैवम्; शिष्यो हि सिद्धहेतुकथनान्न व्याख्यायां शिक्षितो भवति, स्वसंविदनुसरणप्रकारमसौ ज्ञाप्यः; हेतुपरीक्षात एव हि तस्य हेतुप्राप्तिः; सिद्धहेत्वभिधानं तु परबोधनार्थे वादे, न तु शिष्यशिक्षार्थे ग्रन्थे; न हि साध्यावस्थितिविमतसन्दिग्धाज्ञबोधनार्थोऽयं ग्रन्थः; किन्तु स्वसंविदनुसरणप्रकाराज्ञशिष्यशिक्षार्थः; शिक्षितप्रकारो हि हेतुमनुसृत्य वस्तु ज्ञास्यतीति युक्तं परीक्षावसरकथनम्।

माश्रित्य तत्प्रतिज्ञानन्तरप्राप्तहेतूक्त्यतिक्रमेण कुतोऽन्यदुच्यत इति शङ्का; न च शिक्षार्थं यथोक्तन्यायप्रतिपादकतयान्योक्तिरिति शङ्कनीयम्, तदर्थमपि निमित्तपदमात्रमुपयोगि, न परीष्टिपदमित्याक्षेपः। समाधत्ते — मैवं शिष्यो हीति। यद्यर्थविशेषज्ञानमात्रं परस्योत्पाद्यं स्यात्, तदा तत्समर्थनहेतुमात्रं वाच्यं स्यात्; शिष्यं प्रति तद्धेत्वन्वेषणप्रकारोऽपि ज्ञाप्य एव, अन्यथा मनोगतिव्याप्त्यसिद्धेस्तस्य व्याख्यापटुत्वं नापादितं स्यादिति तदर्थमात्ममनोगतिविकासप्रकारमेवासौ ज्ञाप्य इति हेतुपरीक्षां सामान्येनोक्त्वा तत्प्रकारविशेषं विविच्यासौ ज्ञाप्यः यथोत्तरसूत्रैरिति युक्तैवाधिकोक्तिरित्यर्थः। नन्वेवमपेक्षितानुक्त्यनपेक्षितोक्त्योर्दोषतोपगमः तज्ज्ञानामसाधुः स्यादित्याशङ्क्य शिक्षितकर्तृकवादविषयः सः, न शिक्षार्थग्रन्थविषय इत्याह—सिद्धहेत्वभिधानन्त्विति। शिक्षितविचारप्रकारनिष्ठवादस्यार्थविशेषनिर्णयार्थत्वात्तदाकाङ्क्षानुसारी वाच्यावाच्यविभाग इति स तद्विषयो युक्त इत्यर्थः। शिक्षार्थग्रन्थे तदतिक्रमहेतुमाह—न हि साध्यावस्थितीति। न वादवदर्थविशेषबोधफलो ग्रन्थः पुरुषवर्तितत्फलकविचारप्रकारबोधफल इति न तत्र तदपेक्षा वाच्यावाच्यव्यवस्थाहेतुः; प्रकृतसाध्यसाधनशक्तहेत्वन्वेषणप्रकारोऽपि वाच्य इति विशेषोऽधिकपदोपक्षेपेण सूच्यत इत्यर्थः। तर्हि अर्थविशेषासिद्धिः स्यादित्यत्राह—शिक्षितप्रकारो हीति। शिक्षितशिष्यधीवृत्तिव्यवहितास्यार्थनिश्चयफलता, न कल्पसूत्रादिवत्स्वत एवेत्यर्थः। एवं च निबन्धनोक्तहेत्ववसरकथनार्थत्वमपि परीक्षाव्यवहिताभिधानाभिप्रायमिति दर्शयन्नुपसंहरति—इति युक्तं परीक्षावसरकथनमिति। ननु परीक्षार्थे परीष्टिरिति रूपं न सिद्ध्येत्; ईक्षतेस्तावत् "अ प्रत्ययात्" इति प्रत्ययान्तधातुविहिताकारप्रत्ययस्य "गुरोश्च हलः" इत्यनेन विहितत्वात् सामान्यविहितः क्तिन्प्रत्ययो न

१. Omitted. ट. ख.

क्वचिदपवादविषयेऽप्युत्सर्गानुशासनात् क्तिना परीक्षार्थे परीष्टिरिति रूपम्। तदेवमध्यायार्थप्रतिज्ञासूत्रमिदम् । द्वितीयसूत्रेण शास्त्रमारब्धम्; अनेनाध्यायार्थः प्रतिज्ञातः ॥

इति तृतीयसूत्रं समाप्तम् ॥

प्राप्नोति ; " वासरूपः " इति विकल्पस्याक्त्रीविषयत्वात् । यत्तु नः " इषेरनिच्छार्थाद्युज्वक्तव्यः " इति वार्तिकोक्तयुजः "परेष्वा" इति परिपूर्वाद्विकल्पस्मृतेर्वैकल्पिकक्तिना इषेस्तत्समर्थनम् उपसर्गवशाद्धातूनामर्थान्यत्वप्रसिद्धेरिषेः परीक्षार्थत्वञ्चेति, तदुपगमेऽपि पर्येषणापदैकार्थ्यापत्तेः तस्य च परीक्षार्थत्वाप्रसिद्धेरस्यापि तदर्थत्वं दुर्लभमित्याशङ्क्य तत्समर्थनार्थमाह—क्वचिदपवादविषयेऽपीति । इषिधातोस्तद्रूपाभ्युपगमे हि परीक्षार्थत्वासिद्धिदोषः शक्यापादनः, ईक्षतेस्तूपगमान्न तदसिद्धिः । न च तस्मात् क्तिन्प्रत्ययानुत्पत्तेस्तदसिद्धिः " गुरोश्च हलः " इत्यपवादविषयेऽपि " क्तिन्नाबादिभ्यः " इत्याकृतिगणाबादिग्रहणेन क्वचिदुत्सर्गानुशासनात् परीक्षार्थत्वनिश्चयाच्चास्य तद्विषयत्वावगमात्तदुत्पत्त्यविरोधादित्यर्थः । नन्वनपेक्षत्वसमर्थनस्यापि प्रामाण्यप्रतिज्ञाविषयतोपगमे द्वितीयसूत्रेणैव प्रमाण्यार्थाध्यायारम्भासिद्धेः तत्साधकत्वेनैवास्य सङ्गतिरुपेया ; तदसमर्थत्वात्त्वस्य तत्समर्थनस्यैवानन्तर्यप्राप्तेः प्रामाण्यसमर्थनस्य प्राथम्यमर्थोक्तमेव स्यात् , न तदर्थं सूत्रं कर्तव्यम् इत्यपि न शङ्कनीयम् , उक्तविधयास्यैव सूत्रस्याध्यायार्थप्रतिज्ञापरत्वात् । द्वितीयसूत्रस्यार्थप्रतिज्ञापरत्वेन समर्थनान्तप्रामाण्यप्रतिज्ञापरत्वस्याव्यक्तत्वात्तदप्येतत्सूत्रव्यङ्ग्यमेवेति तत्प्राथम्योक्त्यनन्तरवाच्यत्वमेतत्सूत्रज्ञाप्यमित्यध्यायारम्भो न पूर्वसूत्रप्राप्तः ; शास्त्रारम्भ एव तत्सिद्धः, पूर्वप्रतिज्ञातांशमात्रस्य साधितत्वात् । अनेन तदेकदेशसमर्थनासिद्धावप्यध्यायार्थोऽनन्तरवाच्यतया दर्शित इति इदमेव सूत्रमध्यायादिरित्याह—तदेवमिति ॥

इति तृतीयसूत्रव्याख्या ॥

---

१. Added, ख—

वेदार्थः कार्यरूपस्तदपि नरकुलेरीप्सितं कार्यमाहुः
सर्वेषां कार्यबोध्यव्यवहृतिरखिला तत्र सम्बन्धबोधः ।
कार्यार्थतः प्रमाणं श्रुतिरखिलवचोऽप्यर्थसंस्पर्शि लोके
लिङ्गत्वाद्वक्तृबुद्धेर्व्यभिचरति वचोऽलिङ्गके लिङ्गबोधात् ॥
वेदार्थः श्रेयसे हेतुरर्थानर्थात्मकः क्वचित् ।
निषिद्धफलसम्बन्धात् सोऽधर्मः श्यैनिको यथा ॥ इति सङ्ग्रहः

सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम-निमित्तं विद्यमानोपलम्भनत्वात् ॥ १-१-४ ॥

अधुना वेदार्थस्य प्रत्यक्षाद्यविषयतामुक्त्वानेन सूत्रेण औत्पत्तिकसूत्रेण वेदस्यानपेक्षतां वदता परीक्षा कृता । 'सति संप्रयोगे बुद्धिः प्रत्यक्षम्'— इत्यनूद्य वेदार्थबोधं प्रत्यनिमित्तता वर्तमानविषयतयोक्ता । अनुमानोपमानार्थापत्तीनां तु लिङ्गसदृशानुपपन्नद्वारत्वात् वर्णद्वारत्वाच्च वेदार्थस्य वर्णानां च लिङ्गादिद्वारत्वानुपपत्तेरनुमानादेरप्यनिमित्तता । न चेयं न सूत्रिता, विद्यमानमुपलम्भनं यस्य इत्यनुमानाद्यर्थेन सूत्रितत्वात्, प्रायेण विद्यमानस्यैव लिङ्गादिभावात् । विवरणे तु विद्यमानं सिद्धरूपं कार्यप्रतिपक्षमभिमतम् । अतोऽनुमानादेरप्यनिमित्तिता सूत्रिता, न भविष्यद्रूपता

ननु चोदनाप्रमाण्ये वाच्ये तदुपपादकौत्पत्तिकसूत्रप्राथम्यहानेन कथं प्रत्यक्षसूत्रप्राथम्यमित्यत्राह—अधुना वेदार्थस्येति । परीक्षालभ्यतया निमित्तस्योक्तत्वात् परीक्षायाश्च प्रत्यक्षाद्यविषयतोक्त्युपक्रमत्वाद्युक्तं तदादित्वमित्यर्थः । परीक्षासामर्थ्यं सूत्रस्याह—सति संप्रयोग इति । ननु संप्रयुक्तविषयत्वरूपानिमित्तत्वहेतुः प्रत्यक्षमात्रवर्तीति सर्वनिवृत्त्यधीनमनपेक्षत्वं कथमित्यत्राह—अनुमानेति । लिङ्गाद्यपेक्षत्वेनानुमानादिनिरासे भाष्योक्तेऽपि तस्यासूत्रितत्वात् कथं सूत्रोक्तपरीक्षासिद्धिरित्यत्राह—न चेयं न सूत्रितेति । प्रत्यक्षानिमित्तत्वहेतुः संप्रयोग इत्यनेनैव सिद्ध इत्यनुमानाद्यनिमित्तत्वार्थमेव "विद्यमानोपलम्भनत्वात्" इत्युक्तम्; विद्यमानहेतुकत्वात्तेषां धर्मबोधे च तदर्हहेत्वसिद्धेरिति तदनिमित्तता सूत्रितैव । विद्यमानेति वर्तमानोक्तेः प्रायःप्राप्तवर्तमानोक्तिमुखेन लिङ्गादिसत्तामात्रवृत्त्या तत्र तदसिद्धिविवक्षयेत्यर्थः । विवरणे षष्ठीसमासाश्रयणेनैव विद्यमानपदस्य कार्यव्यतिरिक्तमात्रार्थताङ्गीकारेणानुमानादिनिवृत्त्यर्थत्वमित्याह — विवरणे त्विति । ननु भविष्यद्रूपश्चोदनार्थ उक्तो भाष्य इति कथमनुमानाद्यविषयतेत्यत्राह—भविष्यद्रूपतेति । न कार्यस्वरूपविवरणाभिप्रायेण तद्रूपतोक्ता, येनानुमानादिमेयतापत्तिः; चोदनामेयाकाराधिष्ठानमितिकाले भविष्यद्रूपम्, न वर्तमानविषयतया प्रत्यक्षविषय-

१. लिङ्गादित्वानुप. क.

कार्यस्य भाष्योक्ता; किन्तु वेदप्रमेयत्वाधिष्ठानं भविष्यद्रूपं व्याख्यातम्। तद्द्वारत्वादित्यनेन तु दूरापेततोक्ता, शब्दे निमित्तेऽप्यनुमानाद्यभावात्। न च नित्यानुमेयः शब्दोऽस्तीति च यदुक्तं न तद्वेदवाक्यस्य नित्यानुमेयतां विहन्ति, तद्वाक्यगतानामपि शब्दानां प्रत्यक्षत्वात्। एतच्च मेयप्रत्यक्षस्वरूपं सूत्रितम्, न तु मितिमातृप्रत्यक्षस्वरूपमपि; मेये हि वेदार्थे प्रसक्तमेतदेव निरसनीयम्।

संप्रयोगश्चात्र त्रिविधः[1]—संयोगः संयुक्तसमवायः समवायश्चेति[2]। संयोगाद्धि द्रव्यं स्पर्शमहत्त्ववत् पार्थिवाप्यतैजसवायवीयात्मकमैन्द्रियकम्[3], संयुक्तसमवायाज्जातिगुणौ, समवायाच्छब्दः। गुणपदेन च संख्यासादृश्यादेरुप-

तार्हमिति तद्विषयोक्तिपरसूत्रार्थतयोक्तम्, चोदनामेयाकारोक्तेरत्राप्रसक्तेरित्यर्थः। नन्वेवं तन्मते "सतश्चैतदुपलम्भनम्" इति विद्यमानोपलम्भनपदार्थविवरणभाष्येणैवानुमानादिनिरासासिद्धेः प्रत्यक्षपूर्वकत्वेन तन्निरासयत्नोऽनर्थक इत्यत्राह—तद्द्वारत्वादित्यनेनेति। धर्मधीकरशब्दग्राहकतया तत्सन्निकर्षमात्रमप्यनुमानादेर्नास्ति प्रत्यक्षशब्दपूर्वकत्वात्तत्प्रतिपत्तेरिति पूर्वनिरासपरतया तदर्थवत्तेत्यर्थः। एतदुपपादनार्थं नित्यानुमेयः शब्दो नास्तीति यदुक्तम्, तदविरोधमाह—न च नित्यानुमेय इति। वर्णावस्थाग्राहकतयैव प्रत्यक्षस्यापि निमित्तं सन्निकर्षः, तात्पर्यग्रहणापेक्षत्वाद्वाक्यावस्थाप्रतीतेः; तेन तत्तुल्यतैवानुमानादेर्निरस्यते; नित्यानुमेयवाक्यमपि प्रत्यक्षसिद्धवर्णात्मकमेव, वर्णावस्थाया नित्यानुमेयत्वानुपगमादिति नित्यानुमेयवेदोपगमाविरोध्येवैतदित्यर्थः। ननु संप्रयुक्तमात्रग्राहि प्रत्यक्षमिति सूत्रम्; तद्विरुद्धो मितिमातृप्रत्यक्षोपगम इत्यत्राह—एतच्च मेयप्रत्यक्षेति। न सूत्रस्य प्रत्यक्षस्वरूपोक्तौ तात्पर्यम्, मेयरूपधर्मग्राहकत्वनिवृत्त्युक्त्या चोदनानपेक्षत्वपरत्वात्। तेन मेयप्रत्यक्षानुवादेन तन्निवृत्तिमात्रोक्तेः न तद्विरुद्धः स इत्यर्थः। संप्रयोगमात्रस्येह सूत्रितत्वात् तद्विशेषनिर्णयस्तार्किकोक्तोऽनुमत इति शङ्कामपनयन्नाह—संप्रयोगश्चात्रेति। त्रिविधे व्यवस्थान्तामुपपत्तिमाह—संयोगाद्धीति। एवं ग्रन्थोक्तं प्रदर्श्य तदभिप्रायमाह—गुणपदेन चेति। ननु संख्यासादृश्यादेरिति

१. द्विविधा. ख.
२. Omitted च क.
३. ऐन्द्रियिकम्. क.

संहारः। संख्या न गुणः—इति साध्यम्; सादृश्यं तु स्वरूपत एव साध्यम्। गुणकर्माश्रितत्वात्संख्या न गुणः। न च गुणे न संख्यासमवाय इति वाच्यम्। समवायो ह्यनाश्रित एव समवायिनोः सम्बन्धबुद्ध्या कल्प्यते,

आदिशब्दोऽनर्थकः। न, यद्यस्ति, तदा षष्ठीसमासाश्रयणेन प्रथमावगम्यद्रव्यवर्तिमात्रसंग्रहार्थोऽस्तु। ननु गुण एव संख्या, पदार्थविदङ्गीकारात्; सादृश्यमिति तु सामान्यस्य नामान्तरमात्रमिति न संग्रहावकाश इति शङ्कामन्यत्वस्य यत्नसाध्यतोक्त्या परिहरति—संख्या न गुण इतीति। तत्र संख्यायास्तदन्यत्वं साधयति — गुणकर्माश्रितत्वादिति। गुणस्य द्रव्याश्रितत्वनियमात् तद्विहीना संख्या न गुण इत्यर्थः। नन्वारोपमूलव्यवहारमात्रं तत्र तत्समवायमूलमित्याशङ्क्य समवायं साधयति — न च गुणे न संख्येति। कार्यकल्प्यस्तावद् द्रव्यगुणयोरपि समवायः; तच्च कार्यं सम्बन्धबुद्ध्यात्मकम्, स च सम्बन्धो विशेषणविशेष्यभावः शुक्लो घटः—इत्यादिरूपः, स च बुद्धिगर्भ इति विशिष्टबुद्धिरेव सम्बन्धबुद्धिपदार्थः। तेन विशेषणविशेष्यसम्बन्धात्मिका विशिष्टबुद्धिः समवायकल्पकं कार्यमिति दर्शितम्। बोध्यरूपस्तु सम्बन्धो न विवक्षितः, सम्बन्धान्तराप्रसिद्धेः। तेन सम्बन्धकार्यदृष्टदण्ड्यादिविशिष्टधीदृष्टान्तेन गुणादिविशिष्टबुद्ध्यनुमेयत्वं समवायस्यानेनोक्तम्। एवं हि गुणादावपि अबाधितसंख्याविशिष्टबुध्यविशेषात्तदनुमानमपरिहार्यमित्यनेनोक्तम्। ननु अल्पाधिकसदृशविलक्षणादिविशिष्टबुद्धेः सम्बन्धकार्यत्वाभावादनुमानानुपपत्तिरिति शङ्कानिवृत्त्यर्थम् 'समवायिनोः' इति विशेषणमुपात्तम्। अयुतसिद्धयोर्विशेषणविशेष्ययोः विशिष्टधीस्तल्लिंगमिष्टम्, पृथक्सिद्धयोः तदभावो न तद्विरोधीत्यर्थः। ननु समवायीति विशिष्टधीः अपृथक्सिद्धयोरप्यसम्बन्धमूलाभ्युपेतेति अनुमानासिद्धिशङ्काहानार्थम् 'आश्रित एव' इत्युक्तम्। तत्र अनवस्थापत्त्या सम्बन्धपूर्वकत्वासम्भवात् तत्स्वभावमात्राधीनो नियम आश्रितः; तदतिरिक्तविशिष्टधीकार्ये दण्ड्यादिधीतुल्यतैव लाघवादुपेया, न व्यवस्थापकान्तरमिति गुणसंख्ययोः सम्बन्धानुमानमेवेत्यर्थः। ननु इहप्रत्ययगम्यः समवायः पदार्थविदभ्युपेतः। तत्प्रत्ययश्च स्वतन्त्रधीविषये द्रव्ये स्वत इति अन्यतन्त्रे गुणे तदभावान्न समवाय

न तु 'इह' इति धिया। न च कर्मणामस्थायित्वात् द्वित्वाद्यनन्वयो वाच्यः। द्वितीयाद्यनवस्थानेऽपि द्वित्वाद्यन्वयात्। सर्वानवस्थाने तु द्वित्वादिधीर्बाधकादहंतालम्बना। सादृश्यस्थितिस्तु उपमानवादे। न च गुणादिसादृश्यार्थं सन्निकर्षान्तरं धीहेतुः कल्प्यम्; अनन्याधीनधिया हि तत्;

इति आरोपमूल एव तत्र संख्याव्यवहार इत्यत्राह—न त्विहेति धियेति। द्रव्यमपि विशिष्टावगत्युत्तरकालमेव इहप्रत्ययार्हम्, न निर्विकल्पकधीस्थमिति इहप्रत्ययात् पूर्वभाविविशिष्टधीकारणतयैव समवायकल्पना, तदुपजीवी त्विहप्रत्यय इति न तद्गमकः स इत्यर्थः। ननु कर्माश्रिततया द्वित्वाद्युत्पत्तिर्न संभवति, आश्रययौगपद्यापेक्षत्वात्तदुत्पत्तेः, एककर्तृककर्मणां चास्थिरतया तदयोगादिति शङ्कां परिहरति—न च कर्मणामिति। "एकादश प्रयाजान् यजति" इत्यादिश्रुत्या कर्मान्वयावगमात् तद्यौगपद्यस्य च तत्राभावात् ध्वस्तानामपेक्षाबुद्धिविषयतामात्रेण तदुत्पत्त्युपयोगास्थित्यर्हमात्रस्याश्रयतयेत्यभ्युपेत्य तन्निर्वाहोऽभ्युपेयः। तादृग्विषयेषु द्रव्येष्वपि संख्याव्यवहारप्रसिद्धेः तदमुख्यत्वाप्रसिद्धेश्च विधाद्वयेनाप्याश्रयतोपगमस्योचितत्वात् प्रमाणाविशेषान्नारोपः कल्प्य इत्यर्थः। नन्वेकास्थित्यभावेऽपि लोके स्मर्यमाणाश्रयसंख्याव्यवहारदर्शनात्तत्रापि तदुत्पत्तिरित्थमुपेया स्यात्; तदनुपगमे तद्वदितरत्राप्युपपत्तिरित्यत्राह—सर्वानवस्थाने त्विति। तत्रासम्भवात्तद्गतैकत्वानामपि स्मृतिविषयत्वात्तेषाञ्चापेक्षाबुद्धिवर्तितया द्वित्वाद्युत्पत्तिहेतुत्वात्तदल्पाधिकत्ववैलक्षण्येन च संख्याविशेषोत्पत्तेः तदियत्तालोचनया तत्तदहंतास्मृत्यपेक्षः सर्वसंख्याव्यवहार उपेयः। तदाश्रयास्थितौ त्वल्पाधिकवैलक्षण्यमात्रं नानुत्पत्त्यापादकम्, कार्यान्तरेऽपि कारणनानात्वस्य दृष्टत्वादित्यभिप्रायः। सादृश्यविवादे स्वरूपसमर्थनं ग्रन्थेऽन्यत्रास्तीति नेह कृतमित्याह—सादृश्यस्थितिस्त्विति। ननु गुणादिवर्तितया तदन्यत्वे तत्प्रतीत्यर्थं संयुक्तसमवेतसमवायरूपं सन्निकर्षान्तरमुपेयमिति 'त्रिविधः संप्रयोगः' इति नियमोक्तिरयुक्तेत्यत्राह—न च गुणादिसादृश्यार्थमिति। प्रत्यक्षत्वोपगमे तत्कल्पनापत्तेरेव तन्नोपेयम्, तद्धियोऽनुमानादेवोपपत्तिः; तत्सामग्री तु क्लृप्तैवेति। सा तर्हि विविच्यैव वाच्या। न, सादृश्यानुमानस्योपमानवादे वक्ष्यमाणत्वात्; संख्यानुमानसामग्री सर्वसंख्येयानवस्थाने तत्सं-

क्लृप्तसन्निकर्षैरेव चानुमानान्तर्भावात् सादृश्यधीसिद्धिः। संयोगाच्चक्षुस्पर्शनाभ्यां द्रव्यधीः। प्राप्यकारि चक्षुः, बहिरिन्द्रियत्वात् त्वगिव। तैजसं हि तत्, रूपधी[1]हेतुत्वाद्दीपवत्। तस्य रश्मयः पृथ्वग्राः प्रसरन्तः पृथून्यपि द्रव्याणि[2] प्राप्नुवन्ति, सान्तरालधीस्तु देहापेक्षया नयनरश्मिभिरेकीभूतस्य बाह्यतेजसो भागः कोऽपि धीहेतुरदृष्टादिति समकालं भौमध्रुवधीः,

ख्याप्रतीत्यालम्बनन्यायसिद्धेव। तत्र हि संख्याविशेषोत्पत्त्यर्हसमवाय्यसमवायीयत्ताविशेषस्मृतिः तत्तत्संख्याव्यवहारहेतुरर्हतालम्बनोक्त्योक्ता; तदियत्तादिविशेषस्य द्रव्येषु संख्याविशेषव्याप्तिदर्शनाद्गुणादौ तदनुमापकत्वं स्यादिति भावः। संयोगाद्द्रव्यग्रहे इन्द्रियव्यवस्थामाह—संयोगादिति। ननु चक्षुषः संयुक्तग्राहकत्वमयुक्तम्, विप्रकृष्टार्थग्रहात् स्पृश्यवदल्पदेशग्रहणापत्तेश्चेत्याशङ्क्य तदविरोधविवक्षया प्राप्तौ प्रमाणं तावदाह—प्राप्यकारीति। सत्यपि विप्रकृष्टार्थग्रहणे कुड्यादिव्यवहिताग्रहणात् पृष्ठभागवर्त्यग्रहणाच्चावश्यकल्प्ये कस्मिंश्चिद्व्यवस्थापके त्वगादिदृष्टसन्निकर्षत्यागेनान्यकल्पनानुपपत्तेः तस्य बहिरिन्द्रियप्रयुक्ततया अत्रापि स एव व्यवस्थापको ग्राह्य इत्यर्थः। तथापि देशविप्रकर्षान्न सन्निकर्षोऽभ्युपेय इत्याशङ्क्य तदुपपत्तये तैजसत्वमाह — तैजसमिति। रूपप्रतीत्यसाधारणकारणस्य तैजसत्वनियमदर्शनात्तन्निश्चय इत्यर्थः। ततः किमित्याशङ्क्य संयोगाविरोधः पृथुदर्शनाविरोधश्चेत्याह— तस्य रश्मय इति। नन्वव्यवधाननियतत्वात्संयोगस्य संयुक्तदर्शनोपगमो देशविप्रकृष्टानुभवविरुद्ध इत्यत्राह — सान्तरालधीस्त्विति। संयुक्तरश्म्यपेक्षया व्यवधानानुभवाभावाद्देहापेक्षया चाविरोधान्न तदनुपपत्तिरित्यर्थः। ननु बहुयोजनसहस्रव्यवहितातिसन्निकृष्टयोर्युगपद्दर्शनविरोधोऽपरिहार्य इत्याशङ्क्य द्वयव्यापिबाह्यालोकैकीभावात्मिकास्तु प्राप्तिः, न दृश्यप्राप्त्यन्तस्वगत्यैवेत्युपगमे तद्विरोधः परिहार्यः। न चैवमतिदूरव्यवहितदर्शनापत्तिः, कार्यानुसारेण कारणकल्पनेति दर्शनसामग्रीप्रेरकतत्फलभोक्त्रदृष्टनियमिततद्भागविशेषस्यैव ग्राहकत्वोपगमेन तत्परिहारसम्भवादित्याह—नयनरश्मिभिरिति। नन्वेवं कल्पनागौरवदोष इति चोद्यपूर्वकमनन्यथासिद्धकार्यायातस्य न

१. प्रतीति. क.

२. Added अपि. ख.

न चातिदूरव्यवहितधीः । नन्वेवं रश्मीनां स्वतोऽपि पृथुद्रव्यव्याप्त्या बाह्य-तेजसैकीभूय चेति द्विधा धीहेतुता कर्तव्या । नायं दोषः, द्विधा कार्यदर्शनात् । वितेजोदेशस्थस्य सतेजोदेशस्थपृथुद्रव्यधीर्दृष्टेति तद्व्याप्त्या धीहेतुता । अति-दूरानन्तरितयोर्युगपद् दृष्टेरेकीभूयापि हेतुता । अतिक्षेपीयस्तया तु युगपत्ता

दोषत्वमित्याह—नन्वेवं रश्मीनामित्यादिना । ननु निरालोकदेशस्थस्य सालोक-देशस्थद्रव्यदर्शनमात्रं नयनरश्मेः स्वत एव तद्देशगमनकल्पकम्; तत्र किमर्थं पृथु-पदोपादानम्? उच्यते—गतिमात्रासिद्धावपि स्वरूपेणैव द्रव्यव्याप्तिरित्येतन्निर्हेतु-कम्, तदभावे तद्वत्या तत्स्थालोकैकीभावेन तद्व्याप्त्या दर्शनसाधनत्वसम्भवादिति शङ्कानिवृत्त्यर्थं तद्द्रष्टव्यम् । तत्पक्षे तु तत्स्थाल्पपरिमाणद्रव्यदर्शनमपि दुर्वारम् । तादृक्प्राप्तेरविशेषात् स्वावयवव्याप्त्या ग्रहणे दूरदेशे तेषां विरलत्वात् सूक्ष्मद्रव्य-दर्शनासिद्धिः स्थूलदर्शनसिद्धिश्च युक्तेति स्वतोऽपि विषयव्याप्तिः कल्प्येति[1] तेन दर्शितम् । ननु रश्मीनां वेगातिशययोगात् कालभेदानवमर्शाद्यौगपद्याभिमानमात्र-मित्यपि परिहारसम्भवादेकीभावाश्रयणमनर्थकमित्यत्राह — अतिक्षेपीयस्तयेति । यद्यपि तेजोदेशस्थस्य योजनमात्रविप्रकृष्टपर्वतशिखरादिवर्त्यग्न्यादिदर्शने चक्षुरुन्मील-नानन्तरत्वाभिमानात्तदनुरूपवेगातिशयो रश्मीनां प्रसिद्ध एव, तथापि बहुयोजन-सहस्रविप्रकृष्टध्रुवादिदर्शने सन्नेव कालभेदो नावमृश्यत इति प्रतीतिहतम्, तद्योग्यत्व-स्यावर्जनीयत्वात्, स्वल्पविप्रकर्षेऽपि च रश्मीनां विरलतापत्त्या सूक्ष्मार्थादर्शने प्रसिद्धे तावद्विप्रकर्षे तद्दर्शनं च स्वगत्युपगमेन दुर्लभमेवेत्येकीभावेन तत्प्राप्तिराश्रितेति भावः । नन्वतिप्रचुरतमोऽवस्थितस्याप्युन्मीलनयत्नानन्तरमेव यादृच्छिकमेघच्छिद्र-लाभनिर्गतरश्मेर्ध्रुवादिदर्शने सिद्धे गतिकल्पनायाः प्रतीतिविरोधमुद्भावयतः कोऽभिप्रायः? उच्यते—न तावद्दृष्टृदेशादारभ्य यावद्ध्रुवादिदेशं व्याप्य तमोव्याप्ति-रस्ति, मेघावरणापेक्षत्वात्तस्थितेः तेषां चातिनिकटवर्तित्वात्; तदनन्तरदेशे तु ग्रहनक्षत्रादितारकासहस्रातिप्रचितालोकस्य व्यापिनोऽवस्थितत्वात्तदेकीभावेन प्राप्ति-रविरुद्धा, मेघाद्यभावे भूमावपि तद्दर्शनादिति मेघच्छिद्रावकाशेनापि तदेकीभाव एव प्रतीत्यनुगुण इत्यभिप्रायः । ननु तत्पक्षे रश्म्याश्रयस्य चक्षुरादेरन्यस्यापि

१. कल्प्या. ख.

दृष्टविरुद्धा न कल्प्यते। प्रसरद्भिरेव रश्मिभिरेकीभूताभिमुखतेजोभागमध्यवर्तिनि धीर्दृष्टेति नातिदूरव्यवहितानभिमुखधीहेतुता। न[1] त्वेवमादिकल्पनाभयान्मानसिद्धप्राप्यकारित्वहानं युक्तम्। किञ्च[2] अभिमुखतेजोभागमध्यवर्तिधीहेतुतोभयवादिसिद्धा प्रसरत्तैकीभूतता च तेजःस्वभावसिद्धा न कल्प्येति यथोक्तं युक्तम्। न च घ्राणश्रोत्ररसनादिभिरपि द्रव्यधीरिति वाच्यम्, अनुपलब्धेः। स्पृष्टे तु द्रव्ये न रसनादिना धीः; किन्तु सर्वव्यापित्वगिन्द्रियेण, तस्य कॢप्तशक्तित्वादन्यदेशे द्रव्यधियं प्रति। द्रव्ये त्रिविधे दर्शनस्पर्शनजा धीः; वायोस्तु स्पर्शनमात्रात्। न च स्पर्शमात्रे[3] धीरिति

बाह्यालोकसम्बन्धिनो दर्शनापत्तिरित्याशङ्क्य अदृष्टनियमितभागमात्रस्य धीहेतुत्वं पूर्वोक्तं विविच्य दर्शयति—प्रसरद्भिरेवेति। नन्वेवं बहुकल्पनापत्तेः अप्राप्यैव धीहेतुत्वं चक्षुषोऽभ्युपेयमिति सौगतशङ्कां निरस्यति—न त्वेवमादीति। व्यवस्थापकस्यावश्यकल्पनीयत्वाद्दृष्टाश्रयणमेव कल्पनयापि युक्तमिति प्रागेवोक्तम्। तत्पक्षे रश्मीनामचाक्षुषत्वार्थं जलप्रविष्टाग्न्यवयवानामिव रूपाभिभवकल्पनापि स्यादिति तदपेक्षमादिग्रहणं नेयम्। कल्पनागौरवापत्तिश्च नास्मान् प्रति विशेषत आपाद्येत्याह—किञ्चाभिमुखेति। ननु चक्षुःस्पर्शनाभ्यां द्रव्यधीरिति नियमो न युक्तः, तदितरैरपि स्वस्वानस्पृष्टद्रव्यप्रतीतेः प्रसिद्धत्वादित्यत्राह—न च घ्राणश्रोत्रेति। तैस्तदन्यप्रतीत्यसिद्धेः तत्प्रतीतेश्च देहव्यापिकॢप्तत्वगिन्द्रियेणैव सम्भवान्न तच्छक्तिकल्पनया तत्कार्यता कल्प्येत्यर्थः। चतुर्विधद्रव्यस्यैन्द्रियकत्वे पूर्वोक्ते विशेषमाह—द्रव्ये त्रिविध इति। वायोरनैन्द्रियकत्वं तार्किकोक्तं निराकरोति—न च स्पर्शमात्र इति। तस्य स्पर्शनानात्वाभावेऽपि निजस्पर्शेऽन्यसंपर्काभिभूतेऽन्यदीयनानास्पर्शमात्रोपलम्भेऽपि वायुबुद्ध्यनुवृत्तेः स्पार्शनत्वं निश्चीयते, शीतोष्णस्पर्शाभ्यां वाय्वनुमानायोगात्। प्रत्यक्षे तु स्पर्शान्तराभ्यामपि सह तद्धीर्युक्तेति तन्निश्चय इत्यर्थः। ननु स्पार्शनद्रव्यस्य चाक्षुषत्वाव्यभिचारात् तदुपगमे चाक्षुषत्वमप्य-

१. न चैवमादि. ख.

२. किञ्चेत्यादि युक्तमित्यन्तं वाक्यं न दृश्यते. ख.

३. स्पर्शनमात्रे. ख.

वाच्यम्; तद्गतनानास्पर्शानुभवेऽप्येकप्रत्यभिज्ञानाद्वायोः प्रत्यक्षता, न तु चाक्षुषता; महदनेकद्रव्यारब्धमपि न नीरूपं वाय्वादि चाक्षुषम्। नन्वमहत्त्वादेव द्व्यणुकस्येव परमाणोरप्यप्रत्यक्षतासिद्धेरनेकद्रव्यारब्धत्वोपादानं व्यर्थं स्यात्। मैवम्; लक्षणान्तर्निवेशे हि द्वयोर्व्यर्थता; इह तु महत्त्वानेकद्रव्यत्वस्य हेतुतोक्ता; सा चान्वयव्यतिरेकानुविधानात्। तत्र व्यतिरेकानुविधानं परमाणूनामनेकद्रव्यारब्धत्वस्य शक्यं वक्तुमित्यनेकद्रव्यारब्धत्वाभावात्परमाणोरदर्शनमुक्तम्। रूपवदालोकस्य रूपधीहेतुत्वदर्शनाद्रूपधीन्द्रियं रूपवत्, गन्धधीन्द्रियं गन्धवत्पार्थिवम्, शब्दधीन्द्रियं शब्दवन्नभः; रूपवत्तेजसो

निवार्यमिति शङ्कामपाकरोति—न तु चाक्षुषतेति। स्पार्शनत्वं चाक्षुषद्रव्ये भूयोदृष्टमपि चाक्षुषत्वेऽनुपकारकम्; महत्त्वानेकद्रव्यारब्धत्वे तदुपकारके; ते अपि रूपवत्त्वसहिते तदुपकारके, न केवले इति वायोस्तदापादने न शक्नुतः, किं पुनः स्पार्शनत्वमित्यर्थः। ननु द्वयोर्ग्रहणमनर्थकम्; यच्च अनेकद्रव्यारब्धत्वाभावात् परमाणोरप्रत्यक्षत्वं प्रकरण उक्तम्; तच्चायुक्तम्, महत्त्वाभावादेव तत्सिद्धेरिति चोदयति—नन्वमहत्त्वादेवेति। परिहरति—मैवं लक्षणेति। लक्षणविवक्षायामेवैतदानर्थक्यम्, हेतुविवक्षयातूक्तमिति न दोषः। सा च शिथिलावयवारब्धजालादेः निबिडावयवारब्धवस्त्रादेश्च परिमाणसाम्येऽपि बहुतरावयववस्त्रादेः दूरदेशदर्शनयोग्यत्वदर्शनादवयवाधिक्यस्य प्रत्यक्षविशेषावहत्वनिश्चयात् तस्य च सामान्येनानेकावयवारब्धत्वस्यापि प्रत्यक्षहेतुत्वे सत्युपपत्तेः सिद्धा। एवमवयवाधिक्यतारतम्यवर्त्यन्वयव्यतिरेकसिद्धहेतुत्वस्य व्यतिरेकस्थानतया परमाणूदाहरणम्, न तावन्मात्रं प्रमाणतया विवक्षितमिति न दोष इत्यर्थः। इन्द्रियाणां विषयसंयोगार्थं द्रव्यत्वे सिद्धे तद्विशेषप्रदर्शनार्थं चक्षुषस्तावद्रूपवत्त्वमाह—रूपवदालोकस्येति। रूपदृष्टयसाधारणहेतोः दीपवद्रूपवत्त्वमनुमेयमित्यर्थः। तत्पूर्वकं घ्राणस्य स्वग्राह्यगुणवत्त्वं पार्थिवत्वं च ततोऽनुमेयमित्याह—गन्धधीन्द्रियमिति। एवं श्रोत्रमाकाशमित्याह—शब्दधीन्द्रियमिति। रूपवत्तामात्रेण चक्षुषो भूतविशेषानिर्णयेऽपि दीपसाम्यात्तैजसत्वासिद्धिरित्याह—रूपवत्तेजस इति। रसस्पर्शग्राहकयोस्तदि-

१. माणोरप्रत्यक्षतासिद्धेः. ख.
२. द्रव्यत्वस्य. ख.
३. शक्यमित्य. ख.
४. अनेकद्रव्यत्वाभावात्. क.

दीपस्य रूपधीहेतुत्वदर्शनाद्रूपधीन्द्रियं[1] तैजसम्, रसधीन्द्रियं रसवदाप्यम्, स्पर्शधीन्द्रियं स्पर्शवद्वायवीयम्; भूतानां बहिरिन्द्रियारम्भकत्वनियमादियं व्यवस्था। यदि हि[2] स्पर्शधीन्द्रियं न वायुः, तदा तस्येन्द्रियारम्भकता न स्यादेव। एवं नित्यद्रव्यगतवैशेषिकगुणासमवायिकारणं[3]भूतद्रव्यान्तरसंयोगार्थं द्रव्यं मनोऽनुज्ञातम्। तच्चाणु, आरब्धत्वे[4] कल्पनागौरवापत्तेः; परममहत्त्वे च हेत्वभावादात्मना सह संयोगाभावात्। न च पार्थिवाद्यणु तत् इति वाच्यम्,

तदभूतात्मकमेत्याह—रसधीन्द्रियमिति। तत्र हेतुः—भूतानामिति। तमेव हेतुं विपक्षे बाधकोक्त्या दृढीकरोति—यदि हि स्पर्शधीन्द्रियमिति। पञ्चसु भूतत्वप्रसिद्धेरेकोपाध्यधीनत्वादितरेषु चेन्द्रियारम्भकत्वसिद्धेस्तदुपगम एव व्यवस्थानुसाराच्च युक्त इत्यर्थः। सुखादिप्रत्यक्षोचितमिन्द्रियं संप्रयोगं च वक्तुं तत्स्वरूपं सप्रमाणमाह—एवं नित्यद्रव्येति। पार्थिवपरमाणुषु रूपाद्युत्पत्तौ अग्निसंयोगस्यासमवायिकारणत्वात् सुखादावपि अन्यसंयोग एवानुमेय इति तदर्हं मन इति प्रसिद्धमित्यर्थः। द्रव्यस्य परिमाणाव्यभिचारात् तद्विशेषापेक्षायां तमाह—तच्चाण्विति। लाघवादकार्यत्वे परममहत्त्वोपगमे अतत्परिमाणकार्यसंयोगो न स्यात्, दृष्टसंयोगव्यापकनिवृत्तौ तदनुमानाप्रचारात्; अतद्विधस्य चान्यथानुपपत्तिबलोन्नेयत्वादिह च तदभावादणुत्वोपगम एव न्याय्यः। नित्यसंयोगाश्रयणे अन्यासक्तचित्तस्येन्द्रियसंयुक्तार्थाप्रतिपत्तेः हेत्वन्तरं कल्प्यम्, तदनित्यत्वे तदभावादेवोपपत्तिरित्यभिप्रायः। नन्वेवं पार्थिवादिभ्योऽन्यत्वं तस्य न स्यात्, अनन्यत्वेऽप्यविरोधाल्लाघवाच्चेत्यत्राह—न च पार्थिवादीति। स्थूलकार्यकल्प्यानां तेषां तत्कारणत्वं विना तद्भावायोगात्तत्कारणत्वे च तत्कार्याणां कार्यान्तरार्थमुत्पाद्यत्वात्तद्व्यापारस्यावश्यकत्वान्मनःकार्यार्थव्यापारविरोधात् तदविरोधार्थं स्वातन्त्र्योपगमौचित्यादन्यत्वसिद्धिरित्यर्थः। नन्वसमवायिकारणसंयोगार्थमुपगतस्येन्द्रियत्वं

१. हेतुत्वाद्रूप. ख.
२. Omitted. हि. क.
३. कारणीभूत. क.
४. त्वेतत्कल्पना. क.

तस्य द्रव्यारम्भकत्वनियमात्, अस्य तदनुपगमात्। तच्चान्तरसुखदुःखेच्छाद्वेषप्रयत्नधीहेतुः; बाह्यार्थस्मृतौ च संस्कारसहितम्। एवमान्तरबोधे सुखादिमदात्ममनस्संयोगः, सुखादिमनस्संयुक्तसमवाय इति द्वयं हेतुः। रूपादिग्रहे त्वात्ममनस्संयोगः, मनइन्द्रियसंयोगः, द्रव्येन्द्रियसंयोगः, रूपादीन्द्रियसंयुक्तसमवाय इति चतुष्टयम्। अनेकसन्निकर्षानुज्ञानं च—असमवायिकारणभूतः संयोगो ह्यात्मना सहानुज्ञातः; आत्मसमवेतसुखाद्यग्रहात्सुखादिसंयुक्तसमवायोऽनुज्ञातः; एवमन्यचित्तस्येन्द्रियार्थसंयोगेऽप्यग्रहात् तस्येन्द्रियसंयोगोऽनुज्ञातः; इन्द्रियद्रव्यसंयोगेऽपि द्रव्ये रूपाद्यसमवाये रूपाद्यग्रहात्तत्संयुक्तसमवायोऽनुज्ञातः; द्रव्यग्रहे संयोगत्रयमर्थादुक्तम्। एवं सन्निकर्षान्निर्विकल्पकसविकल्पकरूपद्वयं बाह्यमेयप्रत्यक्षम्। नन्वनिन्द्रियसन्निकर्षजमपि भावनाप्रकर्षजं युक्तं साक्षाद्द्विरूपं मेयप्रत्यक्षम्। तन्न, तस्य स्मृतिभेदत्वात्; अनुभूतिर्हि साक्षाद्धीः

कथमित्यत्राह—तच्चान्तरेति। सुखादिप्रत्यक्षधीकरत्वादिन्द्रियत्वम्; बाह्यार्थेऽपि चापरोक्षधीकरत्वं कश्चिदस्ति, प्रमितिमात्रकरत्वं निवर्तत इत्यर्थः। एवमिन्द्रियत्वं प्रदर्श्य संप्रयोगविशेषमाह—एवमान्तरबोध इति। संप्रयोगबहुत्वोपगमे प्रमाणमाह—अनेकसन्निकर्षेत्यादिना। द्रव्यग्रहे ग्रन्थे पृथक् संयोगविशेषापरिगणनमर्थसिद्धत्वादित्याह—द्रव्यग्रह इति। एवं संप्रयोगं तस्य विभज्य लक्षणनिवेशोपयोगं तन्निवृत्त्या धर्मस्य प्रत्यक्षत्वनिवृत्त्यापादनसमर्थमाह—एवं संनिकर्षादिति। यथोक्तान्वयव्यतिरेकबलेन बाह्यद्रव्यगुणसामान्यानां प्रत्यक्षविषयतापरयुक्त्या निर्विकल्पकसविकल्पकविभागेनासंप्रयुक्तेन्द्रियजप्रत्यक्षवाद्युक्ततदविषयत्वनिरासेन द्वयस्यापि संप्रयोगजत्वेनैव तत्प्रामाण्यसिद्धिस्तदुपयोग इत्यर्थः। नन्वनुमानागमाभ्यां परोक्षं वस्त्ववधार्य पुनरेकाग्रचिन्तासन्तानसंस्कारबलादपरोक्षं पश्यतो बुद्धिजन्म इन्द्रियसंप्रयोगहीनमित्यव्याप्तिदोषो लक्षणस्येति चोदयति—नन्विन्द्रियसन्निकर्षजमपीति। परिहरति—तन्न तस्येति। तस्यापरोक्षत्वविशेषणे सत्यपि प्रामाण्यापादकानुभूतित्वाभावान्न प्रत्यक्षतेति न लक्षणदोष इत्यर्थः। ननु तस्येदन्तया विषयमवभासयतोऽनुभवसिद्धमनुभूतित्वमिति तस्य तद्व्यावृत्त्यशक्तत्वात् प्रत्यक्षपदोपात्ते-

१. तस्य. ख.
२. बाह्यस्मृतौ. ख.
३. अग्रहात्संयुक्त. ख.
४. प्रकर्षपर्यन्तजं साक्षाद्वि रूपम्. क.

प्रत्यक्षम्; स्मृत्यनुभूती च नानास्वभावे मानबलसिद्धे; साक्षाद्धीः स्वरूपधीः; अक्षाद्धि स्वेन रूपेण भानम्; लिङ्गशब्दसदृशानुपपन्नेभ्यस्तु लिङ्ग्यादिरूपपरसम्बन्धितारूपेण भानम्। सविकल्पके नामादिरूपतः स्वरूपतोऽपि भानमिति साक्षाद्धीत्वम्। अनक्षजापि मितिमात्रोः स्वरूपभाना-

न्द्रियजत्वं प्रत्यक्षलक्षणमाश्रित्यैवातज्जन्यतया तद्व्यावृत्तिरभ्युपेयेति परमतमाशङ्क्य संस्कारजत्वप्रसिद्धस्मृतिबलेनैवानुभूतित्वव्यावृत्तिसिद्धेरप्रत्यक्षत्वं स्यात्, अन्योन्यविरुद्धस्वभावत्वात् स्मृत्यनुभूत्योः नानुभवबलमनुभूतित्वापादकमिति परिहरति—स्मृत्यनुभूती चेति। नानास्वभावत्वसाधकं मानबलमुत्तरत्र स्वयमेव वक्ष्यति। नन्वेवमपि साक्षात्त्वस्य दुर्निरूपत्वादक्षजत्वमेव प्रत्यक्षलक्षणं ग्राह्यमिति तेनैव स्मृतिव्यावृत्तिः सुकरेत्याशङ्क्य तत्स्वरूपमितरव्यावृत्तिक्षमं दर्शयति — साक्षाद्धीरिति। ननु सर्वापि धीः स्वरूपधीरेवेत्याशङ्क्य तृतीयासमासाभिप्रायविवरणेन कारणकृतं स्वरूपविशेषमाह — अक्षाद्धि स्वेन रूपेणेति। कारणतया अन्यव्यावर्तकमपीन्द्रियं परोपाधिहीनविषयभानरूपकार्यकल्प्यमित्यनुभवसिद्धनिरुपाधिकभानमेव प्रथमप्राप्तं प्रत्यक्षलक्षणं युक्तमित्यर्थः। मानान्तरमेयेषु तदभावं व्यावर्तकत्वार्थमाह — लिङ्गशब्देति। व्याप्यादिभिः व्यापकत्वाद्युपाधिग्रस्ततयैव तत्तदर्थभानं लिङ्गाद्यवधारणस्यायथार्थत्वे लिङ्ग्याद्यभावस्य तत्तत्प्रतीत्यभ्युपगतत्वान्न निरुपाधिकभानं तैरित्यर्थः। ननु चैवं नामाद्यवच्छिन्नभानात्मकसविकल्पकधियोऽप्रत्यक्षत्वापत्तिरित्यत्राह—सविकल्पक इति। पररूपान्तर्भावेऽपि स्वरूपभानानपायान्न तस्योपाधित्वं तत्रेत्यर्थः। एवमक्षजत्वस्य लक्षणबहिष्ठत्वादनुमानादावपि मितिमात्रोः प्रत्यक्षतेत्याह—अनक्षजापीति। वित्तिजनकलिङ्गादेर्वेद्यं प्रत्येवोपाधितया स्वरूपतिरोधायकत्वमवभासते, न वेत्तृवित्ती प्रति—इत्यापेक्षिकमेकवित्तेरेव प्रत्यक्षत्वमप्रत्यक्षत्वं च युक्तमेवेत्यर्थः। यथासूत्रं कारणमुखमेव प्रत्यक्षस्वरूपं सुनिरूपम्, न प्रतीत्याकारमुखमिति स्थापनार्थं प्रतीतिविशेषरूपसाक्षात्त्वस्य लक्षणत्वे टीकायां विशदावभाससंवेदनपदाभ्यां प्रत्यक्षव्यपदेशदर्शनात् सजातीयव्यावर्तकबहुधर्मस्फूर्तेस्तल्लक्षणत्वमुक्तं स्यादित्यापाद्य तदव्यापकत्वदोषोद्भावनमपि परकीयं यथोक्तविधया

१. लिङ्गादि. क. लिङ्गादिभूत. ख.

त्साक्षाद्धीरेव । दूरादशेषविशेषाभानेऽपि त्वचा चाशेषरूपाभानेऽपि परसम्बन्धितारूपेणाभानात्साक्षात्त्वम् । तदेव विशदावभासः संवेदनं चोक्तम्, न तु धीस्फुटता साक्षात्त्वम्; सर्वैव हि धीः स्फुटा । स्मृतेर्विशदत्वेऽप्यमानत्वादप्रत्यक्षता; अविशदत्वे हि विशदावभासेन सह भेदाग्रहो न स्यात्। सापेक्षतापि स्मृतेः परवेद्यतोल्लिखरूपितार्थवेदनात् स्ववेद्ये, न तु स्ववेद्येऽनुमादिकथा । न च मच्छिष्यधीवेद्यत्वान्मत्पूर्वधीवेद्यमित्यनुमानेऽपि तत्ता-

परिहृतमित्याह—दूरादशेषविशेषेति । तदभिप्राय एव टीकाव्यपदेशोऽपीत्याह—तदेव विशदेति । यत्तु विशदाद्युक्तेः स्फुटार्थग्रहेणानुमेयादिधियोऽनुमेयाद्यवच्छिन्नलिङ्गादिधीसङ्कीर्णत्वेनास्फुटत्वात् प्रत्यक्षधियः तदभावात् स्फुटत्वं साक्षात्त्वमिष्टम्, तदयुक्तमित्याह—न तु धीस्फुटतेति । सर्वसविकल्पकधियः स्वविषयार्पणापर्यायान्यमिश्रतास्त्येव, तथापि क्वचिद्धेतुहेतुमत्तया क्वचिद्विशेषणविशेष्यतयोपयोगभेदस्यापि व्यक्ततया स्फुटत्वानपायान्न तेन व्यावृत्तिसिद्धिरित्यर्थः । एवं साक्षात्त्वस्यानुभूतिविशेषणतया प्रत्यक्षलक्षणत्वं समर्थ्य 'स्मृत्यनुभूती च नानास्वभावे' इत्येतत्समर्थनार्थं पूर्वोक्तामपि स्मृतिव्यावृत्तिमनुवर्तयति स्मृतेर्विशदत्वेऽपीति । कथं स्मृतेर्विशदत्वाभ्युपगमः? निरुपाधिकार्थभानं हि तत्स्वरूपमुक्तम्; पूर्वानुभवोपाधिकार्थभानहतं तु तादित्याशङ्क्य तदभावे दोषोद्भावनेन तत्साधयति—अविशदत्वे हीति । अनुभूतत्वमननुसन्धायापरोक्षाविवेकेनापि भ्रान्तिसमये तदुत्पत्तेः स्फुटत्वात् उपाधिव्यवधाने च तदयोगात् तदनुसन्धानेऽपि नात्मसत्तोपाधितया अनुमानादिव तदनुसन्धीयत इति न विशदत्वासिद्धिरित्यर्थः । नन्वेवं पूर्वानुभवापेक्षत्वमुत्पत्तिमात्रार्थतयावशिष्यत इति न तत्प्रामाण्यापहारकमिति तदप्यनिवार्यमित्याशङ्क्य प्रामाण्यविरोध्येव तत्, न निष्पत्तिमात्रोपक्षीणमित्याह—सापेक्षतापीति । सापेक्षतापि स्मृतिवर्तिनी प्रामाण्यमेव बाधते, न विशदत्वम्; स्मृतिर्हि स्वविषयव्यक्तावेव पूर्वानुभवमुपाधितया व्यवधायकमपेक्षते, 'तत्' इति स्फुरणात्; अनुमानादि तु अन्यसत्तोपाधिकसत्ताकं स्वयमेव विषयं व्यनक्तीति विशदत्वमेव तत्र नास्तीति विशेष इत्यर्थः । नन्वेवमनुमानेऽपि क्वचित् स्मृतितुल्यत्वमनिवार्यमित्याशङ्क्य वैषम्यमाह—न च मच्छिष्यधीवेद्यत्वादिति । पूर्वधीविषयत्वव्यक्तिर्द्वेधा स्यात्-संस्कारादनुमानाच्च; संस्काराधीना तद्व्यक्ति-

स्पदतापत्तिः; अनुमा हि पूर्वधीवेद्यताविशिष्टे; न तु वेद्यतावधृते, अनपेक्षस्वभावत्वात् । अनुभूतांशमोषेऽपि स्मृतेः परवेद्यवेदनताशक्तिनियमः कारणानुसारतः; अनुमाने तु परवेद्यतोल्लेखादर्शनान्न तद्रूपे शक्तिनिश्चय इत्यवधेयम् । यदि तु भेदकबहुधर्मवत्त्वेन वेद्यता साक्षात्त्वम्, तदा दूरात्सामान्यवेद्यं प्रत्यक्षं न स्यात्; पक्षधर्मताबलादिनानुमानादावपि बहुधर्मवत्त्वेन धीरिति न भेदः । न च लक्षणं प्रायिकतया समर्थनमर्हति । न च स्वकीयरूपतो वेद्यता साक्षात्त्वम्; पररूपतो हि न वस्तुनो वेद्यता; न हि

त्तत्तास्पदतया हेत्वनपेक्षा प्रामाण्यहीना; संस्कारभ्रंशाद्धेत्वपेक्षा त्वानुमानिकी इतरानुमानतुल्या प्रमाणमेव, हेत्वपेक्षयानपेक्षस्वभावत्वनिश्चयादित्यर्थः । नन्वेवं स्मृतिरपि तत्तानास्पदभूता अस्तु प्रमाणमित्यत्राह—अनुभूतांशमोषेऽपीति । सापि तद्धेतुकृतकारणोत्थैव कारणान्तराप्रचारादुपेतेति दोषखण्डिततदंशापि न स्वभावान्तराङ्गीकारार्हेति न प्रमाणमित्यर्थः । नन्वेवमनुमाने व्याप्तिग्रहणे प्रसिद्धविषयत्वनियमात्तत्संस्कारोत्थतोपगमेनानुभूतांशमोपमात्रं किमिति नाभ्युपेयत इत्यत्राह—अनुमाने त्विति । तन्मोषविषये प्रतीत्यनुगुणकारणप्रसिद्धिमूलः प्रमोपापेक्षसंस्कारोत्थत्वोपगमः । सर्वत्र प्रसिद्धकारणानुमाने तु क्वचित्तत्तास्पदत्वदर्शन एवान्यत्र तत्प्रमोषाश्रयणं न्याय्यम्, तदभावे यथाप्रतीत्यवगतकारणत्यागेन प्रमोपापेक्षसंस्कारकारणाश्रयणमन्याय्यमेवेत्यर्थः । यथोक्तसाक्षात्त्वस्वरूपानङ्गीकारेण बहुतरधर्मवत्तया विशेषान्तरव्यावृत्तभानरूपमङ्गीकुर्वतां परापादितदोषानतिक्रमं स्वयमप्यङ्गीकरोति—यदि त्वित्यादिना । स्वरूपभानपक्षे स्वस्येति पदवृत्त्युपगमोऽप्ययुक्त इत्याह—न च स्वकीयरूपत इति । लिङ्गादेः स्वसत्तोपाधितया वेद्यतोपाधित्वाभावात् स्वीयजात्यादेरेवानुमानादावपि वेद्यतोपाधित्वमिति व्यावर्त्याभावान्न तदुपपत्तिरित्यर्थः । स्मृतेरमानत्वे पूर्वानुभवमात्रार्पकत्वेनार्थविषयत्वाभावो हेतुः, तद्विषयत्वेऽनुवादधीवत्प्रामाण्यं दुर्वारम्, पूर्वानुभवस्य त्वनन्याधीनासिद्धित्वान्न तदुपस्थापकतया प्रामाण्यमिति नार्थस्य साक्षात्त्वप्रसङ्ग इति केचित् । तन्निरस्यति—

१. वेद्यत्वो. क. २. कबहिर्धर्म. क.

द्विरूपं वस्त्विति पूर्वोक्तमेव साक्षात्त्वं युक्तम्[१] । स्मृतेः प्राची धीरेव वेद्या, नार्थः—इति न वाच्यम्,[२] 'तत्' इत्यवमर्शस्यार्थविषयत्वात् । पूर्वधीवेद्यतारूपितार्थपरिच्छेदात्परिच्छेदे सापेक्षतया अप्रकृष्टा स्मृतिः ; अनेवंरूपा प्रकृष्टा धीः प्रमेति भेदः । वर्तमानविषयता च या प्रत्यक्षस्योक्ता, सा सूक्ष्मक्षणभेदानवमर्शादिदन्तया भानात् ; न तु यत्क्षणवतोऽर्थस्य सन्निकर्षः, तत्क्षणवतोऽर्थस्य भानादित्यवधेयम् । मितिमातृप्रत्यक्षतापि यथोक्तेनैव साक्षात्त्वेनेति तदवसरे वाच्यम् । अतः सूक्तं प्रत्यक्षादेर्वेदार्थेऽनिमित्तत्वम् ॥

स्मृतेः प्राची धीरेवेति । बाह्यविषयत्वं तावत्प्रतीतिबलसिद्धं नापलापार्हम् ; न च स्मर्यमाणा पूर्वधीस्तदुपस्थापिका, तत्काले स्वयमसत्यास्तदुपस्थापकत्वासम्भवात्, तेन द्वयमपि सहैव स्मृत्युपस्थाप्यमित्युपेयम् । न चैवं प्रामाण्यापत्तिः, विषयाविष्करणे सापेक्षानपेक्षत्वस्वभावभेदात्तद्विषयप्रकर्षाप्रकर्षभेदमात्रनिमित्तत्वात् प्रामाण्याप्रामाण्योपगमस्य । अतः प्रातीतिकार्थविषयत्वं न हानार्हमित्यर्थः । नन्वर्थसन्निकर्षजत्वोक्तिः प्रत्यक्षस्य वर्तमानविषयत्वापादिकेत्यङ्गीकृतम् ; तदङ्गीकारः स्मृतेर्बाह्यविषयत्वानुपगम एव शक्यः, तत्पक्षे ह्यान्तरबाह्येन्द्रियाधीनद्रष्ट्रात्मावच्छेदकत्वमात्रमर्थस्य दृश्यत्वमिति संप्रयोगकाल एव दृश्यत्वमिति वर्तमानविषयत्वसिद्धिः; तदुत्थज्ञानविषयतया तु दृश्यत्वे भूततयैव संप्रयुक्तं विषयः, तत्पक्षे तु स्मर्यमाणानुभवस्य तदा स्वयमसतः स्वविषयघटकत्वं नास्तीत्यविषयनिष्ठ एव भ्रान्त्यादाविव तज्ज्ञो व्यवहार इति सविषयतोपगमे तद्विरोध इत्याशङ्क्य सूक्ष्मकालस्य दुर्विवेकत्वादनुसन्धानार्हस्थूलकालापेक्षया तदुपगम इति परिहरति—वर्तमानविषयता चेति । साक्षात्त्वस्य बहुधर्मव्यावृत्तभानरूपत्वे स्वीयरूपविशिष्टभानात्मकत्वे च मितिमातृप्रत्यक्षत्वासिद्धिः, अर्थोपरञ्जकतया तयोर्विशिष्टतया भानायोगात् पृथक्त्वभानाभावात् । तद्धीस्थत्वनियमस्तु स्वस्थाने वक्ष्यते । अतोऽप्युक्तरूपमेव तदुपेयमित्याह—मितिमातृप्रत्यक्षतापीति ॥

॥ इति प्रत्यक्षसूत्रम् ॥

१. Omited युक्तम्. क.

२. वेद्येति न तु वाच्यम्. क.

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

ननु लोके शब्दस्य मानान्तरवेद्यतोपहिते स्वार्थे शक्तिरव्यभिचाराद् व्युत्पन्ना यथा कार्यान्विते। अतः प्रत्यक्षाद्यवेद्यस्य न वेदार्थतापीत्यभाव एव वेदार्थस्येति शङ्कायामुत्तरं सूत्रेण। कार्यान्वितस्वार्थमात्रे स्वभाविकसम्बन्धव्युत्पत्तेर्वेदार्थधीः। मानान्तरवेद्यता तु न व्युत्पत्तिनिवेशिनी; यत्र हि व्यवहारदर्शनम्, तत्र शक्तिधीः। न च मानान्तरवेद्यतापि व्यवहारान्तर्भूता; कार्यबोधाधीनस्तु व्यवहार इति तदन्विते शक्तिर्युक्ता। स्वार्थमात्रावधृतशक्तेरेवाप्तवाक्यान्मानान्तरं वाक्यार्थविषयमनुमाय मानान्तरवेद्यार्थतां पश्यतां

"औत्पत्तिकस्तु"। सूत्रव्यावर्त्यं पूर्वपक्षं भाष्यस्थाभावशङ्काहेतूक्तिमुखेनाह— ननु लोके शब्दस्येति। व्युत्पत्तिसिद्धपदविषयप्रमितिशक्तेर्वाक्यनिष्ठतात्पर्यशक्तिधीप्रणाड्या कार्यकरत्वात् कार्यनिष्पत्त्यन्तशक्तिग्रहो वाक्यार्थविषयमानान्तरविषयप्रवृत्त्युपाधिपर्यवसायी, लोके तत्पूर्वकत्वनियमात् प्रमित्युत्पत्तेः, वेदार्थस्य तद्विषयतोक्तेर्व्युत्पत्तिसिद्धशक्तेरपि बाधापत्तेः वेदार्थाभावशङ्का पूर्वसूत्रसामर्थ्यप्राप्तेति तच्छक्त्युपस्थापनेन तत्परिहारार्थं सूत्रमित्यर्थः। कार्यान्वयवैषम्योक्त्या सूत्राभिप्रेतं शब्दशक्तेर्मानान्तरप्रवृत्त्युपाधिहीनत्वं साधयति — कार्यान्वितस्वार्थेति। व्युत्पत्तिभूमिगतशब्दानां सत्यपि व्यापाराधिक्ये स्वभावप्राप्तः कार्ययोगः कार्यान्वितस्वार्थप्रमित्युत्पत्तिनिष्ठ एव व्युत्पत्तिसिद्धः, तदधिकस्त्वौपाधिक इति मानान्तरविषयार्थत्वं न तत्तुल्यमित्यर्थः। तदेव वैषम्यं स्पष्टयति—यत्र हीति। यद्यपि मानान्तरविषयत्वमपि व्यवहर्तृधीस्थम्, तथापि व्युत्पद्यमानपार्श्वस्थदृष्टिविषयव्यवहारानन्तर्भूतत्वान्न तदवसेयशक्त्युपाधितार्हम्; स्वप्रवृत्तिहेतवधारितकार्यं तु तत्प्रवृत्तिहेतुतयानुमानसिद्धत्वाच्छक्त्युपाधितार्हमेवेत्यर्थः। ननु व्युत्पत्त्युत्तरकालावगमेऽपि मानान्तरगम्यार्थत्वं व्यवहारोपयोग्येवावगम्यतामिति स्यादुपाधिरित्यत्राह—स्वार्थमात्रेति। तदा हि पूर्वगृहीतशक्त्युपजीवनेनैव स्वयमनुमानेनार्थं

१. यत्र तु व्य. ख. २. Omitted पश्यताम्.ख

न मानान्तरवेद्यत्वेऽपि शक्तिधीः । ननु तदवेद्येऽपि न शक्तिधीः । मैवम्; प्रसिद्धार्थकामिपदसमभिव्याहाराल्लोकव्युत्पत्त्युपायादपूर्वकार्यार्थता लिङादेः, शब्दान्तराणां च तदन्वितस्वार्थव्युत्पत्तेर्मानान्तरानपेक्षार्थत्वमपौरुषेयवेदं-[1]वचसां युक्तम् । लोके मानान्तरात् स्वार्थधीः; तत्पूर्विकैव पुंसां वाक्यरचना यतः; इदमेव हि पौरुषेयत्वं वाक्यस्य, न तु वर्णादिकार्यता । कार्यव्युत्पत्तिस्तु चोदनासूत्रे; अपूर्वव्युत्पत्तिरपूर्वाधिकरणे; इह तु मानान्तरवेद्यता[2]प्रत्युक्तितोऽनपेक्षतया वेदः स्वार्थे प्रमाणमित्युक्तम् । स्वयं प्रतीयते

निश्चित्य पुनर्वाक्येनावगच्छतीति वृद्धस्यापि तथात्वावगमात् न तदुपाधितया निवेशयेत् विरोधिनिवर्तकतयैव तत्प्रवृत्तिनिश्चयादित्यर्थः । नन्वेवमपि पूर्वसूत्रे मानान्तराविषयतोक्तिः वेदार्थस्यायुक्ता, व्युत्पत्तेस्तत्प्रामाण्यहेतोस्तदहेतुत्वादिति चोदयति—ननु तदवेद्येऽपीति । परिहरति—मैवमिति । लोके व्युत्पत्तिमात्रात्तदसिद्धावपि तत्पूर्वकसमभिव्याहारमूलव्युत्पत्तिनिष्कर्षापेक्षया तदुपपत्तिरित्यर्थः । नन्वभिधानवृत्तेः लोके मानान्तरसिद्धविषयत्वनियमदर्शनात्तन्मूलाभिधानम्, न तद्विपरीतमाश्रयणीयमित्याशङ्क्य तन्नियमस्यान्यथासिद्धत्वात् नाभिधानसङ्कोचकत्वमिति परिहरति—लोके मानान्तरादिति । वाक्यावस्थाप्रयुक्ततात्पर्यमात्रोपाधिर्लौकदृष्टस्तन्नियमः, न पदनिष्ठशक्त्युपाधिरिति न समभिव्याहारावधार्यपदशक्त्यंशविरोधीत्यर्थः । ननु वाक्यतात्पर्यौपाधिकी पदानामभिधानवृत्तिः, न स्वतन्त्रेति मूलभूततात्पर्यौपाधिस्तन्नियतपदवृत्त्यवसाय्येव स्यादित्यत्राह—इदमेव हि पौरुषेयत्वमिति । तात्पर्यनियतत्वेऽपि पदवृत्तेः पुरुषस्वातन्त्र्यं वाक्यतात्पर्यवत्यैव, अनादिव्यवहारपरम्परावगतपदशक्तिपूर्वकत्वाद्विशिष्टार्थविषयवाक्यप्रयोगस्य, तेन यथासिद्धवर्णपदतच्छक्त्युपजीविवाक्यरचनामात्रनिष्ठं मानान्तरपूर्वकत्वं नाभिधानशक्तिनिवेशीत्यर्थः । नन्वनपेक्षत्वोपस्थापकापूर्वकार्यार्थत्वधीपूर्विका अनपेक्षप्रमाणप्रतिज्ञेति तन्न्यायपरताप्यस्य सूत्रस्य स्यादित्याशङ्क्य स्थानान्तरव्युत्पादितन्यायोपजीवनेनानन्तरोक्तमानान्तराविषयत्वप्राप्तविरोधपरिहारमात्रेण तत्प्रतिज्ञा अनेन क्रियत इति परिहरति—कार्यव्युत्पत्तिस्त्विति । भाष्यस्थस्वयंप्रत्ययपदार्थमप्रतीतिहानार्थं मानान्तरानपेक्षत्वरूपं विवृणोति—स्वयं प्रतीयत इति । विवरणे दृष्टसङ्केतपदतुल्यार्थधीकरत्वानुमितसङ्केतापे-

१. दार्थवचसाम्. क.   २. वेद्यार्थता. क

शब्देनेति "स्वयं प्रत्ययो ह्यसौ" इत्युक्तं भाष्ये। विवरणे तु—'देवदत्तादिपदे सङ्केतादर्थधीदर्शनात्सर्वशब्दानां सङ्केतादर्थबोधकता; न चेत्प्रत्यक्षादिगम्यो वेदार्थः, न तत्र सङ्केतः शक्य इत्यभाव एव वेदार्थस्य'—इति शङ्का सूत्रेण निरस्ता। वृद्धव्यवहारतो निश्चितशक्तेर्गवादिशब्दादर्थधीदर्शने सत्यन्यत्र देवदत्तादिपदे दृष्टः सङ्केतो नानुमेयः; न हि दृष्टे हेतौ हेत्वन्तरानुमा; प्रत्यनुमानाच्च न सङ्केतसिद्धिः। पूर्वे जना व्यवहारसिद्धशक्तिज्ञानाद्गवादिशब्दादर्थधीभाजः, गवादिशब्दादर्थधीयोगित्वात्, अधुनातनजनवत्—इति प्रत्यनुमानम्। देवदत्तादौ मूलभूतः सङ्केतो दृष्टः। तत्रापि ये

क्षत्वं सर्वशब्दानामहेयमिति वेदस्य मानान्तरागोचरार्थत्वे सङ्केताशक्तेरर्थाभावात्मकपूर्वपक्षनिरासः स्वाभाविकसम्बन्धोक्त्या सूत्रार्थ इत्याह—विवरणे त्विति। सङ्केतानुमानं निरस्यति—वृद्धव्यवहारत इति। यदि हेतुदर्शनहीनमेव कार्यदर्शनं स्यात्, तदान्यत्र दृष्टो हेतुरनुमेयः, सहेतुकार्यदर्शने तु नान्यदीयहेत्वनुमानावकाशस्तुल्यत्वात्; अन्यथा चातिप्रसङ्गादित्यर्थः। ननु देवदत्तादिपदेऽपि तुल्यं व्यवहारदर्शनोत्थार्थधीदर्शनं केषांचित्, तथापि तत्र सङ्केतहेत्वनुवृत्तिवदेव गवादावपि स्यादिति शङ्कानिवृत्त्यर्थं हेत्वन्तरं चाह—प्रत्यनुमानाच्चेति। अनित्यार्थकशब्दस्य व्यवहारदर्शनपूर्वकप्रयोगनियमासम्भवादस्तु सङ्केतपूर्वकत्वम्, गवादौ तु तत्सम्भवाद्विशेषानुमानप्राबल्यात् तन्नियमसिद्धिरित्यर्थः। नन्वेवं गवादेस्तदनुमानसिद्धस्वाभाविकशक्त्यधीने प्रमितिकरत्वे देवदत्तादेरपि तत्करत्वं तदधीनमेवोपेयमिति सर्वसाधारणशक्तस्वनियतविशेषवर्तिकार्यसिद्ध्यर्थसङ्केतापेक्षोपेयेति शङ्कां परिहरति—देवदत्तादाविति। व्यवधानेनापि सङ्केते कारणे दृष्टे सति न कारणान्तरमनुमेयमिति न तत्र शक्तिरित्यर्थः। नन्वेवं शाब्दप्रमितौ सङ्केतस्यासाधारणकारणत्वापत्तेः तदनुमानापेक्षैवातद्दर्शिनामपि प्रमित्युत्पत्तिरिति न व्यवहितं तस्य कारणत्वं स्यात्। गवादावपि च तदेव कारणमनुमेयम्, न व्यवहारानादितया शक्तिरित्याशङ्क्य अदृष्टसङ्केतानां न सङ्केतानुमानापेक्षा प्रमित्युत्पत्तिः; यतोऽसाधारणकारणताशङ्का स्यादित्याह—तत्रापि य इति। साङ्केतिकशब्दानामन्वय्यर्थसन्निधानमात्रोपक्षीणत्वात्

१. प्रत्योऽसौ. क, ख. २. स्वाभाविकसम्बन्धसूत्रेण. क.

व्यवहारतोऽर्थधीभाजः, ते तत एव ; न सङ्केतात् । वृद्धव्यवहारपरम्परादिमत्तया च सङ्केतपूर्वत्वं सम्बन्धाक्षेपपरिहारे परिहार्यम् । अतो वेदो वेदार्थेऽपूर्वे प्रमाणम्, नान्यदिति ॥

"वृत्तिकारस्तु"। अधुना लोकसिद्धप्रत्यक्षादिव्यभिचारदर्शनान्निरालम्बनतापाते वेदार्थाभावशङ्का । सेह लक्षणपरं तत्सद्व्यत्ययेन सूत्रं व्याख्याय प्रत्यक्षव्यभिचारं कल्पनापञ्चकसमीचीनतया निरस्य अनुमानादीनां तत्सूत्रार्थायातलक्षणान्युक्त्वा निरस्यते । अतः सङ्गतिर्वृत्तिकाराद्यभावान्तवादस्थानानाम्; स्वसंविदनुसरणस्यापि परसम्बोधनपर्यन्तत्वाद्वादस्थानतैवंविधानाम् । वृत्तिकारकृता सूत्रव्याख्या न युक्तेति वक्तुं

तस्य च प्रत्यासत्तिमात्रापेक्षित्वान्नाभिधानवृत्त्युपयोगिरूपान्तरापेक्षास्तीति अनादिव्यवहारपरम्परानुमितस्वाभाविकशक्तिकगवादिशब्दानामेवाभिधानवृत्तिः, अपौरुषेयवेदपरामर्शाधीना च तत्स्थितिः, व्यवहारमात्रस्य वक्तृज्ञानानुमानमात्रादप्युपपत्तेरित्यभिप्रायः । अयं च सङ्केतापेक्षत्वनिरासः वादान्तरलभ्यस्थितिरित्याह—वृद्धव्यवहारेति । सूत्रद्वयसाधितमर्थमुपसंहरति—अतो वेदो वेदार्थेऽपूर्व इति ॥

"वृत्तिकारस्तु"। परव्याख्योपन्यासः किमर्थ इत्याशङ्क्य प्रस्तुतवेदार्थाभावशङ्काया एव मुखान्तरेण प्राप्तेः तद्व्याख्याप्रकारान्तरापेक्षया तन्निरासपरत्वमपि सूत्रस्यास्तीति दर्शयितुमित्याह—अधुनेति । प्रस्तुतसमाधानरूपप्रयोजनोक्त्यैव तद्योग्यवादस्थानानामर्थसङ्गतिश्च सिद्धेत्याह—अतः सङ्गतिरिति । ननु परीक्षास्थानमेव शास्त्रम्, न वादस्थानमिति सूत्रस्थपरीष्टिपदसूचितमिति प्रागुक्तमिति तद्विरुद्धा वादस्थानतोक्तिरित्याशङ्क्य तत्परत्वेऽपि तत्प्रवृत्तेः शिष्यवर्त्यर्थनिर्धारणफलत्वात् तस्य च वादिविप्रतिपत्तिविषये तन्निरासक्षमवादापेक्षत्वादागन्तुकी वादस्थानतापि स्यादिति परिहरति—स्वसंविदनुसरणस्यापीति । नन्वेवं पक्षव्यावृत्तिपर-तु-शब्द-

१. वृद्धपरम्परादिमत्तया. ख.
२. पूर्वकत्व. क.
३. तु सूत्रा. क.
४. यातत्तल्लक्षणं. ख.

वृत्तिकारकीर्तनम्। नन्वध्याहारो हि श्रुतिविरोधादयुक्तः; अपरीक्षां प्रातज्ञाय छलेन परीक्षाप्ययुक्ता; "प्रसिद्धत्वात्"—इति चासिद्धम्; सर्वथा माने विवादात्, चोदनासूत्रे च प्रामाण्यप्रतिज्ञानात् परीक्षाभिमता। सर्वं चेदं दूषणं व्यक्तत्वान्न भाष्ये शाब्दोऽर्थं कृतम्। व्यत्ययस्त्वनुमतः। पूर्वोक्तसूत्रत्रयार्थोपपत्तिः सूत्रकृतैवोक्ता लक्षणद्वारेण—इति वक्तुम्; उत्सूत्रत्वे तु सूत्रकृदनिपुणः स्यादिति भाष्यानुमतो व्यत्ययो लक्षणकरणं च। अत्र भाष्ये कल्पनां प्रत्यक्षमेवाभिप्रेत्य प्रत्यक्षव्यभिचारः शङ्कितः, अविद्यमानार्थान्तरानुसन्धानात्कल्पनानाम्। अनुसन्धानस्य च ज्ञानाकारत्वात्

सहितपरनामग्रहणमनन्वयीत्याशङ्क्य सूत्राक्षरगत्युक्तिः तदीया व्यावर्त्या, तत्प्रतिपादितार्थमात्रं ग्राह्यमित्याह—वृत्तिकारकृतेति। तद्व्याख्यादोषं प्रकटयति—नन्वध्याहारो हीति। भाष्ये तद्दोषानुक्तिहेतुमाह—सर्वं चेदमिति। तत्सद्यत्ययोऽपि तद्वार्जवत्यागादयुक्तोऽभिमत इत्याशङ्क्य ग्राह्यत्वं तस्याह—व्यत्ययस्त्विति। सविकल्पकमात्रस्य निरालम्बनत्वशङ्कया मानान्तरविषयातिरिक्तेऽर्थे वेदस्य प्रामाण्यमयुक्तमिति शङ्कापि सूत्रेणैव निरस्तेति प्रकटनप्रयोजनसम्भवादिष्टो व्यत्यय इत्यर्थः। "ननु व्यभिचरति प्रत्यक्षम्" इति भाष्ये सौगतः पक्ष उपन्यस्तः, "शुक्तिका हि रजतवत्प्रकाशते" इति चोपपादितम्; तदयुक्तम्; तत्पक्षे निर्विकल्पकमात्रस्य प्रत्यक्षत्वोपगमाच्छुक्तिकारजतज्ञाने प्रत्यक्षपदानन्वयात् मीमांसकपक्षापेक्षयापि तदसम्भवादित्याशङ्क्यार्थमाह—अत्र च भाष्य इति। स्वपक्षे कल्पनाज्ञानस्याप्रत्यक्षत्वेऽपि मीमांसकाभ्युपगतप्रत्यक्षत्वमाश्रित्य तद्व्यभिचार उद्भाव्यते—प्रत्यक्षार्थस्यात्यन्तव्यावृत्तत्वात्तदतिरिक्तानुगतविशेषणारोपेण तत्स्फुरणाद्व्यभिचरत्येव तदिति। नन्वविद्यमानत्वे खपुष्पादिवत् स्वानुरक्तवस्तुस्फूर्त्यसिद्ध्यापत्तेः तद्धीरेव निर्विकल्पकवद्यथावभासं विषयसत्तां साधयेदित्याशङ्क्य तद्वैषम्यं ज्ञानाकारताश्रयणेनोद्भाव्य प्रतीत्यविरोधमाह—अनुसन्धानस्य चेति। ज्ञानस्य ज्ञेयातिरिक्ताकारासिद्धिशङ्कया तत्साधनार्थमाह—साकारता च ज्ञानस्येति। भासमानाकारस्य प्रत्यक्षबाधिते बाह्यार्थे भानक्षताया अवर्जनीयत्वात्तत्र तावत्साकारत्वं प्रतीतिसिद्धमेवेत्यर्थः। अतो भाष्यमपि व्यभिचारोपपादकं साकारत्व-

स्वलक्षणे असतोऽपि नालीकता ; साकारता च ज्ञानस्य शुक्तिरजतादाववश्योपेतव्यापि[1], तत्र हि बाधकोदयाज्ज्ञानाकारो रजतमिति वाच्य[2]मिति । एवम् "शुक्तिका हि रजतवत् प्रकाशते" इति भाष्ये निदर्शनत्वेनोक्तम् । अतः कल्पनासु लौकिकबाधानुदयेऽपि यौक्तिकबाधात् प्रत्यक्षव्यभिचारशङ्का, तामपनेतुमुक्तम्—न रजतं प्रत्यक्षम्, इन्द्रियसंयोगविरहात् ; किन्तु स्मृतिः । अतो न ज्ञानमात्रं साकारम् ; 'नेदं रजतम्' इति बाधकोदयाच्चातत्संप्रयोगजतानिश्चयः । तर्हि लौकिकबाधक[3]रहिते जात्याद्यनुसन्धानेऽतत्संप्रयोगजत्वा

साधकतया घटत इत्याह—एवं शुक्तिका हीति । नन्वेवमपि बाधकहीनसविकल्पकप्रत्यक्षस्य निर्विकल्पकवद्बाह्यविषयत्वमेवेत्याशङ्क्य बाधकबलेन ज्ञानस्य साकारत्वसिद्धौ प्रसिद्धबाधकाभावेऽपि युक्तिबलादेव बाह्यविषयासम्भवे साकारत्वापत्तेर्व्यभिचारो भाष्योक्त इत्याह — अतः कल्पनास्विति । ततस्तदुत्तरमपि घटत इत्याह — तामपनेतुमिति । तदेव लक्षणपरत्वोपगमेन "यद्व्यभिचरति न तत्प्रत्यक्षम्" इत्यादिनोक्तं उक्तपदनिर्दिष्टं स्पष्टयति—न रजतमिति । "तत्संप्रयोगे" इति लक्षणेन यद्विषयं ज्ञानं तेनैवेन्द्रियसंप्रयोगे तस्येन्द्रियजन्यतया प्रत्यक्षत्वं नान्यसंयोग इति शुक्तिसंयुक्ते चक्षुषि रजतविषयज्ञानं न प्रत्यक्षम्, स्मृतिस्तु तदिति प्रदर्श्य व्यभिचारविषयेऽपि साकारत्वं ज्ञानस्य निरस्यान्यत्र तत्प्रसक्तिर्निरस्तेत्यर्थः । नन्विन्द्रियान्वयव्यतिरेकानुविधायिनः कथमतज्जन्यत्वमित्यत्राह—नेदं रजतमितीति । संप्रयुक्तविषयापेक्षमेवान्वयव्यतिरेकयोस्तन्नियन्तृत्वम् ; बाधकबलादसंप्रयुक्तविषयासिद्धावन्यथासिद्धिरवश्योपेयेत्यर्थः । यदि बाध्यज्ञानस्य स्वतः प्राप्तविषयनिषेधमात्रातिरेकेण व्यतिरिक्तविषयत्वं बाधकज्ञानमापादयतीत्यभ्युपगतम्, तर्हि तादृशबाधवियुक्तस्यान्वयव्यतिरेकासिद्धेन्द्रियजन्यत्वानिवृत्तेः विषयबाधस्य च युक्तिसिद्धत्वाज्ज्ञानमेव जात्याद्याकारं स्फुरतीत्युपेयमिति बाधविषयेऽपि तदेव स्यादिति मुखान्तरेण व्यभिचारो दुर्वार इति चोदयति—तर्हि लौकिकबाधकेति । स्वत एव विकल्पधियः स्वविषयसाधकत्वान्न व्यभिचार इति परि-

१. Omitted अपि. क.
२. Omitted इति. क.
३. बाधरहिते. क.

निश्चये प्रत्यक्षव्यभिचारो दुर्वारः । मैवम् । जात्याद्यनुसन्धानाकारस्यापि स्वलक्षणे समीचीनत्वान्न व्यभिचारः; न ह्यसमीचीनं किञ्चिज्ज्ञानम्; शुक्ते र्हि रजतात्मना भाने धीरयथार्था स्यात्; न च 'रजतं शुक्तेरात्मा' इति काचिद्धीः; अत उक्तम् 'अन्यस्यान्यथा भानं धीहतम्' इति । धीरेव हि

हरति — मैवं जात्याद्यनुसन्धानेति । युक्तिबाधे कथं तत्साधकतेत्याशङ्क्य तत्सामर्थ्यमुपपादयति — न ह्यसमीचीनमिति । क्वचिदर्थव्यभिचारिज्ञानसिद्धावेव हि युक्तिविरोधस्तद्बाधकः स्यात्; अन्यथा प्रतीतिहता युक्तय एवाभासाः स्युः, तदसिद्धेर्न व्यभिचार इत्यर्थः । ननु शुक्तिरजतादिधियः स्मृतितया कथंचिदुपपत्तावपि बाधकबाध्ययोराञ्जस्यं व्यभिचारपक्ष एवेति तदापत्तेः कथमसिद्धिरित्याशङ्क्य तदसिद्धिमुपपादयति — शुक्तेर्हीति । स्वावच्छेदेन धीप्रकाशमात्रे विषयलक्षणे स्थितेऽन्यथात्वस्यापि प्रकाशं विनान्यथाख्यात्यसिद्धेस्तदुपगमे 'शुक्तेरात्मा रजतम्' इत्येव भानाकारः स्यात्, तदभावान्न बाधकबलमर्थव्यभिचारावहं स्यादित्यर्थः । एतदभिप्राय एव "प्रतीत्यैव पराहतम्" इति प्रकरणग्रन्थ इत्याह— अत उक्तमिति । विषयत्वं विनान्यथात्वस्य धीस्पर्शासिद्धेर्बाधितं तदित्यर्थः । ननु विधान्तरेणापि स्यात् तत्स्पर्शः, धीस्तावत्पुरुषाश्रिता, तत्फलं भानं विषयाश्रितम्; तत्राश्रयनिरूप्यत्वे भानस्य यथार्था धीः, अन्यनिरूप्यस्यान्याश्रयत्वे त्वयथार्था— इत्यवभासमानमप्यन्यथात्वं तत्फलव्यवहारव्यङ्ग्यं स्यादित्याशङ्क्य तदभेदमुखेनोक्तमेव साधयति — धीरेव हि भानमिति । न तावद्धीजन्यभानाश्रयतयार्थस्य धीकर्मत्वम्, अवर्तमानस्यापि लोके तत्कर्मत्वप्रसिद्धेः । तेन धीहेतुनियमितधीनिरूपकत्वमात्रमर्थस्य धीकर्मत्वमुपेयम्; तदवच्छेदकत्वमेव भातिधात्वर्थोऽपि, भूतादावपि प्रयोगाविशेषादिति नार्थान्यत्वं वित्तिभात्योरस्ति । भानेऽर्थस्य कर्तृतोक्तिस्तु करोत्यर्थकर्मणो जनिकर्तृतोक्तिवत्, धातुना स्वशक्त्या क्रियायाः कर्त्राश्रितत्वानुक्त्यैव कर्मावच्छिन्नतयोक्तिरिति, कर्मणोऽप्युक्तिसमये स्वातन्त्र्योद्भवायत्तोपेया । न हि जनिधातुः कर्तृगतक्रियार्थः स्यात्, प्रागसतः क्रियाश्रयत्वायोगात्, लब्धसत्ताकस्य पुनर्जननाभावात्, अतो जनयितृक्रियायोगं जन्यस्य स्वातन्त्र्यविवक्षया जनिधातुराह, तथेहापीति न तद्भेदापेक्षत्वमन्यथात्वमुपेयमित्यर्थः । नन्वेवमर्थसम्बन्धाभावादर्थाव-

भानम्; यदर्थव्यवहारानुगुणं हि यज्ज्ञानम्, तत् तदर्थभानमित्युच्यते । स चार्थो भानस्य वेद्यो विषय इति चोच्यते । ननु धीजन्यो व्यवहारयोग्यतात्मा धर्मो विषयता, तत्कल्पनायां मानाभावात् । तेन 'इदम्' इति भानं

च्छेद्यत्वं भानस्य न स्यात्, वित्तिकर्मत्वं चार्थस्य न स्यात्, अर्थगतफलजनकत्वाभावादिति नैक्यमुपेयमिति शङ्कां निवर्तयति—यदर्थव्यवहारानुगुणमिति । वित्त्यात्मकस्यापि भानस्य व्यवहारगर्भोऽर्थसम्बन्धः सर्वसम्मतोऽस्त्येव । न चैवं व्यवहारोपाधिकस्तत्सम्बन्ध इति स्वाभाविकप्रसिद्धिबाधः, व्यवहारोत्पत्तेश्चानियतत्वात्तदनुत्पत्तिविषये सम्बन्धासिद्धिः तदपेक्षया वित्तेः सकर्मकत्वनियमोऽपि न स्यादिति वाच्यम्, तदनुगुणस्योपाधित्वाङ्गीकारात्तस्य चार्थविशेषनिष्ठतया नियतत्वाञ्च स्वाभाविकत्वक्षतिः; न च वित्तिधात्वपेक्षया सकर्मकत्वासिद्धिः । ननु तदनुगुणत्वं स्वरूपाधिकमनाधिकं वेति वाच्यम् । तत्स्वयंप्रकाशत्वसाधनसमये वाच्यमिति न विविक्तम् । नन्वर्थव्यवहारानुगुणत्वमात्रादस्त्वर्थावच्छेद्यत्वमर्थकर्मकत्वञ्च; विषयोक्तिस्तु अर्थस्य भानसत्ताप्रयुक्तैव, न फलप्रयुक्तेति सत्तोपाधित्वमर्थस्याश्रयतयापेक्ष्य नेयेति स्यादर्थाश्रितं तदिति शङ्काहानार्थम् "विषय इति चोच्यते" इत्युक्तम् । विषयोऽसाधारणस्वरूपनिरूपक इति व्यवहारार्हतयापि स्वरूपस्फूर्त्यनुबन्धोऽर्थ इति तावतैव विषयतोक्तिश्च घटत इत्यर्थः । यत्तु स्वयंप्रकाशत्वानुपगमात् धीजन्यार्थगतधर्माश्रयणम्, तन्निराकरोति— न तु धीजन्य इति । यदि स्फुटसिद्धोऽर्थः पाकादिजधर्मवत् कश्चिदवस्थाविशेषः स्यात्, तदा स विषयत्वमस्तु; विषयोक्त्युपेयस्त्वयुक्त इत्यर्थः । ननु व्यवहारफलव्यवस्थाप्ये विषयत्वेऽन्यथाख्यातिर्न प्रतीतिहतेति शक्यं वक्तुम्, शुक्तेरेव रजतधिया व्यवहार्यत्वादिति शङ्कां तत्फलोक्तिमुखेन परिहरति—तेनेदमिति भानमिति । विषयव्यवहार्या हि सर्वा धीः; तत्र 'इदं रजतम्' इति विशिष्टार्थव्यपदेश्या विशेषणविशेष्यरूपार्थांशभेदादौपाधिकभेदयोगिनीति विशेष्यांशव्यवहारफले 'इदम्' इति भानांशः; स च तस्य हानोपादानकरः; हानोपादाने च विशेष्यनिष्ठे इति इदमंश एव हि साक्षात्तत्फलम्; रजतभानांशोऽपि तद्विशेषणनिष्ठतया तत्सहायत्वेन तत्कर एव । रजतजातेरेव च तदर्थ्युपादा-

पुरोवर्तिनि व्यवहारानुगुणम्, रजतभानं च रजतत्वावच्छिन्ने तस्मिन् व्यवहारानुगुणमिति रजततापि वेद्येति। ननु 'इदम्' इत्येतत्समानाधिकरणतया रजतभानम्; न च वस्तु तथेत्ययथार्थमेव। मैवम् 'इदम्' इति रजतव्यक्तितुल्यधर्मकवस्तुभाने रजतजातिस्मृतौ च सत्यां रूप्यन्तर्भावाच्च रूपबुद्धेरिदमन्तर्भावो जातः; तत्र तु विवेको न भातः—किमपररूपिसन्निधेरित्थं भानमुत निजरूपिसन्निधेरिति। अतो भानस्यमात्रापेक्षया

नादिहेतुतया तत्सहायतेति स्वोचितव्यवहारहेतुतया सम्यग्धियामिव वेद्यत्वं व्यक्तमेवेत्यर्थः। इतिशब्दः "धीरेव हि भानम्" इत्यन्यथात्वस्य धीहनत्वोपपादनोपसंहारार्थो द्रष्टव्यः। नन्ववच्छेदकतया रजतजातेर्धीविषयत्वे सत्यप्यन्यथात्वमहेयमेव, सामानाधिकरण्यस्य प्रसिद्धत्वात्, अतो रजतैक्यं शुक्तिव्यक्तेर्भातीत्ययथार्थत्वं व्यक्तमेवेति चोदयति—नन्विदमित्येतदिति। समाधत्ते—मैवमिति। यदि हि 'इदम्' इति चाक्षुषधियैव संस्कारोत्थरजतस्मृत्यापि तज्जातीयव्यक्तिरुपस्थापिता स्यात्, तदैतत्स्यात्, स्मृतेस्तु संस्कारोद्बोधकानुसारिणी विषयव्यवस्थेति रजतजात्यविरोधिधर्मकवस्तुदर्शनजा स्मृतिः तज्जातिमात्रविषयतयापि तत्पूरितरूप्यन्तर्भावापेक्षा स्यादिति सम्यग्धीतुल्यसामानाधिकरण्यधीसिद्धिः। न हि तत्रापि इदन्ताजातिरूपयोरेकरूप्यन्तर्भावातिरिक्तं सामानाधिकरण्यनिमित्तमस्तीति इहापि तत्सिद्धिरित्यर्थः। ननु रूपधियो निजरूपिधीस्थतामात्रापेक्षित्वान्न तदन्यरूप्यन्तर्भावः स्यात्, निजधर्मित्वभाने चायथार्थत्वमित्याशङ्क्य अन्यत्वाभिव्यक्तावेव सन्निहितातिक्रमः स्यात्, न निजत्वानभिव्यक्त्यैव, प्रातीतिकपरापेक्षाणां वास्तवसम्बन्धानपेक्षतया विरोध्यप्रतीत्यैवान्तर्भावसम्भवादिति परिहरति—तत्र तु विवेक इति। समवायस्याप्रत्यक्षत्वात् जात्यादिविशिष्टदृष्टेः सम्बन्धदर्शनपूर्वकत्वाभावेऽपि सत्तामात्रेणापि हेतुत्वानपायात् स्वकीयपरकीयभेदस्तावत्प्रसिद्ध एव, अबाधितविशिष्टदृष्टेः दण्ड्यादिषु सम्बन्धपूर्वकत्वनियमदर्शनात्। न च सम्बन्धादर्शनेऽश्वगोमहिषोष्ट्राद्यनेकदर्शने रूपरूपिसङ्करापत्तेः व्यवस्थितसम्बन्धानुमानासिद्धिः, सत्यपि सम्बन्धदर्शने तस्य सम्बन्धान्तरादर्शनादव्यवस्थासाम्यात्, सम्बन्धस्वभावाद्व्यवस्थायां तद्दर्शनस्यानपेक्षितत्वाद्दोषः। न च सम्बन्धतत्प्रतीत्यभावेऽपि शुक्त्यादौ विशिष्टबुद्ध्यङ्गीकाराद्व्यवस्थानुपपत्तिः, तथाप्यनेकदर्शने

१. भानाच्च. क, ख.

सत्यधीतुल्यतेति युक्ता समानाधिकरणता । विवेकग्रहावसरे तु निजजातिरूपितम् ‘इदम्’ इति रूपिभानम्; रजतजातिभानमपि निजव्यक्त्यन्तररूपतया । एवं च विवेकाग्रहावसरे रजतव्यवहारः विवेकग्रहे तु तद्बाधः तद्बाधाच्च भ्रमता । अयं भावः—निरन्तरभानं[1] हि रूपरूपिणोरेकधीवेद्य-

तत्तत्संप्रयुक्तचक्षूरश्मिभागदृष्टरूपरूपिणां तत्तज्जातिव्यञ्जकावयवविशेषाणां च व्यवस्थयैव विशिष्टधीकरत्वमिति व्यवस्थितसम्बन्धानुमानसिद्धेः न कश्चिद्दोषः । एवं सम्बन्धसिद्धौ स्वकीयपरकीयत्वाविवेकात् भासमानावस्थया सत्यधीसाम्यात्सामानाधिकरण्यमिति भावः । नन्वयथार्थत्वानङ्गीकारे धीस्थरूपस्यानपायित्वात् सत्यधीवदन्यनिवर्त्यत्वासिद्धिरित्यत्राह — विवेकग्रहावसरे त्विति । धीविषयस्यानपायित्वेऽपि प्रत्यक्षधियोऽन्यविरोध्यधिकविषयतया स्मृतेः तत्स्थरूप्युपजीवनेन रूपमात्रविषयत्वासिद्धेः तत्त्यागेन निजरूपिविषयतेति विषयाधिक्यादपि पूर्वावस्थानिवृत्तिः स्यादित्यर्थः । ततश्च यथार्थत्वे बाध्यत्वप्रसिद्धिः भ्रान्तित्वप्रसिद्धिश्चानुपपन्नेति चोद्यं व्यवहारकार्यापेक्षयापि तदुपपत्तेः परिहृतमित्याह—एवञ्चेति । ननु समवायिलिङ्गविशिष्टबोधे रूपरूपिणोरेकधीस्थत्वमपि समानाधिकरणविशिष्टधीप्रयोजकमभ्युपेतमिति तादृशविशिष्टधीः न धीभेदेन शक्योपगमेति स्मृतित्वोपगमायोगादयथार्थैव स्यात् । निरन्तरधीद्वयोत्पत्त्यैव तदुपपत्त्युपगमे च शुक्तित्वाभिव्यक्त्युत्तरकालेऽपि तन्नैरन्तर्यानपायाद्भ्रान्त्यनुवृत्तिः स्यात्, पूर्वविशिष्टधीहेतोरनपेतत्वात् शुक्तिजातेः शुक्तिव्यक्त्येकधीस्थत्वेन रजतस्मृतिनैरन्तर्यबाधकत्वाभावात्, व्यक्तिसम्बन्धप्रतीत्युपगम एव ह्यन्योन्यविरोधित्वं जातिद्वयस्य, न धीद्वये निरन्तरविषयत्वविरोधिता । तेन तन्मात्रस्य विशिष्टत्वप्रयोजकत्वे बाधकोत्तरकालानुवृत्तिर्भ्रान्तेरपरिहार्यैति विरोधाभ्युपगमेन रजतजातिभानमपि निजव्यक्त्यन्तररूपतयेत्येतदप्यन्यथाख्यातिपक्षपात्येवेति तदनुपगमे भ्रान्तिगतिर्दुरुपपादेति शङ्कामपनेतुमाह—अयं भाव इति । विशिष्टधीस्तावत् स्वतन्त्रधीयोग्यविशेषणविशेष्यनिष्ठा पितृपुत्रनामनाम्यादिविषये सम्बन्धधीपूर्विका भिन्नधीस्थतयापि सुप्रसिद्धेति पृथक्प्रतीत्यनर्हरूपरूपिविषये निरन्तरभानमात्ररूपा विशिष्टधीहेतुशक्त्यनुसारेण धीभेदेनाप्युपपन्नैवेति लाघवमात्रमेकधास्थित्वापादकम्; हेतुबलाद्धी-

१. भानाद्धि. ख.

तया स्वतो युक्तमित्येकधीवेद्यताङ्गीकृता । यत्र[1] धीद्वयं युक्तिसिद्धमविच्छिन्नम्, तत्रापि तद्द्वयाविच्छेदादन्तर्भूतरूपकं रूपिभानमिति बलाद्भिन्नधीवेद्यतास्वीकारोऽपि युक्तः । यदा तु शुक्तिजातिरूपितम् 'इदम्' इति रूपिभानम्, तदा रजतजातिरन्तरितभाना; न तु धीद्वये वेद्यनिरन्तरतान्यथात्वभानम् । न चात्यन्तोद्ग्रन्था सामानाधिकरण्येऽपि स्मृतिरुपेया । तदेवं यद्यपि पुरो-

द्वयनैरन्तर्योपगमेनापि विशिष्टता लभ्यत एव । वेद्यमूलरूपरूपिनैरन्तर्यस्यापि नान्तरीयकसिद्धत्वाद्विशिष्टत्वापादकरूप्यन्तर्भावोऽपि रूपभानस्यास्त्येवेति पूर्वधीस्थरूप्यतिक्रमायोगाद्भर्तृभार्यादितुल्येतरेतरपूरणाकाङ्क्षावतोः अन्योन्यपूरणयोग्यधीसन्निधिमात्रेणैकैकधीस्थताप्युपयोगिनी, न स्वरूपेणैव, ह्रस्वदीर्घादिवदन्योन्यधीपूरणार्हस्वधियोर्विशेषणविशेष्ययोस्तदर्हसहत्वस्यैवान्तर्भूतपदोपात्तस्य विशिष्टतोपयोगित्वात् । एवञ्चेद्बाधोत्तरकालं भ्रान्त्यनुवृत्त्यापादनमप्यपास्तम्, तदेकधीस्थस्वव्यक्त्यैव निवृत्ताकाङ्क्षरजतजातेः पररूपत्वाभिव्यक्त्या कालाविच्छेदानपायेऽपि पूर्वधीस्थविशिष्टत्वापादकेदमन्तर्भावविच्छेदादित्यर्थः । ननु कालाविच्छेदतद्विच्छेदरूपविशेषाधिकपूर्वधीस्थेदमन्तर्भावतन्निवृत्त्योर्बाध्यबाधकधीस्थतोपगमे परापादितमन्यथात्वभानमपरिहृतमेव स्वपक्षेऽपीत्यत्राह—न तु धीद्वये वेद्यनिरन्तरतेति । निरुपाधिकेदमन्तर्भावोक्तावैक्यधिया स्यादन्यथात्वम्; एकमित्युपाध्यपेक्षोक्तौ च जातेरप्यैन्द्रियकतापत्त्या स्यात्, धीद्वयापेक्षोक्तौ तु व्यवस्थिते वेद्यद्वये नैरन्तर्याधिकान्तर्भावाप्रतीतेर्नान्यथात्वापत्तिः । तदा ह्याकाङ्क्षानिरासतदनिरासफलभेदमात्रनिष्ठावन्तर्भावानन्तर्भावावपीति नान्यथात्वभानावकाश इत्यर्थः । एवं निर्व्यक्तिकजातिस्मृत्यपेक्षया सामानाधिकरण्यगतिरुक्ता । केचित् सव्यक्तिकस्मृत्याश्रयणेन तद्गतसामानाधिकरण्यस्मृत्या गृह्यमाणव्यक्तेः तदन्यत्वाग्रहमात्रेण सामानाधिकरण्यनिर्वाहमाहुः; तदनङ्गीकारे हेतुमाह—न चात्यन्तोद्ग्रन्थेति । ग्रन्थोक्तसमर्थनार्थं तदनुक्तग्रहे तदधिकग्रहोऽल्पग्रहेणापि समर्थनसिद्धौ दोष इत्यत्यन्तपदेन दर्शितम् । ननु सत्यमिथ्यात्वविशेषानुपगमेन व्यवहारनिर्वाहोपगमे प्राबल्यदौर्बल्यव्यवस्थापकाभावात् बाध्यबाधकत्वासिद्धिरिति शङ्कां तदनुवादेन परिहरति—तदेवं यद्यपीति । यथार्थत्वाविशेषेऽपि विरुद्धाकारयोः सहत्वासम्भवेऽनु-

१. यत्र तु. ख.

वर्तिनि भानमुभयथापि सत्यम्, तथाप्यनुवृत्तस्य भानस्य फलमनुवर्तते; तेन तद्बलवत्। अत एव यत्र 'इदं रजतम्' इति भाने भेदकधर्मभानात् 'नेदं रजतम्' इति, पुनश्च 'इदं रजतम्' इति, तत्र 'इदं रजतम्' इत्यस्यानुवृत्तेर्यन्मध्ये भेदकधर्मभानम्, [1]तत् स्मृतिरूपम्; रजतधर्माग्रहश्चानुज्ञेयः; [2]अभेदकरजतधर्मभानमेव तु गृहीतिः, न तु भेदकधर्मभानमित्येवं बलवत्ता। यत्र त्वननुवृत्तिस्तत्र भेदाग्रहो दोषाधीनोऽनुज्ञायते; लोकसिद्धदोषपदार्थस्य हि कार्यखण्डकता क्लृप्तैव। ये तु दोषोपहतधीसामग्रीतोऽन्यथाख्यातिमाहुः, तेषां दोषस्वभावविपरीतशक्तिकल्पना स्यात्। यद्धि यस्य कार्यम्, न तद्विकृतं दोषात्; जाठराग्नेः कार्यं [4]रसो विहत एव भस्मकात्, पाकाधिक्यं त्वग्नि-

वृत्त्यननुवृत्त्यपेक्षया व्यवहारफले बलवत्त्वाबलवत्त्वव्यवस्थया तत्फले बाध्यबाधकत्वव्यवस्थोपपत्तिरित्यर्थः। यतो ग्रन्थेऽनुवृत्त्यननुवृत्त्यभिप्रायेण भेदकधर्मग्राहिणो बाधकत्वमतद्ग्राहिणो बाध्यत्वञ्चोक्तम्, न तद्ग्रहाग्रहमात्रविवक्षयैव; अत एव विषयान्तरेऽप्यविरोध इत्याह—अत एव यत्रेति। भेदकधर्मभानमप्यननुवर्तमानं स्मृतिरेव स्वव्यावर्त्यप्रसक्तपूर्वधीस्थधर्मभानानुवृत्तिविषये मध्ये; तदग्रहमात्राद्व्यावर्त्यत्वप्रसक्तिस्तत्रोपेयाः पुनस्तद्व्यञ्जकधर्मान्तरस्थिरावस्थप्रथमधीस्थधर्म एव ग्रहणविषयः—इत्यनुवृत्तिरेव प्राबल्यहेतुरित्यर्थः। प्राबल्यहेतुनिष्कर्षव्यावर्त्यतां स्पष्टयति—न तु भेदकधर्मेति। एवं बाध्यबाधकप्रतीत्याकारानुरोधेनाग्रहणं समर्थ्य हेतुस्वभावालोचनया तत्प्राप्तिमाह—यत्र त्वननुवृत्तिरिति। दोषस्वरूपहेतुस्वभावप्राप्तकार्यानुमतिमात्रमग्रहणे, नान्यथाख्यातिपक्षवदप्रसिद्धहेतुशक्तिकल्पनेत्यर्थः। तत्र हेतुमाह—लोकसिद्धेति। अन्यथाख्यातिमते तत्कल्पना स्यात्; हेतुस्वभाववैपरीत्यं च तदा स्यात् इत्याह—ये त्विति। तदेवोपपादयति—यद्धि यस्येति। ननु भस्मकदोषोपहतस्य जाठराग्नेर्विकृतकार्यकरत्वं प्रसिद्धमेवेति नान्यथाख्यातिपक्षेऽपि दोषस्वभावभङ्ग इत्यत्राह — जाठराग्नेरिति। देहेन्द्रियोपचायकरसविवेक एव तस्य स्वप्रयुक्तकार्यम्, तद्रहितपाकमात्रमग्निसामान्यप्रयुक्तम्; कार्यनिरूप्यं च दोषत्व-

१. तच्च. क.
२. भेदक. क, ख.
३. भेदकबहुधर्म. ख.
४. रसोपहित. क.

मात्रतया प्रबलीभूतस्य युक्तम्; न तत्र दोषता भस्मकादेः। दग्धं तु वेत्रबीजं कदलीकार्ये सामग्री, न तु दाहोऽस्मिन् कार्ये दोषः; वेत्राजननात्तु दोषता, न तु विकृतवेत्रजननात्। एवं च यज्जातीयकार्यजनिका या सामग्री न सा दोषात्तज्जातीयं कार्यं विकृतं करोतीति न धीजातीयं दोषाद्विकृतं युक्तम्। एतेन वेत्रदाहादिवन्नेत्रादिदुर्बलत्वैवान्यथाख्यातिसामग्रीत्युपगमोऽपि मन्दफलः। समग्रधीकार्य(१)गम्यसामग्र्या विशेषोपधानात् सामग्र्यन्तरं न धीजातीयमेवं(२) विकुर्यादिति नान्यथाख्यातिसिद्धिः। सन्दिग्धे चान्यथाख्यातिकार्ये सामग्र्यन्तरोपगमोऽप्ययुक्तः। एवं हेतुमुखेनाप्यन्यथाख्यातिरयुक्ता।

मिति कार्यविशेषनिष्ठः स दोष इति तत्रापि नास्त्येव दोषस्य विकृतकार्योत्पत्तिहेतुत्वासिद्धिरित्यर्थः। ननु दाहोपहतवेत्रबीजस्य कदलीविकारवदङ्कुरजनकत्वदर्शनादस्त्येव तत्सिद्धिरित्यत्राह—दग्धं तु वेत्रबीजमिति। बीजाङ्कुरयोः सामान्याकारेणैव हेतुहेतुमत्त्वावधारणे हि तत्र तत्सिद्धिः स्यात्, तच्च सर्वबीजानुगतरूपदर्शनाधीनान्वयव्यतिरेकसाध्यम्; तद्दर्शनाभावात्तु तद्विशेषनिष्ठमेव तदवधारणमिति कार्यान्तरमेव कदल्यङ्कुरम्, न पूर्वावधारितकार्यस्य विकार इति कार्यान्तरे कारणान्तरं तत्; अतो न तत्रापि तत्सिद्धिरित्यर्थः। एवं चेत्युक्तमर्थं स्पष्टीकृत्योपसंहरति। सामग्र्यवच्छेदे कार्यस्य तदंशस्य वा निरोधमात्रं दोषकार्यं प्रसिद्धमित्यसदाकारावभासतद्विकारः तत्कार्यतया नोपेयः; प्रसिद्धतत्स्वभावहानापत्तेरित्यर्थः। एवं तर्हि क्लृप्तकार्ये दोषस्सन्नन्यथाख्यातिकार्ये वेत्रदाहवत् सामग्र्यस्त्वित्युपगमोऽपि नाविरोधापादनक्षम इत्याह — एतेनेति। वेत्रदाहादेर्हि न वेत्रप्रयुक्तकार्यसामग्र्यवधारणोपजीवनेन कदलीकार्यादिकरत्वमवलीयते, स्वतन्त्रकार्यत्वात्; पूर्वसिद्धोपजीव्यन्यथात्वमात्रकरत्वावधारणं विशेषोपधानमात्रस्य न क्वचिद्दृष्टम्; सामान्येनाङ्कुरादिहेत्ववधारितवेत्रादिविशेषाणां तद्विशेषकरत्वं न तत्तुल्यम्, सामान्यान्तर्गतत्वाद्विशेषाणां तन्नान्तरीयकत्वात् तदधीनविशेषस्य; न त्वर्थभानकार्यविशेषोऽर्थशून्यत्वमित्ययथार्थत्वपक्षे क्लृप्तस्वभावभङ्गोऽपरिहार्य एवेत्यर्थः। सामग्र्यन्तरोपगमश्च कार्यान्तरोत्पत्तिनिश्चय एव स्यात्। यथार्थतयाप्युक्तविधया भ्रान्तिप्रसिद्ध्युपपत्तौ तन्निश्चयाभावादपि तदुपगमोऽशक्य इत्याह—सन्दिग्धे चेति। उपसंहरति—एवं हेतुमुखेनापीति।

१. omitted. गम्य. ख. २. व हि कुर्या. क.

किञ्च अयथार्थधीपक्षे धीतोऽर्थनिश्चयरूपोऽनाश्वासः[1] स्यात् । न च निर्दोषधीहेतुजा[2] धीरर्थाश्वासकरी, निर्दोषत्वेऽप्यनाश्वासात् । न च धीयथार्थत्वपक्षेऽपि व्यवहारानाश्वासतुल्यतापातः; धीतोऽर्थदार्ढ्ये हि विरोध्यनन्तरानुदये च न व्यवहारविचिकित्सा; पक्षान्तरे तु किंदार्ढ्येनार्थनिश्चयाद्व्यवहारोदयः मूलशैथिल्यात्? किञ्च रजताकारस्य स्वरूपवत्त्वेन[3] भानानालीकता न चार्थरूपतेति धीरेव साकारा स्यादिति बाह्यार्थापलापो दुर्वारः। तदेवं विवेकाग्रहात् कचित् स्मृत्योः कचित् गृहीत्योः कचित् गृहीतिस्मृत्योः

धीतोऽर्थनिश्चयश्च न स्यादित्याह—किंचायथार्थेति । दोषप्रयुक्तत्वादयथार्थतायाः तदभावादर्थनिश्चयः सुकर इति शङ्कां निरस्यति—न च निर्दोषेति । यथार्थत्वपक्षेऽपि व्यवहारानाश्वासापादनेन साम्यापादनं दूषयति—न च धीयथार्थत्वपक्षेऽपीति । यथार्थत्वपक्षेऽर्थसंशयाभावात् तदिच्छयोपादानादिकर्तव्यताधीः प्रतिबन्धकनिवृत्तिमात्रात् स्यात्; ज्ञानव्यभिचारेऽनिश्चयज्ञानस्यैव अर्थसंशयकरत्वात् तन्निवर्तकाभावाद्व्यवहारहेतोरेवासिद्ध्यापत्तेर्न साम्यमित्यर्थः । तत्पक्षे बौद्धोक्तयुक्त्यापादितं धियः साकारत्वमपरिहार्यमिति तन्मूलबाह्यार्थापलापोऽपि दुर्वार इत्याह—किं च रजताकारस्येति । एवं सर्वोदाहरणेषु यथार्थत्वं नेयमित्युपसंहरति—तदेवमिति । ननु जातिमात्रस्मृत्या पुरोवर्तिव्यक्तिविशेषणतोपगमेनाप्ययथार्थत्वं न परिहर्तुं शक्यते; विशेषणस्य अन्यव्यावृत्तिधीपर्यवसायितया शुक्तिव्यावृत्तेरसत्या एव विशिष्टधीविषयत्वापत्तेरिति चोद्यपरिहारविवक्षया दिङ्मात्रमित्युक्तम्; अन्यव्यावृत्तेरन्यत्वधीपूर्वकप्रतीतिकरतया तत्तद्भावधीरेव विलक्षणस्वभावविषयेत्युपेत्यैवान्यव्यावृत्तिधीः समर्थनीया; स च स्वभावो विशिष्टस्य विशेषणेन सह धीस्थतैव, विशिष्टत्वस्य तन्मात्रत्वात् । अतो व्यावृत्तिव्यवहारस्यापि तदालम्बनतयोपपत्तेः नाभावरूपमेयमुपेयमिति नायथार्थतापत्तिरिति भावः । एवं संशयस्यापि निजधर्महीनधर्मिमात्रग्रहादन्योन्यविरुद्धधर्म-

१. यः रूपोऽना. क.

२. धीजहेतुजा. क.

३. रूपत्वेन. स्वरूपवत्त्वेन. क.

स्वमपीतशङ्खशुक्तिरजतादिभ्रान्तिसिद्धिरिति दिङ्मात्रम् ; भ्रमवच्च सत्यतयैव सन्देहधीसिद्धिः ।

ननु कल्पनापञ्चके सत्यता न सिद्ध्यति । तथा हि—अवस्तुभूतजातिगुणकर्मात्मकं तत्तयाध्यवस्यन्ती धीरसत्या, अवस्तुभूतनामद्रव्यात्मकं तत्तयाध्यवस्यन्ती धीरसत्यैव । वस्तुसमानाधिकरणतया च भानात्तदात्मकतया धीः । ननु व्यधिकरणभानमपि पञ्चसु— अस्य संज्ञा, दण्डोऽस्य, कर्मास्य, गोत्वमस्य, शुक्लोऽस्य इति । अत एवानवस्थितभानं न वस्तुनो युक्तमित्यसत्यत्वैव । जातेरवस्तुता पृथगग्रहणादुक्ता । पृथग्ग्रहश्च द्विधोक्तः ; वस्तुभूता हि तुल्यवद्व्यक्त्या सह पृथक् भासेत ; तथा व्यक्त्यग्रहेऽपि कदाचिद्गृह्येत ।

मात्रस्मृतेश्च पाक्षिकव्यवहारमात्रफलतया गतिरित्याह—भ्रमवच्च सत्यतयैवेति ।

अस्तु तर्हि कल्पनाज्ञानमुखमेवासत्यार्थत्वमिति चोदयति—ननु कल्पनापञ्चक इति । ननु विशेषणविशेष्ययोः ऐक्यधीरसिद्धेति शङ्कां परिहरति—वस्तुसमानाधिकरणतयेति । 'गौरयम्' इत्यादिस्वलक्षणसमानाधिकरणधीस्तावदविवादा । सा च भिन्नधीस्थघटपटादिभ्यो निवृत्ता तदभेदधीसाधिका । 'दण्ड्ययम्' 'देवदत्तोऽयम्' इत्यपि धीः दण्ड्यादिस्वरूपमात्रसिद्धावपि सामानाधिकरण्यावस्थिताभेदविषयतया मिथ्यार्थैवेतीतरतुल्येत्यर्थः । नन्वभेदावभासित्वे तद्विपरीतधीर्न स्यादिति तद्भावान्नाभेदसाधिकेति चोदयति—ननु व्यधिकरणभानमपीति । उभयथाभानमेवासत्यार्थत्वसूचकमिति परिहरति—अत एवानवस्थितेति । ननु सामानाधिकरण्यं भेदधीपुरस्सरमेव, अन्यथा गौर्गौरितिवत्तदसिद्ध्यापत्तेः व्यधिकरणधीर्भेदावसायिनीति व्यक्तमेवेति कथमनवस्थितधीमात्रमभेदसाधकमित्याशङ्क्य व्याप्तिबलं तत्साधकम्, तत्सहायमात्रमनवस्थितभानमित्याह—जातेरवस्तुतेति । पृथग्ग्रहणस्य हेतुत्वं विविच्याह पृथग्ग्रहश्चेति । व्यक्तिद्वयदर्शने भेदस्य व्यधिकरणधीनियमदर्शनात् कदाचित्पृथग्दर्शनव्याप्तिसिद्धेश्च द्वयनिवृत्तिर्जातिगुणयोर्व्यक्तिगुण्यभेदं साधयेदित्यर्थः । परोक्तयुक्त्यन्तरप्रपञ्चः प्रक-

१. Omitted. पृथगग्रहणादुक्ता. ख. २. पृथगग्रहश्च. क.

तदेतदुभयं निवर्तमानं वस्त्वन्तरतां जातेर्निवर्तयति गुणस्य च। 'आश्रयद्रव्यानुत्पत्तेर्निराश्रयत्वादाश्रयभेदाभेदविकल्पासहत्वादाश्रये वृत्तिविकल्पासहत्वादाश्रयोत्पत्तिविनाशयोराश्रयान्वयानन्वयप्रकारानिरूपणात्' इत्यादिना जात्यपलापप्रपञ्चोऽप्युक्तः। जातिवद् गुणापलापः। कर्मापलापस्त्वाश्रयाभिमतात् क्षणिकादेवागन्तोः कर्मफलस्यागन्तुकस्य सिद्धेर्न कर्मकल्पनेति। ननु तुच्छरूपा जातिः कथं स्वरूपवत्त्वेन भाति? मैवम्; कल्पनाज्ञानाकारकतया वस्तुनोऽवगमात्; बाह्यात्मकताभिमानस्त्वतद्व्यावृत्तिसामान्याद् भेदाग्रहादध्यासापरपर्यायात्। अत एव नित्यात्मसुखानां ज्ञानाकाराणामेव भेदाग्रहाद्बाह्याभिमानात् संसारस्थितिः। तदुक्तम् "प्राक्

रण एव दर्शित इति तत्स्मारणमात्राभिप्रायेणाह—आश्रयद्रव्यानुत्पत्तेरिति। कर्मनिरासे विधान्तरमाह—कर्मापलापस्त्विति। ननु साक्षात्प्रतीतिबलसिद्धार्थबाधे युक्तिमात्रं तन्निरासासमर्थम्, तद्बाध्यत्वादिति चोदयति—ननु तुच्छरूपेति। परिहरति—मैवमिति। बाह्यत्वमात्रं युक्तिबाध्यमिति स्वप्नादिदृष्टवत्प्रतीत्याकारतयापि भानाविरोधान्न युक्तिर्बाध्येत्यर्थः। नन्वेवमपि बाह्यत्वभानानुपपत्तिरपरिहृतेति तदुपपत्तये यथासम्भवं बाह्यत्वमेवोपगमार्हमिति शङ्कां परिहरति—बाह्यात्मकतेति। सविकल्पकस्य स्वहेतुनिर्विकल्पकतद्विषयान्यत्वानवगमान्न स्वलक्षणव्यावृत्त्यप्रतीतेः द्वयोरपि द्वयातिरिक्तेभ्य एव व्यावृत्तिभानमित्येकप्रतियोगिकव्यावृत्तिमत्तया सादृश्यादन्योन्यभेदाभानादैक्यव्यवहारफलाध्यासात्मकादन्योन्यधर्मसङ्क्रमात्बाह्यत्वाभिमानोपपत्ते नानुभवविरोध इत्यर्थः। अयं च विवेकोऽत्यन्तपुरुषार्थ इत्येतदर्थमुक्ताध्यासमूलत्वं संसारस्याह—अत एव नित्यात्मसुखानामिति। ननु तन्मतोपन्यास इहानर्थकः, भाष्यानुक्तत्वादिति शङ्काहानार्थमाह—तदुक्तं प्राग्बाधकेति। ननु तदपि संप्रतिपन्नभ्रान्तिविषयमेव, बाधकोत्पत्तेः पूर्वं भ्रान्तिनिश्चयहेत्वसम्भवमाशङ्क्य कारणदोषहेतुकथनार्थमिति शङ्कापनयनार्थमाह—प्राक्पदमिति। तच्छङ्काहानार्थेकेति विनार्थग्रहणेन सर्वसंप्रतिपन्नव्यभिचारपरिहारानन्तर-

१. Omitted. कर्म ख

२. वस्तुतोप क
वस्तुतोऽव. ख,

बाधकज्ञानात्" इति । प्राक्पदं विनार्थे; कल्पनापश्चके बाधकं विना तत्संप्रयोगजता दुर्निरूपेति ।

अत्र समाधिः—शुक्तिरजतादौ तावद्बाह्यताकारस्योक्ता । कल्पनाकारस्यापि बाह्यत्वात् तत्संप्रयोगजतैव, जात्यादेर्बाह्यत्वात् तद्योजनाकारस्यापि बाह्यत्वात्; न हि योजनमेकताभानम्; किन्त्वभेदव्यपदेशमात्रम्; तदपि कदाचित् । न च जातेरसत्त्वात्तत्कल्पना न बाह्येति वाच्यम्; न तावज्जातेराश्रयानुत्पत्तेरसम्भवः, सद्वितीयेनाणुना तत्संयोगाद्द्व्यणुकाद्यारम्भात् स्थूलोत्पत्तेः यथानेकवस्त्वनुपगमेऽपि परमतेऽणुचयो धीहेतुः । वृत्तिस्त्वेकैकत्रा-

प्राप्तस्याभिमतव्यभिचारहेतूद्भावनार्थं उक्तपरिहारासम्भवाभिप्रायेण तद्बाह्यमर्थवदुपेयमित्यभिप्रायः ।

राद्धान्तमाह—अत्र समाधिरिति । प्रसिद्धभ्रान्तिव्यभिचारसंप्रतिपत्त्यपेक्षमेव तावदुक्तयुक्तिबलेन जात्याद्याकारस्य ज्ञानगतत्वमापाद्यम्, तद्व्यभिचारस्य स्थापितत्वात् कल्पनाकारस्यापि बाह्यत्वं धीबलप्राप्तमनिवार्यमिति तद्धीरुक्तलक्षणवत्येव; तेनेतरवद्व्यावर्त्येति तदशक्त्यापादनमनवकाशमित्यर्थः । यत्पुनः सामानाधिकरण्यस्याभेदावसायित्वाज्जात्यादेरबाह्यत्वमुक्तम्, तन्निराकरोति—न हि योजनमेकताभानमिति । विशेषणविशेष्यभेदभानगर्भत्वाद्विशिष्टप्रत्ययस्य तद्विरुद्धतदभेदस्यानाशङ्कनीयत्वात् पृथगुच्चारितविभक्तिमात्रं विशेष्यैक्यादेकार्थं तन्मूलमैक्यभानं भ्रान्तिमात्रमित्यर्थः । तदपि कदाचिदिति दूरनिरासः । ननूक्तस्वरूपासम्भवयुक्तिबलात्तदसिद्धमिति शङ्कामपनयति—न च जातेरसत्त्वादिति । जात्याश्रयाभिमतस्थूलद्रव्यनिष्पत्त्यनुपपत्तिस्तावन्नास्ति; एकैकव्यतिरिक्तानेकानुपगमे हि द्वित्वादिः संख्यामात्रनिष्ठ एव, न द्वितीयादिवस्तुनिष्ठः, अणुचयोपगमात्; तेन द्वितीयसहितस्यैकस्य कारणत्वाविरोधात् द्व्यणुकादिक्रमेण तदुत्पत्तिः अविचलैवेत्यर्थः । नन्वेकवस्तूपगमेऽप्येकस्येतरसहत्वानुपगमात् तदपेक्षसंयोगपूर्वकद्व्यणुकाद्युत्पत्तिश्चालयितुं शक्येति शङ्कां दृष्टान्तोक्तिमुखेन परिहरति— यथानेकवस्त्वनुपगमेऽपीति । एकैकावस्थाणूनां प्रत्यक्षधीजनकत्वं त्वयापि नाङ्गीक्रियते, तथापि तच्चयस्य तदङ्गीकारात्तत्तुल्यसहत्वेनैव संयोगाद्युत्पत्तिसम्भवान्न त्वया चालयितुं शक्येत्यर्थः । क्षणिकत्वविरोधः स्थानान्तरापेक्षया परिहार्य इत्यभिप्रायः । अवयवेष्ववयविवृत्तिसाधनायाह—वृत्तिस्त्विति । विशिष्टदर्शनबलोन्नेया हि वृत्ति-

१. बाह्याकारताज्ञानस्योक्ता. ख.
२. एकदाभानम्. क.
३. अद्वितीय. क.
४. वृत्तिकारस्त्वेकत्र. क.

वयविबुद्धेरनुत्पत्तेर्व्यासङ्गादेवेष्टा । येनापि मूलस्य कुसुमेषु वृत्तिमवयवान्तरतो व्यासङ्गाद्दृष्टावयविवृत्तिर्व्यासङ्गतो वार्यते, तेनापि मूलस्य स्वावयवेषु व्यासङ्गवृत्तिरनुज्ञातेति तन्निषेधोऽशक्यः । एवं भिन्नाया एव जातेर्द्विधा पृथग्ग्रहणं रूपतया । येनापि हि भिन्नानां घटपटादीनां पृथग्ग्रहो दृष्टः, तेनापि घटत्वादिरूपस्य पृथग्ग्रहोऽप्यनुज्ञात एव; प्रत्येकं च व्यक्तितः पृथग्ग्रहोऽप्यस्त्येवेति भेदसिद्धिः । जातेस्तु वृत्तिः प्रत्येकं कार्त्स्न्येन; वृत्तिर्ह्यपरिमाणस्यानेकत्रापि कार्त्स्न्येन नादृष्टा । व्यक्त्यन्वयानन्वयौ च जातेः सम-

र्थथादर्शनमेवेति व्यासङ्गिन्येवाश्रयणीया । न चावयवान्तराधीना सेति तदभावात्तदनुपपत्तिः, तदधीनतायाः पुष्पसूत्रादिदर्शनमूलत्वात् तत्रापि च स्वावयवेषु तदनपेक्षतद्वृत्तेर्दृष्टत्वात्तद्दर्शनसापेक्षत्वाच्चावयवान्तरापेक्षत्वव्याप्तिसिद्धेः तत एव तन्निषेधायोगात् स्वावयवव्यतिरिक्तद्रव्यवृत्तावेव व्यासज्यवृत्तेरवयवद्वारतेति तद्व्याप्तिरुपाधिरवश्यापेय इति नावयवान्तरनिवृत्त्या तन्निषेध इत्यर्थः । पृथगग्रहाज्जातिस्वरूपापलापे परिहारमाह—एवं भिन्नाया एवेति । जातिविषयेऽप्युक्तोपाध्युन्नेयहेत्वनुकर्षणार्थमेवमित्युक्तम् । भेदस्य पृथग्ग्रहणव्याप्तिर्घटादौ तत्स्वरूपनिरूपकरूपाद्यन्यभेदाश्रितोपेया, न भेदमात्राश्रितेति रूपत्वाज्जातेरपृथग्ग्रहेऽपि भेदो दुर्वार इति । तद्विवृणोति—येनापीति । पृथगग्रहासिद्धिश्च उपपादयितुं शक्येत्याह—प्रत्येकं चेति । स्वयं भेदसाधनशक्तं चैतदित्याह—इति भेदसिद्धिरिति । वृत्तिविकल्पे त्ववयविसाम्यं न जातेरित्याह—जातेस्त्विति । तदसाम्यमेव साधयति—वृत्तिर्ह्यपरिमाणस्येति । परिमाणगुणयोगप्रयुक्तावयविनोऽवयवेष्वकृत्स्ना वृत्तिः; सर्वावयवसङ्ग्रहान्तं हि कृत्स्नत्वमेकैकत्रासम्भवद्धतमिति अकृत्स्नवृत्तिस्तत्रावयवीति युक्तम्, सर्वावयवव्यापिपरिमाणनिरूप्यत्वात् कृत्स्नत्वस्य; तद्धीना जातिर्यथावभासं वर्तत इति गौर्गौरित्येकैकत्र संपूर्णदृष्ट्यनुरोधात्तद्विरोध्यदर्शनाच्चानेकत्रापि कृत्स्नवृत्तिं दर्शनमेव साधयितुमलमित्यर्थः । व्यक्त्युत्पत्तिनाशयोस्तद्योगापायप्रकारानिरूपणदूषणे समाधिमाह—व्यक्त्यन्वयानन्वयौ चेति । तद्योगापायौ स्वरूपतः समवायोत्पत्तिनाशाविशिष्टौ; तद्धेतू च व्यक्त्युत्पत्तिविनाशहेतू, न पृथगुपेतौ।

१. पि हि सूत्रस्य. क.　　　२. रूपकतया. क.

वायोदयापायाभ्यां व्यक्त्युत्पादापायहेत्वधीनाभ्यां समर्थितौ । आगमसन्निधिहीनस्याप्युत्पन्नवस्तुपरतन्त्रतया भानादेव संयोगविलक्षणः सम्बन्धः कल्पितः समवायशब्दवाच्यः[1]। समवायश्च स्वयमनाश्रित एव स्वभावात् स्वतन्त्रपरतन्त्रयोः समवायिनोराश्रयाश्रितताभानहेतुः[2]। अत एव यावत् समवाय-

न चान्यत्र सम्बन्धे सम्बन्धिहेतुमात्राधीनत्वादर्शनात् तदुपगमानुपपत्तिः, संयोगो ह्यन्यः सम्बन्धः प्रसिद्धः; तन्नियतदृष्टहेत्वभावेऽपि सम्बन्धकार्यावधारितविशेषणविशेष्यभावदर्शनात् सम्बन्ध्युत्पत्तिनाशावधिकत्वाच्च तद्दृष्टेः कार्यकल्प्यसम्बन्धस्तद्विलक्षण एवेति नोक्तहेतुकत्वानुपपत्तिरित्यर्थः । ननु कार्यकल्प्यत्वे समवायस्यास्त्वेवमन्यविलक्षणत्वम्; तदेव त्वसिद्धम्, समवायिनोराश्रयाश्रयितयान्योन्यविलक्षणदृष्टेः घटोदकयोरिव सम्बन्धविधाभेददर्शनाधीनत्वात् प्रत्यक्षत्वैसिद्धेः। तेन 'इहप्रत्ययसिद्धः' इत्यवश्योपेयम्। कार्यकल्प्यत्वं चासम्भाव्यम्, तदुपपादकत्वायोगात्। विशेषणविशेष्यनियामकत्वस्य सम्बन्धान्तरापेक्षत्वात् तदुपगमे चानवस्थापत्तेः । ततश्च नित्य एव समवायः । कार्यत्वे संयोगविपरीतकारणाश्रयणायोगादिति शङ्कां परिहरति—समवायश्च स्वयमिति । न विशेष्यान्तरप्रसङ्गपरिहारेण विशेषणविशेष्यनियन्तृतया कार्यानुमेयत्वं समवायस्येष्यते, येन सम्बन्धान्तरापेक्षा स्यात्। यस्य ह्यनियतत्वं स्वतस्सिद्धं दण्डादेः, तस्यैव नियमार्था सम्बन्धापेक्षा; जात्यादेस्तु तदसिद्धेर्न तदर्था तदपेक्षा; विशिष्टधीहेतुसिद्धिमात्रं सम्बन्धानुमाननिमित्तमिति सम्बन्धान्तरानपेक्ष एव समवायोऽनुमेयः, अनवस्थापत्तेरेव। न चाश्रिता धीस्तद्दर्शनापेक्षा, जात्यादेर्व्यक्त्यादिभ्यः पृथग्ग्रहणस्यान्वयव्यतिरेकसिद्धत्वात् । स्वतन्त्रपरतन्त्रस्वभावत्वकृतमाश्रयाश्रितत्ववैलक्षण्यमिति तादृग्विशिष्टभानहेतुः सोऽनुमेय इति कार्यानुमेयत्वाद्विलक्षणकारणको नानुपपन्न इत्यर्थः । यथोक्तकार्यकल्प्यत्वाभिप्राय एव समवायस्येहप्रत्ययगोचरत्वनिषेधोऽपीत्याह—अत एव यावदिति । स्मृत्युपस्थापितस्वातन्त्र्यपारतन्त्र्ययोः सहधीस्वतामात्रं विशिष्टधीहेतुः, न सम्बन्धधीरिति सम्बन्धधीनिवेशिनी इहधीस्तदनुमेयोपजीविन्येवेत्यर्थः । यथोक्तसम्बन्ध्युत्पत्तिविनाशावधिस्थितिस्वभावत्वमवयविसमवायस्याप्युपजीव्य अवयविनः पृथ-

१. समवायपदवाच्यः. क.   २. राश्रयाश्रयिता. क.

कल्पना न जाता तावन्न 'इह गोत्वम्' इति धीरित्युक्तम्। भिन्नोऽप्यवयवी द्विधा न पृथग्गृह्यते, अवयवसमवेतत्वादवयवग्रहाधीनग्रहत्वाच्च। येनापि हि घटादेर्भिन्नस्य पृथग्ग्रहो दृष्टः, तेनापि पृथग्ग्रहोऽवयविनोऽनुज्ञात एव। तादात्म्याङ्गीकारे त्वेकतैव स्यान्न तु सम्बन्धितेति स नानुज्ञात इत्यनुसन्धेयम्, धीबलात्। यत्र च भेदभानेऽप्येकाकारावमर्शः, तत्रैव जात्युपगम इति सत्त्वशब्दत्वब्राह्मणत्वादिजातिर्नोपेता; न हि द्रव्यादिभाने पूर्वाकारावमर्शोऽस्ति, येन सत्त्वं जातिः स्यात्। सच्छब्दप्रवृत्तिनिमित्तमेकमपि न जातिः, किन्तु क्रियैव मितिरूपा; तयोपलक्षिता योग्यतैव सत्ता।

गग्रहानुपपत्तिं परिहरति — भिन्नोऽप्यवयवीति। उक्तहेतुहीनभेदस्यैव पृथग्ग्रहव्याप्तिरित्युपाध्याश्रयणे गौरवदोषपरिहारार्थमाह—येनापीति। केचित्तूपाध्याश्रयणगौरवहानात्सामानाधिकरण्याख्यस्याश्च भेदपक्षपातिसमवायत्यागेनाभेदपक्षपाति तादात्म्यमिच्छन्ति, तत्र दूषणमाह—तादात्म्याङ्गीकारे त्विति। भेदापेक्षः सम्बन्धः; तन्निमित्ता च विशिष्टधीरिति कार्यविरोधात्तादात्म्यरूपसम्बन्धानङ्गीकार इत्यर्थः। गोत्वादिवत्सत्तासामान्यमपि प्रत्यक्षमिति परमतम्, तन्निरस्यति—यत्र च भेदभानेऽपीति। तत्साधकप्रत्यक्षाभावमाह—न हि द्रव्यादिभान इति। यथा गवादिपदानुवृत्त्यनभिज्ञस्याप्यनेकतद्व्यक्तिदर्शने तत्सर्वानुगतैकाकारप्रत्यभिज्ञा भवति, न तथा सत्पदार्थव्यक्तिष्वस्तीति न प्रत्यक्षं तन्मानतार्हमित्यर्थः। नन्वेकपदानुवृत्तिरेव स्वहेतुतया तत्प्रतीतिसाधिकेत्यत्राह — सच्छब्दप्रवृत्तिनिमित्तमिति। वाच्याश्रितैकाकारदर्शनाभावेऽपि मितिविषयत्वरूपैकनिमित्तापेक्षैकपदानुवृत्तिर्घटत इति न तत्साधनक्षमा सेत्यर्थः। ननु तन्निमित्तत्वे तस्मिन् वर्तमाने वर्तमानार्थतत्पदप्रयोगनियमः स्यात्, न तु 'असीत्', 'भविष्यति' इति वा प्रयुज्येतेत्यनुपपत्तिः वर्तमानामितिविषयत्वाभावनिश्चयेऽपि वर्तमानसत्तासंशयानुपपत्तिश्चेत्यत्राह—तयोपलक्षितेति। द्वेधा हि स्यान्निमित्तता विशेषणतयोपलक्षणतया च; तत्र विशेषणत्वं एवायं विरोधः; मितियोगयोग्यतोपलक्षणत्वेन तु मितिक्रियाया निमित्तत्वमुक्तमिति नोक्तदोष इत्यर्थः। ननु वाच्याभिमतद्रव्याद्व्यतिरिक्तयोग्यतायां विशेषण-

१. कारेऽप्येक. क.

योग्यता तु न स्वरूपातिरिक्ता, स्वरूपमात्रे मितिदर्शनात् । सत्ताजाति-मनुजानतापि स्वरूपमतिरिक्तमुपेयम्; अन्यथा सत्ताया नित्यत्वात् त्रैकाल्य-व्यवस्था न स्यादिति सत्ता सत्त्वद्रव्यत्वादेरपि स्वरूपसत्त्वमेव युक्तम् । ननु प्रतिस्वं स्वरूपभेदान्न मित्यर्हत्वमेकम् । तन्न; यद्विधे हि द्रव्यगुणादौ मित्युत्पत्तिः, तत्सत्त्वमित्युपलक्षणोपाधिरेकः; अतस्तत्र सत्स्वरूपवस्त्वादि-शब्दा इति । ककारखकारादावप्येकाकारधीविरहाच्छब्दत्वजातिरप्ययुक्ता ।

तथैव निमित्ततापत्तेर्नामान्तरेण सामान्यमेवोक्तं स्यादित्यत्राह—योग्यता तु न स्वरूपातिरिक्तेति । मितियोगप्रयोजकं हि रूपं तद्योग्यतेत्युच्यते, द्रव्यादिस्वरूप-मात्रं च तदिति न तदितिरिक्ता योग्यतेति न सामान्याङ्गीकारापत्तिदोष इत्यर्थः । ननु न मितियोगोऽपि स्वरूपमात्रप्रयुक्तः, सर्वानुगतसत्ताप्रयुक्तताया एवोचि-तत्वादित्यत्राह—सत्ताजातिमनुजानतापीति । मितिप्रवृत्तिप्रयोजकरूपमेव हि मेयं स्यात्, न तदुपजीवि व्यवहार्यतया भानस्पृष्टमपि रूपं पृथङ्मेयतार्हम्, द्रव्यगुणजा-त्यादिस्वातन्त्र्यपारतन्त्र्यवत्तदपृथक्त्वोपपत्तेः न तत्तुल्यं द्रव्यमुपेयम्, सदा वर्तमा-नायाः सत्तायाः विपरीतभूतभविष्यद्रूपेण तद्भानासिद्धिप्रसङ्गादिति स्वतन्त्रभूततदनु-वर्तिता सत्ताया एव द्वैतवादिभिरूपेयेति द्रव्यादिस्वरूपमात्रप्रयुक्तैव मित्युत्पत्तिरिति न तदन्या योग्यता; सत्तायां च पृथक्सच्छब्दस्य व्यवहारदर्शनात् तत्र च सामान्य-निमित्तत्वायोगात्तत्तुल्यतया सर्वस्यापि भासमानस्य स्वरूपमेव मितियोगात् सदुक्ति-निमित्तमुपेयमित्यर्थः । नन्वेवमेकशब्दानुवृत्तिरेकनिमित्तहीनैवोपेता स्यात्, मित्य-र्हत्वस्याप्येकस्याप्यनुपगमादिति जात्युपगम एव न्याय्य इति चोदयति—ननु प्रति-स्वमिति । परिहरति—तन्न यद्विधे हीति । यद्यपि मानप्रसिद्धावस्थमेकं निमित्तं नास्ति, तथापि नानाभूतानामपि मानवृत्तिप्रतियोगित्वेन प्रतिसंहितानां सर्वेषां तद्रूपेण यत्नोत्थाप्यैकधीविषयतयान्योन्यानपेक्षाणामेव शब्दवाच्यत्वं सुग्रहम्; तदर्थोत्थाप्यैकधीरूपोपाधेः उपलक्षणत्वेन मेयावस्थानामेव वाच्यत्वग्रहादित्यर्थः ।

एवं सत्ताजातिं निरस्य तुल्यन्यायतया शब्दत्वजातिं निरस्यति—ककारखका-

१. तापि न. ख.
२. दिति सत्वपरद्रव्यादे. क.
३. यद्विधेऽपि द्रव्य. ख.
४. शब्दार्थ इति, क.

शब्दपदानुवृत्तिस्तु श्रोत्रोत्थधीक्रियोपलक्षितयोग्यतात एव । तद्योग्यता तु केषांचिदेव तद्धीवेद्यत्वदर्शनात् स्थिता । शब्दत्वजातिमनुजानतापि केचिदेव जात्यन्वयिनो वाच्याः । 'ननु जातियोगः केषाम्?' इति पृष्टो जात्युपलक्षणेनैव प्रतिवक्तीति युक्तम् । ब्राह्मणत्वादिजातिरप्ययुक्ता ; न हि नानानरेषु नरत्वातिरिक्तं शूद्रादिनिवृत्तमनुगतमाकारमनुसन्दधाना धीरुदेति । ब्राह्मणादिशब्दानुवृत्तिस्तु सन्ततिविशेषजस्त्रीपुंव्यतिकरजन्मक्रियोपलक्षणा । सन्ततिविशेषास्तु

रादावपीति । नन्वस्मिन्नुदाहरणे व्यक्त्यैव प्रत्यभिज्ञा, किमिति प्रसिद्धवत्तदभावमात्रमुक्त्वा निराशङ्कमेव गम्यते? उच्यते—ककारप्रत्यभिज्ञा तावद्व्यक्ति विषयेति न जातिविषयधीनिरासविरोधिनीति कवर्गप्रत्यभिज्ञापि न शब्दत्वधीनिषेधविरोधिनी, तस्य सर्वशब्दानुवृत्ततयेष्टत्वात् । तथापि जातिमात्रमनिवार्यमिति चेत्; न, अनुवृत्तस्य व्यावृत्तरूपत्वभानाभावे तज्जातित्वासिद्धेः । तेनैकवर्गानुगतांशस्य वर्गान्तरीयप्रथमद्वितीयाद्यनुगतांशस्य च संश्लिष्टानेकवर्ण इव संयोगमात्रमनुवृत्तधिया स्यात्, जातिप्रयोजकरूपासिद्धेः सहितावस्थस्य वर्णान्तरत्वं वेति निषेधबाधकं न किंचिदित्यभिप्रायः । एतच्च एकाकारधीविरहादित्याकाराकारित्वनिषेधेनोक्तमिति न कश्चिद्दोषः । शब्दशब्दानुवृत्तिहेतुं पूर्वोक्तविधयैवाह—शब्दपदानुवृत्तिस्त्विति । ननु श्रोत्रग्रहणयोग्यतात्मकमेकमिह निमित्तं नास्तीति कथमेकशब्दानुवृत्तिरित्यत्राह—तद्योग्यता त्विति । तद्ग्राह्यवर्णानामानन्त्याभावात् पृथक्पृथगेव योग्यतामवधार्य तदनुसन्धानपूर्वकः शब्दप्रयोगो नानुपपन्न इत्यर्थः । नन्वेवं बहूनां निमित्तत्वाश्रयणमेव दोष इत्यत्राह—शब्दत्वजातिमनुजानतापीति । जात्युपगमेऽपि तत्समवायप्रयोजकत्वेन तदाश्रयणं दुर्वारमिति तुल्यत्वान्न दोष इत्यर्थः । ननु तत्समवायप्रयोजकत्वेऽपि जातिवादिनो न तज्ज्ञानापेक्षा, शब्दप्रयोगनिमित्ततोपगमे तदपेक्षेति विशेष इत्यत्राह — ननु जातियोगः केषामिति । जात्युपगमेऽपि गवादिवत् सर्ववर्णानुवृत्ततया स्फुटदृष्टयभावाच्छब्दवृत्त्युन्नेयतया तद्व्युत्पत्तिः प्रत्येकप्रयोगमूलैवोपेयेति साम्यमित्यर्थः । ब्राह्मणत्वादिजात्युपगमोऽप्येवमेवायुक्त इत्याह — ब्राह्मणत्वादीति । न तच्छब्दानुवृत्तिनिमित्तासिद्धिरपीत्याह—ब्राह्मणादीति । तद्विशेषचिह्नमाह — सन्ततिविशेषास्त्विति ।

प्रत्येकं लोकत एवावधार्याः–एतज्जो ब्राह्मशब्दवाच्यः–इत्येवं गृहीतसम्बन्धस्य ब्राह्मणपदप्रयोगो मूलभूतः । न तु ब्राह्मणशब्दवाच्यमातापितृजतया सम्बन्धग्रहो वाच्यः, मातापितृब्राह्मण्यबहिर्भावे सर्वब्राह्मण्यानुपसंहारात् । नानासन्ततिष्वपि लोकप्रसिद्धितो गणत्वेन सम्बन्धग्रहणान्नानेकार्थता । अगणितोऽपि गणः सम्बन्धग्रहहेतुः आकृतिगण इव शब्दानाम् । जात्युपगमेऽपि कतिपयसन्ततिजतयावधृतब्राह्मण्यमातापितृजत्वधीपराधीनैव जातिधीरनुज्ञेया ; अन्यथा हि मातापितृब्राह्मण्यधीव्यवस्था न स्यात् । एकवर्तिकावर्तिनीनां ज्वालानां जात्यन्तरं न युक्तं विना भेदभानात् । अतो भेदभानेऽप्येकाकार-

व्युत्पत्तिमात्रनिभित्तब्राह्मणादिपदप्रयोगः स्वविषयव्यक्तिजन्मव्यवधानेन सन्ततिविशेपावधारणचिह्नं स्यादिति स व्युत्पत्तिमूलः स्यादित्यर्थः । एकदेशिमतं निरस्यति — न तु ब्राह्मणशब्दवाच्येति । ननु स्वपक्षेऽपि सन्ततिविशेषाणां पृथगवधारणीयत्वात् सर्ववाच्यव्यापिव्युत्पत्तिः सकृदशक्येति तुल्यदोषतेत्यत्राह — नानासन्ततिष्वपीति । स्वतःसर्वव्याप्येकोपाध्यग्रहेऽपि गणत्वेनोत्थापितैकधीस्थत्वापेक्षया व्युत्पत्तिः सकृन्नाशक्येत्यर्थः । ननु गणनोत्तरकालवर्तिभ्रंशशङ्कया सन्तत्यपेक्षयापि निश्चयो दुर्लभ इत्यत्राह—अगणितोऽपि गण इति । यद्यपि विशेषनिष्ठतया सन्ततिपरिगणनमेव नास्ति केषां चित्, तथापि कश्चिद्गण इत्येवमवगम्य तत्र शब्दशक्तिरिति ज्ञात्वा पश्चात्तदन्तर्भावावमर्शेनाकृतिगण इव व्युत्पन्नप्रयोगदर्शनात् तदा विशेषनिष्ठतया अवधारणसिद्धिः, गणितान्तर्भावसंशयनिवर्तकज्ञानान्तरापेक्षया तु व्युत्पत्त्यसिद्धिर्न शङ्कार्हेत्यर्थः । नन्वतिदुष्करत्वादस्य प्रकारस्य शब्दान्तरवज्जात्युपगमेनैवास्यापि व्युत्पत्तिर्लाघवाद्युक्तेत्याशङ्क्य जात्युपगमेनापि नेदं गौरवं सुवारमित्याह—जात्युपगमेऽपीति । गवादिवदितरव्यावृत्ततया स्वत एव तद्ग्रथक्त्यभावादुक्तोपायव्युत्पत्तिविषयार्थजन्यत्वधीव्यङ्ग्यैव जातिरुपेया, नेतरवद्व्युत्पत्त्युपयोगिनीति तदुपगमगौरवमेवापरिहार्यमित्यर्थः । पुनश्चान्यविषयवर्तिजात्युपगमं दूषयति — एकवर्तिकावर्तिनीनामिति । प्रकृतमुपसंहरति—अतो भेदभानेऽपीति । द्रव्यकल्पनायां जातिगुणोक्तदोषाभावस्य

१ ण्यस्य बहि. ख. २. ग्रहान्ना ख.

भानाज्जातिसिद्धेर्जातिकल्पनां संप्रयोगजैव । तथा गुणकल्पनापि, पृथगग्रहेऽपि जातिवत् भेदसिद्धेः । द्रव्यकल्पनापि व्यक्तभेदत्वात् द्रव्यस्य तत्संप्रयोगजैव । नामकल्पनायां तु संज्ञाशब्दस्य स्मृत्यारोहेऽपि संज्ञिनस्तत्संप्रयोगजता न हेया । कर्मकल्पनायामनुमेयकर्मयुक्ते द्रव्ये तत्संप्रयोगजा धीः । न च द्रव्यमेवागन्तु क्षणिकत्वात्तत एव कर्मफलोत्पत्तेर्न कर्मानुमेति वाच्यम्, प्रत्यभिज्ञादार्ढ्यात् क्षणिकतानुमानादार्ढ्याच्चाक्षणिकतासिद्धेः । अतो भ्रमसंन्देहकल्पनादेरप्रकारान्तरत्वात् प्रकारद्वयमेव—प्रमाणं स्मृतिश्च प्रत्ययः—इति सिद्धम् ॥ *

व्यक्तत्वात् सम्बन्धधीपूर्वकधीविशेषणसम्भवान्मानत्वसिद्धिरित्यत्राह—द्रव्यकल्पनापीति । नामकल्पनायां रूपस्य रूप्येकधीस्थत्वाभावेऽपि प्रधानस्य रूपिणः तत्संप्रयोगजैव धीरिति प्रत्यक्षत्वसिद्धिरित्यत्राह—नामकल्पनायां त्विति । कर्मकल्पनायामप्येवमेवेत्याह—कर्मकल्पनायामिति । ननु कर्मणः स्वरूपेणाप्यसिद्धत्वात् न नामकल्पनासाम्यमिति बौद्धमतक्षणभङ्गित्वानुवृत्तिर्नीं शङ्कां निरस्यति—न च द्रव्यमेवागन्त्विति । स्वरूपतस्तावदितरसविकल्पकप्रत्यक्षापेक्षया दौर्बल्यं नास्ति, कारणं तु सर्वत्र कार्यबलोन्नेयम्; तदिहापि यथार्हं कल्प्यम् । न च क्षणिकानुमानबाध्यत्वादमानत्वम्, एकस्य क्रमवदनेककार्यकरत्वासम्भवस्य क्षणिकत्वहेतोः सहकारिसन्निधिक्रमापेक्षया सक्रमकानेककार्यकरत्वसमर्थनेन निराकरिष्यमाणत्वात् बाधकानुमानासिद्धेरित्यर्थः । एवं च प्रत्ययस्य द्वैविध्याभिधानमपि समर्थितमित्याह — अतो भ्रमसन्देहादेरप्रकारान्तरत्वादिति ॥

१ ना तत्सं. क. ३ omitted कर्म. क

२. नाद्विग्य क. ४. omitted. कल्पना क.

* प्रातः प्रातः समुत्थाय द्वौ मुनी कुंभमंभसा ।
अत्र क्रियापदं वक्तुं दत्तः षाण्मासिकोऽवधिः ॥ ख.

"अत्र चोत्तराधिकरणारम्भस्याधस्तात् जगदण्डकबळीकरणकृतोद्यमतिमिरततिविशारदकिरणमालिना भगवता सहस्रकिरणेन कुन्तिभोजसुताराधनप्रसन्नेन तदर्थदत्तवररूपसुतस्य गगनविशेषगुणानुभवककरणस्येन्द्रियस्य गुणविशेषो द्रष्टव्यः" इति मातृकायाम् ।

"ननु"। संप्रति बाह्यार्थापह्नवेनार्थसंप्रयोगाभावात्तत्संप्रयोगजत्वाक्षेप इति संगतिः। पूर्वपक्षस्तु—स्वप्ने तावत् स्मृतित्वमशक्यम्, संस्कारोद्बोधहेतोः सदृशचिन्तादेर्दृष्टस्याभावात्; अचिन्तितेऽपि क्वचित् स्वप्नोत्पत्तेः। न चादृष्टमुद्बोधकं कल्प्यम्; कष्टेनैवोपपादयितुं स्मृतिप्रमोषप्रकारोऽङ्गीकृतः; स्वप्ने चेन्न तथा, तद्वरं वासनात एवार्थाकारः स्वप्नोदयः; प्रबोधे बाह्यार्थं प्रति बाधोदयान्नार्थहेतुकता। एवं च जाग्रद्बोधोऽपि वासनात एव; एकहेतुकत्वं हि लाघवाद्युक्तम्। अर्थस्य च स्वप्ने बाधितत्वादव्यापिता, वासनायास्तु न बाध इति सैव सर्वधीहेतुः। वासना चानादिर्व्यामोहधीसन्ततिरेवेति नातीव तत्कल्पनापि। न च संविदद्वैतविरोधः। तदुक्तम्—"वासनातो

"ननु सर्व एव निरालम्बनः प्रत्ययः" इति, प्रत्यक्षव्यभिचाराशङ्कापरिहारे कृते, किमभिप्राय आक्षेप इत्यत्राह—संप्रति बाह्यार्थेति। उक्तहेतुविषयोऽयमाक्षेपः, न तदभ्युपगमेनार्थान्तरविषय इत्यानन्तर्यसिद्धिः। स्वप्नदृष्टान्तेन बाह्यार्थापह्नवमात्रार्थत्वे बलवत्प्रत्यक्षसमर्थनानन्तरमनुमानानवतारादनुपपत्तिरित्यर्थः। ननु उक्ताक्षेपाभिप्रायेणापि प्रत्यक्षबाधितेऽनुमानानवतारात्तुल्यैवानुपपत्तिरित्याशङ्क्य पूर्वपक्षसमर्थनार्थमाह — पूर्वपक्षस्त्विति। स्वप्नदृष्टान्तेन जागरिताभावानुमानविवक्षायामियमनुपपत्तिः, यथोक्तस्मृतिकारणनिषेधेन स्मृतित्वनिरासविधया वासनामात्रकारणत्वं स्वप्नस्यापाद्य जाग्रद्धियोऽपि लाघवात्तन्मात्रजत्वप्रसाधनेनार्थात् बाह्यार्थापह्नवः क्रियत इति न पूर्वपक्षानुपपत्तिरित्यर्थः। नन्वदृष्टस्य स्मृतिहेतुत्वं तत्कल्पनादोषेणापह्नुत्य वासनाकल्पनाश्रयणे गौरवसाम्यमित्याशङ्क्य विशेषमाह—वासना चानादीति। धीकार्यतयैव तावद्वासनेष्यते, नादृष्टवद्विहितनिषिद्धजन्यतया, तेन धीसन्तत्यतिरेको वासनाया नावश्यंभावी, कार्यनिरूप्यत्वाद्वासनायाः; तस्या एव तत्करत्वेन वासनात्वाविरोधादित्यनुभवसिद्धधिय एव स्वतुल्यकार्यकरत्वमात्रपरत्वं तत्पक्षे कल्प्यम्, न स्वरूपमपीति विशेषः, संविदद्वैताभ्युपगमहानिश्च नेति न कश्चिद्दोष इत्यर्थः। तद्भेदोक्तिश्च कार्यकारणमात्रापेक्षैव, न स्वरूपभेदापेक्षेत्याह—तदुक्तमिति। एवं च भाष्योक्तिमात्रवीक्षणेन स्वप्न-

१. जाग्रत्प्रबोध क. २. omitted ख. ग.

व्यामोहः, व्यामोहाद्वासना बीजाङ्कुरवत्" इति । एवं च सर्वधीकार्याल्लघुनि कारणे वासनाख्येऽनुमानमिदम्; न तु प्रत्ययत्वादित्येवम्, येनानैकान्तिकताद्युद्भावनं स्यात् ॥

राद्धान्तस्तु—यथाकार्यं हि कारणानुमानम्; स्वप्नधीकार्यं च बहिरर्थभानरूपमर्थमेव यथासम्भवं हेतुतयाऽनुमापयति, न वासनाम् । न चार्थे बाधः, स्मृतित्वात् स्वप्नस्य । न चादृष्टकल्पनादोषः, सुखदुःखहेतुतयादृष्टस्य क्लृप्तत्वात् । स्वप्ने च सुखदुःखोदयात् क्लृप्तमेवादृष्टम्; स्वल्पकालान्तरितापि चिन्तोद्बोधहेतुः दृष्टेति, यत्र तथा, तत्र चिन्तैव हेतुः । स्वप्ने च स्मृतीनामेव 'तत्' इत्यग्रहान्मिथ्यात्वम् । भाष्ये च "सुपरिनिश्चिता बुद्धिः कथं विपर्यसिष्यति" इति बुद्धेरविपर्ययोक्त्या विवेकाग्रह एव मिथ्यात्वमुक्तम् । एवं जाग्रत्स्वप्नधीषु सर्वत्र बाह्यार्थसिद्धेर्युक्तं तत्संप्रयोगजतया प्रत्यक्षलक्षणम् ॥

दृष्टान्तेनासद्विषयत्वं जाग्रद्धियोऽनुमेयमित्याश्रित्य तद्दूषणं परापादितमपास्तमित्याह—एवं च सर्वधीकार्याल्लघुनीति । अनुमानबुद्धेर्यथार्थत्वाङ्गीकारादनैकान्तिकत्वम्, स्वप्नधियोऽपि स्वरूपतः स्मृतिभेदत्वात् सविषयतेति साध्यविकलतापीत्यर्थः ॥

सिद्धान्तमाह—राद्धान्तस्त्विति । न जाग्रद्धियो वासनाकार्यत्वं लाघवादाश्रयणीयम्, कार्यानुरूपस्यैव लाघवस्योपेयत्वात् । बाह्यार्थावभासित्वाच्च कार्यस्य तदनुरोधात् गौरवेऽप्यर्थ एव कारणं युक्तम् । न च गौरवम्, स्वप्नस्यापि बाह्यार्थावभासित्वाविशेषाद्व्यवधानेनाप्यर्थस्यैव कारणत्वाङ्गीकारादित्यर्थः । न चैवं बाधकानुरोधोऽपीत्याह—न चार्थे बाध इति । स्वप्नस्यानुभूतित्वमात्रं तद्बाधते, नार्थविषयत्वम्, तच्च नाङ्गीक्रियते स्मृतित्वादित्यर्थः । न चैवं संस्कारोद्बोधकादृष्टकल्पनापत्तेस्तदाश्रयणम्, सुखादिहेतुतया तस्य स्वत एव क्लृप्तत्वादित्याह—न चादृष्टकल्पनेति । न च सर्वत्र तदुद्बोधकत्वाङ्गीकारोऽपीत्याह—स्वल्पकालान्तरितेति । नन्वेवं मिथ्यात्वप्रसिद्धिविरोध इत्यत्राह — स्वप्ने च स्मृतीनामेवेति । तदंशहीनत्वादनुभवसाम्यादनुभवव्यवहारफलत्वाद् तद्बाधादेव मिथ्यात्वप्रसिद्धिः, नार्थबाधादित्यर्थः । भाष्योक्तं चाग्रहस्य मिथ्यात्वप्रयोजकत्वमित्याह—भाष्ये चेति । एवं लक्षणाक्षेपः समर्थित इत्याह—एवं जाग्रत्स्वप्नेति ॥

"शून्यस्तु।" स्वप्नद्वारके बाह्यार्थाक्षेपे समाहितेऽपि युक्त्यन्तरेण पुनराक्षेपसमाधानाभ्यां वादान्तरं संगतमवान्तरसंगतं च। प्रत्ययप्रक्रमात्तस्यैवार्थशून्यतोक्ता, न तु ज्ञानस्याप्यभावाच्छून्यता माध्यमिकमतोक्ता। योगाचारयुक्तितो हि बाह्यार्थापह्नवे सति माध्यमिकमतं तद्युक्तिबाधाद्बाध्यत इति न पृथङ्निरासः। अत्र च ग्राह्यग्राहकयोः संविदन्तर्भावादद्वैतमनेन क्रमेण ग्राहकं ग्राह्येऽन्तर्भूतम्, ग्राह्यं तु संविदि इति। तथा हि—ग्राह्यं संविदः सम्बद्धमेव युक्तम्; अन्यथा ग्राह्यव्यवस्था न स्यात्। सम्बन्धिता च

"शून्यस्तु।" वादान्तरप्रतिपाद्यार्थविवेकमुखेन सङ्गतिद्वयमाह— **स्वप्नद्वारक** इति। ननु नोक्तस्यैवार्थस्य हेत्वन्तरोत्थाक्षेपसमर्थनार्थत्वमस्य युक्तम्; क्रमप्राप्तमाध्यमिकमतनिरासार्थतैव युक्ता; अन्यथा तदनिषेधप्रसङ्गादित्याह— **प्रत्ययप्रक्रमात्तस्येति**। शून्यशब्दस्य विशेष्यापेक्षत्वात् प्रत्ययस्य च प्रकृतत्वात् तस्यैवार्थशून्यता ग्रन्थसामर्थ्यादवसीयते। न च तस्याप्यभावः। न च तन्मतं निषेध्यमस्माभिः, योगाचारमतनिरासेनैव तत्पूर्वकप्रसक्तेस्तस्य निरासंसिद्धेरित्यर्थः। ननु यथासमर्थितप्रत्यक्षाविरोधान्नास्ति युक्त्यन्तरमुक्ताक्षेपक्षममित्याशङ्क्य पूर्वपक्षमुपपादयति—**अत्र च ग्राह्यग्राहकयोरिति**। ननु द्वयोः संविदभेदे युक्तिसाध्ये ग्रन्थस्थमन्योन्याभेदसाधनमनर्थकमिति शङ्कानिरासार्थमुक्तम्—**अनेन क्रमेणेति**। संविदभेदोक्तिक्रममात्रं तदित्यर्थः। तमेव क्रममाह—**ग्राहकं ग्राह्य इति**। तत्क्रमसमर्थनार्थमाह—**तथाहीति**। यद्यपि संविदपेक्षया ग्राह्यस्यात्यन्तभेदः प्रतीयते; तथापि स नाभ्युपेयः, ग्राह्यग्राहकव्यवस्थानुपपत्तेः। तेनावश्याभ्युपेये सम्बन्धे ग्राहकस्य तत्संप्रतिपत्तेः तदभेद एव ग्राह्यप्रतिपक्षस्याप्याश्रयणीय इति संविद्भेदद्वारतया ग्राहकाभेदोक्तिर्विवक्षितेत्यर्थः। नन्वित्थं ग्राह्यस्य ग्राहकेऽन्तर्भाव उक्तः, किमिति प्राक् "ग्राहकं ग्राह्येऽन्तर्भूतम्" इति प्रक्रान्तम्? उच्यते—यद्यपि सम्बन्धप्रसाधने ग्राहकस्यान्तरङ्गत्वात् ग्राह्यस्य तदन्तर्भाव उच्यते, तथापि संवित्स्वरूपव्यावर्तकतया तत्प्रकाशकतया ग्राह्यमेवान्तरङ्गतयावशिष्यते, तत्प्रलीनमेव ग्राहकम्, तस्य सर्वसाधारणत्वात्, तदवशेषे च सौगतपक्षप्रतिक्षेपः स्यादिति

१. सम्बन्ध. क. ख.

ग्राहकस्य, ग्राहकता चात्मनो मनसो वा मतभेदतः; युक्तितस्तु नोभयोरपि; किंतूभयसन्निकर्षस्य, तस्यैवाव्यभिचारिणस्तादात्म्यादाश्रयत्वसम्भवाद् ग्राहकत्वमिति ग्राहकमेव ग्राह्यम्। संविच्च प्रत्यक्षोपेया; साकारं च प्रत्यक्षम्। एकश्चायं ग्राह्यभूत आकारः संविद एव युक्तः। न च वाच्यं यथाश्रयत्वमसत्यपि सम्बन्धान्तरे व्यवस्थितम्, तथा ग्राह्यता अनाश्रयास्त्विह; स्पष्टे हि ग्राह-

स्वपक्षानुगुणत्वात् पूर्वोक्त एवान्तर्भावक्रमो विवक्षितः। सम्बन्धसंप्रतिपत्त्यापादनसौकर्यात्त्वन्याभिधानमभेदमात्रविवक्षयेति मन्तव्यम्। ननु ग्रन्थेऽन्तर्भावोक्तात्मबुद्धिज्ञानानामव्यवस्थाभिधाने कोऽभिप्राय इत्यपेक्षां परिहरन्नभेदावसाय्यन्तर्भाव इति प्रतिवाद्यभ्युपगमापेक्षया तत्संवादापादनार्थमात्मादिसंकीर्तनम्, स्वाभिप्रायेण तु संविद्व्यभिचार्यभिमतात्ममनोऽपह्नवेन तद्वदन्याभिमतमिलितावस्थान्तर्भावो ज्ञान एवेत्युच्यते इत्याह—ग्राहकता चात्मन इति। उपसंहरति—इति ग्राहकमेव ग्राह्यमिति। एवं ज्ञानाभेदसिद्धावपि कथं संविदद्वैतसिद्धिरित्यत्राह — संविच्च प्रत्यक्षेति। यद्यप्रकाशमाना संवित् विषयावभासिनी स्यात्, तदा बाह्यार्थः प्रत्यक्षो भवेत्; प्रकाशमानैव तु सोपेयेत्यर्थः। तथापि कथमर्थस्याप्रक्षत्वमित्यत्राह—साकारं चेति। इतरव्यावृत्तरूपेणैव वस्तुनः प्रत्यक्षत्वात् निराकारत्वे च तदयोगात् व्यावर्तकाकाराभिन्नमेव तदर्हम्, भेदेऽतत्स्पृष्टस्य तद्व्यावर्तकत्वासिद्धेरित्यर्थः। ततः किमित्यत्राह—एकश्चायमिति। प्रत्यक्षत्वे संविदोऽर्थस्यापि तदुपगमे तदाकारोऽन्यः प्रथेत, तन्निवृत्तिरर्थस्याप्रत्यक्षत्वमेवापादयेदित्यर्थः।

एवं संविदाश्रयतया परोपगतात्मादेः ग्राह्यतापादनेन संविदभेद उक्ते तदुपगताश्रयत्ववदेव ग्राह्यत्वमपि सम्बन्धान्तरानपेक्षं वस्तुस्वभावमात्रेणैव व्यवस्थितमित्याश्रीयताम्; ततो यथाप्रतीति बाह्यमेव ग्राह्यमस्त्विति तदीयाशङ्कां निवर्तयति—न च वाच्यमित्यादिना। तत्र हेतुः—स्पष्टे हीति। संविच्च प्रत्यक्षोपेया, साकारं च प्रत्यक्षमित्युक्तयुक्त्या प्रतीताकारस्य संविन्निवेशोऽवश्यंभाविनि तद्ग्राह्यस्याकारान्तरं विना मानासिद्धेर्ग्राहकस्यापि संविदन्यत्वं दुर्लभमेवेति तद्दृष्टान्तबलेन ग्राह्यस्यान्यत्वाप्रसिद्धेः द्वयोरपि संविदैक्यमेवापतेत्. यदि पुनराकारान्तरस्य स्पष्टतया

१. बाह्यभूत. २. ग्राह्यस्यानाश्रयास्तीति. क.

कस्याकारान्तरे तद्बलादसम्बन्धेऽपि ग्राह्यता युक्ता । इह त्वेक एव नीलाद्याकारः; स चेत्संविदि निवेशितः, अपह्नुते तर्हि ग्राह्यग्राह्यके । अयं भावः— व्यवहारानुगुणं हि वस्तुसंवित्; सैव प्रकाशः; तदन्यज्जगज्जडम्, तदधीनव्यवहारात् । तद्यदि प्रकाशोऽपि पराधीनव्यवहारः, तदा सोऽपि जड एव स्यादिति व्यवहारानर्हं जगदन्धं स्यात् । अथार्थं प्रति प्रकाशता संविदः, न स्वं प्रति; तन्न, प्रकाशस्वभावताहानात् । न च अधीकर्मतया संविदो न

ग्राहकस्यान्यत्वं स्फुटं स्यात्, तदा दृष्टान्तबलात् त्वदुक्तं संभवेत्; तदभावे तु न स्यादित्यर्थः । ननु संवित् प्रत्यक्षोपेयेत्येतदसिद्धम्, स्वोत्पत्तिमात्रेणैव सा विषयव्यवहारहेतुतया तत्प्रमाणम्, नावगता, स्वयं तु पश्चात्संविदन्तरेण विषयवदेव प्रकाशत इति कथमाकारान्तरविरहाद्ग्राह्यार्थापह्नव इति शङ्कमानं प्रत्युक्ताभिप्रायं विवृणोति— अयं भाव इति । विषयव्यवहारफलमात्रमेव तावत्संविदो वस्त्वन्तरव्यावर्तकं रूपम् । न च विषयाश्रयः प्रकाश एव व्यवहारफलकः, नात्माश्रया संविदिति शङ्कनीयम्; प्रकाशपदस्य संविदर्थत्वाद्विषयाश्रितत्वं नास्ति, प्रकाशस्यातीतादेरपि प्रकाशाविवादात् असतश्चाश्रयत्वायोगात् 'अहं जाने' 'मम प्रकाशते' इति नियतोक्तिदर्शनाच्च । तस्माद्यथा करोत्यर्थकर्मैव ततोऽपनीय 'जायते' इति तत्क्रियासम्बन्धमेव स्वतन्त्रं नीत्वा धातुशक्तिमात्रात् कर्तृतयोच्यते प्रागसतो जन्मक्रियाश्रयत्वाभावनिश्चयात्, तथा धातुशक्तिमात्रेण संवित्कर्मैव 'प्रकाशते' इति कर्तृतयोच्यत इत्यवगन्तव्यम् । तेन संविदोऽसाधारणो धर्मो व्यवहारानुगुणत्वम्, तदन्यत्सर्वं तदधीनव्यवहारं जडमिति जडप्रकाशविभागः । तत्र संविदोऽपि इतरवत्पराधीनव्यवहारत्वोपगमे प्रकाशत्वविपरीतप्रसिद्धजडतापत्तेः तदपेक्षयाप्यन्यस्य व्यवहारालाभात् सर्वदा सुषुप्तावस्थैव स्यादिति संविदपेक्षया तन्निवृत्तिप्रसिद्धेरनन्याधीनप्रकाशैव संविदुपेयेत्यर्थः । ननु विषयव्यवहारार्हत्वं संविद इतरव्यतिरेकि रूपम्, न स्वव्यवहारार्हत्वमिति स्वव्यवहारेऽन्याधीनेऽपि न प्रकाशस्वभावत्वहानिरिति शङ्कते—अथार्थं प्रतीति । परिहरति — तन्न प्रकाशस्वभावतेति । विषयतन्त्रत्वे स्वभावत्वप्रच्युतेर्विषयतुल्यत्वापत्तेः अन्योन्यापेक्षयैव विषयाणां संविदपेक्षयापि

१. न चेद्. क.

सिद्धिरिति वाच्यम्; धीकर्म सिद्धयति—इत्यनुमानतो धीत्वेनापि सिद्धिरूपतैवेति धीस्तत्कर्म चोभयं सिद्धम्; किन्तु धीः प्रकाशस्वभावा स्वरूपिणी वाच्या, निःस्वरूपस्याभानात्; स्वरूपं च नीलाद्यतिरिक्तं न निरूप्यते इति नीलाद्याकारैव संवित्।

यत्तु कीर्तेर्हेतुत्रयम्, तन्मन्दमिति गुरुणा नोपन्यस्तम्। तथा हि—निराकारापि धीर्नीलादिव्यवहारानुगुणतया 'नीलधीः, पीतधीः' इति व्यवस्थामर्हति, सहोपलम्भनियमस्तूपलभ्ययोरभेदसाधनम्, नोपलम्भोपलभ्ययोः[1]; जडस्य प्रकाशात्मकता नेष्टा। प्रकाशसम्बन्धिता तु जडस्यैव भिन्नस्य युक्ता[2]।

व्यवहारार्हता न स्यादिति स्वाभाविकरूपापेक्षया तदर्हत्वार्थं स्वाभाविकमेव संविदः प्रकाशत्वम्, विषया आविश्य प्रकाशन्त इति प्रकाशमानस्वभावैव सोपेयेत्यर्थः। ननु संवित्कर्मत्वमेव प्रकाशमानत्वं विषयेषु प्रसिद्धमिति संविदोऽपि तदेव तत्स्वरूपमिति व्यक्तैव संविदन्तरापेक्षेति शङ्कां निरस्यति—न चाधीकर्मतयेति। यदा हि संवित्कर्म 'प्रकाशते' इत्यवधार्यते, तदा स्वरूपमात्रं व्यवच्छिन्नमिति संविदुपाधिकमेव तस्य प्रकाशमानत्वमिति तस्यास्तदसत्त्वे ततोऽपि तल्लाभायोगात् तस्याः स्वाभाविकं तदवधृतमेवेति न तदर्थमन्यापेक्षा स्यादित्यर्थः। नन्वेवं स्वतः परतश्चोभयोरपि प्रकाशलाभात् कथं तद्विषयापलापसम्भव इत्याशङ्क्य तदभिप्रायमाह—किन्तु धीः प्रकाशस्वभावेति। न तावत्प्रातिस्विकरूपहीनैव प्रकाशस्वभावा धीरित्याश्रयणीयम्, क्वचित्तत्प्रसिद्ध्यभावात्, तच्च नीलादिव्यतिरिक्तं नोपलभ्यत इति तदभिन्नैव सा, भेदे तद्रूपत्वासिद्धेः नीलपीतयोरिवान्योन्यम्—इत्येवं रूपान्तराभानात्तद्विषयासिद्धिरित्यर्थः।

एवं संवित्प्रकाशान्यथानुपपत्तियुक्त्या कीर्त्युक्तयुक्त्यनादरेण संविदद्वैतं साधयतोऽभिप्रायोक्तिमुखेन तद्युक्तिदोषमुद्भावयति—यत्तु कीर्तेर्हेतुत्रयमिति। प्रतिकर्मव्यवस्था तावन्निराकारायाः प्रकाशसम्भवे तत्स्वभावाधीनार्थविशेषव्यवहारार्हतामात्रेणापि घटत इति नाभेदसाधनसमर्था, सहोपलम्भनियमस्य भेदव्यावृत्तिश्चोप-

१. भ्ययोरसा. क.   २. भिन्नता युक्ता. क. ख.

यत्तु सौत्रान्तिकवैभाषिकनये धियः साकारतां मुक्त्वापि यद्बाह्यं साधितम्, तदपि मन्दम्; नानाभूतसमनन्तरप्रत्ययेभ्य एव नानाविधज्ञानोदयदर्शनात् बाह्यहेतूपगमो न युक्तः ॥

राद्धान्तस्तु—सत्यं संवित्प्रकाशरूपा, न तु नीलाद्याकारा; तदाकारत्वे प्रकाश्यत्वापत्तेः प्रकाशत्वहानिः स्यात्। यथा च नीलादिकं स्वरूपम्, तथा संविदपि स्वरूपमिति तद्भानं युक्तम्। भानं हि संविदेव तत्त्वतः। सैव नीलादेरिति नीलादेर्भानमुच्यते। सा च यद्यप्यान्तरी 'इदम्'

लभ्यविषये दृष्टा नोपलम्भोपलभ्यगतभेदाभावसाधनसमर्था; जडस्य प्रकाशानुपपत्तिश्च तादात्म्यापेक्षया, न सम्बन्धापेक्षया, सम्बन्धापेक्षया च विपरीतहेतुर्जडत्वमिति युक्तस्तदनादर इत्यर्थः। न चोक्तयुक्त्या साकारत्वमात्रसिद्धावपि वैभाषिकसौत्रान्तिकमतानुसारेण प्रत्यक्षेणानुमानेन वा बाह्यार्थसिद्धेर्न संविदद्वैतसिद्धिरिति शङ्कनीयम्, तत्तद्वासनात्मकानन्तरदृष्टसमनन्तरप्रत्ययकारणतयैव संविदुत्पत्त्युपपत्तौ तदुपगमायोगादित्याह—यत्तु सौत्रान्तिकेति ॥

एवं पूर्वपक्षं संशोध्य सिद्धान्तमाह—राद्धान्तस्तु सत्यमिति। प्रकाशस्वभावत्वमङ्गीक्रियत एव; तथापि नीलाद्याकारता संविदो न स्यात्, प्रकाश्यावगततदैक्ये तत्त्वापत्तेः प्रकाशत्वस्फुरणविरोधाद्यथावभासं भेदानपायात्। न च तद्भेदाभावे निःस्वरूपत्वापत्तिरपीत्याह—यथा च नीलादिकं स्वरूपमिति। नीलाद्यनपेक्षैव संविद्व्यवहारे स्फुरणे चानर्हेति हि तत्स्वरूपमित्युच्यते, तद्द्वयोस्तुल्यम्; न हि तदपि तदनपेक्षमेव द्व्यर्हम्, व्यावृत्तत्वं विजातीयापेक्षया द्वयोरप्यस्ति; सजातीयापेक्षया न निर्देशार्हम्, स्वरूपतस्तु तुल्यमेव सत्त्वमिति भानार्हतापि तुल्यैवेत्यर्थः। ननु संविदो नीलाद्यन्यस्वरूपोपगमेन तत्तुल्यभानयोगोपगमे तत्तुल्यप्रकाश्यतापत्त्या प्रकाशत्वहानिस्तुल्या, प्रकाशाश्रयत्वं तु प्रागेवापास्तमिति न तन्निर्वाह इत्याशङ्क्य भानस्य संविदन्यत्वे ह्ययमनिर्वाहः, तस्य त्वौपाधिकत्वात्तत्त्वतोऽनन्यत्वान्नानिर्वाह इति परिहरति—भानं हीति। औपाधिकत्वेन तन्निर्वाहं वक्तुं तदुपाधिं तावदाह-सैवेति। संविदेव नीलादिसम्बन्धोपाधेः 'नीलादिभानम्' इत्यपि वचनार्हेति न 'भाति' इति समानाधिकरणोक्तिमात्रेणान्यत्वापत्तिरित्यर्थः। ननु नाना-

इत्यनिर्देशात्, तथापि सा स्वभावाद्बाह्यनीलादिव्यवहारानुगुणत्वान्नीलादिभानमित्युच्यते; न तु नीलाद्याश्रितोऽसौ धर्मः, अतीतानागतनीलादेरपि भानोपगमात्। यत्र च भाने नीलादि साक्षात्कारव्यवहारादि भजते, तत्र नीलादि संवेद्यतया प्रत्यक्षम्; संविद्धेतुश्च ज्ञानं न नीलादिभानारूढमिति तद - मेयं प्रमेयमात्रम्, न संवेद्यम्; निरावरणं स्वलक्षणं ज्ञानारूढं संवेद्यम्; दूरात्

देशवर्तिनोः संविदर्थयोः सम्बन्ध एव न स्यादिति संविदोऽप्यर्थभेदोपगमेनैव भानेक्याहितेत्याशङ्क्य तत्पक्षे सर्वव्यवस्थापकभूतप्रतीतिबाधापत्तेः निर्मूलैव तद्व्यवस्थेति यथाप्रतीति स्वहेतुव्यवस्थितसंवित्स्वभावादेव नियतबाह्यव्यवहारानुगुणतया बाह्यसम्बन्धोपगमेनैव तद्गतिर्नेया. तदा च स्वव्यवहारानुगुणतया प्रकाश्यत्वनिवृत्तिसिद्धेर्यथाप्रतीति सर्वनिर्वाहः स्यादिति परिहरति—सा च यद्यपीति। नन्वर्थस्य बाह्यत्वे सति भानोक्तेरपि मुख्यत्वार्थं संविदोऽन्यदेव भानमुपेयमित्याशङ्क्य अवर्तमानभानोक्त्यनुगतमेव तन्निमित्तमुपेयम्, तदुक्तेरमुख्यत्वप्रसिद्ध्यभावादिति परिहरति—न तु नीलादीति। ननु संविदधीनव्यवहारभाक्त्वमात्रे तद्विषयत्वेऽर्थस्यापि तद्विषयत्वार्थं संविद इवाकारापेक्षा न स्यात्, ततश्च भाष्यकारीयस्तदङ्गीकारो मिथ्या स्यात्, ज्ञानस्यानुमेयत्वाङ्गीकारेण तत्र तदनपेक्षोक्तिश्च बाध्येत; तेनोक्तगतिर्भाष्याननुमतेति शङ्कां निवर्तयति—यत्र च भान इति। सर्वप्रमाणसाधारणफलस्याकारानपेक्षत्वेऽपि कचित्साक्षाकारविशेषणयुक्तं भानमर्थे स्वफलकरमिति फलेऽपि तद्विशेषणानुवृत्तेः साधारणफलनिरूप्यवेद्यत्वमपि तत्र सम्यगेव भातीत्यर्थस्यापि तत्र ज्ञानवाचिप्रत्यक्षव्यपदेशप्रसिद्धिरित्यव्यवधानेनार्थस्य संविदवच्छेदकत्वात् अस्त्येव तत्राकारोपयोगः; अनुमेयत्वोपगमेनाकारानपेक्षोक्तिस्तु संविद्धेतुविषया, तस्य साक्षाद्भानाभावादिति न भाष्यविरोध इत्यर्थः। किमात्मकं तर्हि तद्वेद्यानुवर्तिसम्यक्त्वमित्यत्राह—निरावरणमिति। अनुमेयाद्यर्थस्य सत्ताभिव्यक्त्यावावरणमुपाधिर्लिङ्गादेः व्याप्तिपक्षधर्मत्वादिरित्यसम्यक्त्वं तद्युक्तेः सर्वत्र, प्रत्यक्षे तद्विरहात् संविदवच्छेदकोऽर्थः व्यवहार्यत्वमात्रमितरत्रेति। अव्यवच्छेदः संशब्दार्थः प्रत्यक्षे विवक्षित इत्यङ्गीकुर्वतो यद्दूषणम्—दूरात्सामान्यमात्रं प्रत्यक्षं न स्यादिति, तदुक्तप्रकारे न प्रसक्तमित्याह—दूरात्सामान्यमात्रमपीति। प्रत्य-

सामान्यमात्रमपि तथेति संवेद्यमेव। तदेवं प्रत्यक्षेऽर्थे साक्षात्कारः; धीस्त्वतिरोहितस्वलक्षणभाना सर्वत्रैव साक्षात्कारवती प्रत्यक्षा, तथा ज्ञाततापीति वक्ष्यते। न च संविदनुमेया, लिङ्गाभावात्। नार्थमात्रं लिङ्गम्, व्यभिचारात्। न च ज्ञाततविशिष्टम्, विशेषणस्याज्ञानारूढत्वे विशिष्टस्यालिङ्गत्वात्; ज्ञानारूढत्वे गम्याभावात्। न चार्थधर्मः प्राकट्यं लिङ्गम्, अतीतानागतार्थधर्मत्वानुपपत्तेः। किञ्च, तत्प्राकट्यं स्वप्रकाशं चेत्, नामान्तरेण धीरेव; नापरं गम्यम्। अथ तदन्यत् प्रकाश्यम्, तदार्थवत् प्राकट्यान्तरापेक्षेति प्राकट्यानन्त्यप्रसङ्गः। यच्च प्राकट्येऽर्थधर्मे दूषणम्, तदभावोद्धारेऽप्यर्थधर्मे तुल्यम्; नामान्तरेण चाभावोद्धारो धीरेवोक्ता। न च स्वचेष्टादिरेव स्वधियो लिङ्गम्; आगन्तुप्रयत्नवदात्मदेहसंयोगभेदादेव चेष्टाहेतोस्तत्सिद्धेर्न धीलिङ्गता। न चात्मधर्म एव तैरश्चीन्यादि लिङ्गम्; तस्य प्रकाश-

क्षस्य कारणविशेषनिरूप्यमितरवैलक्षण्यं वाद्यन्तराङ्गीकृतमनादृत्य प्रतिभासगतवैलक्षण्यमङ्गीकुर्वतोऽभिप्रायमाह — तदेवं प्रत्यक्षेऽर्थ इति। चित्यात्मनोः सर्वधीषु प्रत्यक्षत्वं विवक्षितमिति ज्ञानानुमानोक्तेः परोक्तं संविदप्रत्यक्षत्वाभिप्रायं दूषयति—न च संविदनुमेयेति। प्राकट्यमङ्गीकृत्यापि दूषयति—किंचेत्यादिना। प्रकाशमानमेव हि तत्संविदनुमापकमुपेयम्, तदन्यानपेक्षमेव प्रकाशत इत्यङ्गीकारे—अनुमात्रनवमृष्टस्य लिङ्गत्वासम्भवात्—तत्प्रकाशार्हधीरेवोपेता स्यादित्यनुमेयासिद्ध्यापत्तिः, तत्प्रकाशार्थमन्यापेक्षायामनवस्थापत्त्या संविदनुमानासिद्धेः यथोक्तैव भाष्यगतिरुपेयेत्यर्थः। मतान्तरमप्युक्तन्यायेन निरस्तमित्याह — यच्च प्राकट्येऽर्थधर्म इति। 'नामान्तरेण च' इति प्राकट्ये 'किंच' इत्युक्तं दूषणं स्पष्टार्थं पृथगुक्तमिति द्रष्टव्यम्। विप्रतिपन्नप्राकट्यादिकार्यलिङ्गदूषणं संप्रतिपन्नचेष्टादिकार्येऽपि तुल्यमेव, तथापि दूषणान्तरविवक्षया तस्य लिङ्गत्वमाशङ्क्य तदुक्त्या दूषयति — न च स्वचेष्टादिरेवेति। न तावत्साक्षादेव चेष्टाहेतुत्वं धियोऽङ्गीक्रियते, प्रयत्नेच्छाव्यवधानेन तदुपगमात्, तेन चेष्टामात्रं न तल्लिङ्गं स्यात्, यत्नानन्तरभावितया अतन्मात्रलिङ्गत्वादित्यर्थः। नन्वेवमपि तत्तच्चेष्टाहेतुयत्नविशेषानुगुणात्मावस्थान्तरं तत्तदभिमुखत्वं धीलिङ्गमस्त्वित्यत्राह—न चात्मधर्म एवेति। तदपि प्रकाशस्वभावत्वा-

१ मात्रमात्रमपि. क, ख. २. कार धी. ख. ३. भानात्सर्वे. क. ४. ज्ञातापि. क. ५. गतधर्मानुप क. ६. अर्थदूष. क.

स्वरूपत्वे धीत्वमेव; प्रकाश्यत्वे तदानन्त्यम् । भाष्ये तु बुद्ध्यनुमानोक्तिर्धीहेतोरपि कथञ्चिद्बुद्धिव्यपदेशात् । दिङ्नागेन हि तद्धीहेतोरेव नीलाद्याकारवत्तया प्रत्यक्षतामास्थायार्थापह्नवः कृतः 'ज्ञातो ह्यः' इति स्मृतिबलात्; तन्निराकर्तुं प्रत्यक्षार्थानुमेयज्ञानाभ्यामपि 'ज्ञातः' इति स्मृत्युपपत्तिरिति वक्तुं बुद्ध्यनुमानमुक्तम् । यदि चैकेनाकारेण संविदर्थात्मकं द्वयमशक्यमुपगन्तुम्, तद्दूरं स्पष्टे बहिरर्थे संविदपह्नवात्तदनुमेयबुद्ध्यपह्नवोऽस्तु; नार्थहानम् । बाह्यतन्तूपादाने नियमेन पटबुद्धेर्बाह्यः पटो वाच्यः; वासनोद्बोधाधीनत्वे नियमासौरस्यम् । एवं च बहिरर्थसद्भावादिन्द्रियार्थसन्निकर्षजता प्रत्यक्षलक्षणं युक्तम् ॥

तत्स्वभावत्वविकल्पोक्तदूषणानतिवर्ति न लिङ्गतार्हमित्यर्थः । ननु बुद्ध्यनुमानस्य भाष्योक्तत्वादवश्योपेयं धियोऽनुमेयत्वमित्याशङ्क्य तदुपपत्तिरपि धीकारणविषयोपेयेत्याह—भाष्ये त्विति । ननु बुद्धिपदस्य फलवाचित्वप्रसिद्धेः कुतस्तत्कारणपरताश्रितेत्यत्राह — दिङ्नागेन हीति । निराकार्यार्थस्थापकग्रन्थकर्त्रभिहितस्योपन्यसनीयत्वात् करणेऽपि कचित् किन्प्रयोगदर्शनात् फलहेतोरेव 'ज्ञातः' इति स्मृतिबलेन प्रत्यक्षत्वं तदुक्तमुपन्यस्यान्यथापि स्मृत्युपपत्त्या निराकर्तुं तदिति युक्तमेव तदर्थत्वमित्यर्थः । प्रत्यक्षाभ्युपगतसंविदोऽप्याकारान्तरापेक्षमेव प्रत्यक्षत्वमिति परापादितमङ्गीकृत्य "काममेकरूपत्वे" इत्यादीत्याह—यदि चैकेनाकारेणेति । भानबलापह्नवेनाकारमात्रतन्त्रे प्रत्यक्ष आश्रिते तस्य बहिष्ठेनैव भासमानत्वात् तदेव तात्त्विकं तद्विरुद्धान्तरस्थत्वत्यागेन तत्तन्त्रबुध्यपह्नवेनोपेयं स्यादित्यर्थः । युक्तिश्च बाह्यार्थसद्भावे प्रतीतिबलसचिवतयास्त्येवेत्याह—बाह्यतन्तूपादान इति । यद्यन्तरेणैव बाह्यं पटं वासनामात्रतः पटप्रत्यय इत्याश्रीयेत, तदा शब्दमात्रात्तन्तूपादानादिस्मृतेर्वासनोद्बोधकालेऽपि पटोत्पत्तिधीर्बाह्यतन्तूपादान इव स्यात्, तदभावाद्बाह्योत्पत्तिरेवावगम्यते, अन्यथोद्बोधकवैलक्षण्यकल्पनाप्यापनेत्, तन्निर्मूलैवेति प्रतीत्यनुसार्यभ्युपगमो युक्तः, न तदनादरेणेत्यर्थः । वादद्वयप्रसाधितमर्थमुपसंहरति—एवं चेति ॥

१. इतरथा तदा. ख.

२. Omitted हि. क.

३. मवग. ख.

४. नार्थभानम् क.

अनुमानम् ।

"अनुमानम्" । प्रत्यक्षलक्षणं लोकप्रसिद्ध्यनुसारतः सूत्रयता दिगुपदर्शनद्वारानुमानादिलक्षणान्यपि सूत्रितानि ; भाष्यं स्फुटमाह ; लोकप्रसिद्धे हि मानान्तरे व्यभिचरति तत्साधर्म्याच्छास्त्रेऽपि व्यभिचारशङ्का; सा लक्षणाव्यभिचारादपैतीति सङ्गतिः । अनुमा च प्रत्यक्षवत्प्रसिद्धेर्बहुवादिसंमतेश्च प्रत्यक्षानन्तरं लक्ष्यत इत्यवान्तरसङ्गतिः । लक्षणे च "ज्ञातसम्बन्धस्य" इति न कर्मधारयः, सम्बन्धस्यैकदेशितापत्तेः 'सम्बन्धोऽग्निमान्' इति धीर्लक्षिता स्यात् ; न चैवं लोकधीः । अतो बहुव्रीहिणैकदेशस्योपसर्जनस्यापि

अनुमानम् ।

"अनुमानम्"। सूत्रव्याख्यापरत्वप्रकारं भाष्यस्याह—प्रत्यक्षलक्षणमित्यादिना । प्रत्यक्षस्यापि व्यभिचारशङ्कानिवृत्तिसमर्थं लोकप्रसिद्धमेव स्वरूपं सूत्रकारेण दर्शितम्, नाप्रसिद्धमित्यन्यदपि तत्तुल्यं तात्पर्यविषयतया तत्सूत्रेणैव गमितमिति तदभिप्रेतमेव भाष्ये स्पष्टीकृतमिति तद्व्याख्यैवेत्थं क्रियत इत्यर्थः । स्यादेवं सूत्रार्थविवरणार्थता, यदि लोकप्रसिद्धेरेव सूत्रोक्तिप्रयोजकत्वं नियतं स्यात्; तदेव कथमित्यत्राह—लोकप्रसिद्धे हीति । शास्त्रव्यभिचारशङ्कानिरासहेतुतया तदव्यभिचारोक्तेरेवाध्यायसङ्गतिरिति तत्परता निश्चीयत इत्यर्थः । तथापि कथमनुमानस्य प्राथम्यमित्यत्राह—अनुमा च प्रत्यक्षवदिति । ननु ज्ञातसम्बन्धोक्तेर्विशेष्यान्तरासिद्धेः कर्मधारयस्याङ्गीकार्यत्वात् कथं प्रसिद्धानुमानलक्षणार्हतेत्याशङ्क्य बहुव्रीहिसम्भवोक्त्या तदर्हतामाह—लक्षणे चेति । अर्थतस्तावद्दर्शनोपसर्जनस्याप्येकदेशस्यान्वयार्हतेति स्थित उपसर्जनत्वमाकाङ्क्षाबलोपनीतानुपसर्जनत्वप्रतीक्षयावान्तरवाक्यभेदाश्रयणेन परिहृत्य विशेष्यताश्रयणीयेत्यर्थः । ननु समासिन एकपदत्वात्तदेकदेशोपसर्जनस्याकाङ्क्षोत्थापनेनापि पृथगन्वयानर्हत्वात् वाक्यभेदस्य चातिकष्टत्वात् न तद्युक्तमित्याशङ्क्य पदमात्राद्याप्यैकदेशानुपस्थितेस्तदुपस्थित्यधीन-

'कस्य' इति साकाङ्क्षस्यानुपसर्जनावस्थस्य वाक्यभेदाद्विशेष्यता। आकाङ्क्षा च व्याप्यैकदेशार्था। अत एव वाक्यभेदाश्रयणम्। विशेषणापेक्षस्य च समर्थता; 'गुरुकुलम्' इत्यत्र हि 'कस्य' इत्यपेक्षायां गुरुविशेषणं दृष्टम्। नित्यसापेक्षतया हि वैधर्म्यं शिष्यविशेषणे शक्यम्। यस्य च मते स्वर्ग उपसर्जनं पदान्तरार्थेन भावनयान्वितः, कस्तस्य विशेषणान्वये प्रद्वेषः? इदं च शाब्दैरेव शब्दोत्थं कृतम्—"अथ शब्दानुशासनम्। केषां शब्दानाम्? लौकिकानां वैदिकानां च" इत्यत्र। किञ्च स्वभावाद्दृश्यमेव दर्शनस्य प्रधानमिति तदहानादेव दृश्यदर्शनयोरन्वयान्नोत्तरपदार्थप्रधानता तन्त्रम्। शब्दानां पूर्वनिपातार्था तूपसर्जनसंज्ञा, अन्तर्गतविभक्तिलोपार्था च। यत्तु

त्वात्तदन्वयार्हतायास्तदर्थमुत्थितैवाकाङ्क्षा, न विशेषेण श्रुत्युत्थाप्येति वाक्यभेदाश्रयणमपि न दोषः, तदधीनत्वादुपस्थितान्वयधीसमासेरिति परिहरति—आकाङ्क्षा चेति। समासश्रुतिश्च नेह पदान्तरान्वयविरोधिनी, स्वनिमित्तभूतसामर्थ्यापादकत्वात्तस्येत्याह—विशेषणापेक्षस्य चेति। न चाप्रसिद्धोऽयमन्वयप्रकार इत्याह—गुरुकुलमित्यत्र हीति। वार्तिककृतेदं दूषितम्—'गुरुकुलमित्यत्रास्ति विशेषणान्वयार्हता, नित्यसापेक्षत्वात् गुरूक्तेरुपसर्जनावस्थायामपि तदनुवृत्तेः; तदभावादेकदेशपदस्य तदुत्थापनस्य चोपसर्जनत्वे सत्यशक्यत्वात्' इति; तत्परिहारमाह—नित्यसापेक्षतयेति। शिष्यप्रतियोगिकी नित्यापेक्षेति तद्विशेष्यत्वे शक्यते वैषम्यं वक्तुम्; यदा बहुत्वात् गुरूणां तद्विशेषाकाङ्क्षायां स्वरूपेणैव विशेष्यते, तदा तत्साम्यमेकदेशोक्तेरिति तदपेक्षया साम्योक्तिरदुष्टैवेत्यर्थः। स्वाभ्युपगतार्थविरोधाच्चाशक्यमिदमन्वयानुपपत्त्यापादनमित्याह—यस्य मते स्वर्ग इति। महाभाष्यप्रयोगाच्चानुपपत्त्युत्थापनमशक्यमित्याह—इदं च शाब्दैरेवेति। उपसर्जनत्वमेवेह नास्ति, पूर्वपदप्राधान्यस्य वस्तुबलप्राप्तस्यापरिहार्यत्वादित्यपि समर्थनं सुकरमित्याह—किं च स्वभावाद्दृश्यमेवेति। नन्वेवमुपसर्जनोक्तिविरोध इत्यत्राह—पूर्वनिपातार्था त्विति। नार्थस्य प्राधान्यनिवर्तनेन तन्निमित्तविशेषणान्वयानर्हतोक्तिपरा तत्संज्ञा; "उपसर्जनं पूर्वम्" इति सूत्रान्तरेण तत्संज्ञकपदस्य पूर्वप्रयोगनियमार्थेति कचि-

भट्टमतम्—ज्ञातः सम्बन्धो येनेति व्युत्पत्त्या बुद्धिगम्यो बोद्धा विशेष्यः, यस्येति व्युत्पत्त्या एकदेशद्वयगम्यस्तत्समुदायो वा एकदेशी वा विशेष्यः इति, तत्स्वोक्तिहतम्—

"गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम्।"

इति वदता। न च वाच्यम्—क्वचिद्गम्यस्यापि विशेषणं संख्यादि दृष्टम् 'षड् गावः' इति; न सर्वत्र गम्यमविशेष्यमिति दुर्लभलब्धमिव योज्यम् इति; यतस्तद्धि गम्यमविशेष्यम्, यदतत्परात् पदादविनाभावाद्गम्यते धूमपदादिवाग्निः; व्यक्तिपर्यन्ते हि गोपदे षडिति विशेषणं युक्तमेव।

दर्थस्य सामर्थ्यप्राप्तप्राधान्योपगमेऽपि न तद्विरोध इत्यर्थः। फलान्तरं च संज्ञाया आह—अन्तर्गतविभक्तीति। "सुपो धातुप्रातिपदिकयोः" इति समासस्य प्रातिपदिकसंज्ञापेक्षया समासात्पूर्वभाविविभक्तिलोप उच्यते, सोऽपि ह्युपसर्जनसंज्ञापूर्वकपूर्वनिपातनियमापेक्ष एव, तदभावे समाससंज्ञायां सत्यामपि प्रथमानिर्दिष्टस्य परत्रापि प्रयोगप्रसक्तेः तदा विना विभक्त्या विवक्षितार्थप्रतिपादनासमर्थत्वादुभयथा तत्समर्थत्वे च लोपनियमानुशासनमित्यनवसरमेव लोपविधानं स्यात्; पूर्वनिपातनियमपूर्वकत्वे तु सामर्थ्याविशेषाल्लोपविधिः सुकर इति सोऽप्युपसर्जनसंज्ञाफलमेवेत्यर्थः। वार्तिककारेण तु एकदेशस्य विशेष्यत्वानुपगमेन बोद्धुः समुदायस्यैकदेशिनो वा विशेष्यत्वमभ्युपगतम्; तदनुपपत्तिमाह—यत्तु भट्टमतमित्यादिना। तदुपगतार्थस्य स्वोक्तिहतत्वदोषोद्भावनामिदममृष्यमाणैः 'गम्यमानस्याविशेष्यत्वाभिधानमिदं न नियततया व्याख्येयम्, क्वचिद्विशेष्यत्वदर्शनात् प्रायिकोक्तिमात्रमिदम्' इत्यभिप्रायो दर्शितः, तदभिप्रायकथनं दूषयति—न च वाच्यं क्वचिद्गम्यस्यापीति। तन्निषेधहेतुः—यतस्तद्धीति। गम्यागम्यविशेषानवधारणात्, क्वचिद्गम्यमपि विशेष्यं दृष्टमित्यतात्पर्यविषयस्य गम्यत्वम्, न पदशक्त्यविषयमात्रं गम्यमुच्यते; तेन 'षड् गावः' इति संख्याविशेष्यत्वं व्यक्तीनां शक्त्यविषयत्वेऽपि तात्पर्यविषयत्वाद्युक्तम्, न तद्गम्यस्य विशेष्यत्वदर्शनम्; तेन प्रायिकाभिधानाभिप्रायोक्त्या बोद्धादेर्विशेष्यत्वसमर्थनमयुक्तम्, गम्याविशेष्यत्वस्य नियतत्वादित्यर्थः। एवमपि पिनाकपाण्यादिपदवत् स्वयमेव विशेषणान्वयद्वारेण विशेष्यपरमस्त्विति शङ्कां निवर्तयति—

अतः सर्वत्र गम्यमविशेष्यम् । न च स्वत एव विशेष्यनिष्ठमिति वाच्यम्, अनामत्वात् । पिनाकपाणिपदं तु नाम विशेष्यार्थं युक्तम् । न च वाच्यम्—गुरुनये वाक्यभेदाध्याहारानुषङ्गदोषाः ; तद्वरं लाक्षणिकप्रमात्रादावन्यतमो विशेष्यः ; तथा हि—ज्ञातसम्बन्धस्येति वाक्यान्तरम्, 'कस्यैकदेशस्य' इत्यध्याहारः, ज्ञातसम्बन्धस्येत्यत्र वाक्ये 'एकदेशस्य' इत्यनुषङ्गः इति ; यत[1] उक्तं विवक्षितपरे नरवाक्ये वाक्यभेदादि न दोषः इति । किञ्च आकाङ्क्षाभिलापोऽयम् 'कस्यैकदेशस्य' इति ; न त्वध्याहारः ; यथाश्रुतस्य विशेषणानर्हत्वादवस्थान्तरान्तर्भावार्थं[2] विरम्यविशेषणान्वयादवान्तरवाक्यभेदेऽपि महावाक्यमेकमिति नानुषङ्गः । सकृच्च मुख्यलाक्षणिकत्वायोगात् बुद्ध्यादिपदानां न लाक्षणिकप्रमात्रादिविशेषणता । योऽपि गुरूक्ते युक्त्यन्तरे दोषो-

न च स्वत एवेति । नाम्न एव हि स्वतो विशेष्यनिष्ठत्वम्, तस्यावयवार्थयोगावगमेऽपि तदविवक्षया नाम्न्यन्वयपरत्वात्, नामत्वाभावे तु अवयवार्थान्वयपरत्वान्न विशेष्यान्वयपरतेति न तन्निष्ठत्वमित्यर्थः । यद्यप्यनामतया स्वतो विशेष्यार्थं न स्यात्, तथाप्युक्तप्रमात्राद्यन्यतमस्यैव लक्षणया बुद्ध्यादिपदार्थभूतस्यास्तु विशेष्यत्वम्, पक्षान्तरेऽधिकदोषापत्तेरिति शङ्कामपाकरोति—न च वाच्यं गुरुनय इति । तन्निरासहेतुः — यत उक्तमिति । लक्षणानुगुणव्याप्त्यैकदेशे विवक्षिते सिद्धे तद्वृत्तेर्वाक्यभेदाद्यपेक्षत्वे तदाश्रयणं न दोष इति चोदनासूत्रेऽर्थपदं प्रयुञ्जता सूत्रकारेणैव प्रदर्शितमित्युक्तमिति न तल्लील्या तावद्वृत्त्यन्तरमुपेयम् । वस्तुतस्तु "कस्यैकदेशस्य" इति नाध्याहार उक्तः, विशेषणान्वयोपयोग्याकाङ्क्षैवोक्तेति नाध्याहारानुषङ्गापादनावकाशः; वाक्यभेदश्चान्वयानुगुणावान्तरवृत्तिभेदापेक्षयोक्त इति विवक्षितार्थोक्तावेकवाक्यतैवेति न कोऽपि दोषोऽस्मन्मत इत्यर्थः । लाक्षणिकप्रमात्रादेः विशेष्यत्वाङ्गीकारोऽतिकष्ट इत्याह—सकृच्च मुख्यलाक्षणिकत्वायोगादिति । वस्तुतः कार्यान्तरङ्गत्वात् पूर्वपदमेवेह प्रधानमिति नोपसर्जनत्वमित्युक्तयुक्त्यन्तरे भूतादिलिङ्गधीमात्रेणाप्यनुमोदयदर्शनादर्शनमेव वस्तुतोऽपि प्रधानम्, न दृश्यमिति दोषमुद्भावयन्ति, तमनुवदति—योऽपि गुरूक्त इति । परिहरति—सोऽयुक्त इति ।

१. Omitted यतः. क, ख.   २. स्थान्तर्भावार्थम्. क, ख.

च्छेदः—नैकदेशज्ञानुमा, अतीतेऽपि लिङ्गे धीस्थेऽनुमोदयात्; दर्शनमेव कार्यबलात् प्रधानम्, न तु दृश्यम् इति, सोऽयुक्तः; व्याप्यतया ज्ञातस्यैकदेशस्य विज्ञातकार्यस्य संस्कारो युक्तः, न तु सत्तयैकदेशः; कार्यवत्तया संस्कार्योऽवगत इति दृश्यं प्रधानमेव। नन्वाकाङ्क्षापूर्तिर्विशेषणेऽपि नास्ति; ज्ञातो हि सम्बन्धो व्यापकस्यापि। तन्न; 'यस्य' इति विग्रहवाक्यस्थषष्ठ्या सम्बन्धितया व्यपदेशः सः,—यस्य सम्बन्धोऽस्त्येव, तस्यासाधारण्यायुक्त इति षष्ठीतो व्याप्यताधीः; अव्याप्येऽपि हि व्याप्तिविवक्षायां

तत्रापि तावदनुमेयधर्मानिष्पत्तावसत्त्वादकारकत्वं लिङ्गस्य नोपेयम्; तदनपेक्षस्य ज्ञानस्यापि तदसिद्ध्यापत्तेः तन्निरूपकतयापि कारकत्वोपगमे प्राधान्यं लिङ्गस्यापरिहार्यम्, व्याप्यत्वेनावगतस्यैव व्यापकधीशक्तस्य स्वतोऽनवगतकार्यदर्शनद्वारतार्हस्य दर्शनसंस्कार्यत्वावगमात्। न चासत्त्वात् संस्कार्यत्वानुपपत्तिः, सत्तायाः संस्कार्यत्वोपाधित्वे प्रागवगते हि तदभावादसंस्कार्यता स्यात्, न तु तदिहेति, दृश्यतया कार्यकरत्वार्थमेव दर्शनापेक्षेति सत्तायाः कार्यानङ्गत्वात् युक्तैव दर्शनसंस्कार्यतेत्यर्थः। ननु ज्ञातसम्बन्धपदस्याकाङ्क्षितसम्बन्ध्यन्तरबुद्धिशक्तैकदेशार्पणसामर्थ्यं नास्ति, द्वयोरपि सम्बन्धिनोः पदवृत्तौ विशेषाभावादिति चोदयति—नन्वाकाङ्क्षापूर्तिरिति। परिहरति—तन्न यस्येति। विग्रहवाक्यस्थेति। सम्बन्धिन एकदेशस्येत्युक्ते यथा सम्बन्धाभावव्यवच्छेदान्नियतसम्बन्ध एवोच्यते, स्वरूपे स्वपदोक्ते पदान्तरोक्तेस्तद्व्यवच्छेदैकार्थत्वात्, तथेहापि, समासान्तर्गतषष्ठ्यर्थस्यापि तदविशेषात्। व्यापकस्य तु सम्बन्धधीयोगमात्रेण व्याप्यसाम्येऽपि विशेषणावस्थोक्तिफलव्यवच्छेदसंपूर्त्यभावाद्व्याप्यार्थतैवेत्यर्थः। ननु 'अस्य स्वम्,' 'वृक्षस्य फलम्' इत्यव्याप्येऽपि प्रचुरप्रयोगदर्शनात् कथं व्याप्यार्थता षष्ठ्या इत्यत्राह—अव्याप्येऽपि हीति। तत्रापि तत्सम्बन्धवस्थायामेव प्रातिपदिकवृत्तिर्न तद्वियुक्तावस्थायामिति वृत्त्यपेक्षया तदर्थतासिद्धिरित्यर्थः। ननु विशिष्टार्थपदसामानाधिकरण्याद्वाक्यार्थतया व्याप्यधीसम्भवातिरेकेण कथम् अव्याप्येऽपि लोके षष्ठीप्रयोगदर्शने सत्यपि विवक्षापेक्षया तद्गतिमाश्रित्य व्याप्यार्थतोपेयते? षष्ठ्यर्थान्वयमात्रमवस्थाविशेषापेक्षयास्तु,

षष्ठी । लोकेऽपि 'ममायम्' इत्यत्र ममेति व्याप्यम् 'अयं पुनरन्यस्यापि' इति वाचा व्याकृतम् । अतो विशेषणादाकाङ्क्षापूर्तिः । यत्तु भट्टोक्तम्—न सम्बन्धोऽस्त्येवेति व्याप्यता; किन्तु व्याप्तेर्नियमपर्यायात्सम्बन्धान्तरात् इति, तन्न; नियमो हि सदात्वं सम्बन्धादेर्धर्मः, न सम्बन्धः; तदा कादाचित्कत्वमपि सम्बन्धः स्यात् । क्रियागर्भ एवंजातीयकः सम्बन्धः—इति कल्पनाप्यमानिकी स्यात् । तादात्म्यतदुत्पत्तिभ्यां व्याप्यतेत्यपि न; पञ्चभिर्व्याप्यतेत्यपि न; सम्बन्धान्तरेऽपि तद्दर्शनात् अव्याप्यदर्शनात् गणनमयुक्तम् । व्याप्यत्वे मानमुच्यते–यद्वस्तु येन मानेन सम्बन्धविशिष्टतयावसीयते,

कस्मात्प्रातिपदिकस्यापि तत्रैव वृत्तिराश्रितेत्यत्राह—लोकेऽपि ममायमित्यत्रेति । व्याप्यार्थात्वस्य व्युत्पत्त्यविषयत्वेऽपि विभक्त्यर्थत्वात् षष्ठ्यर्थोऽपि प्रातिपदिकार्थविशेषणत्वेनैव भातीति तद्व्याप्ततयैव तदर्थो भातीति, सम्बन्ध्यन्तरं तत्प्रतियोगितयेति, द्वयमतुल्यम् । लोकव्यवहारोऽपि तदनुवर्त्येव दृश्यते, 'ममायम्' इत्येकनियतषष्ठीप्रयोगहेतुतया प्रतियोगिनोऽन्यसम्बन्धोक्त्या प्रकृतसम्बन्धव्याप्यत्वनिषेधेन तत्र षष्ठ्यनर्हतोक्तेः । तेन तया षष्ठ्या व्याप्यधीर्व्याख्यातेत्यर्थः । साधितमपेक्षितार्थार्पकत्वं ज्ञातसम्बन्धपदस्योपसंहरति—अतो विशेषणादिति । नन्वसम्बन्धव्युदासान्ते सम्बन्धव्याप्यत्वे यथोक्तं भवेत्, सम्बन्धान्तराधीनं तु व्याप्यत्वमिति परमतम्; अतः कथं तस्य षष्ठ्यर्थतेति शङ्कानिवृत्त्यर्थं तन्मतमनूद्य दूषयति—यत्तु भट्टोक्तमित्यादिना । व्याप्तेर्नियमपर्यायत्वप्रसिद्ध्यभ्युपगमात् तद्विरुद्धः सम्बन्धान्तराङ्गीकारः, तद्व्यापकक्रियान्तरकल्पनापत्तिश्चेति न तन्मानानुसारीत्यर्थः । सम्बन्धनियतत्वात्मकं तु व्याप्यत्वं सम्बन्धविशेषवर्त्येव, न सम्बन्धमात्रवर्तीति केषांचिन्मतम्, तद्विविच्य निरस्यति—तादात्म्येति । गणिताधिके व्याप्यभावाद्वा तत्र व्याप्तिनियमाद्वा गणनोपपत्तिद्वयाभावात् गणनमयुक्तमित्यर्थः । ननु केन प्रमाणेनाशेषदेशकालवर्तिव्याप्यत्वमवगन्तुं शक्यमित्यत्राह— व्याप्यत्वे मानमिति । सम्बन्धस्वरूपावगतौ तावन्मानं न दुर्लभम्, विवादाभावात्, तदेव व्याप्तिसाधकं स्यात्, सर्वस्यापि हि सकृत्प्रमाणनिर्धारितस्वरूपस्य पुनर्मानापेक्षा

तेनैव सम्बन्धव्याप्यतापि । धर्मी हि कालाद्यवच्छिन्नो भाति, न तत्सम्बन्धोऽपि धर्मः कालादिधर्मावच्छिन्नः; गुणानामगुणपरतन्त्रस्वभावत्वात्। जैमिनिनापि स्वभावानुसारादेव समत्वादसम्बन्ध उक्तः, नाशब्दत्वात्। यदि हि धर्मोऽपि कालाद्यवच्छिन्नो भासेत न धर्मिमात्रानुबन्धितया, तदा निजधर्मनिरूप्यो धर्मी न प्रत्यभिज्ञायेत। अथ धर्म्यवच्छेदकेन धर्मोऽप्यन्तर्भावित इति यावद्धर्मितया निजधर्मिता सिद्धा, तर्हि सम्बन्धव्याप्यता धूमादेः। या तु सम्बन्धस्य सर्वथानवच्छेद्यतोक्ता, सा तथा प्रतीतेर्व्याप्तिदार्ढ्यार्थम्। अत उक्तम्—'धूमसत्त्वैव परमानमपेक्षते; अग्निसम्बन्धस्तु धूममात्रानुबन्धी'

तन्निर्धारणोपाधिभूतदेशकालाधीना. तदुपाधिहीनस्य सकृत्प्रवृत्तप्रमाणेनैव कृतार्थता, तत्र सम्बन्धस्य स्वयं सम्बन्धिधर्मतयैव धीस्थस्य तद्धर्मदेशकालावच्छेदार्हता नास्तीति न स्वोपस्थापकाधिकमानापेक्षा देशकालभेदप्रयुक्ता धर्मिण इवेत्यर्थः। यथोक्तयुक्तिबलाद्विवेकेनानिवृत्तबुद्धिविपर्यासं विपक्षे बाधकोक्त्या जिज्ञासामुत्थाप्य विवेचयति—यदि हि धर्मोऽपीति। गुणजात्योरपि हि विशेषणस्वभावत्वे सम्बन्धसाम्यमनुभवसिद्धमेव। तत्र सम्बन्धस्य कालाद्यवच्छेद्यत्वोपगमे तदविशेषात् गुणजात्योरपि द्रव्यावच्छेदकत्वे कालाद्युपाध्यनुप्रवेशानिवारणात् विशिष्टावस्थस्य कालान्तरेऽनुवृत्त्ययोगात्तद्विषया प्रत्यभिज्ञा न स्यादिति सर्वप्रसिद्धा सैव कालादेस्तदनुप्रवेशं वारयेदित्यर्थः। ननु मा भूज्जात्यादेः स्वधर्म्यवच्छेदकत्वं कालाद्युपाधिकम्, प्रत्यभिज्ञाविरोधित्वात्; कालादिना धर्म्यवच्छेदे तद्धर्मभूतजात्यादेरपि अवच्छेद्यत्वमानुषङ्गिकमित्युच्यत इति पराभिप्रायमाशङ्कते—अथ धर्म्यवच्छेदकेनेति। परिहरति—तर्हि सम्बन्धेति। एवं तर्हि जात्यादेः स्वरूपनिरूपकत्वात्तन्निरूपितधूमाद्यवच्छेदकः सम्बन्धो यावद्धूमादिभावीति सकृद्दर्शनसिद्धैव व्याप्तिः स्यादित्यर्थः। ननु व्याप्त्युपपादकतयायमप्यवच्छेदप्रकारो निरस्तः प्रकरणे, तद्विरोधः स्यादेवं व्याप्तिसिद्ध्यङ्गीकार इत्याशङ्क्य वस्तुवृत्त्यैवमपि कालाद्यवच्छेदो नास्ति, गुणानां गुणिमात्रपरतन्त्रतयान्योन्यास्पर्शात्, तदभ्युपगममात्रेण तु व्याप्त्यविरोध उक्त इति दूरनिरासाभिप्रायेण सर्वथानवच्छेद्यतोक्ता, न त्वन्यथा व्याप्त्यसिद्ध्यभिप्रायेणेत्यविरोध इति परिहरति—या तु सम्बन्धस्येति। तस्माद्युक्तमुक्तमित्याह—अत उक्तं धूमसत्त्वैवेति। ननु कालाद्यनवच्छेदमात्रेण व्याप्तेः सकृद्दर्शनसिद्धिरियं

१. धर्मो. क.

सकृद्दर्शनसिद्ध एव'। ननु धूमाकृतिकव्यक्तिभेदे संयोगभेदवति सकृद्दृष्टेन व्यक्त्यन्तरं संयोगान्तरवद्दृष्टमिति न व्याप्तिः। मैवम्; एवं हि व्यक्तिभेद उपाधिरिति शङ्क्येत; सा च व्यक्त्यन्तरेऽपि धियापैति। यदि चानेकव्यक्त्युपाधिशङ्का, तदानुगतं तदाकृतिकत्वमेकमुपाधिलाघवात्तर्कतः; उपाधिशङ्कापनयनमपि

कथमाश्रिना? यदि हि सर्वव्यक्तिव्याप्येक एव सम्बन्धः स्यात्, तदैवं स्यात्, सम्बन्धस्वरूपस्यैव भेदे कः कालाद्यनवच्छेदस्योपयोग इति चोदयति—ननु धूमाकृतीति। परिहरति—मैवमेवं हीति। यदि सम्बन्धोऽपि धर्मिस्वरूपनिरूपणार्थ एव स्यात्, तदैकव्यक्त्यवसायिता तद्दृष्टेः स्यादिति व्यक्त्यन्तरे दृष्ट्यन्तरापेक्षं तन्निरूपणं स्यात्; यदा तु धूमाकृतिकव्यक्तिभेदे संयोगभेदवतीति जातिनिरूपितव्यक्त्यवच्छेदकत्वं सम्बन्धस्याङ्गीकृतं तदेति एवं हीत्युक्तम्। तदा हि निरूपितावस्थव्यक्तिरेव सम्बन्धावच्छेद्येति यावन्निरूपकवृत्त्यवसायितैव सम्बन्धदृष्टेः स्यात् धूमपदवाच्यतावधृतेरिव, न हि सकृद्दृष्टसम्बन्धानां पदानां तदाकृतिकव्यक्त्यन्तरे व्युत्पत्त्यन्तरापेक्षा वृत्तिरिष्यते व्यक्तिवाच्यवादिभिरपीति सम्बन्धितन्त्रसम्बन्धदृष्टेः तत्स्वरूपदृष्ट्यन्तर्भूताकृतिधीपूर्वकत्वनियमात्तदाकृतित्वप्रयुक्तसम्बन्धधीर्जातैवेति व्यक्तिविशेषावसायित्वशङ्कोपाधिशङ्कैव स्यादिति तन्निवर्तकतया व्यक्त्यन्तरदर्शनं व्याप्त्यवधारणाङ्गमित्यर्थः। ननु तन्निवर्तकतया तद्दर्शनान्तराङ्गीकारेऽवश्यंभाविनि पुनश्चानेकोपाधिशङ्कापत्तेस्तन्निरासे दर्शनमात्रस्याशक्तत्वान्मानान्तरं तच्छक्तमुपेयमेव स्यादिति शङ्कामनूद्य, मानसहायाभ्युपगततर्कमात्रमपेक्ष्यमिति प्राच्यदर्शनमेव तन्मानं स्यात् न मानान्तरमिति परिहरति—यदि चानेकव्यक्तीति। ननूपाधिशङ्कापनायकतर्कस्य न मानसहायता स्यात्, व्याप्त्यनिर्णयार्थत्वात्तस्य, तन्मानसहायता हि प्रसक्ता; प्राच्यदर्शनस्य तु तन्मानत्वे तस्यानेन विषयविशेषविवेकः कार्यः; स त्वनेन लेशमात्रेणापि नावसीयत इति मानान्तरमेव तद्ग्राह्युपेयमिति शङ्कां परिहरति—उपाधिशङ्कापनयनमपीति। मा भूद्व्याप्तिग्राहकमानसहायत्वम्, तद्गृहीतव्याप्त्युत्पाद्यानुमानोत्पत्तिसहायात् स्यात् तदपनयः। न च विषयविवेकेनैव तर्कस्य सहायतेति नियमः, उत्पत्तिहेतुतयाप्यविरोधात्, बाह्यालिन्दप्रदेशो पुरुषेण भवितव्यम्, न स्थाणुना—इत्यनुमानोत्पत्त्युपयोगित्वमपि

तर्कान्मानोत्पत्तिसहायादिति दिक् । एवं प्रतीतेऽपि विषयेऽनुमानानुभूतितया मानान्तरमिष्टेति । अग्निस्त्वसम्बन्धोऽपि दृष्टः । सम्बन्धासम्बन्धयोर्नानाकालाग्निगतयोश्च दर्शनादेवमविरोधार्थं कल्प्यते—सविशेषण एवाग्निः कालाद्यवच्छेद्य इति । विरोधे त्वसति धूममात्रस्यैवाविच्छिन्नोदयस्य नभोवर्तिनः स्वतःसिद्धोऽवच्छेदः । ननु धूमेऽप्यसम्बन्धो द्रक्ष्यत इति शङ्कायां व्याप्यत्वानिर्वाहः ।

बहुलमुपलभ्यते । प्रत्यक्षस्योर्ध्वतामात्रविषयतया स्थाणुत्वपुरुषत्वाग्राहकत्वाद्देशविशिष्टोर्ध्वतायाः पुरुषव्याप्त्युपस्थापकतया अनुमानोत्पत्तिसहाय एव तत्रेति इहापि तथास्तु । न चोत्पद्यमानस्याप्यनधिगतार्थत्वायोगादमानत्वात् सहायत्वासिद्धिः, अधिगतार्थस्याप्यनुभूतित्वमात्रेण मानत्वाविरोधात् तर्कानुग्राह्यतोपपत्तेरित्यर्थः । नन्वेवमग्नेरपि धूमव्याप्यत्वमनिवार्यम्, कालाद्यनवच्छेद्यत्वसाम्यात् तन्मूलत्वाच्च व्याप्तेरिति शङ्कां परिहरति—अग्निस्त्वसम्बन्धोऽपीति । स्वतः सम्बन्धस्य कालाद्यवच्छेदाभानेऽपि तदनवच्छिन्नदर्शनविरोध्यसम्बन्धदर्शनेऽन्योन्यप्रतियोगिकतयैकैकविशेषणदृष्टस्य व्यभिचार्यवच्छेदकत्वं तत्कालवर्त्यार्द्रेन्धनसंयोगादिनिरूप्यकालादिविशेषणापेक्षस्य स्वयं विशेषणावस्थस्यापीति विरोधपरिहारार्थं कल्प्यते, न धर्मिमात्रं स्वतः प्राप्त्यनुरोधेन कालाद्यवच्छेद्यमित्यर्थः । नन्वेवं सम्बन्धस्य विशेषणत्वात् कालादिविशेषणास्पृष्टत्वं पूर्वोक्तं भग्नमिति तदुक्त्यानर्थक्यं तदपेक्षव्याप्तिसिद्धिश्च भग्नेत्यत्राह—विरोधे त्वसतीति । विशिष्टदृष्टौ विशेषणस्य विशेषणान्तरयोग एव तद्भङ्गः, विरुद्धदर्शनकल्प्ये तु न । तद्विहीनसम्बन्धिनं प्रति तस्यैव सम्बन्धस्यावच्छेदकत्वं कालाद्यनपेक्षमेव स्यादिति धूममात्रस्यैव कालाद्यवच्छेदः, न तद्विशेषणावस्थसम्बन्धस्यापीत्यर्थः । न च कुम्भादिप्रवेशितस्य देशान्तरं नीतस्याग्निसंयोगविरहात् कालाद्यवच्छेदः कल्प्य इत्येतदर्थं अविच्छिन्नेति विशेषणम् । धूमस्वभावनिरूपकावयवसंस्थानानुप्रविष्टस्य जातितुल्यतया सम्बन्धात्पूर्वभावित्वात्तद्विहीनस्यासम्बन्धो न कालाद्यवच्छेदकल्पक इत्यर्थः । ननु सम्बन्धदर्शनसमये द्वयोस्तुल्ययोरेकस्यासम्बन्धदर्शनमेव इतरस्यापि तच्छङ्काकरमिति चोदयति—ननु धूमेऽप्यसम्बन्ध इति । तुल्यतैव द्वयोर्नास्ति, सोपाधिकत्वनिरुपाधिकत्वरूपेण

१. अग्नित्वसम्बन्धो दृष्टः, क. अग्नित्वसंबन्धोऽपि दृष्टः. ख.

मैवम्; यद्विधे हि यस्य दर्शनम्, तद्विध एव अर्थान्तरे तस्य शङ्का; यस्य कुतश्चिदुपाधेः सम्बन्धः, तस्योपाधिविगमादसम्बन्धोऽपि स्यात् यथार्द्रेन्धनोपाधिरग्नेः। न च धूमस्य सम्बन्धेऽप्युपाधिः कश्चिन्निश्चितः, यद्विगमादसम्बन्धोऽपि स्यात्। नन्वनौपाधिकत्वस्याप्यनिश्चयादुपाधिशङ्का। तथापि निश्चितोपाधिविगमाधीना शङ्का नास्त्येव। किन्तु उपाधिशङ्कापि नास्ति, सम्भावितोपाधेर्विगमेऽपि सम्बन्धदर्शनात्। एतच्चासकृद्दर्शनायत्तमिति तदाहृतं वृद्धैः। ननु दीर्घकालादेरुपाधिता, यस्य विगमानवगतेन तत्र शक्यं वक्तुम्—विगमेऽपि सम्बन्धनियमानुवृत्तेर्नोपाधिरिति। तन्न; तद्विधस्य कालादेः क्वचिदुपाधितानवगतेर्नेहोपाधिताशङ्का; यद्विधे त्वृत्वादौ कुसुमादिसम्बन्धोपाधिता तद्विधविगमे सम्बन्धानुवृत्तिदर्शनार्थं भूयोदर्शनमुक्तम्। किञ्च

सम्बन्धावच्छेदवैषम्यादिति परिहरति—मैवं यद्विधे हीति। पश्चादुपाधिविगमकालवर्त्यसम्बन्धदर्शननिश्चितो ह्युपाधियोगः पूर्वभाविदर्शनवर्त्येव, व्यवहारार्हता-मात्रं पश्चात्, धूमे तु तन्निश्चयस्तावन्नास्ति, पश्चादप्यसम्बन्धादर्शनात्। न च शङ्कामात्रमपि स्वरूपमात्रेण; प्राच्यदर्शन एव हि सम्बन्धोपाधिरग्नेर्दृष्टः, स्ववियोगेनासम्बन्धावहत्वात् तादृक्सम्भावितसहदृष्टव्यतिरेकेणापि सम्बन्धदर्शनेन शङ्कानिरासस्सम्भवात् तदर्थं च भूयोदर्शनस्याप्युपेतत्वादित्यर्थः। न चादृष्टव्यभिचारार्द्रेन्धनसंयोगस्योपाधित्वशङ्कया व्याप्त्यसिद्धिः, तस्याप्यग्निवद्व्यापकत्वेनोपाधित्वासम्भवात् साधनाव्यापकस्यैवोपाधितार्हत्वात्। न चान्योन्योपाधित्वशङ्कयोभयोरपि व्यापकत्वासिद्धिः, कार्यस्य धूमस्यैकैकाभावेऽनुपपत्तेरुभयकार्यत्वनिश्चयेनोभयोरपि व्यापकत्वसिद्धेरित्याशयः। नन्वेवमपि व्यतिरेकदर्शनायोग्यदीर्घकालस्यान्यस्य वा कस्यचिदुपाधित्वशङ्कया तदनिश्चय इति चोदयति—ननु दीर्घकालादेरिति। दर्शनमूलशङ्का दृष्टविधातिलङ्घनेन नैव भवेत्, दृष्टविधस्य च व्यतिरेकदर्शनं सुकरमिति परिहरति—तन्न तद्विधस्येति। सम्भावितोपाधिभावस्य कस्यचिदनुवृत्तस्य स्पष्टदृष्टावेव सोपाधिशङ्कापि स्यात्, नादृष्टविशेषस्योत्प्रेक्षामात्रेण पूर्वभाव्युपाध्यस्पृष्टसम्बन्धदर्शनस्यासम्बन्धदर्शनविरोधं विना, बाधानर्हस्य बाधा-

‘अस्मिन् काले सम्बन्धो नान्यदा’ इत्येवं कालस्योपाधिता[1] वाच्या। न च कालाद्यवच्छेदान्तर्भावः समवायदर्शनादर्शनविरोधं विना; यद्विधं हि यद्दृष्टं तद्विध एव तच्छङ्क्येत्युक्तम्। सकृद्दर्शनादेव स्वभावमात्रानुबन्धित्वं स्वतःप्रामाण्यनयसिद्धमिति दिङ्मात्रम्।

पत्तेरित्याह — किंचास्मिन् काल इति। ननु सकृद्दर्शनादेव सम्बन्धस्य सम्बन्धिभावमात्रानुबन्धित्वसिद्धिर्नास्ति, इन्द्रियसंप्रयुक्तधूमादेरेव तदुत्थधीविषयत्वेन तदितरधूमाद्यनुबन्धित्वासिद्ध्ययोगादिति सम्बन्धभङ्गभयादुपाधिशङ्कानवतारो नास्ति; संप्रयुक्तव्यक्तेरपि सम्बन्धभङ्गे स्यात्तदनवतारः, तदभावादवतरेदिति शङ्काहानार्थं दिङ्मात्रमित्युक्तम्, “तदा निजधर्मनिरूप्यो धर्मी न प्रत्यभिज्ञायेत” इत्यनेनैव परिहारस्य सूचितत्वात्। प्रत्यभिज्ञा हि असंप्रयुक्तावस्थस्यापि संप्रयुक्तस्येन्द्रियग्राह्यत्वं गमयतीति तेनोक्तम, कारणत्वमेव संप्रयुक्ततया पूर्वक्षणवर्तिनः, तदधीनविषयत्वं तु तत्स्वरूपमात्रस्येति यावत्स्वरूपस्थिति स्वात्थमितिपरिच्छिन्नमेव तदिति प्रत्यभिज्ञायाः आत्मलाभः; व्यक्त्यन्तरमपि पूर्वदृष्टजात्यवच्छिन्नतया प्रत्यभिज्ञायत एव; शूर्पाकरजन्मनो देशान्तरगतस्योष्ट्रदर्शने तद्वर्तिगवादौ पूर्वदृष्टत्वानुसन्धानस्योष्ट्रव्यावृत्ततया स्पष्टत्वात्पूर्वदृष्टजातिस्वभावबलेनैव विशेष्यभूतस्वव्यक्त्यन्तरविषयत्वसम्भवाच्च प्रत्यभिज्ञाया जातिमात्रशक्तगोपदोत्थधिय इव तद्व्यक्तिविषयत्वम्। एवं जात्यवच्छिन्नव्यक्तेः सम्बन्धविशेष्यत्वेऽपि जातिस्वभावानुसार्येव तद्विशेष्यत्वम्, सन्निहितव्यक्त्यवसायिन्यपि प्रथमदर्शने पूर्वविशेषणतन्त्रत्वात्तदुपजीविन्याः सम्बन्धविशिष्टदृष्टेः; प्रकृतौ प्रकृत्यपूर्वगृहीतावघातादेरिव तदपूर्वीयद्वारसम्बन्धे प्रकृत्यपूर्वीयतयान्वयेऽपि तद्ग्रहणबलात् तदीयसाधनलक्षणेति स्वग्राहकीयत्वमेव तदन्वये प्रयोजकमिति तत्प्रमाणकमेव पश्चाद्भाविविकृत्यपूर्वग्रहणव्यवहिततदीयसाधनभूतद्रव्यान्तरान्वयित्वमपि इति; जातिस्वभावस्य सर्वव्यक्तिष्वविलक्षणत्वात् सर्वव्यापिन्येव सन्निहितव्यक्तितिरोहितापि सम्बन्धविशिष्टधीरिति ॥

स्वोपजीव्याकृतिव्याप्तिरुपजीव्यर्थसंविदः।
शाब्दप्रत्यक्षयोस्तुल्या निर्विकल्पा तदा परम्॥ इति सङ्ग्रहः॥

१. कालस्यैवावधिता. क, ख.

परोक्तं त्वयुक्तम्—भूयोदर्शनसंस्कारसचिवं मनो वहिरर्थे व्याप्तौ मानमिति, संस्कारस्यापरिच्छेदकत्वात् । किञ्चासाधारणसंस्कारानुप्रवेशे तेनैव मानव्यवहारान्मानान्तरमश्लोकसिद्धमनुज्ञातं स्यात् । किञ्च इत्थं व्याप्तिरग्न्यादावपि दुर्वारा । न चार्थापत्त्या व्याप्तिः, शतशोऽग्नौ धूमदर्शनमनग्नौ चादर्शनं शतशो व्याप्तिं विनानुपपन्नमिति ; यतो यत्र यदा च दर्शनादर्शने तत्र तदा सम्बन्धभावाभावाभ्यामेव तदुपपत्तेर्न व्याप्तिसिद्धिः । व्याप्तिस्मृतिश्च अनुमाङ्गमिति वक्तुं ज्ञातसम्बन्धतोक्ता । तदभावे साधारणासाधारणविरुद्धा हेत्वाभासाः । एकदेशश्च यथासम्भवमाश्रितोऽभिमतः । आश्रिताभ्यां च लाघवादेकाश्रयाक्षेपः, अन्तरशब्दस्वरसाच्च । अत एकाश्रयाश्रितयोरेव गम्यगमकतोक्तेत्यपक्षधर्मस्याहेतुता । न च नितम्बोपरि भागभेदे भिन्नाश्रितता, नगावयव्येकत्वात् । अतः कदाचिन्नगाश्रितयोर्गम्यगमकता कदाचिद्धूमाश्रितोऽग्निसंयोगो गम्यः, धूमत्वं च तदाश्रितं निजं हेतुः । कृत्स्नपक्षानाश्रितस्य चाहेतुता उपाख्यानात्मकत्वस्येव कृत्स्नवेदानाश्रितस्य ; नगस्य

एवं स्वमतेन व्याप्तिप्रमाणं व्याख्याय परोक्तं दूषयति—परोक्तं त्वयुक्तमिति । व्यक्तस्त्वर्थः । पुनः पक्षान्तरं दूषयति—न चार्थापत्त्येति । तदर्थश्च व्यक्तः । ज्ञातसम्बन्धपदेन ज्ञानस्यातिवृत्ततोक्तेरनुमोत्पत्तिकारणत्वनिरोधं स्मृतेरेव साक्षात्कारणत्वं विवक्षितमिति परिहरति—व्याप्तिस्मृतिश्चेति । स्मृत्यभावे हेत्वाभासतापत्त्युक्त्या हेतुत्वं दर्शयति—तदभाव इति । एकदेशपदेनान्यधर्मत्वमुक्तम् नावयवत्वमिति सर्वानुमानानुवृत्त्या लक्षणक्षमत्वमाह—एकदेशश्चेति । एकदेशद्वयेनैकधर्म्याक्षेपाद्नैकधर्मत्वनियमहेतोः पक्षधर्मत्वमङ्गमिति तद्विरहाद्भासान्तरापत्तिरित्याह—आश्रिताभ्यामिति । न चैवं धूमस्याप्यहेतुतापत्तिरित्याह—न च नितम्बोपरिभाग इति । अतो विधाद्वयेनापि हेतुतेत्याह—अतः कदाचिदिति । नन्वित्थमपक्षधर्मत्वसमाधिसम्भवेऽपि भागासिद्धिरपरिहृता, तथापि धूमस्य हेतुत्वोपगमे च भागासिद्धिरदोष इत्याश्रितः स्यादित्याशङ्क्यादोषता नाङ्गीकृतेत्याह—कृत्स्नपक्षानाश्रितस्येति । तदुदाहरणमाह—उपाख्यानात्मकत्वस्येवेति । तद्वैषम्यं धूमस्याह—

त्ववयविनः पक्षत्वात् कृत्स्नाश्रितो धूमः। दर्शनशब्दात् स्वरूपासिद्धो न हेतुः। असाधारणस्य संशयहेतुता केनचिदुक्ता, सा न युक्ता; उभयसम्बन्धिनो हि दृष्टस्योभयस्मृतिजनकत्वादेकस्य द्वयात्मकत्वविरोधात् सन्देहहेतुत्वं साधारणस्य युक्तम्; न त्वसाधारणस्य, धर्मिमात्रादपि सन्देहापत्तेः। कथञ्चित्सम्बन्धात् कथञ्चिदेककालाश्रिततया चानुमानोदयादेककालादिसम्बन्ध एककालाद्याश्रिततापि मता। तथा दर्शनशब्दात् सतोऽपि दर्शन एव हेतुता। एकदेशान्तरपदाऽस्वतन्त्रस्य गम्यता। अन्तरशब्दाच्चैकाश्रिताश्रितयोरेव गम्यगमकता। एवं समाप्तेऽपि लक्षणे सुहृद्भूत्वोत्पत्तिहेतुगण-

नगस्य त्ववयविन इति। वेदात्मकावयव्यभावादेकैकवाक्यस्य पृथक् पृथक् पक्षत्वात् पक्षवृत्त्यभावादुपाख्यानात्मकत्वमपक्षवृत्ति नगस्याग्न्यनुमाने त्वेकत्वात् पक्षस्य न भागासिद्ध्यवकाश इत्यर्थः। दर्शनपदव्यावर्त्यमाह—दर्शनशब्दादिति। तत्र साधारणासाधारणयोर्लक्षणैकदेशभाजोस्तत्पूर्त्यभावादनुमित्युत्पत्त्यसामर्थ्यादाभासतया व्यावर्त्यत्वेनोक्तयोः संशयकरतयापि साम्यं कैश्चिदङ्गीकृतम्; तदनूद्य दूषयति—असाधारणस्येति। विरुद्धानेकधर्मस्मृतिद्वारेणैव तत्करत्वम्, तदसाधारणस्य नास्ति, तत्सम्बन्धस्य स्मृतिहेतोरसिद्धत्वात्, व्यतिरेकमुखेन स्मृतिकरत्वोपगमे धर्मिमात्रस्यापि तत्करत्वापत्तेरसाधारणधर्ममात्रस्य संशयहेतुत्वोपगमानुपपत्तिरित्यर्थः। ननु चन्द्रोदयादिना समुद्रवृद्ध्याद्यनुमानं लोकप्रसिद्धं यथोक्तसम्बन्धं यथोक्तमेकाश्रयत्वं च विनेति कथमस्य लक्षणत्वमित्याशङ्क्य तद्याप्येव द्वयं विवक्षितमिति न दोषापत्तिरित्याह—कथंचित्सम्बन्धादिति। एवं लक्षणावयवैराभासव्यावृत्तिमुपदिश्य अनाभासहेतोरपि हेतुत्वमनिश्चितावस्थस्य दर्शनपदेन व्यावृत्तं तन्निश्चयस्यापि अनुमानोत्पत्तिसामग्र्यन्तर्भावोक्त्येत्याह—तथा दर्शनशब्दादिति। द्वितीयैकदेशपदेन मेयार्पकेण तस्य स्वतन्त्रावस्था व्यावर्त्येत्याह—एकदेशान्तर इति। अन्तरशब्देन द्वयोर्भिन्नाश्रितता नेत्याह—अन्तरशब्दादिति। किमर्थमसन्निकृष्टपदमित्यत्राह—एवं समाप्तेऽपीति। धीहेतूनामेव लक्षणत्वेनोपात्तत्वात् व्यावर्त्याभावाल्लक्षणान्तर्भावाभावेऽपि हेतुत्वाविशेषात्तदवगममात्रार्थं तद्ग्रहणं शिष्यकौशलार्थं-

नार्थमसन्निकृष्टपदं कृतम्। तज्जिज्ञासितधर्मपरं परिशिष्टं व्याख्यातम्। जिज्ञासा च तद्धर्मत्वनिश्चये तद्विरुद्धधर्मत्वनिश्चये च नास्तीति नानुमा; यदि तु निश्चितेऽपि मानान्तरतो निश्चयेच्छा, कथञ्चित् तदानुमोदेती-त्युक्तम्। प्रकरणे विरुद्धधर्मत्वनिश्चये तु जिज्ञासापि न हेतुरित्यभिसन्धाय बाधित एव नानुमेति स्थापितम्, न तु साधिते तथा; गुरुनये हि सिद्ध-विषयमेवानुमानम्। परोक्तम्—"असन्निकृष्टवाचा च द्वयमत्र जिहासितम्।" इति। न तत् तुल्यं द्वयम्। असत्प्रतिपक्षता च यथोक्तहेतुद्वयाद्विरुद्धसाध्यद्वये सन्देहापत्तेरिष्टा; सा त्वतुल्यत्वात् द्वयस्य प्रत्युक्ता; तुल्यत्वे वा वस्तु नित्य-सन्दिग्धं स्यादिति दिङ्मात्रम्।

"तत्तु द्विविधम्" इत्यनेन व्याप्ति लक्षणमित्युक्तम्, अदृष्टस्वलक्षणेऽपि क्रियाशक्त्यादौ सामान्यरूपेण सम्बन्धग्रहणादेवानुमोत्पत्तेः। क्रियायां तावत्

मित्यर्थः। बाधितविषयव्यावृत्तिर्ज्ञातसम्बन्धपदेनैव सुलभेति भावः। कस्य हेतुत्वं तेनोक्तमिति शङ्कायामाह—तज्जिज्ञासितधर्मेति। तदभावाद्नुत्पत्तिविषयमाह—जिज्ञासा चेति। विषयद्वये विशेषमाह—यदि तु निश्चितेऽपीति। सत्प्रतिपक्ष-हेतुत्वाभासव्यावृत्त्यर्थमसत्प्रतिपक्षतापि लक्षणान्तर्भूतेति केचित्; तन्नेत्याह—असत्प्रतिपक्षता चेति। दिङ्मात्रमिति। न्यायशास्त्रोक्तप्रपञ्चापेक्षं द्रष्टव्यम्॥

"तत्तु द्विविधम्" इति किमर्थमित्यत्राह—"तत्तु द्विविधम्" इत्यनेनेति। व्याप्त्यभावशङ्कां तत्परिहारं च विवृणोति—अदृष्टस्वलक्षणेऽपीति। ज्ञातसम्बन्ध-त्वेऽनुमानाङ्गे लोकप्रसिद्धप्रत्यक्षायोग्यार्थविषयानुमाने लक्षणाव्याप्तिः शङ्किता—सम्बन्ध्यसिद्धौ सम्बन्धासिद्धेरिति; सामान्यरूपेणापि सम्बन्धग्रहणसम्भवाद्विशेष-रूपेण प्रत्यक्षायोग्यमप्यनुमेयं स्यादिति लक्षणसमाध्यर्थंतत्यर्थः। कथं सामान्य-सम्बन्धमात्रेण प्रत्यक्षानर्हावधारितविशेषनिष्ठमनुमानं स्यादिति शङ्कां क्रियानु-मानोदाहरणेन परिहर्तुमाह—क्रियायां तावदिति। कार्यमागन्तुजमित्येतावन्मात्र-ग्रहेऽपि निरन्तरोत्पन्नसंयोगविभागरूपकार्यदर्शनादागन्तुहेत्वनुमाने द्रव्यसमवायि-

१. मानान्तरापेक्षा. ख. २. Omitted. तु. ख.

कादाचित्कं ह्यागन्तुजं दृष्टम् ; अतः संयोगविभागादागन्त्वनुमा; समवायिकारणस्य पूर्वस्थितेरसमवाय्यागन्तु, तत्कर्मेत्युच्यते । न च कर्मण आगन्तोरसमवाय्युपेयम्, तत्कर्मजस्यास्त्विति वाच्यम् । कर्मासमवायिहेत्वभिमतसंयोगस्तावन्नोदनाभिघातादिरूपोऽसमवायितया कार्यान्तरजनने निरूपितनियतस्वभावः—यत्स्वाश्रये स्वाश्रयसमवेते वा करोति, नान्यत्र—अवयवसंयोगः स्वाश्रयेऽवयविनम् ; प्रचयाख्योऽवयवसंयोगः स्वाश्रयसमवेतेऽवयविनि महत्त्वम् ; तन्तुतुरीसंयोगः पटतुरीसंयोगं जनयन्नेकदैव स्वाश्रयतत्समवेतयोः—न सोऽपि नियममतिक्रामति । तथा गुरुत्वद्रवत्वसंस्काराः कर्महेतवः; तेऽपि न नियममति-

नोऽनागन्तुत्वसिद्धेः परिशिष्टमसमवायिकारणमागन्त्वित्यनुमानपर्यवसानाददृष्टस्वलक्षणविषयं तत्स्यादित्यर्थः । नन्वेवमप्यदृष्टविषयमनुमानं न स्यात्, दृष्टस्यैवागन्तोस्तत्र तत्र भावात्, कर्मानुमानवादिनापि यत् तदसमवायिकारणमाश्रयणीयं दृष्टं दृष्टविषयानुमानसिद्धं वा, तस्यैव संयोगविभागकारणत्वसम्भवादिति शङ्कामपाकरोति—न च कर्मण आगन्तोरिति । कर्मासमवाय्यभिमतसंयोगे प्रथमं तदसम्भवहेतुमाह—कर्मासमवायिहेत्वभिमतेति । यद्यपि पटादिहेतोस्तन्त्वादिसंयोगस्य तत्कर्तृकव्यापारपूर्वकत्वात् क्रियाजन्याभिमतसंयोगस्य पूर्वभावित्वात् प्रचुरदृष्टत्वात् सन्तानवर्तितया स्पष्टदृष्टत्वाच्च तत्कारणावधारणस्य पूर्वप्राप्तत्वात् तदनुवर्तित्वं द्रव्याद्युत्पत्तिहेतोः स्वतो युक्तम्, तथापि तदुत्पत्तिहेतुसंयोगस्य तत्कारणत्वं निरूपणार्हम्, इतरकारणं तु पूर्वदृष्टपूर्वदेशप्रतियोगिकसंयोगान्तरमुभयाश्रितमेकवत्यैव कार्यं कुर्यात्, नेतरवर्तीनि विषमस्वभावं दुर्निरूपमिति—पूर्वं द्रव्योत्पत्तावसमवायिकारणसंयोगस्य निरूपितनियतस्वभावत्वात्, परिमाणकार्ये चान्यथानिरूपितनियतस्वभावत्वात्, संयोगान्तरकार्ये स्वाश्रयापेक्षया विषमस्याप्युभयनियतस्वभावमेलनमात्रेणैवान्यथात्वात्, स्वभावान्तरकल्पनाहेत्वभावात्, क्लृप्तस्वभावाहानार्थं दृष्टसंयोगव्यतिरिक्तमेवासमवायिकारणमनुमेयमित्यर्थः । कर्मासमवायिहेत्वभिमतगुरुत्वादेश्च कर्मकार्याहेतुत्वमाह—तथा गुरुत्वद्रवत्वसंस्कारा इति । वेगभावनयोः साधारणं संस्कारत्वं स्वकारणसमस्वभावकार्यकरत्वमभिप्रेतम् । ननु कर्मनामकासमवाय्यनु-

१. घातरूपः क.

क्रामन्ति। अवयवगुरुत्वं स्वाश्रयसमवेतेऽवयविनि गुरुत्वं करोति। तथावयवद्रवत्वादवयविद्रवता। संस्कारोऽप्यात्माश्रयःस्वाश्रये स्मृतिं करोति। वेगाख्योऽपि संस्कारतया तथा। एवं नियमानतिक्रमात् कर्महेतुभ्यः कर्मजन्यसम्भावना मानहता। कर्मणि त्वपूर्वे नियमोऽयं नावधृत इत्यतद्विधेऽपि देशे तज्जन्यं युक्तम्। नन्वसमवायिकारणतया संयोगादेरयं नियमः; अत एवार्थेन्द्रियसंयोगादिरतद्विध आत्माश्रये धीकार्येऽतिक्रान्तनियमः। युक्तं चेदम्; समवायिनि द्विधा प्रत्यासत्तिरसमवायिनस्तदसमवायतत्कारणसमवायरूपेष्यते। स चेन्नियमोऽत्र कार्ये कर्मकल्पनेऽपि हेयः किं कर्मणा? तन्न, न तावदसमवायिहेतोरयं नियमः, वेणुदलविभागजे खदलविभागेऽतिक्रमात्, द्वित्वाद्युत्पत्तौ च। प्रत्यासत्तिस्तु समवाय्यन्तर्भावात्, न त्वसमवायिवहिर्भावनियमात्। किञ्च यद्यसमवायितामात्रेणायं नियमोऽवधार्येत, कर्मजन्यं कार्यमसमवायिशून्यं स्यात्।

मानेऽप्युक्तनियमस्य त्यागस्याहेयत्वे लाघवाद्दृष्टसंयोगस्यैव तन्नियमत्यागेन तत्कार्यकरत्वमस्त्विति शङ्कामकृप्तस्वभावत्वात्तस्य तत्त्यागो न दोष इति कर्मानुमानमेव युक्तमिति परिहरति—कर्मणि त्वपूर्वे इति। नन्वसमवायित्वप्रयुक्तमिदं नियताश्रयकार्यकरत्वम्, न संयोगादिप्रयुक्तम्; निमित्तकारणेऽर्थेन्द्रियसंयोगे नियमत्यागदर्शनात् द्वेधा समवायिप्रत्यासत्त्युपगमाच्चासमवायिनस्तत्फलत्वान्नियमस्येति चोदयति—नन्वसमवायीति। परिहरति—तन्न, न तावदसमवायीति। न्यायशास्त्रोपगतविभागजविभागे द्वित्वादौ च व्यभिचारान्नासमवायिप्रयुक्तता नियमस्योपेता; समवायिप्रत्यासत्त्युपगमोऽपि न तन्नियमापादक इति न कर्मानुमानेऽपि नियमबाधापादनावकाश इत्यर्थः। यद्यपि व्यभिचारो न स्यात्, तथापि युक्तिबलेनैवासमवायिमात्रधर्मत्वमस्य नियमस्य निराकर्तुं शक्यमित्याह—किंच यद्यसमवायितेति। संयोगादिरूपासमवायिन एवायं नियम इति विशेषणाग्रहे कार्यस्यासमवायिजन्यत्वनियमबाधापत्तेः तदबाधार्थं तत्पूर्वकनियमान्तरे विशेषमात्राङ्गीकारो युक्त इत्यर्थः।

१. स्वाश्रय. . तिं. क.
२. इत्येतद्विधे. क, ख.
३. गादेः. क, ख.
४. भागज दल क. ख.
५. वायिमात्रेण. क, ख.

संयोगादेर्दृष्टस्यासमवायिनोऽयं नियमो नासमवायितामात्रस्येति स्वीकृते द्वयं सुस्थम्। असमवायिनियतता सर्वकार्याणाम्; असमवायिनां दृष्टानां नियताश्रये कार्यकारिता च; द्वेधासत्त्युपगमो दृष्टासमवायिन्येव। नन्वदृष्टं स्थाणावपि कल्प्यताम्; यावदसमवायिविषय एव नियमोऽस्तु। तन्न; यदि तावदेकमेव स्थाणुश्येनाद्याश्रितं तन्नानास्वभावं स्यात्—श्येनं प्रति देशान्तरप्रापकं स्थाणुं प्रति नेति। अथ द्वयं कल्प्यं नानास्वभावम्, तन्न; विभागोपक्रमे संयोगे द्वयाश्रितेऽप्येकस्मिन् कार्ये लाघवतर्कसहायैकासमवाय्यनुमा युक्ता। लाघवादेव श्येने; स्थाणौ हि कर्मणि कॢप्तेऽपि विभागांशस्य स्थाण्वनाश्रितस्य कृते कर्मान्तरं श्येनेऽपि कल्प्यं स्यात्। नियमे तु दृष्टासमवायिगतेऽपि व्यवस्थिते लाघवमेव। यत्तु केनचित् दृष्टासमवायिन्यपि नियमासिद्धिरुद्भाविता—तन्तुद्वयसंयोगात्तन्त्वराश्रितोऽपि पटः कार्ये दृष्ट-

नन्वेवमप्यभ्युपगतासमवायिस्वभावबाधोऽपरिहार्यः, द्वेधा समवाय्यासत्तेस्तत्स्वभावतयोपगमात् कर्मणश्च तदभावादित्याशङ्क्य तदुपगमोऽप्यदृष्टस्वलक्षणातिरिक्तविशेषविषय एव, नासमावायिमात्रविषयः, तेन कर्मणः समवाय्येकदेशमात्रसमवायादसमवायिमात्रापेक्षया त्रेधा प्रत्यासत्तिरेवेष्टेत्याह—द्वेधासत्त्युपगम इति। ननु कर्मणोऽदृष्टत्वावगमे तद्गौरवद्वयहानार्थं स्थाणुश्येनसंयोगकृत् कर्म स्थाणावप्यनुमेयं स्यात्, यथादृष्टस्वभावस्यैवासमवायिनोऽनुमानार्हत्वादिति लोकप्रसिद्धिविरोधमापादयति—नन्वदृष्टं स्थाणावपीति। परिहरति—तन्न यदि तावदेकेति। द्वयाश्रितैककर्मानुमानं तावदशक्यम्, तत्कार्यापेक्षयापि द्वयोरैकरूप्यापत्तेः, विलक्षणस्वभावकारणद्वयानुमानमेककारणार्हकार्यस्यानेकानुमापकत्वायोगादयुक्तमिति तदर्हश्येनवर्त्येवानुमेयमित्यर्थः। न च कर्मण्यसमवाय्यन्तरदृष्टनियमानङ्गीकाराद् गौरवापत्तिः, दृष्टस्थानातिक्रमस्यैव गौरवकरत्वात्, तदनतिक्रमो लाघवकर एवेत्याह—नियमे त्विति। दृष्टोपाधिप्रवेशोऽदृष्टकल्पनातो लघुरित्यर्थः। दृष्टासमवायिन्यपि परापादितनियमासिद्धिमनूद्य तत्सिद्धिमाह—यत्तु केनचिदिति। पूर्वपूर्वखण्डा-

१. Omitted असमवायिनः. क.
२. Omitted स्वीकृते. क.
३. स्वस्थम्. क. ख.
४. नियमेऽपि. क.

मिति, तन्न; तन्तुजखण्डावयवितन्तुसंयोगजो हि पटः स्वाश्रय एव दृष्टः। एवं द्व्यणुकत्रयसंयोगे त्र्यणुकहेतौ योज्यम्।

नन्विन्द्रियानन्तरं स्फुरत्कर्म नासति बाधके लैङ्गिकं युक्तम्। तन्न, लिङ्गातिरिक्तस्वलक्षणास्फूर्तेः; स्फूर्तिविवादे चायं निर्णयः—रूपिद्रव्याश्रितेष्वपि कार्यगम्यं चक्षुरादेर्नियतग्राहित्वम्; तत्र किं कर्मग्राहित्वमपि कल्प्यताम् उत क्लृप्तं लिङ्गमेव तद्ग्राहीति? लाघवाल्लैङ्गिकत्वे स्थिते क्षणभेदाग्रहादनन्तरताभिमानः। एवंविधे सर्वत्र हि इयमेव युक्तिरिति दिक्।

वयव्यविनाशे हि तत्तत्प्रतियोगिका एवोत्तरोत्तरावयवसंयोगा इति तत्कार्यावयविनोऽपि तत्समवाय्याश्रिता एवेति न नियमातिक्रमः, न च तन्नाशकास्ते संयोगा इत्यर्थः। ननु त्र्यणुककार्यं द्व्यणुकत्रयसमवाय्येवोपेयम्, अन्यत्र बहुत्वस्यैवात्र महत्त्वकारणत्वादिति तत्र नियमातिक्रम इत्यत्राह—एवं द्व्यणुकत्रयेति। स्वसमवायिसमवेतमेव बहुत्वं महत्त्वकारणमित्यनुपगमान्न तदुत्पत्तिविरोधः, क्रमेणापि सूक्ष्मबहुतरतन्त्वारब्धपटस्याल्पस्थूलतन्त्वारब्धान्महत्त्वदर्शनात् समवायिसमवाय्यपेक्षयापि तत्कोटिनिविष्टं बहुत्वं स्यादेव महत्त्वोत्पत्त्यर्हमित्यभिप्रायः।

नन्वेवमपि प्रत्यक्षत्वप्रसिद्धिविरोधो दुर्वार इत्याक्षिपति—नन्विन्द्रियानन्तरमिति। परिहरति—तन्न लिङ्गातिरिक्तेति। नेन्द्रियसन्निकर्षमात्रं कर्मधीहेतुः, देशभेदास्फूर्तौ दूरवर्तिपुरुषादिदृष्टौ तदभानात् तत्रैव तिर्यग्गतेस्तद्दृष्टौ च तद्भानात् नौस्थस्यापि तन्मात्रव्यापृतदृष्टेरभानात् देशभेदस्फूर्तौ च भानात् तत्सहकार्यपेक्षयैन्द्रियकभानविवादे तत्पक्ष इन्द्रियशक्तिकल्पनापत्तेः, तद्धानार्थं लैङ्गिकत्वनिश्चयात्, प्रसिद्धेरन्यथासिद्धिरुपेयेत्यर्थः। गुरुत्वादावुपगतश्चायं निर्णयप्रकार इत्येवंविध इति दर्शितम्। गुरुत्वे तद्धारणयत्नभेदस्य सर्वप्रसिद्धत्वादस्तु तदनुमेयत्वम्, कर्मणि त्वनुमेये यथोक्तयुक्त्या कुशलानां गतिव्यवहारासिद्ध्यापत्तिः प्रत्यक्षत्वापादिकेति शङ्काहानार्थं दिङ्मात्रमित्युक्तम्। देशान्तरसंयोगविभागसन्ततिमात्रविषयतयापि तदुपपत्तेर्न कर्मणोऽनुमेयत्वक्षतिरिति भावः। केचित्तु आन्तरज्ञानादिमदात्मसंयोगादान्तरेच्छाद्वेषसुखदुःखादिकार्यनियमात् आन्तरप्रयत्न-

मात्तम् । यस्तु[1] प्रयत्नवदात्मदेहसंयोगस्यान्तरस्य बहिःकार्यं नेति नियमात् समाधिः[2]; स तु न, उक्तनियमासिद्धेः; सुखवदात्मदेहसंयोगाद्बहिर्देहदेशे रोमाञ्चादिदर्शनादव्यापित्वाच्च; आन्तरा[3]भिघातादिसंयोगस्य बहिःकार्यहेत्वात् । तथा[4] शक्तावप्यनुमैकगम्यतेष्टा; कुण्ठदशायामजनकस्य कुठारस्य तैक्ष्ण्यातिशयवतः कार्यदर्शनात्, अग्नेर्[6]मन्त्रादियोगदशायामजनकस्य दाहकार्यं सातिशयस्यैवेत्यतिशयानुमा; सोऽतिशयः शक्तिरित्युच्यते । अथ जनकेऽप्यग्नौ[5] मन्त्राद्यप्रयोगस्यापि हेतुत्वान्मन्त्रप्रयोगे न सामग्रीति न कार्यम् । तन्न, अप्रयोगस्याभावत्वात् सर्वकार्याणां च भावरूपकारणनियतत्वदर्शनात् अभावरूपस्य क्वचिदपि कार्यजनकत्वाश्रयणायोगात् । अयं भावः—भावाभावयोः भाव-

वदात्मदेहसंयोगादप्यन्यदृश्यकार्यायोगात् देशान्तरसंयोगासम्भवात् देहस्थकर्मैवोत्पत्त्यर्हमित्याहुः, तन्मतमुपन्यस्य निरस्यति तदङ्गीकारभ्रान्तिहानार्थम्—यस्तु प्रयत्नवदात्मेति । शक्तिविषयेऽप्यदृष्टस्वलक्षणानुमानं समर्थयितुमाह—तथा शक्तावपीति । अन्वयव्यतिरेकावधारितसहकारिमत एवाग्नेः परनिमित्तस्वकार्याजनकत्वदर्शनात् तद्दशाननुगतातिशयवत्त्वं जनकदशायां परशुदृष्टान्तेनानुमेयमित्यदृष्टस्वलक्षणा शक्तिरनुमानार्हेत्यर्थः । ननु अन्वयव्यतिरेकाभ्यां तदभावस्यापि तद्भावे सामग्र्यन्तर्भाव एवैवं स्यात्, न तदनादरेण सहायान्तरमनुमेयमिति शङ्कयति—अथ जनकेऽप्यग्नाविति । कार्यस्वभावावधारितभावकारणकत्वहानापत्तेर्नैतदित्याह—तन्न अप्रयोगस्येति । नन्वन्वयव्यतिरेकावधार्ये कारणत्वे कथं तदतिलङ्घनेन भावकारणत्वनियमोऽवधार्यतेत्याशङ्क्य अभिप्रायमाविष्करोति—अयं भावः भावाभावयोरिति । न तावदभावस्य सर्वप्रकारकारणत्वनिषेधेनास्माभिः शक्तिः समर्थ्यते; यतः प्रतिबन्धक्षयेऽपि शक्त्युद्भावकभावहेत्वभावात् कार्यासिद्धिरापतेत्, तत्राभावस्य स्वतन्त्रकारणत्वादस्तु कारणत्वम् । वस्त्वभावः

१. यत्तु. ख.
२. समाधिस्तुनो क.
३. अनन्तरा. क.
४. तथा. च. क.
५. प्युक्तेऽग्नौ. ख.
६. Omitted मन्त्र. क.

हेतुकयोरेवाभावोऽपि सहकारी वाच्यः, मुद्गरपाताभावे घटोत्पत्तेः ; तन्न ; पाताभावे हि भावहेतुसाकल्यादेव घट इति नाभावस्यापि हेतुताश्रयणम् ; अन्यत्वातः शक्तिसम्बन्धविपर्येऽपि नाभावस्य हेतुतेति परमदृष्टस्वलक्षण-हेतुकता । न चादृष्टं सर्वहेतुः सिद्धमिति नापरा शक्तिः कल्प्येति वाच्यम् । उक्तं हि—जनकदशायामतिशयवत्ता दृष्टेति अनन्याश्रित एव धर्मः कल्प्य इति आत्माश्रितादृष्टहेतुतासिद्धावपि शक्तिः कल्प्येति । न च अतिशयनाशाद-जनकतास्तु—अभिभवे कथम्? अभिभवस्यानिरूपणात्—इति वाच्यम् ; यथा शक्तिः कार्यैकनिरूप्या तथा पुनःकार्योत्पत्तिगम्योऽवस्थाभेदोऽभिभव

सहकारितया कारणत्वार्हः तस्यैवाकारणत्वमुच्यते, तदन्वयव्यतिरेकभाजां च सर्वेषां भावाभावरूपकार्याणां निर्धारितभावकारणकानामेव प्रतिबन्धकोपाधौ तत्कार्यादर्श-नात् तदुत्तरकाले तदभावोऽपि पूर्वावगतभावकारणकानां सहकारी, यदभावात्तत्र कार्यानुत्पत्तिरिति कारणत्वमभावस्याश्रयणीयम् ; न सहैव, प्रतिबन्धकानवगमे तदभावावगमायोगात्, तथा च न कारणत्वमुपेयम्, मुद्गरपातादिप्रतिबन्धकस्य सामग्रीनिवर्तकतयैव प्रतिबन्धकत्वान्मणिमन्त्रादिप्रतिबन्धकस्यापि तथैव प्रतिबन्ध-सिद्धौ तदभावस्य कारणत्वाश्रयणे हेत्वभावात् । तेनादृष्टस्वलक्षणकारणसिद्ध्यपेक्ष-त्वात् प्रतिबन्धकत्वसिद्धेर्न[1]तदभावदृष्टेरनुमानविरोधितेत्यर्थः । नन्वेवमपि प्रसिद्धा-दृष्टातिरिक्तादृष्टानुमानासिद्धिरिति शङ्कामपाकरोति — न चादृष्टमिति । कारण-विशेषं प्रति हि प्रतिबन्धकत्वमन्वयव्यतिरेकसिद्धमिति प्रासाजनकभावकारण-विशेषवर्त्येवादृष्टं कुठारदृष्टान्तेनानुमेयामिति स्याच्छक्त्यनुमानसिद्धिरित्यर्थः । नन्व-जनकावस्थानुवर्त्येवादृष्टमनुमेयमिति कथं शक्तिमत एव तदभिभवादजनकत्वं क्वचिदित्युच्यत इति शङ्कमानं प्रत्याह—न चातिशयनाशादिति । प्रतिबन्धकापग-मात् कार्यकरत्वदर्शने शक्त्यनुवृत्तेरावश्यकत्वादभिभवोऽपि कार्यकल्प्य एव, स च तत्समवायमात्रनिवृत्तिरूप इति तदवगमे समवायिद्वयेनैव प्रतिबन्धकनिवृत्त्या-गन्तुकसचिवेन पुनः स्यादिति तदुपगम इति भावः । नन्वभावानङ्गीकारात् कथं

१. स्यापिनि. ख.

इत्युच्यते । अत्र परसिद्धमभावमुपेत्य हेतुता निरस्ता । अनुपगमे तु दूरोत्सारिता । अत एव गुरुनये—संयोगाभावात् पतनम्, भेदाग्रहात्प्रवृत्तिः, विद्ध्यतिक्रमात् प्रत्यवायः, नञर्थान्नियोगसिद्धिरित्याद्यननुयोगः । भावभेदादेव हि सर्वत्र कार्यम्, अभावानुपगमात् । एकदेश्यपि शक्तिवादी विद्ध्यतिक्रमे[1] नाभावात् प्रत्यवायमाह—

"स्वकाले यदकुर्वंस्तु करोत्यन्यदचेतनः ।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते ॥"—

इत्याह । परोक्ता प्रतिबन्धकाभावस्याहेतुत्वे युक्तिः—विरोधिप्रयोगे सत्युत्तेजकमन्त्रेऽपि कार्यं न स्यात्; अथ विरोधिमन्त्रवदुत्तेजकमन्त्राभावोऽपि[2] प्रति-

तदकारणत्वाद्युक्त्यवकाश इत्यत्राह—अत्र परसिद्धमिति । तदङ्गीकारेणापि शक्तिसमर्थनस्य सुकरत्वप्रदर्शनार्था तदुक्तिरिति न दोष इत्यर्थः । यत एवाभावाङ्गीकारेण यथोक्तविषय एवाभावस्य कारणत्वं निराक्रियते, अत एवानीदृशविषयेऽनेकत्र कारणत्वव्यवहाराविरोध इत्याह—अत एव गुरुनय इति । वस्तुतस्तु तत्रापि भावस्यैव कारणत्वमिष्टम्, अभावानङ्गीकारादित्यकारणत्वोक्तेरुक्ताभिप्रायत्वमेव द्रढयति—भावभेदादेव हीति । प्रामाणिकाभावादिनापि शक्तिसमर्थनद्वारमभावस्याकारणत्वव्युत्पादनमेव तत्कारणत्वेन परैस्तद्दूषणादाश्रितमिति तदभ्युपगमेनापि युक्तं तन्निराकरणमित्याह—एकदेश्यपीति । तेन तु स्वविपरीतभावनिष्पादकस्वभावाभावात् प्रधानकारणत्वमेव निषिध्यते भावव्यावर्तकतया तत्सहकारित्वमात्रमङ्गीकृतमिति प्रधानकारणतयोक्तविध्यतिक्रमरूपाभावस्यापि स्वकालस्थभावनिरूपकतयैव कारणत्वम्, न साक्षादेवेति तदविरोधार्थमिदमुक्तमित्यनेनोच्यते । कथं तर्हि प्रतिबन्धकाभावस्यापि तादृशाकारणत्वसम्भवात् तन्निरासेन शक्तिः समर्थ्येत इत्यत्राह—परोक्ताप्रतिबन्धकाभावस्येति । भावद्वारेण कारणत्वसम्भवेऽपि मणिमन्त्रौषधादीनां प्रतिबन्धकानां बहुत्वात्तदभावानामपि बहुत्वे तद्भावेऽपि तत्तद्विरोध्यन्यथो-

१. क्रमेणाभावात्. क २. भावो न प्र. ख.

न्धकः, उत्तेजके सति तन्निवृत्तेः कार्यम्, तर्हि उत्तेजकाभावे विरोध्यभावेऽपि कार्यं न स्यात्; अथ विरोधिविशिष्ट उत्तेजकाभावः प्रतिबन्धकः, तर्हि बहु कल्प्यम्; वरं शक्तिकल्पनास्तु। तन्न; प्रमाणाविरुद्धं बहु कल्प्यमेवेति अभावस्याहेतुत्वं यथोक्तमानविरोधादिति दिक्। एवमग्न्यादौ सिद्धा शक्तिर्भावान्तरेष्वपि कार्यकरेष्वनुमानसिद्धा। सा च नित्याश्रया नित्यैव अनित्याश्रयाश्रयहेतुजा। संस्कारस्तु नित्येष्वप्यनित्यः इत्वन्तरादनित्येष्वपि। सर्वशक्तौ तु 'कार्ययोग एव शक्तेरुद्बोधः' इति यदुक्तम्, तत् उद्भवधीस्तदैवेत्येवमविरोधः। क्वचिच्छक्तिनाशः क्वचिदभिभव इति च सर्वशक्तिनयो-

गेऽपि कार्योत्पत्तेस्तदभावापेक्षत्वादिकल्पनातः शक्तिकल्पनैव लघ्वीति समर्थ्येन इत्यर्थः। तदनुपगमकारणमाह—तन्न प्रमाणाविरुद्धमिति। बहूनामप्यन्वयव्यतिरेकसिद्धेः शक्त्युपगमेऽपि प्रतिबन्धकस्य तद्विरोधितयापेयत्वाच्चादृष्टकल्पनातः तदङ्गीकार एव लघीयानिति पूर्वोक्तैव विधापेयेत्यर्थः। नन्वेवं स्वपक्षेऽपि प्रतिबन्धकनिरूप्यकेवलकारणावस्थाया एव प्रत्यक्षदृष्टायाः कार्योत्पादकव्यवस्थापकत्वापत्तेर्न शक्तिसिद्धिरिति शङ्कानिवृत्त्यर्था दिगुक्तिः। प्रत्यक्षदृष्टमण्यादिप्रतिबन्धे तत्सम्भवेऽपि विशेषावस्थानापादकमन्त्रादिप्रतिबन्धे तद्धीनावस्थानुपगमान्न शक्त्यसिद्धिः. परपक्षे त्वभावस्य तत्राप्यविशेषात्तदसिद्धिरिति भावः। नन्वेवमपि सर्वकारणेषूक्तप्रकाराभावात् कथं तत्र शक्त्यङ्गीकार इत्याशङ्क्य तत्पूर्वकानुमानान्तराधीन इत्याह—एवमग्न्यादाविति। कुर्वदकुर्वद्विभागस्याग्न्यादौ तत्प्रयोजकातिशययोगायोगकृतत्वनिश्चये धर्मिभेदेनापि तद्विभागे तदेव निमित्तं स्वतः प्राप्तमित्यनुमानान्तरापत्तिरित्यर्थः। कीदृशस्तत्र तत्र तद्योगप्रकार इत्यत्राह—सा च नित्याश्रयेति। संस्कारस्यापि कार्यजनकत्वप्रयोजकत्वाप्रयोजकत्वोपगमात् ततो विभागमाह—संस्कारस्त्विति। सर्वशक्त्यधिकरणोक्तशक्त्युद्भवस्य पूर्वोक्तादन्यत्वदोषं परिहरति—सर्वशक्तौ त्विति। ननु शक्तिस्वरूपसमर्थनकाले नाशाभिभवविभागोक्तिरजनकावस्थाव्यावृत्तजनकावस्थामात्रवर्त्यतिशयानुमानानुपयोगादनर्थिकेत्याशङ्क्य अन्यार्था सा, न स्वरूपानुमानोपयोगाभिप्रायेणेत्याह—क्वचिच्छक्तिनाश इति। अत्र भाष्ये सामा-

१. Omitted सति. ख. २. याश्रयहेतुजा. क.

पयोगी; इह तु सर्वत्र नाशोत्पत्त्युपगमेऽपि न दोषः। यत्र हि क्रियाहेतोः फलसिद्धिनिश्चयः तत्क्रियानुमानपूर्विकान्यत्रापि क्रिया फलानुमेयेति वक्तुं भाष्ये "देवदत्तस्य गतिपूर्विकाम्" इत्युक्तम्। यदि त्वादित्येऽपि गतिहेतोः फलसिद्धिः शक्यनिश्चया, तदानादरोऽन्यपूर्विकतायाः। गतिनियततास्मृतितोऽनुमितेर्गतिस्मरणमुक्तं भाष्ये।

परार्थानुमानवाक्यस्येयमेव सामग्री वाक्यार्थः। अबाधितार्था एकदेशान्तरार्था च प्रतिज्ञा; साध्ये हि ज्ञाते सत्यबाधितधीरेकदेशान्तरधीश्च; न तु साध्यबोधनार्था प्रतिज्ञा, सामग्रीत एव साध्यबोधोत्पत्तेः स्वानुमायामिव;

न्यतोदृष्टानुमानमादित्यगतिविषयमुक्तं देवदत्तगतेः प्रत्यक्षविषयतोक्त्येति तद्विरुद्धं नित्यानुमेयकर्मपक्षाश्रयणमित्याशङ्क्य अविरोधमाह — **यत्र हि क्रियाहेतोरिति।** उभयत्रानुमेयत्वविवक्षयापि कारणानुमानस्य दृष्टव्यतिरिक्तविषयतया क्रियाविषयत्वनिश्चयो देवदत्ते सुकरः, नादित्य इत्यभिप्रेत्य पौर्वापर्योक्तिर्युक्तेति न तद्विरोधः शक्यापादन इत्यर्थः। नन्वादित्यस्यापि पूर्वदेशाद्विप्रकृष्टदेशप्राप्तिर्मध्यस्थनिरन्तरसंयोगविभागसन्तानपूर्विकेत्यन्यदेशान्तरप्राप्तिवदनुमानसिद्धमिति तुल्यकालतैव स्यादित्याशङ्क्य तदापि तत्प्रकटनेन गतिकारणकत्वस्य वाच्यत्वात् पौर्वापर्याविवक्षया स्वतःप्राप्तविधान्तराश्रयणेनास्तु तदुक्तिरिति परिहरति— **यदि त्वादित्येऽपीति।** गतिस्मरणमित्यनुमानविवक्षया निर्देशोपपत्तिमाह— **गतिनियततेति।**

एवमनुमानभाष्यार्थं प्रदर्श्य तदवधृतेर्वाक्योत्थाप्यतत्सामग्रीद्वारकपरसम्बोधनफलावसायित्वात्तदुत्थापकवाक्यविषयविवादजनितसंशयनिरासे च तत्सम्भवात् तदर्थं तद्वाक्यविषयं तावदाह — **परार्थानुमानवाक्यस्येति।** ततः प्रतिज्ञायाः तद्वाक्यान्तर्भावः सिद्ध इत्याह — **अबाधितार्थ इति।** ननु साध्योक्तिरूपा प्रतिज्ञेति तज्ज्ञानार्था तज्ज्ञानस्य च सामग्रीमात्रालभ्यत्वादनर्थिकेति शङ्कां तदनङ्गीकारेण परिहरति—**न तु साध्यबोधनार्थेति।** हेतुदृष्टान्ता-

१. फलासि. क, ख. २. Omitted अनुमान. क.

सम्बन्धनियमार्थो दृष्टान्तः; एकदेशदर्शनार्थो हेतुः; एवं त्र्यवयवता। हेतुदृष्टान्तयोः पौर्वापर्ये न नियमः, नियमस्मृतिपूर्वके तत्परके वैकदेशदर्शनेऽनुमोत्पत्तेः। एवं प्रतिज्ञया सह हेतुदृष्टान्तयोर्न पौर्वापर्ये नियमः। प्रायेण प्रतिज्ञा च यदग्रे, तज्जिज्ञासोत्पादात्सुखमनुमोत्पत्त्यर्थम्, न तु सामग्रीत्वात्; यथा स्पष्टार्था—'यो यः स सः' इति वीप्सा, 'अग्निमानेव' इत्यवधारणा च। एवं च यत्तत्पदे अपि किञ्चित्स्पष्टार्थे। पूर्वोच्चारणस्वरसादपि लिङ्गमुद्देश्यरूपं लभ्यते। परत उच्चारणे यत उद्देश्यता। वाक्यं च—'पर्वतोऽग्निमान्,' 'यो यो धूमवान् सोऽग्निमान् महानसादिः,' 'धूमवांश्चायम्'

न्तर्भावोऽविवादसिद्ध इत्याह—सम्बन्धनियमार्थ इति। एतावतैव सामग्रीपूर्तेर्नावयवान्तरमुपेयमित्याह—एवं त्र्यवयवतेति। तत्र क्रमनियमाङ्गीकारश्चास्माभिर्नेष्यत इत्याह—हेतुदृष्टान्तयोरिति। ननु प्रतिज्ञाया अनियतक्रमत्वमयुक्तम्, पूर्वोक्तेः सर्वाभ्युपेतत्वादित्यत्राह—प्रायेण प्रतिज्ञेति। सामग्रीत्वेनास्माभिः पूर्वत्वं निषिध्यते, जिज्ञासोत्थानेनोपयोगो न निवार्यते वीप्सोक्तिरिव। स्पष्टार्थवीप्सायाः सौकर्यमात्रार्थतोक्त्यैव यत्तत्पदस्वरूपोक्तेरपि तत्कोटितयैवाङ्गीकार इत्याह—एवं च यत्तत्पदे अपीति। यत्तत्पदयोरुद्देश्यविधेयत्वोपदर्शकतया व्याप्तिधीकरत्वम्, विधेयस्योद्देश्यव्यापकतयैव स्वपदप्रतिपाद्यत्वात्। 'धूमवानग्निमान्'इति पूर्वोक्त्याप्युद्देश्यता प्रतीयत एव, पदक्रमानुवर्तित्वात् स्वतोऽन्वयप्रतीतेः। तेन तद्व्यञ्जकतया यत्तत्पदयोरपि तदुपयोग इति पूर्वप्रयोगलब्ध उद्देश्यत्वे तदनुक्तिर्न दोष इत्यर्थः। नन्वेवं पदमात्रलभ्यार्थसूचकत्वमात्रं यत्तत्पदयोः स्यादित्यव्ययवदनभिधायकत्वापत्तिरित्यत्राह—परत उच्चारण इति। यदोद्देश्यपदं परत्रोच्चार्यते विधेयपदं च पूर्वम्, तदा यच्छब्दादेवोद्देश्यत्वधीरिति नाव्ययसाम्यमित्यर्थः। तत्र दृष्टान्तस्य पूर्वप्रयोगे प्रयोगप्रकारमाह—वाक्यं च पर्वतोऽग्निमानिति। हेतुत्वार्थो विभक्त्यादिस्तदा न प्रयोज्यः, आकाङ्क्षान्तरपूरकतया तदा हेत्ववतारादित्यर्थः। संक्षेपोक्त्याश्रय-

१. Omitted स्मृति——नियमः. क
२. तदग्रे. क, ख.
३. Omitted इति. क, ख.

इति । संक्षेपपक्षे—[1]पर्वतोऽग्निमान् धूमवत्त्वात् महानसवदिति । धूमवत्त्वादित्युक्तेऽर्थात् सम्बन्धिनियतता धूमस्याभिप्रेतावगम्यते । एवं 'पर्वतोऽग्निमान्,' 'यो यो धूमवान् सोऽग्निमान्' इत्युक्तेऽर्थात् धूमवत्त्वादित्यभिप्रायधीः । एवमङ्गुल्यादिनिर्देशेऽभिप्रायधियानुमोत्पादसिद्धिः । एवमवाचकादिप्रयोगेऽप्यभिप्रायधिया; किन्तु योग्यवाक्याज्ञता वक्तृदोषः । पञ्चावयवता तार्किकोक्ता न मता । प्रतिज्ञाहेतुदृष्टान्तानन्तरम् 'धूमवांश्चायम्' इत्युपनयः 'तस्मादयमग्निमान्' इति [2]निगमः—द्वयं व्यर्थम्; 'धूमवत्त्वात्' इत्युक्तेः 'धूमवांश्चायम्' इति पुनरुक्तिः; 'तस्मादयमग्निमान्' इति च पुनरुक्तिः । वैधर्म्यदृष्टा[3]न्तं केचिदाहुः—'यत्राग्निर्नास्ति, तत्र धूमोऽपि [4]नास्त्येव' इत्येवम्; तदपि व्यर्थम्; साधर्म्यदृष्टान्तादेव नियततासिद्धेर्वि[5]पक्षे निवृत्तिरुक्तैव । सपक्षवृत्तिता [6]पक्षवृत्तिता च हेतूक्त्यैवोक्ता—इति त्रिरूपतया हेतुतासिद्धिः ।

णेन व्याप्त्युक्त्यभावे हेतुः पूर्वमित्याह—संक्षेपपक्ष इति । व्याप्त्यप्रतीतेस्तत्रानुमेयाप्रतीतिदोषं परिहरति—धूमवत्त्वादित्युक्त इति । हेतुत्वधीसामर्थ्याद्व्याप्तिविवक्षावगमात् संक्षेपोऽपि न दोष इत्यर्थः । संक्षेपपक्षे दृष्टान्तोक्त्याक्षेपसिद्धे हेत्वनुक्त्यापि क्वचिद्वाक्यपूर्तिरित्याह—एवमिति । अभिनयादिना हेतुबुद्ध्युत्पादेनापि क्वचिदनुमेयमित्यापादनमित्याह—एवमङ्गुल्येति । अतश्चावाचकोक्तावपि नानुत्पत्तितो निग्रहाङ्गीकारो न्यायशास्त्र इत्याह—एवमिति । नन्वनुमानविवेकप्रधानन्यायशास्त्रोक्तावयवान्तरानुक्तिः कस्मादित्यत्राह—पञ्चेति । तदनङ्गीकारे हेतुः—द्वयं व्यर्थमिति । प्रतिज्ञाहेतूक्त्यनधिगतवाच्याभावादित्यर्थः । न च व्याप्ततया हेतुप्रत्यभिज्ञार्थोपनयोक्तिरर्थवतीति वाच्यम्, उक्तहेतुत्वनयैव दृष्टान्तोक्त्या तदेकवाक्यत्वात् व्याप्त्युक्तेः व्याप्तिधीः सिद्धैवेत्यभिप्रायः । व्याप्तिस्मृतेरन्वयव्यतिरेकानुसन्धानलभ्यत्वाद्व्यतिरेकोपयोगिवैधर्म्यदृष्टान्तोऽपि प्रयोज्यत इति परमतमुपन्यस्य निष्फलत्वेनैव निरस्यति—वैधर्म्येति । साधनवदुद्देशेन साध्ययोग-

१. Omitted पर्वतो——गम्यते. क.
२. नियमः. क.
३. न्तं द्वितीयं केचित्. ख.
४. नास्ति तदपि. क, ख.
५. पक्षनिवृत्ति. क.
६. Omitted पक्षवृत्तिता. ख.

अथ वैधर्म्यदृष्टान्तेन सह विकल्पोऽस्तु । न ऋजुवक्रयोर्विकल्पः । न चोपायतापि वक्रस्य; न हि विपक्षनिवृत्तेरभावरूपायाः सपक्षेऽस्तित्वनियमहेतुता । न चानन्तविपक्षनिवृत्त्या नियमः सुगमः । पक्षहेतुदृष्टान्तदोषाश्च यथोक्तसाम¹ग्रीवैगुण्यमेव । वैगुण्यं सर्वं हेतोरेव, विवक्षया पक्षदृष्टान्तयोः । अतत्त्वदोषाश्छलजातिनिग्रहा विमतबोधोपायतयादृतास्तार्किकैः ॥

विधिबलात् साधर्म्यदृष्टान्तेनैव विवक्षितव्यावृत्तिरर्थोक्तेति व्यक्तमानर्थक्यमित्यर्थः । नन्वेवमपि विकल्पाश्रयणेनार्थवत्त्वं सुलभमिति शङ्कते—अथेति । परिहरति—न ऋजुवक्रयोरिति । साधर्म्यदृष्टान्तेन साक्षात्सम्बन्धनियमोक्तेरितरेण साधनप्रतीत्यन्यथानुपपत्तिर्धीव्यवधानकल्प्यत्वादतुल्ययोर्न विकल्प इत्यर्थः । वैधर्म्यदृष्टान्तस्यापि इतरवद्व्याप्तिधीसामर्थ्यव्यतिरेकद्वारेण परोक्तमभ्युपगम्य विकल्पो निवारितः । वस्तुतस्तत्सामर्थ्यमपि नास्तीत्याह—न चोपायतापीति । सपक्षवृत्तिसाध्यसाधकत्वं तावन्न विपक्षवृत्तिव्यावृत्तेर्व्यधिकरणत्वाद्युक्तम् । विपक्षनिवृत्तेश्च सम्बन्धदर्शनप्रसक्तनिरुपाधिकसम्बन्धावधारणप्रतिबन्धकाभावरूपायास्तदवधारणहेतुता न स्यात्, प्रतिबन्धकाभावस्य प्रागेव निरस्तत्वादित्यर्थः । विपक्षाणां चानन्तत्वात् सर्वनिवृत्तिरूपहेतुप्रसिद्धिश्चाशक्येति दूरनिरस्ता तद्धेतुका सम्बन्धनियमसिद्धिरित्याह—न चानन्तेति । वादादिव्यवहारे परिहार्यत्वेन पक्षादिदोषाश्च प्रपञ्चिता ग्रन्थान्तरे । तत्संग्रहमात्रं तन्मूलायत्तान्तरार्थमाह—पक्षेति । सामग्र्युक्त्यैव तद्वैकल्यकराः सुज्ञाना एवेत्यर्थः । ननु व्याप्तिमूला साध्यधीः व्याप्त्याश्रयहेतुतन्त्रेति तत्परिकरमात्रमन्यत्सर्वमिति दोषाश्च तस्यैव स्युः, कथमन्यस्येत्याशङ्क्य वस्तुतस्तदीयत्वेऽपि द्वारमात्रविवक्षयान्यसम्बन्धोक्तिरिति परिहरति—वैगुण्यं सर्वमिति । नन्वनुमानविवेकप्रकरणे तदुपयोगेन कथं तत्पृष्ठे छलादेर्ज्ञेयतयोक्तिर्न्यायशास्त्र इत्याशङ्क्य वादिनां परज्ञापनप्रवृत्तौ विमतापेक्षया तदुपायतास्त्येवेति तदुक्त्युपपत्तिरित्याह—अतत्त्वदोषेति ॥

इत्यनुमानवादः ॥

---

१. मग्रीवैगुण्यं सर्वम्. क. ख.

अथ शास्त्रवादः

"शास्त्रम्" प्रत्यक्षानुमानाधीनव्युत्पत्त्यपेक्षस्येदानीं लक्षणमुच्यते । शास्त्रमिति लक्ष्यं निर्दिष्टम्; लोके च यतः शब्दाच्छासनधीः, तच्छास्त्रं प्रसिद्धम् । शासनं च प्रेरणमभिमतम्, न च प्रेरणाधीः शब्दालम्बनाज्ज्ञानात् । कार्यज्ञानं[1] न प्रेरणाविषयम्; किन्तु शब्दाद्यत् ज्ञानं कार्यविषयम्, ततः प्रेरणाज्ञानं शास्त्ररूपम् । अतो[2] ज्ञानं शास्त्ररूपं लक्ष्यमिति समर्थपञ्चमीसमासाश्रयणम्

ननु लोकप्रसिद्धप्रमाणलक्षणे प्रक्रान्ते प्रमेयतोऽपि प्रसिद्धप्रमाणावसान एवातथाभूतशास्त्रलक्षणं वाच्यमिति शङ्कामपनयन् सङ्गतिमाह—प्रत्यक्षेति । व्युत्पत्त्यपेक्षशास्त्रप्रामाण्यार्थमेव तल्लक्षणावतार इत्यपेक्षितोऽक्स्यविच्छेद एव ग्राह्यः, न साद्दश्यविशेष इत्यर्थः । ननु शब्दविज्ञानादिति पञ्चमीसमासाश्रयणमयुक्तम्, "पञ्चमी भयेन" इति विशेषमात्रनिष्ठत्वात्तदनुशासनस्येत्याशङ्क्य तत्समर्थनार्थमाह—शास्त्रमिति । यदि शाब्दं लक्ष्यं स्यात्, तदा तदाश्रयणमयुक्तं स्यात्, शास्त्रं त्विह लक्ष्यमभिमतम् । ततः किमित्यत्राह—लोकेति । शासनात्मकधीहेतोः शब्दस्य शास्त्रपदार्थतया प्रसिद्धस्याविवेकमूलव्यभिचारशङ्कानिवृत्त्यर्थं लक्षणमुच्यते, नाप्रसिद्धस्वरूपनिर्धारणार्थमिति प्रसिद्धलक्ष्यानुसारीह लक्षणार्थो वर्णनीय इत्यर्थः । ततश्च किमित्यत्राह—न च प्रेरणेति । शब्दज्ञानादव्यवहितप्रेरणोत्पत्तिसिद्धौ न स्यात् पञ्चमीसमासाश्रयणम्, न तथोत्पत्तिरित्यर्थः । ननु 'ममेदं कर्तव्यम्' इति शब्दादेव धीरिति कथं तत्र प्रेरणानुत्पत्तिरित्यत्राह—कार्यज्ञानमिति । यद्यपि कार्यस्यैव प्रवृत्तावव्यवहितहेतुत्वात् तद्वाचिता लिङादेरिति तस्य चोदनार्थत्वमाश्रितम्; तथापि चोदनोत्थं कार्यज्ञानं नाव्यवहितप्रवृत्तिहेतुविषयम्, तस्याक्रियात्वेन स्वतः प्रवृत्त्यविषयत्वात्, तत्कारणं तु प्रेरणाज्ञानमापादितस्वकृतिसाध्यत्वसाधनचक्रव्यापिस्वकार्यत्वधीरूपमिति शास्त्रात्मिका धीर्व्यवहितैवेत्यर्थः । तेन पञ्चमीसमासोऽङ्गीकृत इत्याह—अतो ज्ञानं शास्त्ररूपमिति । नन्वेवमप्यनुशासनाभावात् अयु-

१. कार्यं न. क, ख.   २. Omitted. अतो ज्ञान शास्त्ररूपम्. क.

"पञ्चमी," "भयेन" इति योगविभागात् । सप्तमीसमासपक्षेऽपि कार्यधीव्यवहिते प्रेरणाधीहेतुत्वे न दोषः । "सप्तमी शौण्डैः" इत्याकृतिगणत्वाददोषः । कारकविशेषतयान्वयेऽस्मिन् सम्बन्धमात्रस्मृतषष्ठीसमासो नोक्तः । ननु कार्यधीरेव शाब्दी प्रमितिः, तत्परत्वाच्छब्दस्य ; न प्रेरणाधीः । मैवम् ; कार्यधीरेवं हि स्वसाधनाक्षेपरूपा प्रेरणपर्यन्तेति पर्यन्ते लक्षिते तावती कार्यधीरेव लक्षिता भवति । प्रेरणाधीहेतुतया च शब्दः शास्त्रं चोदना

त्कतेत्यत्राह—"पञ्चमी" "भयेन" इति योगविभागादिति । सामान्येनापि जघन्यतयानुशासनं व्याख्यातृसंमतमेवेत्यर्थः । शब्दविज्ञानस्य व्यवहितहेतुत्वाश्रयणेन सप्तमीसमासाश्रयणेनापि भाष्यगतिः सुकरेत्याह -सप्तमीसमासपक्षेऽपीति । ननु तत्रापि सामान्येनानुशासनाभावात् तुल्यैवानुपपत्तिरित्याशङ्क्य "सप्तमी शौण्डैः" इत्याकृतिगणत्वेनेष्टत्वान्नानुपपत्तिरिति परिहरति—"सप्तमी शौण्डैः" इतीति । ननु षष्ठीसमासः कस्मान्नोक्त इत्यत्राह—कारकविशेषतयेति । विशेषप्रतिपत्तेः स्ववाचिविभक्तिनियन्तृत्वात्तदितरविषयैव षष्ठी, शेषोद्देशेन विहितत्वादित्यर्थः । ननु शब्दतात्पर्यानुवर्ति शास्त्रं प्रमाणम्, न शास्त्रपदवृत्तिनिमित्तानुवृत्ति, कार्यनिष्ठं च तात्पर्यमिति न जघन्यसमासाश्रयणहेतुरस्तीति चोदयति—ननु कार्यधीरेवेति । परिहरति—मैवं कार्यधीरेवेति । यदि कार्यधीबाह्या प्रेरणाधीः स्यात्, तदा प्रेरणापेक्षं शास्त्रं नोपेयं स्यात्; कार्यबोधावसानात्मिका तु प्रेरणाधीरुक्ता, तेन कार्यतात्पर्यानुगुणमेव तन्मुखेन शास्त्रलक्षणं विवृतमित्यत्रापि कार्यधीरेव पर्यवसिता शास्त्रमुक्तेत्यर्थः । अनर्थकस्तर्हि ऋज्वर्थत्यागेन व्यवहितज्ञानापेक्षः समासविवरणप्रयास इत्यत्राह—प्रेरणाधीहेतुतयेति । सूत्रे चोदनापदसूत्रितप्रमाणं तत्पर्यायशास्त्रपदेनोपादाय लक्षणकरणात् पदद्वयवृत्तिनिमित्तप्रेरणाधीहेतुत्वं शब्दस्येह विवक्षितम्, न स्वार्थमात्रधीहेतुत्वमित्यभिप्रायानुपपत्तिसमाधानार्थः प्रयासो नान्यव्युदासार्थ इत्यर्थः ।

१. नरकार्यं. क, ख. २. Omitted हि. क.

चेति वृद्धप्रसिद्धिः समर्थिता भवतीति भावः । ननु लक्षणमतिव्यापि, 'वन्ध्यासुतो याति' इत्यतोऽपि शब्दाद्धीः शास्त्रं स्यात् । [1]अथाप्रेरणाधीरियमिति नातिव्याप्तिः, तर्हि 'वन्ध्यासुतं पश्य' इति प्रेरणाधीभ्रान्तिमूलापि शास्त्रं स्यात् । अनास्थया 'याति' इत्युदाहृतम् । मैवम्; उक्तं हि—पुंवाक्ये लिङ्गोपस्थितमानान्तरादर्थधीः, न शब्दादिति; लिङ्गाभासोत्थेयं धीः । एवं च पुंवाक्योत्था [2]सत्यापि धीर्न शाब्दी[3] । अनुवादधीस्त्वसन्निकृष्टपदाच्छाब्द्यपि न शास्त्रम् । ननु न सा मितिर्न स्मृतिरिति विधान्तरं स्यात् । मैवम्; मितिस्वभावेयमनपेक्षतांशमोषेण स्मृतिवद्धाता—[4]इति न लक्षिता, मितिकार्या-

यथाग्रन्थं लक्षणमाक्षिपति—ननु लक्षणमतिव्यापीति । तदभिप्रायाविष्करणार्थमाशङ्कते—अथाप्रेरणाधीरिति । असदर्थत्वमात्रमाक्षेपे विवक्षितम्, प्रदर्शनार्था वर्तमानोक्तिरित्यभिप्रायं विवृणोति तर्हि वन्ध्यासुतं पश्येतीति । समर्थयते—मैवम्; उक्तं हीति । पुंवाक्ये वक्तृज्ञानानुमानात् प्राग्वाक्यस्यानभिधायकत्वाच्छब्दविज्ञानपदेनैव व्यावृत्तिसिद्धेः नातिव्यापितेत्यर्थः । एवमसत्यार्थपुंवाक्यवत्याक्षेपसमाधानेनैव सत्यार्थपुंवाक्यजा धीः शब्दप्रमाणात्मिका किमितीतरवन्न लक्षितेत्यपि चोद्यमपास्तमित्याह—एवं च पुंवाक्योत्थेति । सानुमानलक्षणेनैव लक्षिता, शाब्दी तु न भवतीत्यभिप्रेत्य भाष्ये तत्परिहारेण शास्त्रलक्षणमेव कृतमिति न चोद्यावकाश इत्यर्थः । नन्वेवमप्यनुमानानन्तरं शाब्दधीरनिवार्येति लक्ष्यतापत्तिरित्याशङ्क्यानुवादत्वान्न शास्त्रमिति व्यावर्तितेत्याह—अनुवादधीस्त्विति । ननु तर्हि द्विविधैव धीरित्युपगमबाध इति चोदयति—ननु न सा मितिरिति । मैवम्; मितीति । परिहरति । कारणशक्त्यपेक्षया मितित्वेऽपि प्रवृत्त्यादिमितिकार्यनिष्ठव्यभिचारशङ्काहानार्थलक्षणफलमतत्कार्यतया नास्तीति मानलक्षणबहिष्ठता तस्याः, न

१. अथ प्रेरणा. क, ख.

२. Omitted सत्या. ख.

३. Added अन्तःसारविहीनाना वोधः केनोपजायते ।
मलयाचलसञ्जातो न वेणुश्चन्दनायते ॥ ख.

४. Omitted इति. क. ख.

दर्शनात्। अशासनाच्च न शास्त्रमुच्यते। एवंविधविवेकार्थमित्थं लक्षणं कृतम्। न त्वविशिष्टं विशिष्टस्य लक्षणमिति शङ्का, लक्षणस्यापि विशिष्टत्वात्; 'शब्दादसन्निकृष्टेऽर्थे धीः' इत्येवं लक्षणात्। एवं वेदवाक्यात् सम्यगवधृतवचनव्यक्तिकाद्धीर्लक्षिता। अनवधृततात्पर्याद्धर्माणां स्वरूपान्वयधीः विपरीतावधृततात्पर्यात् पूर्वपक्षधीः। पुंवाक्याद्धीर्निरस्ता, अर्थाप्रतिबन्धात्। बौद्धोक्तविसं-

मितित्वाभावादिति नाभ्युपगमहानिरित्यर्थः। ननु कार्यादर्शनात् पृथग्यत्नमात्रं वर्जनीयम्, "शब्दविज्ञानात्" इत्युक्तलक्षणं किमिति तदनुगतं न कृतमित्यत्राह— अशासनाच्चेति। लक्ष्यत्वेन विवक्षितं शास्त्रमिहेति तद्विलक्षणत्वात्तदनुगतं लक्षणं तद्विरोधादशक्यमित्यर्थः। नन्वनुवादो लक्षणास्पृष्ट एवेत्याह—एवंविधविवेकार्थमिति। बोध्यबोधकद्वयद्वारकं हीदं लक्षणमुक्तम्; बोध्यमात्रमुखं च लक्षणं लघु शक्यम्, तत्त्यागेन गुरूपादानात्कारणमुखेनानुवादधीः शास्त्रानन्तर्भूतापि शब्दप्रमाणतया संगृहीतेति ज्ञाप्यत इत्यर्थः। परैस्तु—शास्त्रप्रमाणं लक्षयितुमसमर्थमिदं लक्षणम्, शब्दमात्रमेव शक्नोतीति भाष्यदूषणमुद्भावितम्, तन्न शङ्कार्हमिति दूषयति—न त्वविशिष्टं विशिष्टस्येति। पुंवाक्यस्य वक्तृज्ञानलिङ्गत्वानभ्युपगमेनार्थाभिधायकत्वोपगमे हि शास्त्रलक्षणयोग्यविशेषहीनत्वं लक्षणस्य स्यात्, तदुपगमे तु "शब्दविज्ञानादसन्निकृष्टे" इत्येतद्द्वयमुभयावस्थपुंवाक्यजव्यवच्छेदसमर्थत्वाद्विवक्षितं शास्त्रमेव लक्षयेदिति नासमर्थमिदमित्यर्थः। तथापि वेदोत्थभ्रान्तावतिव्याप्तिरिति शङ्कां शब्दविज्ञानादिति विशब्देनापाकृतां दर्शयन् उपसंहारमुखेन लक्ष्योक्तविज्ञानपदार्थं विवृणोति—एवं वेदवाक्यादिति। व्यावर्त्यविशेषमाह— अनवधृततात्पर्यादिति। ननु सापि धीः शब्दोत्थेति न व्यावर्त्या, बाधकाभावादित्याशङ्क्य तत्र हेतुमाह—अर्थेति। व्युत्पत्तिसिद्धशक्तिमात्रापेक्षया शब्दजत्वभानेऽपि तात्पर्याभावादर्थप्रमितिकरत्वं तत्र शब्दस्य नास्ति; पुंवाक्येऽपि पुमभिप्रायानपेक्षोऽर्थप्रतिबन्धः शब्दस्य नास्तीति व्यावर्त्योक्तेत्यर्थः। नन्वर्थाप्रतिबन्धः स्वाभाविक एव शास्त्रादिषूक्तो बौद्धैर्न विषयविशेषनिष्ठः, विपक्षे बाधकाभावादित्यर्थविसंवादि तदुत्थज्ञानमिति तच्छङ्कानिवृत्त्यर्थमाह—बौद्धोक्तेति। क्वचिद्व्यभि-

१. च्यत इति। क, ख.

वादित्वं च शास्त्रादीनां निरासानर्हम्, स्वतः प्रामाण्यात् परतो[1] विसंवादाभावाच्च; लक्षणग्रन्थोपयोगि तत्र तत्र स्थितत्वान्नोच्यते । "शब्दविज्ञानात्" इत्यस्योपयुक्ताः[2] शब्दार्थसम्बन्धव्युत्पत्तयः; "असन्निकृष्टे" इत्यस्य सपरिकरापूर्वस्थितिः; "शास्त्रम्" इत्यस्य शास्त्रभेदादीति ॥

चारसंप्रतिपत्तौ हि तदापादनं पृथग्यत्ननिवार्यं मानान्तरैकविषयत्वेन तत्संवादापेक्षत्वे वा, तदुभयाभावान्न तन्निरासार्हमित्यर्थः । व्यभिचारशङ्कानिवृत्तिर्लक्षणप्रयोजनमिति शास्त्रादावनुक्तमपि प्रत्यक्षोक्तमेव सर्वार्थं स्यादित्याह—लक्षणग्रन्थोपयोगीति । प्रकरणोक्तप्रपञ्चस्य लक्षणग्रन्थशेषतां विभज्याह—शब्दविज्ञानादित्यस्येति ॥

इति शास्त्रवादः ॥

---

१. परतोऽपि सं. क, ख.

२. शब्दज्ञानस्योप. क.

अथ उपमानवादः

"उपमानम्" असन्निकृष्टार्थशास्त्रानन्तरमसन्निकृष्टार्थमुपमानं[1] लक्ष्यते। लक्षणे सादृश्यमुक्तं न तद्द्रव्यम्, गुणकर्मणोरप्याश्रितत्वात्। अत एव च न गुणः, न च कर्म। न सामान्यम्, अननुवृत्तेः। न समवायः, असम्बन्धत्वात्। विशेषपदार्थस्तु न मानार्हः; स्थूलकार्यगम्यं हि परमाणूनां पृथक्त्वम्; स्थूलं हि द्व्यणुकादिक्रमेण; द्व्यणुकमणुद्वयात्; भेदे च

"उपमानम्।" ननु बहुविषयत्वादर्थापत्तिरुपमानात्पूर्वं धीस्थेति कुतस्तदतिक्रमेण पूर्वमुपमानलक्षणावतार इत्यत्राह—असन्निकृष्टार्थेति। शास्त्रप्रमाणप्रयोजकत्वेनासन्निकृष्टविषयत्व उक्ते तत्प्रयुक्तमेवोपमानमपीति तदुत्थापितं तदेवानन्तरं युक्तमित्यर्थः। कथमसन्निकृष्टार्थत्वम्, ततश्च कथं मानान्तरत्वमित्येतत्साधनार्थं लक्षणग्रन्थे बुध्युत्पादकत्वेनोक्तं सादृश्यमनूद्य तस्य द्रव्याद्यनन्तर्भावं तावदाह—लक्षणे सादृश्यमुक्तमिति। 'सदृशम्' इति तावदैन्द्रियकं विज्ञानं द्रव्यविषयं प्रसिद्धम्, तद्विशेषणं च सादृश्यम्, तच्च नावयवादिद्रव्यात्मकम्, गन्धरसगत्यादावपि सादृश्यबुद्धिविशेषात् द्रव्यस्य च तदाश्रयत्वायोगात् गुणकर्मता च तत एव निरस्तेत्यर्थः। सामान्यसमवायरूपता च तत्प्रयोजकरूपाभावान्नास्तीत्याह—न सामान्यमिति। विशेषात्मकता तु न शङ्कार्हा, स्वरूपासिद्धेरित्याह—विशेषपदार्थस्त्विति। स्वरूपासिद्धिहेतुं प्रकरणोक्तं तावदाह—स्थूलकार्यगम्यं हीति। अनेन स्थूलकार्यनिष्पत्तिलिङ्गानुमेयत्वं विशेषस्य पराभ्युपगतं पृथक्त्वगुणेनैव तदुपपत्त्युक्त्या दूषितम्। तदनुमानप्रकारमाह—स्थूलं हि द्व्यणुकादिक्रमेणेति। द्व्यणुकारम्भकाणुद्वयभेदोऽन्योन्यव्यावर्तकधर्मयुक्तः, भेदत्वाच्छुक्लकृष्णयोर्यथा। न चान्योन्यव्यावृत्तसामान्ययोगस्तादृशगुणयोगो वा तत्र शङ्कार्हः, भिन्नजातीययोः सहारम्भकत्वाभावाद्विरुद्धगुणकानामपि तन्नाङ्गीक्रियते। तदङ्गीकारेऽप्येकगुणकयोरेव पक्षीकृतत्वान्न दोषः। न च गुणव्यक्तिभेदमात्रं व्यावर्तकम्; शुक्लधिया हि कृष्णा-

१. मान मुच्यते. क.

द्वयम्; भेदश्च विशेषयोगादिति विशेषानुमा; भेदस्तु पृथक्त्वात् दृष्ट इति स्थूलात्पृथक्त्वानुमेत्युक्तम्; स्थूलकार्योन्नेयं पृथक्त्वम्; तदधिकस्तु विशेषो न मानार्हः; अथ पृथक्त्वहेतुतया तदनुमा, तन्न, नित्यत्वात् परमाणुपृथक्त्वस्य; अथ भेदकधर्मनियतात् पृथक्त्वात्तदनुमा, तन्न, भेदकधर्मासिद्धेः स्वरूपत एव वस्तूनां भेदप्रसाधनात्; एवं योगिप्रत्यभिज्ञयापि भेदकधर्मासिद्धिः; असिद्धा च योगिप्रत्यभिज्ञा—इति सादृश्यं धीसिद्धं पदार्थान्तरम्। तत्र यदपि परोक्तम्—गुणावयवकर्मसामान्यानि तद्योगो वा जात्यन्तरस्य सादृश्यमिति—जात्यन्तरस्येति प्रायिकम्, यमलयोरपि दर्शनादिति, तत्प्रत्युक्तम्; न सामान्यम्, अननुवृत्तत्वात्; न योगः, असम्बन्ध-

दिभ्य एव व्यावृत्तिः स्यात्, न शुक्लान्तरादिति सामान्यास्पृष्टात्यन्तव्यावृत्तधर्मयोगः प्रतिपरमाण्वनुमेय इति विशेषपदार्थानुमानमुक्तम्, तद्दूषणमाह—भेदस्तु पृथक्त्वादिति। व्यावर्तकधर्मयोगः पृथक्त्वगुणाङ्गीकारेणैव सिद्ध इति न तदधिकविशेषसाधनसामर्थ्यमनुमानस्येत्यर्थः। न च सामान्यवत्तया पृथक्त्वगुणस्य व्यावर्तकत्वासामर्थ्यम्, पृथक्त्वेऽपि सामान्यासिद्धेरिति भावः। ननु पृथक्त्वस्यापि धर्मान्तरापेक्षत्वान्न तदपसार्यनुमानमिति शङ्कते—अथ पृथक्त्वहेतुतयेति। दूषयति—तन्न नित्यत्वादिति। ननु नोत्पादकतया तदपेक्षकत्वमुक्तम्, तद्व्याप्तता-मात्रेणेति शङ्कते—अथ भेदकधर्मनियतादिति। दूषयति—तन्न भेदकधर्मासिद्धेरिति। धर्माणामप्यन्योन्यं भेदासिद्धेः भेदकापेक्षत्वेऽनवस्थापत्तेः धर्माणां तदनपेक्षत्वे धर्मिणामपि स्वतस्तदपेक्षा नास्ति सादृश्यादिप्रतिबन्धात् क्वचित्प्रातिस्विकधर्मावगम्यत्वेऽपीति न विशेषाख्यवस्त्वन्तरानुमानसिद्धिरित्यर्थः। तुल्यजातिगुणकपरमाणुषु योगिनामन्योन्यव्यावृत्तरूपेण प्रत्यभिज्ञाप्यस्माभिरनुमिता व्यावर्तकधर्मविषया प्रमाणमित्युपगमोऽप्ययुक्त इत्याह—एवं योगिप्रत्यभिज्ञेति। भेदस्य धर्मान्तरानपेक्षतोक्तैवेत्यर्थः। तदसिद्धिं चाह—असिद्धा चेति। प्रासङ्गिकादपेत्य प्रकृतमुपसंहरति—इति सादृश्यं धीसिद्धं पदार्थान्तरमिति। परोक्तमप्येतेनैवापास्तमित्याह—तत्र यदपीति। तदेव विवृणोति—न सामान्यमित्यादिना। तदन्यत्वं

१. रिति दर्श क. ख.

त्वात्; 'तद्वत्' इति हि तद्धीः; न तु 'तत्' इति 'सम्बन्धः' इति वा। किञ्च सामान्ययोगयोर्गुणादिवर्तिता अबहुता च; सादृश्यं गुणादिमद्वर्ति[१] बहु चेति भेदः। गुणादिसामान्यं ह्येकार्थसमवेतसमवायात् गुणादिमद्योगि; सादृश्यं तु तद्वतं धीस्थमिति भेदः। सामान्यान्याश्रयभेदेऽपि तान्येव; सादृश्यं तु न तथेति भेदः। सादृश्यं हि प्रत्याश्रयं भिन्नम्, न संयोगादिवदेकम्; 'सदृशम्' इति प्रत्येकं धीः प्रत्येकं भिन्नविषया; यापि 'सदृशौ द्वौ' इति धीः, सा सादृश्यद्वयधीपूर्विका। एकधीस्थयोरपि हि प्रतियोगिस्वरूप[२]प्रतिसन्धानापेक्षा प्रतियोग्यन्तरे सादृश्यधीः; संयोगिनोरेकधीस्थयोस्तु संयोगालिङ्गितयोरेव धीरित्येकः संयोगः; सादृश्यमनेकमन्योन्यनियतं च धीसिद्धं

विधान्तरेणाह—किंचेति। गुणावयवकर्मसामान्यानि स्वाश्रयमात्रावच्छेदकानि तद्विशेष्यावच्छेदे नानाभूताश्रयव्यवधानेनैव स्वानानात्वाहानेनैव चावच्छेदकानि यावदाश्रयं भेदहीनानि च भान्तीति तद्विपरीतस्वभावसादृश्यात्मकतानर्हाणीत्यर्थः। ननु सादृश्यस्यापि यावदाश्रयं भेदोऽसिद्धः, संयोगादितुल्यत्वभानात्; तत्रापि हि 'अनेनेदं संयुक्तम्' इत्यपि धीः 'संयुक्तौ' इत्यपीति साम्यमित्याशङ्क्य भेदमुपपादयति—सादृश्यं हीति। 'अनेनेदं संयुक्तम्' इति व्यपदेशेऽपि संयोगिद्वयदृष्टावेव तद्दृष्टिः, नान्यतरदृष्टौ; सादृश्यदृष्टिस्तु प्रतियोगिस्मृतिमात्रेणैकदृष्टयैव भवतीति प्रत्याश्रयं भिन्नविषयेत्यवधारणात्सहदृष्टावपि सादृश्यद्वयदृष्ट्यधीनैव 'सदृशौ' इति धीरित्युपमेयमित्यर्थः। ननु सादृश्यभेदे धर्मिप्रतियोगिभावेन विलक्षणैव द्वयोर्धीरुपेयेति 'सदृशौ' इति तुल्यतानुभवविरोधः स्यादित्यत्राह—एकधीस्थयोरपि हीति। प्रतियोगित्वं न स्वरूपातिरिक्तरूपभानापेक्षमित्येकधीस्थयोरन्योन्यप्रतियोगिकैकैकाश्रयसादृश्यद्वयविशिष्टतया 'सदृशौ' इति तुल्यानुभवो नानुपपन्न इत्यर्थः। नन्वेवम् 'संयुक्तौ' इत्यपि धीस्तथैव नेत्यत्राह—संयोगिनोरिति। सादृश्येऽन्यतरदर्शन एव सादृश्यदर्शनबलादेवमाश्रितम्; संयोगे तु तदभावाद्यक्तमेवैकत्वम्; भेदश्चेतरत्र व्यक्तः, भेदेऽप्यन्योन्यनियतत्वात्संयोगवत् सहापि दर्शनसम्भवात् 'सदृशौ' इति संयोगदर्शनसाम्यमात्रं भवतीत्यर्थः। नन्वेवं गुण-

१. मद्वर्त्यबहु. क, ख. २. स्वरूप प्रति. क. ख.

पदार्थान्तरम् । तच्च प्रीतिकरत्वादिसामान्यादेः गुणगतमनुमेयम्, कारकसामान्यादेः कर्मगतमनुमेयम्; प्रत्यक्षत्वोपगमे हि संयुक्तसमवेतसमवायादपीन्द्रियशक्तिकल्पनापत्तिः ।

नन्वेवं सादृश्यात् प्रत्यक्षात् परोक्षद्रव्यगतमनुमेयम्, नोपमानमेयं स्यात् । मैवम्; भिन्नधर्मिधर्मभूताविह गम्यगमकौ; आद्यदर्शन एव चेह धीः; अनुमाने तु एकधर्मिधर्मता ज्ञातसम्बन्धता च; न ज्ञायमानसम्बन्धता, निरुपाधिकत्वविपक्षव्यतिरेकित्वयोरसकृद्दर्शनाधीनत्वात्; न चेह

कर्मगतसादृश्यधीः किन्निमित्तेत्यत्राह — तच्च प्रीतिकरत्वादिति । प्रीत्यर्था तावत्सर्वा प्रवृत्तिः, दुःखनिवृत्त्यर्था वा, तत्र चन्दनादिविशेषनिष्ठा प्रवृत्तिस्तत्तत्साध्यानुभूत प्रीतिविशेषार्थैव, अन्यथा विशेषव्यवस्थानुपपत्तेः तेन प्रीतिविशेषाणां साधनविशेषाणा चान्योन्यनियतत्वं प्रवर्तमानैरवधारितमित्यास्थेयम् । ततश्चन्दनगन्धसाध्यावधारितप्रीतेरन्यगन्धाघ्राणजत्वानुभवे चन्दनगन्धसदृशत्वं तस्यानुमेयम् । पुत्रादिदर्शनजप्रीतेस्तत्सदृशदर्शनोत्थत्वदर्शनात् । तथा दुर्गन्धविशेषनियतदुःखविशेषस्यान्यगन्धजत्वदर्शनेऽपि तत्सादृश्यमनुमेयम् । शत्रुसदृशदर्शनदुःखस्य दृष्टत्वात् । एवं रसादिगुणेऽपि सादृश्यानुमानमुन्नेयम् । सिद्धे च प्रीत्यप्रीतिविशेषकरत्वसामान्यानुमिते गुणसादृश्ये प्रीत्याद्यनुत्पत्तिविषयेऽपि तत्तद्गुणविशेषवृत्तिलिङ्गानुमेयतापि स्यात् । कर्मगतसादृश्यं त्वेकरूपैकप्रकारव्यापारितकारकैर्निरोत्पादितचित्रपटादीनां सादृश्यदर्शनात्तद्विधकारकोत्पाद्यकर्मस्वपि तदनुमानात् तत्साध्यफलैकरूप्यलिङ्गाच्च सिद्धमित्यर्थः । नन्विन्द्रियव्यापारानन्तरधीबलात्प्रत्यक्षत्वमेव तत्सादृश्यस्यापि कुतो नोपेयत इत्यत्राह—प्रत्यक्षत्वोपगमे हीति । अनन्यथासिद्धकार्यबलेनैव[1] सम्बन्धान्तरापेक्षधीशक्तिरिन्द्रियाणामुपेया, न प्रसिद्धशक्तिकलिङ्गगम्यत्वसम्भवेऽपीत्यर्थः ।

नन्वेवमुपमानप्रमाणमपि नोपेयम्, तन्मेयस्यापि लिङ्गगम्यत्वसम्भवादिति चोदयति—नन्वेवं सादृश्यात् प्रत्यक्षादिति । तत्सामर्थ्यसिद्ध्या परिहरति—मैवमिति । यद्यपि सादृश्यलिङ्गापेक्षयानुमासामर्थ्यसिद्धिः, तथाप्यवयवसामान्यस्य

१. द्रव्यसादृश्यम. ख.

सम्बन्धः। ननु सदृशमवयवसामान्यबहुलभाजं पश्यन् 'यस्तद्वान् स तत्सदृशः' इत्यवधारयन् 'स्मृतोऽपि गौस्तद्वांस्तत्सदृशः' इत्यवैति ; तद्वत्त्वतत्सदृशत्वयोरेकधर्मिधर्मता एकार्थसमवेतसमवायसम्बन्धनियतता चेत्यनुमैव। मैवम् ; सम्बन्धनियमस्मृतिरनुमानाङ्गम्, न तदवधारणमेव। अत एव निरुपाधिकत्वविपक्षव्यावृत्त्योरसकृद्दर्शनाधीनत्वमुक्तम्। अतो हेतुभेदान्मानान्तरमुपमा। यत्तु नैयायिकोक्तम्—'यथा गौस्तथा गवयः' इत्येवं श्रुतातिदेशवाक्यस्य वने गवयं पश्यतः 'अयं स गवयः' इत्युपमानम्, तन्न ; 'गोसदृशो गवयः' इत्याद्या धीर्वाक्यप्रभवा। यापि वनगते गवये तद्गते च गोसादृश्ये धीः, सा सप्रत्यभिज्ञं प्रत्यक्षम्। यापि तस्य गवयशब्दवाच्यताधीः, सा गवयशब्दप्रयोगादनुमा ; वने संज्ञिनमुपलभ्य 'अस्येयं संज्ञा' इति धीः स्मृतिरिति नोपमानावकाशः। लक्षणेन च सादृश्याभासात्

लिङ्गत्वं न सामग्र्यसम्भवहतमिति चोदयति—ननु सदृशमवयवसामान्येति। परिहरति—मैवं सम्बन्धिनियमस्मृतिरिति। सकृद्दर्शनादेव निरुपाधिकसम्बन्धस्वरूपमात्रसिद्धावपि निरुपाधिकत्वनिश्चयस्तदा नास्ति, तन्निश्चयाधीनविपक्षव्यावृत्तिश्च न निश्चिता, संशयहेतोरनपास्तत्वात्—इत्यनुमानसामग्र्यसिद्धिस्तत्पक्षेऽपि तुल्येति सादृश्यदर्शनात्मकहेत्वन्तरोत्थमुपमानं मानान्तरमेवेत्यर्थः। ननु न्यायवित्परिगृहीतोपमानत्यागे किं निमित्तमिति शङ्कां तदसम्भवप्रदर्शनेन निवर्तयति—यत्तु नैयायिकोक्तमिति। गवये गोधर्मातिदेशकेन वाक्येन यत् गोसादृश्यं विवक्षितं गवयस्थं तद्धीस्तावद्वाक्यजेति न तत्र मानान्तरसम्भवः। तदूर्ध्वम् 'इदं तद्वाक्योक्तम्' इति ज्ञानान्तरमपि वाक्यजज्ञानसंस्कारसहितेन्द्रियजमिति न मानान्तरापेक्षम्। तस्य गवयशब्दवाच्यता न प्रत्यक्षार्हेति सा मानान्तरार्हेत्यपि न शङ्कनीयम्। वाक्यस्य सादृश्यपरतया वाच्यत्वानर्पकत्वेऽपि सादृश्याश्रयविषयप्रयोगलिङ्गेन प्रागेव तद्वाच्यतानुमितेति न मानान्तरापेक्षा। वाक्यस्यैव शब्दार्थनिर्धारणार्थत्वे तु तद्विषयमानान्तरशङ्कापि नेति प्रयोगानुमेयतैवोक्ता। ननूभयथापि प्रयोगानन्तरमेव

१. Omitted बहुल. ख.
२. सदृशयो. क, ख.
३. तत्र सम्बन्ध. क. ख.
४. Omitted अत एव. क. ख.

सादृश्यान्तरे धीर्नोपमेत्युक्तम्, यथा हि पलालकूटे हस्तिसादृश्यं ज्ञात्वा 'एतत्सादृश्यं हस्तिनि' इति धीः, भूयोऽवयवसामान्यबाहुल्यभ्रमात् सादृश्यभ्रमः। अत एव सन्निधौ प्रबलालोके च बाधधीः। स्तोकसाधर्म्यात् सादृश्यव्यवहारस्तु कवीनां व्यवहारमात्रम्॥

शब्दार्थसम्बन्धोऽशक्यावगमः, सादृश्यस्यावाच्यत्वाद्वाच्यस्य चासिद्धत्वादिति कथं मानान्तरासम्भवः? उच्यते—सादृश्यं हीह लक्षणतयोपयोगीत्यविवादम्। ततश्च स्वलक्ष्यं परोक्षतया स्वयमेव तदुपस्थापयेदित्यनन्तरमेव वाच्यवाचकधीः स्यात्। आपरोक्ष्यमात्रं वनगमनापेक्षम्, न तद्वाच्यत्वज्ञानोपयोगीति तद्गतस्य 'अस्येयं संज्ञा' इति धीः स्मृतिरिति युक्तमेवोक्तम्। लक्षणेन चेत्यादिसुगमम्॥

इत्युपमानवादः

१, Omitted सामान्य. क.

अथार्थापत्तिवादः

" अर्थापत्तिः " अनुमानाद्भिन्नेयमर्थापत्तिरविशिष्टा सतीदानीं लक्ष्यते। उपलब्धोऽर्थः कल्पनां विना अर्थान्तरं सन्देहयन्नर्थं कल्पयति, सन्देहित एव वा कल्पयति इति द्विधा लक्षणम्। परोक्तम् उपलब्ध एव सन्दिग्धः कल्पयतीति। जीवतो गृहाभावः सन्दिग्धः, न तु जीवनं सन्देहितं कल्पयतीत्यर्थः। इयमिह स्थितिः—यः सदा गृह एव दृष्टो गणितागमादेः कश्चित्कालं तज्जीवनं निश्चितम्, तदन्तर्गत एव क्षणे तस्य गृहेऽदर्शनात् पूर्वनिरूपितगृहदेशत्वधर्महानाज्जीवनं सन्देहं नीतं बहिर्देशत्वकल्पनया पुनर्निश्चितम्;

"अर्थापत्तिरपि"। ननु व्याप्तिग्रहोपजीविन्यर्थापत्तिः किमित्यनुमानानन्तर्यानादरेणेदानीं लक्ष्यत इति शङ्कां निरस्यन् सङ्गतिमाह—अनुमानाद्भिन्नेयमिति। लक्षितादन्यत्वधीतोऽनन्तरलक्ष्यत्वप्राप्तिः; न चार्थापत्तेरन्यत्वं वस्तुतः सदपि व्यक्तमिति तदनुसन्धानविलम्बिता लक्ष्यत्वापत्तिरिति शास्त्रस्यैव तदापत्तिर्प्रागिति तदनुसन्धानापेक्षयेदानीं परिशेषाद्धीस्था लक्ष्यत इति न स्थानातिक्रम इत्यर्थः। तदन्यत्वं व्यञ्जयितुं प्रकरणपञ्चिकयोर्दर्शितं लक्षणं संगृह्यानुवदति — उपलब्धोऽर्थ इति। भाष्यस्थदृष्टश्रुतपदार्पितोऽर्थ उपलब्ध उक्तः; सोऽर्थान्तरानुपपत्त्यापादकतया विवक्षितोऽर्थान्तरकल्पकः स्वमते; परमते स एवानुपपन्नो विवक्षित इति विशेषमाह द्वयाभ्युपगतमानानन्तरसाधकत्वशक्तिविवेकार्थम्—परोक्तमुपलब्ध एवेति। तदभिप्रायमाह — जीवतो गृहाभाव इति। तत्र कस्य सन्देहार्हतेति विवेक्तुं सन्देहहेतुज्ञापकतया विषयमेव शोधयति—इयमिहेति। यस्य जीवनं गणितशास्त्रादिनिश्चितं गृहाधारतया च तन्निश्चितं गमनाशक्त्यादिना तत्रैव सदा दर्शनात् तस्य प्राङ्निश्चितमपि जीवनं तद्व्यापकावधारितदेशयोगबाधात् सन्देहार्हं तद्देशयोगस्योपाध्युन्नयनेनाव्यापकत्वपरामर्शात् बहिर्देशवर्तितया पुनर्निश्चयार्हं चेति स्वपक्षस्तावन्निर्वाह्यान्तः। परपक्षे सन्देहो दुरुपपाद इत्याह—

१. Omitted सन्दे——कल्पयति. क.
२. जीवतो वा गृहा. क. ख,
३. काल जीवनम्. क.
४. देशकल्प. क.

त्[1] न सन्देहमर्हति; गृहदेशता त्वौत्सर्गिकी आगमनिश्चयानुरोधात् बाधमर्हति। बहिर्भावधीस्तु जीवतो[2] गृहादावदर्शनाद्वा जीवनादेव वा गृहादर्शनात् सन्दिग्धा; विवक्षाभेदात् विधाद्वयम्; सत्यप्यनुमानसामग्री नास्यां कल्पनायां व्यापृता। इत्थमपि लोके मित्युत्पत्तेर्नानुयोगः। न च सन्देहान्तर्भावविधा; कारणानुमाने कार्यं हि कल्प्यकारणाकल्पनयैव सन्दिग्धम्; जीवनं तु

स्वपक्षेऽपि गृहनियततयावधारितजीवनस्य कथं तद्विपरीतावधारणमित्यत्राह— गृहदेशता त्विति। तदर्थस्तूक्त एव। ननु गृहनियततानिश्चयबाधानन्तरं बहिःस्थितिरनुमानार्हेति कथं मानान्तरसिद्धिरित्यत्राह — बहिर्भावधीस्त्विति। सामग्र्यन्तरजा तद्धीरिति मानान्तरसिद्धिरित्यर्थः। ननु विधाद्वयोक्तिर्न घटते, हेतुभेदाभावादित्यत्राह — विवक्षाभेदादिति। गृहाभावजीवनयोर्गुणप्रधानभाव-विवक्षाभेदमात्रात् द्वयोक्तिर्न सामग्रीभेदाभिप्रायेणेत्यर्थः। नन्वनुमानसामग्र्यां सत्यां कुतः सामग्र्यन्तरजत्वाङ्गीकार इत्यत्राह — सत्यप्यनुमानसामग्रीति। गृहाधारत्वव्याप्तिबाधानन्तरजीवनसन्देहनिवृत्तिर्बहिर्देशनिर्णयान्तैव, नानाधार-जीवननिश्चयव्यवहितस्तन्निश्चय इति बहिःसम्बन्धकल्पनासमकालैवानुमानसाम-ग्रीति तज्जन्यत्वायोगान्मानान्तराङ्गीकार इत्यर्थः। ननु गमकविषयः सन्देहः तस्य गमकत्वशक्तिप्रतिबन्धक इति प्रसिद्धमेवानुमाने, युक्तं च तत्; स्वयंसन्दिग्धस्य स्वोपपादककल्पकत्वेऽतिप्रसङ्गः स्यादित्यत्राह—इत्थमपि लोक इति। इतरसन्दे-हानां तत्प्रतिबन्धकत्वेऽप्युक्तविधस्य तत्साधकत्वं मित्युत्पत्तिदर्शनादेवेतरमानवदु-पेयमिति न चोद्यावकाश इत्यर्थः। ननु स्वमाननिश्चिते वस्तुन्यन्यगतः संशयो मिति-हेतुर्मानान्तरत्वहेतुश्चेत् कार्यलिङ्गे कारणानुमानेऽपि तदापत्तिरित्याशङ्क्य ततोऽपि प्रकृतस्य विशेषमाह—न च सन्देहान्तर्भावविधेति। न हि प्रकृता विधा तत्रास्ति, गम्यव्यतिरिक्तव्यापकाभावधीर्जीवनसंशयकरी, न सा कारणानुमाने; तदसिद्धौ कार्याभावप्रसङ्गमात्रमिति न साम्यमित्यर्थः। तत्संशयनिवृत्तिफलार्थजिज्ञासाप्रयुक्त-मनोवधानलभ्या च तदुत्था मितिरिति गमकाभिमतजीवनमेव गम्यम्, तत्प्रकार-मात्रतया बहिर्देशयोगस्य गम्यता; न तथा कार्यस्य गम्यता, संशयस्यापि कारण-

१. Omitted न. क, ख.
२. जीवत्वे गृहा. क.

गृहाभावदर्शनात् कल्प्याकल्पनसहितात्सन्दिग्धम्; गम्यं चेदं बहिर्वर्तितया। गमकपक्षेऽप्यन्यापादितः सन्देहः[1]; कार्ये तु कल्प्याकल्पनमात्रान्नीतसन्देहमिति भेदः। कार्यानुमानादपि परोक्तो भेदः—जीवनं देशव्याप्तम्; अव्याप्त एव हि गृहाभावोऽनुपपद्यमानतया[2] बहिर्भावं गमयतीति। तन्न; गृहाभावो हि[3] निश्चित एवेत्युक्तम्; जीवतो हि गृहाभावोऽपि बहिर्भावव्याप्त एव गमकः; शुद्धस्त्वगमक एव, अव्याप्तत्वात्। अस्तु वा जीवतो गृहाभावस्य[4] बहिर्भावं विनानुपपत्तिः; सा तु व्याप्तित एवेत्यनुमापत्तिः। साध्येन हेतुव्याप्तेः साध्याभावो हेत्वभावव्याप्त इति साध्याभावे हेत्वभावापत्ति-

जिज्ञासापाद्यत्वादिति विशेषान्तरमाह—गम्यं चेदमिति। ननु गमकमात्रमित्यपि पक्षोऽस्तीत्याशङ्क्य तत्रापि पूर्वोक्तो विशेषोऽनपाय्येवेत्याह—गमकपक्षेऽपीति। एवं स्वमतेन मानान्तरत्वमुपपाद्य परमते तदसम्भवं दर्शयितुं तदुक्तप्रकारमाह—कार्यानुमानादपीति। व्याप्तेः सम्बन्धात्मतोपगमेऽपि सम्बन्धान्तरोपजीविन्येव सेति जीवनमेव बहिर्देशव्याप्त्यर्हम्, न गृहाभावः, तच्च देशमात्रव्याप्तम्, न बहिर्देशविशेषनियतमिति न लिङ्गतार्हम्, न चैवं मित्युत्पत्त्यसिद्धिः;बहिर्वृत्त्यभावे गृहाभावस्यानुपपत्तिः, देशयोगं विना जीवनानुपपत्तेः—इत्यनुपपत्तिज्ञानायैव बहिर्वृत्त्यवगमादित्यर्थः। तदसम्भवमाह—तन्न गृहाभावो हीति। न तावद्गृहाभावस्यानुपपत्तिः, तत्स्थितेः प्रत्यक्षार्हत्वात्तन्निवृत्तिमात्रेणैव तदभावनिश्चयात्, देशयोगासिद्धिनिमित्तस्तु संशयो जीवनविषय एवेत्यभिप्रायः। गृहाभावस्य सम्बन्धाभावाद्व्याप्त्यसिद्धेः अनुमानासम्भवो नास्तीत्याह—जीवतो हीति। व्यभिचारस्तावज्जीवनविशेषणयोगात् परिहृतः, केवलस्य ह्यगमकत्वं संप्रतिपन्नमेव तद्व्याप्त्यभावकृतम्, अनुपपत्तिभावाभावव्यवस्थाया व्याप्तिभावाभावैकहेतुत्वादिति व्याप्त्यपेक्षाया अवश्याश्रयणीयत्वाल्लिङ्गतैव स्यादित्यर्थः। गृहाभावस्य परोपगतानुपपत्तिरेव व्याप्तिमूलेत्यनुमानत्वापादिकेति तदङ्गीकारेणाह—अस्तु वा जीवत इति। यादृशं हि गृहगतस्य द्रष्टुस्तदर्शनभावनिश्चयं प्रति दार्ढ्यम्, न तादृशं जीवननिश्चयं प्रतीति न तन्निश्चयो गृहाभावनिश्चयं

१. पादितसन्दे. क. ख.
२. मानो बहि. क.
३. हिस्थिरएवे. ख.
४. Omitted गृहाभावस्य, क.

रूपानुपपत्तिर्मा भूदिति हेतोरेवान्वयव्यतिरेकप्रतिसन्धानात् साध्यधीरनुमैव । अत एव जीवतो गृहाभावबहिर्भावावेककालत्वसम्बन्धनियतावेकदेशौ कालस्यात्मन्येव दृष्टौ; तथैकताभावे जीवनं देशान्तरसंयोगेन नियतैकार्थसमवायमेकदेशश्च जीवत इत्यनुमानसामग्रीसम्भवेऽपि विधाद्वयादुक्तो भेदः । एवमपि धीदर्शनाल्लोके मानान्तरतेत्युक्तम्; दृष्टस्य हि जीवनादेः पूर्वनिरूपितरूपादर्शने सन्दिग्धता लोकसिद्धेत्यप्ययुक्तम् । भाष्ये दृष्टश्रुतशब्दाभ्यां गोबलीवर्दवदुपलब्धमात्रमुक्तम्; इत्थमपि लोके प्रयोगान्न गौरवानुयोगः गुरुपर्यायप्रयोगवत् । परस्तु—'श्रुतार्थापत्तेः शब्दकल्पनेति भेदं वक्तुं श्रुतपदम्'

चालयितुं शक्नोति । वस्तुतस्तु तदभ्युपगमेऽपि जीवनदार्ढ्योपपन्नं बहिर्भावव्याप्यत्वं गृहाभावस्यानुसन्धायैव तदभावोत्प्रेक्षया गृहाभावानुपपत्तिरुन्नेयेति तच्छाल्यर्थो बहिर्भावधीर्व्याप्यधिया व्यापकधीरेवेयं स्यादित्यर्थः । यस्मादेवं जीवनस्य सन्देहापत्त्यनुपगमेऽवश्याश्रयणीयानुमयैव मित्युत्पत्तिः, तस्माद्व्याप्त्यपेक्षितसम्बन्धाद्यनुमानसामग्र्यपीत्थमाश्रयणीयेत्याह—अत एव जीवत इति । संयोगादितुल्यसम्बन्धाभावेऽपि चन्द्रोदयसमुद्रवृद्ध्यादिवदेककालत्वसम्बन्धादप्यनुमानसिद्धेर्मानान्तरं न स्यादित्यर्थः । गृहाभावस्य जीवनविशेषणत्वापेक्षयाप्यनुमानसामग्रीलाभात् स्वोक्तगतिरेव भाष्यानुगुणेत्याह—तथैकताभाव इति । ननु प्रमाणसिद्धे वस्तुनि तदुपपादकासिद्धिमात्रप्रसक्ततदभावसंशयस्यैव तत्प्रमितिसामर्थ्यं लोकसिद्धम्, न स्वत एव सन्दिग्धस्येत्युक्तगतिरप्ययुक्तैव । स्वरूपतश्च संशयः पूर्वनिश्चयनिरुद्धोत्पत्तिरित्याशङ्क्योक्तस्मारणेन परिहरति—एवमपि धीदर्शनादिति । ननु दृष्टपदस्योपलब्धमात्रोपलक्षणार्थत्वाच्छ्रुतपदं भाष्यस्यमनन्वितमित्यत्राह—भाष्ये दृष्टश्रुतपदाभ्यामिति । सति श्रुतपदे तदतिरिक्तोपलब्धार्थं दृष्टपदमिति नान्वयानुपपत्तिरित्यर्थः । नन्वेवमपि गौरवदोषो दुर्वार इत्याशङ्क्य न स दोषतया प्रसिद्ध इति परिहरति—इत्थमपि लोक इति । कल्प्यान्यत्वसूचनार्थं पृथक् ग्रहणमिति परोक्तमनुवदति—परस्तु श्रुतार्थापत्तेरिति । ग्रन्थार्थो व्यक्तः । तदनुपपत्तिमाह—सवि-

१. अदर्शनात्. ख.

इत्याह। यद्यपि पीनत्वानुमितं भोजनं दिवानिषिद्धं रात्रिवर्ति कल्पयितुं प्रवृत्तिः, तथापि शब्दविकल्पितं तत् कल्प्यमिति तद्वाचकशब्द[2] एव प्राथम्यलाघवाभ्यां कल्प्यते, ततोऽप्यर्थबोधादनुपपत्तिशान्तेः ; न चैवमिन्द्रियादि सविकल्पकेऽपि शब्दो वेद्यः ; तिर्यगादिधीषु शब्दशून्यास्वर्थे शक्त्यवधृतेर्न शब्देऽपि शक्तिकल्पना। न च दृष्टार्थापत्तावर्थे शक्तेरत्राप्यर्थ एव ; उपपादकतया हि शक्तिरर्थे, नार्थतयेति शब्देऽप्युपपादके सा। मन्दतयेदं गुरुणा न निरस्तम्, मन्दतामाह नाथः ; सविकल्पके हि संज्ञाविशिष्टोऽर्थो वेद्यः, न तु संज्ञामेव इति तदवस्थे शब्देऽपि नार्थमित्यनुपपत्तिशान्तिः। अथ तदवस्थस्यार्थधीशक्तेरर्थपरत्वमवस्थान्तरं कल्प्यम् ; एवं कल्पनागौरवाद्वरमर्थकल्पना। किञ्च दृष्टार्थापत्तेः साक्षादुपपादकेऽर्थे शक्तिः ; इह तूपपादकबोधके शब्दे कल्प्या। किञ्च अन्यत्र सविकल्पके शब्दः स्मृतिस्थ इति अत्रापि तथा, न तु मितिस्थः कल्प्यः। ये तु विश्वजिदादौ प्रमाणत्वे-

कल्पकेति। व्युत्पन्नस्य शब्दपूर्विकापि सविकल्पकधीः न मानावस्थशब्दोपनेत्रीति न पूर्वोपस्थितिमात्रेणावसायिन्यर्थापत्तिः, तत्परधीस्वतोपाधिकत्वान्मानतायास्तदस्थिद्धेश्चानुपपत्तिशान्त्यसमर्थत्वादित्यर्थः। यदि पुनर्व्युत्पत्त्यवधार्यसाधारणपदशक्तिसिद्धिमात्रेण कल्प्यतात्पर्यापेक्षयार्थोपस्थापकशब्दावसायितेष्टा, तदा लाघवादर्थावसायितैवोपेयेत्याह—अथ तदवस्थस्येति। साक्षादुपपादकत्वं चेहार्थस्यैवेति संमतमिति दृष्टार्थापत्तौ तद्विषयप्रसिद्धार्थापत्तेः तद्धानेन व्यवहितविषयत्वकल्पनया शब्दविषयत्वाश्रयणे गौरवाधिक्यदोषोऽपीत्याह—किञ्च दृष्टार्थापत्तेरिति। सविकल्पकान्तरवैषम्याश्रयणं च दोष इत्याह—किंचान्यत्रेति। केचित्पुनः—विश्वजिदादौ तावच्छब्दकल्पनैवोपेया, शब्दस्यैवापरिपूर्णतयानुपपन्नत्वात्तदवयवान्तरकल्पनया तत्पूर्तेरेवापाद्यत्वात्तत्साम्यात् प्रकृतेऽपि सैवाविशेषादित्याहुः ; तन्मतमनूद्य दूषयति—ये तु विश्वजिदादाविति। शब्दस्यापि साकाङ्क्षतदपेक्षितार्थप्रतीतिम् -

१. यद्यपीनत्वा. क.
२. शब्दमात्रम्. क.
३. Omitted शक्ति. क.
४. नार्थमिथ्यानुप. क. ख.
५. शब्दस्मृतिस्थ. क. ख.
६. तु. मूतिस्थः. ख.
७. तु. शब्दोविश्व. ख.
८. णत्वेन परि. क.

नापरिपूर्णः शब्दः शब्दमेव कल्पयतीत्याहुः, ते निरस्ताः, अर्थाभावेऽप्रमाणत्वेनापरिपूर्णतार्थादेव शाम्यतीत्यर्थ एव कल्प्यः। भाष्ये[1] च श्रुतेऽप्यर्थकल्पनैवोक्ता, न शब्दकल्पना। अर्वाचीनोक्तं हेयम्—ऊहादौ शब्दकल्पना न स्यादिति। यत्र हि शब्द एव साक्षादुपपादकः, तत्र शब्दकल्पनैव[2] मता; प्रकृतिवदाभिधानिकं प्रकाशनं मन्त्रकार्यमिह धीस्थमिति 'सूर्याय' इति प्रक्षेपादेव कार्योपपत्तिरिति शब्दकल्पनोक्ता नवमे। अध्याहारेऽपि "इषे त्वा" इत्यत्र छिनद्मि इति शब्दकल्पनं मन्त्रोपदेशादाभिधानिकप्रकाशोपपत्त्यर्थम्। विश्वजिदादौ त्वर्थाध्याहार एव। अशब्दोप-

लैवापूर्तिरिति तत्प्रतीत्यैव तच्छान्तिरिति तत्त्यागेन शब्दकल्पना न न्याय्येत्यर्थः। भाष्यविरुद्धा च सेत्याह—भाष्ये चेति। तत्र शब्दकल्पनानुपगमे तदविशेषादूहविषयोपगतापि सा न स्यात्, "इषेत्वा" इत्यध्याहाराश्रिताधीत्यापादनमप्ययुक्तमित्याह—अर्वाचीनोक्तं हेयमिति। उपपादकत्वप्रयुक्तार्थकल्पनोक्ता; तत्प्रयोजके शब्दाश्रिते तत्कल्पनाप्यहेया तच्चोहे शब्दाश्रितम्; मन्त्रपाठप्राप्तपदस्य तत्प्रकाश्यतयोहे प्राप्तेऽर्थान्तरे कॢप्तवृत्त्यसम्भवे पदान्तराणां कॢप्तकार्यार्थं प्रयोज्यत्वे तेषां यथाकॢप्तकार्यकरत्वं पदान्तरार्पितांशान्तरापेक्षमिति तदाक्षेपेणैव प्रयोगं विधिराक्षिपेत्; न तेषामेव तदंशेऽपि व्यापारम्, कार्यान्तरतापत्तेः—इति युक्ता शब्दकल्पना; तथा "इषे त्वा" इत्यत्रापि स्यात्। यद्यपि छिनद्मिपदस्य सम्बन्धापादकः कश्चिद्विनियोगो नास्ति, तथापि "इषे त्वेति च्छिनत्ति" इति साक्षात्तदुक्त्यशक्ते पदद्वये तत्र विनियुक्ते तदनुष्ठानोपयोग्यनुष्ठेयानुसन्धानार्थोपायान्तरनिवृत्तौ छिनद्मिपदहीनस्य च पदद्वयस्य तदनुसन्धानाशक्तेस्तदपेक्षस्य च तच्छक्तेस्तत्कल्पना स्यादित्यर्थः। तत्तुल्यहेत्वसिद्धेर्विश्वजिदादावर्थाध्याहार एवेत्याह—विश्वजिदादौ त्विति। ननु तदर्थस्य मानान्तराविषयतया शब्दैकविषयतोपगमाच्छब्दाध्याहारानुपगमे च तदसिद्धेस्तदापत्तिरित्याशङ्क्य आन्विताभिधानश्रुतशब्दाभिधायिविषयतयैव तत्सिद्धेर्न तदर्थः शब्दाध्याहार इत्याह—अशब्दोपस्थितेनापीति। अनुषङ्गे तर्हि कथमर्थान्वयमात्रानङ्गीकारेण

१. भाष्येऽपि श्रुते. क. ख. २. वम्, अतः. क.

स्थितेनापि प्रतियोगिना श्रुतः शब्दोऽन्विताभिधायीत्येवं शाब्दतापि। अनुषङ्गे तु न कल्पना, तन्त्रोच्चरितशब्दस्यैव सर्वशेषत्वात्। स्मृतिलिप्यपभ्रंशानां वेदवर्णसाधुप्रभवतया तदुपस्थापकता साधुत्वेऽन्विताार्थतेति। विभक्तेरसाधुत्वेऽर्थानन्वयो नाशब्दतया। एवं पचति इत्युक्ते प्रत्यक्षेणौदनेऽनन्वयो

शब्दविषयत्वाश्रयणमित्याशङ्क्य तत्कल्पनैव तत्र नास्तीत्याह—अनुषङ्गे त्विति। स्मृत्यादौ तर्हि कथं शब्दकल्पनेत्याशङ्क्य कार्यकारणव्याप्तिमूलानुमानविषयस्तत्र शब्दः, नानुपपत्तिमात्रकल्प्य इति परिहरति—स्मृतिलिप्यपभ्रंशानामिति। तत्रापभ्रंशेऽनुपपत्तिरापादिता परैः—पदांशापभ्रंशेऽपि प्रकरणादिभिः तदर्थप्रतीतिपूर्विकैव साधुशब्दकल्पना; ततोऽर्थकल्पनापक्षे तदन्वयमात्रमुपेयम्, साधुशब्दकल्पना निर्मूलैवस्यादित्यशब्दोपस्थापितस्यान्वयानर्हतैव तत्कल्पनाहेतुरवश्याश्रयणीय इति सर्वत्र शब्दकल्पनैव साध्वीति, तत्समाधिमाह—साधुत्वेऽन्विताार्थतेति। वक्त्रा तावत्तदन्वयोऽपि पदार्पणीयो विवक्षितः; प्रयुक्तं च तदेकदेशविकलमपीति तदर्पणीय एव तदन्वयो यथासम्भवं न पदान्तरविषयतयोपेयः। तस्य च श्रुतांशस्य असाधुतया तच्छक्त्यभावाद्विवक्षितसाधुपदोपस्थापनद्वारेणैव तदर्हतेति तदनुमितविवक्षितपदाभिधेयस्तदन्वय इष्टः, नाप्रयुक्तांशार्थस्याशब्दतादोषेणेति नाभ्युपगतभङ्ग इत्यर्थः। यत्तु—शब्दोपस्थितस्यैवान्वय इत्येतद्दार्ढ्यार्थमेव—अन्यथा 'पचति' इत्येतावत्येव प्रयुक्तेऽश्रोतृप्रत्यक्षोपस्थापितौदनान्वयोऽपि स्यादित्यापादितम्, सन्निध्यविशेषादिति; तत्परिहारमाह — एवं पचतीत्युक्त इति। न सन्निधिमात्रमन्वयप्रयोजकम्, तात्पर्यस्यापि तद्धेतुत्वप्रसिद्धेस्तन्निश्चयात्तदन्वयः; तन्निश्चये च तदन्वयः प्रसिद्ध एवेति न शब्दसान्निधापितान्वयहेतुरित्यर्थः। नन्वेवमपि त्वदभ्युपगतकार्यपरान्वयनियतशक्तिव्युत्पत्तिसाम्यं शब्दोपस्थापितान्वयनियमव्युत्पत्तेर्नापैति, व्युत्पत्तौ कार्याव्यभिचारात्, तदुत्तरकालव्यभिचारः पुरुषाभिप्रायनिमित्तो न शब्दस्वभावनिमित्त इति हि शक्तिनियमाङ्गीकारः; तद्वद्व्युत्पत्त्युत्तरकाले पुमभिप्रायकृतः प्रत्यक्षसन्निहितान्वयो न शब्दस्वभावकृत इति शङ्कते—

१. तत्तदुप. ख.
२. न त्वशब्द. ख.
३. दनेनाशाब्दत्वात्. क.

नाशब्दत्वात्, किन्तु तद्विवक्षानवधृतेः; अवधृतेऽन्वय एव। अथ यथा वः[1] कार्यपरान्वये व्युत्पत्तिः, तथा नः[2] शाब्देनैव शाब्दान्वयव्युत्पत्तिरिति, तन्न; कार्यधियैव व्यवहारात्सा तथा; नेयम्, अध्याहारेणापि व्यवहारात्। अध्याहारस्य चोपपादकेऽर्थ एव स्थितेः शाब्दत्वस्य श्रुतशब्दार्थतयापि व्युत्पत्तेः। यदि च शाब्दोपपत्त्यर्थं शाब्दमेव, तर्हि प्रत्यक्षोपपत्त्यर्थं प्रत्यक्षमेव[3] स्यादिति दिक्॥

अथ यथा वः कार्यपरान्वय इति। वैधर्म्यमाह—तन्न कार्यधियैवेति। व्युत्पत्तिस्थानव्यवहारे कार्याव्यभिचारात् कार्यपरत्वमुपेक्ष्यते, तत्रैव त्वध्याहारस्य दर्शनात्, तस्य चार्थविषयत्वमुक्तमिति साम्यापादनमशक्यमित्यर्थः। शाब्दत्वभङ्गापादनस्यान्विताभिधानहतत्वमित्याह—शाब्दत्वस्येति। श्रुतार्थापत्तावध्याहारसाम्याङ्गीकारेण शब्दकल्पनोपगमे च दृष्टार्थापत्तावतिप्रसङ्गदोषोऽपि स्यादित्याह—यदि च शाब्दोपपत्त्यर्थमिति। ननु शब्दोपस्थितस्यैव शाब्दान्वयो न हेत्वन्तरोपस्थितस्येति व्युत्पत्तिसिद्धनियममूलस्तत्र शब्दकल्पनोपगमः; तदभ्युपगमेन प्रत्यक्षार्थोपपादकार्थः प्रत्यक्ष एव स्यादिति निर्मूलातिप्रसङ्गापादनमुन्मत्तचेष्टितमेवेति शङ्काहानार्थो दिगुक्तिः। अयमर्थः—यत्र 'पीनो दिवा न भुङ्क्ते' इति वाक्यं रात्रिवर्तिभोजनविधिपरमेव प्रयुज्यते, तत्रैव रात्रिवर्तिभोजनस्य वाक्यार्थान्वयः तदर्थं शब्दकल्पना च; न तु तत्रार्थापत्तेः प्रचारः, शब्दोत्थत्वात्तत्प्रतीतेः; यत्र तु दिवानिषेधमात्रपरम्, तत्रार्थापत्तिः, तत्र च वाक्यार्थान्वयो नास्ति, केवलं शब्दोपपादकत्वमात्रम्। अर्थापत्तिविषयस्य तत्रोपपाद्यस्य शाब्दत्वमात्रेण तत्सजातीयप्रमाणविषयत्वमुपपादकार्थस्य यद्युपेक्ष्यते, तदातितसङ्ग इति॥

इत्यर्थापत्तिवादः॥

---

१. यथावयवः. क.

२. न शाब्देनैव. क.

३. पत्त्यर्थं प्रत्यक्षमेव. क.

अथाभाववादः

"अभावोऽपि।" उक्तलक्षणसमाध्यर्थं भाष्यमनन्तरं[1] कृतम्। पूर्वः पक्षः—प्रसिद्धेः षष्ठं प्रमाणं लक्ष्यं प्रमेयशून्यत्वान्न[2] लक्ष्यमिति सन्देहो भाष्यादपि नापैतीति। राद्धान्ताभासी लक्षणपरं भाष्यमाह, प्रमेयसम्भवात्; भूतले घटो-नास्तीति। धीर्हि शून्यत्वे न भूतलमात्रे, घटवत्यपि प्रसङ्गात्। पादन्यासादि-व्यवहारोऽपि न भूतलमात्रधिया; धीःसैव प्रतियोगिना; सकण्टकधियाप्यापत्तेः। अथ द्वयी धीः—संसृष्टे तन्मात्रे[3]; तन्मात्रे च द्विधा[4]—प्रतियोगिन्यदृश्ये दृश्ये च;

"अभावोऽपि"। भाष्यप्रयोजनं ससङ्गतिकमाह — उक्तलक्षणसमाध्यर्थ-मिति। का तदनुपपत्तिरित्याशङ्क्य तन्निवर्त्यशङ्कारूपं पूर्वपक्षमाह—पूर्वः पक्ष इति। लोकप्रसिद्धप्रमाणलक्षणकरणे प्रसिद्ध्यविशेषादभावाख्यप्रमाणमपि लक्षणार्हं भाति; विषयनिरूप्यं प्रमाणमिति तद्विवेके तन्मेयाप्रसिद्धेर्न लक्ष्यमित्यपि—इति संशयात्मकः पूर्वः पक्षः प्रमाणव्यभिचारसंशयान्तः। स च भाष्याक्षेपावसायी; पूर्वपक्षनिरा-सार्थं हि तदारभ्यते; ततस्तच्छक्तमेव तद्रचनार्हम्; न चेदं तच्छक्तम्, स्थान-प्रकरणाभ्यां वाच्यान्तराप्रसिद्धेश्च प्रमाणलक्षणपरत्वभानान्मेयान्तरानुपलब्धेः पूर्वं-वद्बुद्ध्युत्पत्त्यनुक्तेश्चातत्परत्वभानाच्च सन्दिग्धार्थत्वादित्यर्थः। उक्तहेतुभ्यो लक्षणपर-त्वभाने मेयाभावशङ्कामात्रं तद्विरोधीति तत्समर्थनेन लक्षणपरत्वमेव—इत्येकदेशि-मतं पूर्वपक्षनिरासप्रकारमाह — राद्धान्ताभासी लक्षणपरमिति। धर्मिविशेष-निष्ठान्यनास्तिताधीस्तदपेक्षानुष्ठानं च लोकेऽभाववत्प्रचरतीति तावत्प्रसिद्धम्; तत्र नास्तिधियस्तद्धर्म्यनधिकविषयत्वशङ्कया हि मेयाभावः शङ्क्यः; तन्मात्रविषयत्वे संसृष्टधीकालेऽपि तदापत्तियुक्त्याधिकविषयत्वनिश्चयसम्भवान्मेयसिद्धेर्मानलक्षण-मेवैतदित्यर्थः।

नन्वयमतिप्रसङ्गदोषो नास्ति, संसृष्टावस्थायां तद्विलक्षणविषयतन्मात्रधि-योऽनुत्पत्तेरिति राद्धान्तिमतमाशङ्कते — अथ द्वयी धीरिति। भूतलदृष्टे-

१. न्तरं कृतः पूर्वः. क. ख.
२. प्रमेयत्वान्न. क. ख.
३. अतन्मात्रे. क.
४. Omitted द्विधा. क

तत्र दृश्ये या तन्मात्रधीः, सैव प्रतियोगिनास्तित्वधीः । धीरेव नास्तित्वमिति यदुक्तम्, तत्तद्धीवेद्यतयैव तन्मात्रकेवलैकाकि[1] तदेकपर्यायं नास्तित्वं विमतो[2] बोध्यते । यथा धीविमतावर्थनिर्देश्या धीः, तथार्थविमतौ धीनिर्देश्योऽर्थः ; धीनिर्दिष्टेऽप्यर्थे विमतस्तत्संमत्या बोद्धव्यः । अभावधीहेतुर्हि भावधीर्न संसृष्टे, विरोधात् ; नाभावविशिष्टे, आत्माश्रयात् । अतस्तन्मात्र एव वाच्या, एवं च तन्मात्रावस्थैव घटभङ्ग इति तद्धीहानेऽपि जलपातो[3] युक्तः । मृत-

रेव हि घटसंसर्गाविषयत्वमात्रेणापि तत्संसृष्टतद्दृष्टिविलक्षणत्वं प्रसिद्धमेव, न तत्संसर्गाभावविषयतयैव, सा तु तन्मात्रधीः तत्संसर्गस्फुरणसमर्थसामग्र्युत्था चेत् तन्नास्तिताधीरिति प्रसिद्धिं लभेत तदर्हानुष्ठानहेतुश्च स्यात्, न तदधिकाभावप्रमितिः प्रसिद्धेति न लक्षणोक्त्यवकाश इत्यर्थः । ननु नेदं राद्धान्त्यभिप्रेतम्; तन्मात्रधीविषय एवैवमभावस्य स्वरूपमुक्तं स्यात्; तद्धीरेव तु तत्स्वरूपं शालिकोक्तमिति किमित्यन्यथोच्यत इत्याशङ्क्य तदुक्तिरप्येतदभिप्रायैवेत्याह—धीरेव नास्तित्वमितीति । संप्रतिपन्नाधिकार्थस्वरूपविवादे तद्व्यवहारसमर्थपर्यायपदानां वाच्यविवादस्यानुषङ्गसिद्धत्वात्तदन्यतमेन तद्बोधासिद्धेस्तदुपस्थापकधीविवेकमात्रलभ्यबोधापनेयस्तद्विवाद इत्यवश्यापेक्षे बोधविवेके तदुक्तिमात्रोपरमस्तद्विषयसिद्धेरयत्नलभ्यत्वाभिप्रायेणेत्यर्थः । एतदेव दृष्टान्तमुखेन स्थापयति—यथा धीविमताविति । यथा धियो लिङ्गेन्द्रियजत्वादिविवादे लिंगादिसम्भवासम्भवविवेकलभ्यं तन्निर्धारणं तथेत्यर्थः । ननु तन्मात्रधियः संसर्गाभावाधिकाविषयसंप्रतिपत्तौ तदधिकाभावमेयासिद्धिस्तदवष्टम्भेनापाद्या, कथमभाववादिनस्तत्संप्रतिपत्तिरित्यत्राह—धीनिर्दिष्टेऽप्यर्थे विमत इति । कथं तत्संमतिः स्यादित्यत्राह—अभावधीहेतुर्हीति । धर्मिधीसापेक्षत्वादभावधियोऽभावानपेक्षमेव संसृष्टावस्थधर्मिविलक्षणावस्थधर्मिधीविषयत्वमभावबोधार्थमुपेयमिति न सम्मतिर्दुष्करेत्यर्थः । ततश्च तन्मात्रधिय एवाभावतां यथाश्रुतां गृहीत्वा परापादितदूषणद्वयमपास्तमित्याह—एवं च तन्मात्रावस्थैवेति । धीविषयधर्म्यवस्थैवाभाव इति नानन्तरमेवाभाव-

१. न्मात्रैकैवलैकाकि. ख.

२. विमतो बोध्येते. क.

३. पातनपि. क.

संजीविनी चाप्रसक्ता। धीहाने तु व्यवहारहानम्। धीभावेऽपि दृश्यतार्था सूक्ष्मजिज्ञासा। संसृष्टबुद्ध्यनन्तरं च तन्मात्रधीर्युक्ता, स्वहेत्वागमात्[1]। कपालमाला वा देशान्तरस्थितिर्वा घटस्य तद्धीहेतुः। संसृष्टधीस्तु स्वहेतुध्वंसाद्भावान्तरोदयरूपान्निरन्वयविनाशिबुद्ध्यादेः धर्मिस्वरूपमात्रस्थितिरूपान्न[2] भवति। धर्मिमात्रस्थितिरेव ध्वंसो व्यापी। अनुमाद्येकवेद्यस्य[3] धर्मिणो धर्माभावेऽप्यनुमाद्यात्मिकैव तन्मात्रधीः। लिङ्गव्याप्तिदृश्यतया प्रतियोगिनो धर्मस्य दृश्यता। तन्मात्रधीश्च यस्मिन् दृश्येत, तदभावव्यवहारहेतुः। अतो

नाश इति न तत्प्रयुक्तदूषणापत्तिः, धीनाशात्तु तत्प्रयुक्तव्यवहारहानमेव स्यादित्यर्थः। ननु धर्मिमात्रावस्थात्मके धर्माभावे तद्भाने सत्यपि पुनः सूक्ष्मजिज्ञासा प्रवृत्त्यङ्गं न स्यादित्याशङ्क्य प्रतियोगिदृश्यतापेक्षयैव तद्भानं व्यवहारकरम्, न केवलमिति न तदनुपपत्तिरित्याह—धीभावेऽपि दृश्यतार्थेति। सत्यपि ह्यभावाख्ये मेये न तद्भावनिष्ठप्रवृत्तौ विषयतयेक्षणापेक्षं स्वप्रतियोगिपरिहारोपयोगितयैवेति सूक्ष्माणां परिहार्यत्वे तद्भानयोग्यधीहेत्वनुवृत्तिनियतोऽनिष्टपरिहार इति मेयान्तरानुपगमेऽपि न सूक्ष्मनिरीक्षणानर्थक्यमिति भावः। ननु घटसंसृष्टभूतलदर्शनानन्तरमेव केवलदर्शनं तत्संसर्गाभावोत्पत्त्यनुपगमे तद्दर्शनहेत्वभावानुपगमे च न स्यादित्याशङ्क्य अन्यथापि तदुपपत्तिरित्याह — संसृष्टबुद्ध्यनन्तरमिति। सुव्यक्तभावान्तरोदयात्मकपरिहारविवक्षयैव विषयभेदेनानेकपरिहारोक्तिः प्रकरणे, न त्वेकासम्भवादित्याह—धर्मिमात्रस्थितिरेवेति। एवं च तन्मात्रधीः स्वहेत्वागमादित्युक्तस्वहेत्वागमो धर्मिमात्रस्थितिरूपो दर्शित एवार्थादित्यभिप्रायः। ननु नित्यानुमेये धर्मिणि कथं तन्मात्रधियैवोपपत्तिरित्याह—अनुमानाद्येकवेद्यस्येति। तत्राप्यभाववादिनाप्यभावधीहेतुतया तन्मात्रधियः प्रतियोगिदृश्यतायाश्चानुमानान्तर्गततयैवोपेयत्वात् तद्दृश्यतन्मात्रात्मकता तद्धर्माभावस्य नाशक्योपगमेत्यर्थः। ननु प्रतियोगिभेदेनानन्तभेदभाजामभावानां निर्भेदं धर्मिमात्रमात्मेत्येतत्प्रतीतिहतमित्याशङ्क्य दृश्यत्वेनाभिसंहितप्रतियोगिधीसहायभेदेनासंकीर्णानन्ततदभावव्यवहारकरस्वधीस्थतयैकमपि व्यवस्थया तत्तदभावात्मतार्हमेवेति परिहरति—तन्मात्रधी-

१. हेत्ववगमात्. क, ख.
२. रूपानिरन्वये. क, ख.
३. कस्य वेद्य. क.

नातिप्रसङ्गाप्रसङ्गौ । तन्मात्रधियैव शशशृङ्गानुमाबाधः । न च तन्मात्रधिया अभावमेयनिह्नवे भावधिया भावनिह्नवात् बाह्या[1]पलापापत्तिः, मितेर्बहिर्नीलादिस्फुटस्वरूपमपलापानर्हम्; अभावस्त्वस्फुटत्वान्निह्नुतः ।

अत्राह राद्धान्ताभासी—न मन्मतेऽपि तन्मात्रावस्था स्वरूपाधिका; स्वरूपधीरेवाभावधीहेतुः; संसृष्टस्वरूपधीस्तु यन्नाभावधीः तत्र प्रतियोगिस्मृत्यभावात्, न तु स्वरूपधीहेत्वभावात् । तदुक्तम्—"स्मृत्वा च प्रतियोगिनम्" इति; संसृष्ट[2]ग्रहे च न तत्स्मृतिः । अतो नामान्तरेण तन्मात्रावस्था अभाव एव ।

राद्धान्तस्तु—यत्र यस्याभावधीः तत्र तत्संसृष्ट[3]स्वरूपधीर्नास्ति, स्वरूपधीस्त्वस्तीति द्वयी स्वरूपधीरास्थेया । तत्र या संसृष्ट[4]धीतोऽन्या विधा, सा

श्चेति । एवं चाभावात्मकमेयानुपगमे शशमस्तकवर्तिशृङ्गानुमानमबाधितं स्यादित्यापादनमपि निरस्तमित्याह—तन्मात्रधियैवेति । बाह्यार्थापलापान्तत्वापादनमप्यभावमेयानुपगमस्यायुक्तमित्याह—न च तन्मात्रधियेति । न तावदबाधितव्यवहारहेतुधीवृत्त्वे यथाव्यवहारं विषयसत्तानियमोऽभाववादिनापीष्यते, विषयविशेषनिष्ठव्याप्यारोपपूर्वकव्यापकारोपात्मकतर्कप्रवृत्तेर्मानसहायोपगताया अपि तद्विरहात्; तद्विषये हि तदन्वयो नित्यनिरस्तः, न च स्वविषये तदन्वयधीः प्रसज्यत इत्यनन्वयापत्तेः । तेन धीबलविमर्शाधीना विषयव्यवस्था, नापातमात्रसिद्धा, ह्रस्वदीर्घाद्यापेक्षिकव्यवहारस्यैकस्मिन्नेव विषये प्रचुरत्वात् । नास्तिबुद्धेस्तु धर्मिमात्रातिरिक्तो विषयो विमर्शसहो नास्तीत्युक्तमिति न काचिदनुपपत्तिरित्यर्थः ।

एवं राद्धान्तिमतमुपपाद्य एकदेश्यभिमतं तद्दूषणमुपन्यस्यति—अत्राह राद्धान्ताभासीति । धर्मिस्वरूपातिरिक्तकेवलावस्थासंमत्यापादनेनाभावनिरासोऽशक्यः, तदनुपगमेनैवाभावधीसामग्र्युपगमात् । अतो नामान्तरेणाभावाख्यं मेयान्तरमेवाश्रितं स्यादिति ।

परमसमाधातुरभिप्रायमाह—राद्धान्तस्तु यत्र यस्येति । यद्यपि तन्मात्रावस्थायाः स्वरूपाधिकत्वानुपगमेनाप्यभावधीसामग्री सुलभैव, तथापि तदन्तर्भूता धर्मि-

१. बाह्यमेयापत्तिः. क.

२. संस्पृष्ट. क, ख.

३. संस्पृष्ट. क, ख.

४. संस्पृष्टधीस्त्वतोऽन्या. क, ख.

तन्मात्रधीविधा; तन्मात्रमपि तद्धीवेद्यत्वविधया मेयान्तरम्। व्यवहार-शक्तिधीस्तमात्रमिति हेयम्; तन्मात्रधिया व्यवहारः, ततः शक्त्यनुमेति न शक्तिधीस्तन्मात्रधीरिति न शक्तिस्तन्मात्रम्। अभावधीपक्षे च धीहेतुरनुपलम्भः सत्तया न ज्ञानेन, अनवस्थापत्तेः। यदा तु दृश्यमानस्यैव 'प्राङ् नासीद्-

धीर्न संसृष्टविषयेत्यविवादादल्पाधिकविषयत्वविधया धीविभागोऽभ्युपेत एवेति तदुपस्थाप्यावस्थाभेदस्यावर्जनीयत्वात् भावरूपकेवलावस्थाधिकमभावाख्यं मेयं दुर्लभ-मेवेत्यर्थः। नन्वेवं धर्म्यतिरिक्तमेव तन्मात्राख्यं मेयमभ्युपगतं स्यात्, संसृष्टाव-स्थानुवृत्त्यनुवृत्तिरूपविरुद्धधर्माक्रान्तेर्भेदापादकत्वात्, ततश्च द्रव्यादिषु क्वास्या-न्तर्भाव इति वाच्यम्। उच्यते—सर्वाभ्युपेतप्रत्यक्षधीबलोपदर्शितं हीदं विविक्तम्, न मानान्तरमूलमेतत्प्रेक्षितमिति नैकं प्रत्येवानिष्टतया किञ्चिदापादनीयम्। न चान्यमते कैवल्यं नाम न किंचिन्मेयमस्ति, संसृष्टावस्थावत्याधिक्यमात्रकृतं तु तद्धीवैलक्षण्यमिति वाच्यम्, अधिकस्याल्पप्रतियोगिनिरूप्यत्वेनाल्पत्वरूपार्थाधि-क्यस्यावारणीयत्वात्; ह्रस्वदीर्घादिवत् पदमात्रं तदधिकं नार्थ इति चेत् न, तस्या-प्यवकाशपूरणादिशक्तिपरीक्षकैस्तिलरोममात्रादिरूपेण यत्नान्तरपरिच्छेद्यत्वेनाभ्यु-पगमात्, तथेहापि प्रतियोगिविशेषनिरूप्याल्पत्वरूपकैवल्यस्य तत्तज्जिज्ञासुभिः पृथग्यत्नैर्विकल्पज्ञानविषयतापादनेनैव प्रवृत्त्यर्हतापादनात् अल्पाधिकत्वमात्रेणैवो-त्तरोत्तरसंख्योत्पत्तावपेक्षाबुद्धिविषयसमवायिकारणवैलक्षण्यनिमित्तव्यवस्थावद्व्यव-हारसिद्धेर्न काचिदनुपपत्तिः। कैवल्यं नामावस्थाख्यपदार्थान्तरं वास्तु, प्रसिद्धस्यैव वा विशेषणान्तराधीनविकल्पान्तरात्मकव्यवहारहेतुभूतावस्थान्तरं यत्नान्तरावसेय-मस्त्वित्यनास्थया तदनादर इत्यनवद्यम्। स्वयूथ्येनान्येनान्यथोक्तं तन्मात्रत्वं स्वा-भ्युपगतमिति शङ्काहानार्थं दूषयति—व्यवहारशक्तिरिति। तन्मात्रस्यावगततया व्यवहारहेतुत्वेनोपगमात् शक्तेश्च कार्यकल्प्यतयोत्तरकालावसेयत्वात् प्राग्धीयोग्य-मन्यदेव तदुपेयमित्यर्थः।

एवं विषयाभावाल्लक्षणपरत्वं निरस्य धीजनकाभावाच्चेति वक्तुमनुपलम्भस्य ज्ञात-तया तावन्न जनकत्वमित्याह—अभावधीपक्षे चेति। न च सत्तयापीत्याह—यदा तु दृश्यमानस्यैवेति। प्रतियोगिस्मृत्यभावात् सत्यनुपलम्भे तदभावमप्रतीत्य तद्दर्शन-

यमिह' इति धीः, तदानुपलम्भो निवृत्तः सत्तया न हेतुः स्यात्। अथ प्रत्यक्षानुपलम्भे निवृत्तेऽपि स्मृत्यनुपलम्भः सन्नेव, प्राक्तनी च तत्स्थितिः स्मृत्यर्हेति स्मृत्यनुपलम्भः सत्तयैव हेतुः, तन्न; यदा मध्याह्ने दृष्टस्य प्रातरभावः सायं बुद्ध्यते, तदा माध्यंदिनदर्शनस्मृत्या स्मृत्यनुपलम्भसत्ता हता न धीहेतुः। अथेयं विधा—यदोपलम्भस्तत्कालमात्रानुपलम्भबाधः, न तु प्रातर्गतबाधः; तन्न; माध्यन्दिनोपलम्भैकत्वे तत्प्रागभावोऽप्येक एव। स चेदुपलम्भहतः यावत्पूर्वक्षणगत एव हतः; प्रातर्गततोपाधिभेदस्तु प्रातर्ज्ञानादेव हतः। एवमनन्तरक्षणहततापि तत्क्षणज्ञानादेव हता। उपलम्भक्षणे तु प्रसक्तः प्रागभावो भावबाध्यो न क्षणावच्छप्रसक्तिमात्रं बाध्यम्; अन्यथा भावोऽपि प्रध्वंसबाध्य एकक्षणान्वयितयेति पूर्वक्षणान्वयोऽनुवर्तेत। न च प्रातरुत्पत्त्यर्होपलम्भप्राग-

काले पूर्वकालवर्त्यभावधीर्न सतानुपलम्भेनोत्पाद्येत्युभयथापि सा न हेतुरित्यर्थः। तथापि स्मृत्यभावो हेतुरिति शङ्कते—अथ प्रत्यक्षानुपलम्भ इति। तद्दर्शनकालेऽपि जिज्ञासाभावात्तदुत्तरकाले जिज्ञासोद्भवात् स्मर्यमाणप्रतियोग्यभावावगमे तन्निर्वाहोऽपि नास्तीति दूषयति—तन्न यदा मध्याह्न इति। ननु कालविशिष्ट एवार्थानुपलम्भः कालावच्छिन्नतदभावधीजननशक्तः, तद्विशिष्टोपलम्भसत्तया च स नाश्यत इति तदनुत्पत्तेस्तदनुपलम्भोऽनुवृत्त्यर्हः उत्तरकालजातोपलब्ध्या तत्कालीनानुपलम्भनाशेऽपीति न हेत्वसिद्धिरिति शङ्कते—अथेयं विधेति। दूषयति—तन्न माध्यन्दिनोपलम्भैकत्व इति। विशिष्टसत्ता हि विशेषणविशेष्यसत्तौपाधिकी; विशेष्यश्चेहानुपलम्भोऽनुभवसिद्धोपलम्भनिरूप्य इति तदेकत्वे तदुत्पत्त्यवसायी नानुवृत्त्यर्हः। विशेषणावश्यकालक्षणानां तु क्षणभङ्गिस्वरूपत्वान्नानुवृत्तिशङ्कापि स्यात्। यदि तु विशिष्टभावानुत्पत्तिमात्रेण विशिष्टाभावानुवृत्तिरभ्युपेयेत, विशिष्टाभावानुत्पत्त्या विशिष्टभावानुवृत्तिश्चोपेयेति सर्वलोकव्यवहारविरोधः स्यादित्यर्थः। नन्वुत्पत्त्यर्हतामात्रेण धीस्थोपलम्भस्यानुपलम्भनिरूपकत्वाङ्गीकारेण हेत्वनुवृत्तिरुपेयते, नोत्तरकालोत्पन्नस्येति स्यादनुपलम्भानुवृत्तेरभावधीरिति शङ्कामपाकरोति —न च

१. तथा. क, ख. २. लम्भः सत्ताविता. क.

भावादभावधीः, नित्यतुच्छस्योपलम्भसजातीयत्वासिद्धेः तदर्हत्वमसिद्धम् । माध्यन्दिनोपलम्भ एव तज्जातीयस्तदर्ह इति दिक् । दृश्यता चानुलम्भविशेषणं न युक्तम्; योगाद्धि विशेषणता; न च भावस्तद्योगो वा तुच्छाभावा-

प्रातरुत्पत्त्यर्होपलम्भप्रागभावादिति । कालविशेषनिरूपितेन्द्रियाद्युत्पत्त्यर्हता हि अनुत्पन्नव्यक्तिनिष्ठा दुरुपगमेत्युत्पन्नव्यक्तिनिरूप्यैव सेति वस्तुतो धीजननसामर्थ्यसम्भवाच्च न मानोपपत्तिरित्यर्थः ।

ननु 'इह घटो नास्ति' इति वर्तमानाभावधीविषयेऽप्येवमुत्पत्त्यर्होपलम्भव्यक्तिविवेकासम्भवनिमित्तदृश्यानुपलम्भरूपहेत्वभावापादनसाम्ये केन विशेषेण "यदा तु दृश्यमानस्यैव 'प्राङ्नासीदयमिह' इति धीः" इति विषयान्तरमुपात्तम्? तत्रापि हि न धर्मिधीहेतुविरत्यर्हतातिरिक्तधीव्यक्त्यन्तरार्हतापेक्षायोग्यता धर्मिधीहेत्वर्हता तद्विषयत्वाभावश्च भूतलविषयेऽपि तुल्यौ; तदभावाच्च तत्स्मृतिरस्त्वभावधीहेतुः; अत एव प्रतियोगिस्मृत्यभावादेव संसृष्टस्वरूपधीहेतोः नाभावधीरित्युक्तम्, अन्यथा ह्यनुपलम्भाभावादित्युच्येत । तस्मात् "यदा तु दृश्यमानस्यैव" इत्याद्यबद्धमिव प्रतिभाति ।

उच्यते—तन्मात्रधियः संसृष्टधीस्वस्वरूपातिरिक्तावस्थान्तरविषयत्वसंप्रतिपत्तिनिषेधार्थं यदभावधियः प्रतियोगिस्मृतिजत्वमेकदेशिनोक्तम्, तद्दृश्यमानस्यैव प्राग्दृष्टस्मर्यमाणधर्मिवर्त्यभावबोधे नास्तीत्यवस्थान्तरविषयत्वासंप्रतिपत्तयेऽनुपलम्भस्यैवाभावधीहेतुत्वमाश्रितम्, तदनाश्रयणे तत्संप्रतिपत्त्यङ्गीकारभिया तेन तदसम्भवप्रदर्शनेन तदनङ्गीकारे हेत्वभावप्रसङ्गोक्त्या तत्संप्रतिपत्तिरेवापद्यत इति तन्मात्रावस्थैवाभाव इत्येतदेव स्थापितम् । ननु तथानुपलम्भस्मृतिरस्तु कारणम्, धर्मिस्मृतिवदिति शङ्कानिरासार्था दिगुक्तिरनवस्थयोकस्यानाहेतुत्वसूचनेन । सत्यपि चानुपलम्भे हेतुत्वाहेतुत्वव्यवस्थापकरूपासम्भवात् कादाचित्कमभावधीहेतुत्वं न युक्तम्; दृश्यतायास्तदयोगाद्विशेषणत्वासिद्धेः ।

असत्यां च दृश्यतायामहेतुत्वं प्रसिद्धमेवेति सतोऽपि न हेतुत्वार्हतेत्याह—दृश्यता चानुपलम्भविशेषणमिति । उक्तमेव भावाभावसामान्यप्रयुक्तासम्बन्धमुपजीव्याभावस्वरूपसिद्ध्यभ्युपगमेन प्रत्यक्षमेयत्वं परोक्तं दूषयति—

श्रयः, विरोधात्; अत एव सिद्धेऽप्यभावे संयुक्तविशेषणतया नेन्द्रियग्राह्यता। इन्द्रियोपरमे च तद्धीरुक्ता। न च दृश्यसत्ता दर्शनेन व्याप्तेति दर्शननिवृत्तिलिङ्गात् दृश्याभावधीरनुमा। व्यापकनिवृत्तिव्याप्याभावयोः पूर्वबुद्ध्योर्न व्याप्तिधीरिति नानुमामात्राद्भावधीः। तन्मात्रधीस्तु भावरूपा दृश्यविशेष्या युक्ता। दृश्यता च तदधीनान्यधीहेतुसाकल्यमेव व्यापि। एवमसति मानान्तरे षष्ठप्रसिद्धिरमूला। भाष्यं च न लक्षणपरम्; किन्तु उक्तलक्षणमानसमाध्यर्थं तद्युक्तं ग्रन्थे। न चापरं मानपञ्चकं सम्भवैतिह्यलोकप्रसिद्धिह्रस्वदीर्घप्रतिभाख्यं महासंख्यावच्छिन्नवस्त्ववयवेऽवान्तरसंख्याधीः सम्भवोऽनुमैव। मूलशून्यनृपरंपरावचनमैतिह्यं न मानम्; अनुभवप्रत्यक्षादिर्न लोके मानान्तरम्। लिङ्गाभासजा प्रतिभा अनिश्चयो न मानम्। ह्रस्वदीर्घे परिमाणे प्रत्यक्षा-

अत एव सिद्धेऽप्यभाव इति। दूषणान्तरं चाह — इन्द्रियोपरमे चेति। परोपगतानुमानमेयतामपि निरस्यति — न च दृश्यसत्तेति। ननु तन्मात्रधीरपि सूक्ष्मकण्टकादीनां दृश्यत्वादृश्यत्वावस्थयोः अनुगततया अनुपलम्भतुल्यैव, तद्दृश्यतायाश्च धर्मिविषयतन्मात्रधीसम्बन्धाभावात् तदविशेष्यतयापि तत्तुल्यैवेत्यनुपलम्भस्याहेतुत्वप्रसाधनं न तन्मात्रधियो भावधीहेतुत्वं परिशेषयेदित्याशङ्क्य परिहरति—तन्मात्रधीस्तु भावरूपेति। भावरूपत्वात्तस्याः सामान्यप्रयुक्तसम्बन्धविरोधस्तावन्नास्ति, तथाप्यभावधीकाले धर्मिसम्बन्धाभावान्न विशेष्यतेति शङ्कां परिहरति—दृश्यता च तदधीनेति। दृश्यतायाः प्रतियोग्याश्रितत्वे हि सम्बन्धासिद्धिः, धर्मिण एव तु प्रतियोगिप्रकाशनसमर्थावधारितसामग्रीसमुत्थधीविषयतैव तन्निरूप्यतया तद्दृश्यतेत्युच्यते; तेन तद्धीस्तद्विशेष्या युक्ता। न च प्रतियोगीन्द्रिययोगस्यापि तत्सामग्रीनिविष्टत्वात्तस्य चेहाभावात् सामग्र्यसिद्धिः, विषयाधीनहेत्वतिरिक्तधीहेतुसाकल्यस्यैव दृश्यतापदार्थत्वात्तस्यैव दर्शनादर्शनविषयव्यापित्वाद्योग्यतायाश्चोभयगामित्वादित्यर्थः। एवमावश्यकतन्मात्रावस्थाधिकाभवाख्यमेयासिद्धेरसति मानान्तरे प्रसिद्धिमात्रमन्यथा नेयमित्याह—एवमसतीति। तथापि भाष्यं सार्थकमेवेति व्याख्यातमित्याह—भाष्यं

१. षष्ठमानम्. ख.

दिग्राह्ये ; ह्रस्वदीर्घशब्दप्रवृत्तिस्तूपाध्द्यपेक्षा । अल्पदेशव्यापि ह्रस्वमुच्यते । ह्रस्वादिसंख्याल्पत्वाद्देशाल्पता । संख्याल्पता पूर्वगणनीयतया, परगणनीयसंख्यया तु दीर्घशब्दः । अत एवाल्पान्तरत्वेऽङ्गुल्यर्द्धाङ्गुल्यवच्छेदं विना न ह्रस्वदीर्घशब्दः । संख्यापूर्वपरता च प्रत्यक्षादिसिद्धेति न मानान्तरतेति पञ्चैव प्रमाणानि इति स्थितम् ॥

चेति । न चापरं मानपञ्चकमित्यादि मतान्तरनिरासपरं व्यक्तम् ॥

इत्यभाववादः

अथ सम्बन्धाक्षेपवादः

"ननु[1] प्रत्यक्षादीनि" तत्सद्व्यत्ययेन सूत्रावयवे लोकप्रसिद्धप्रत्यक्षपरे लोकसिद्धिसामान्यान्मानान्तरेषु भाष्योक्तेषु लोकसिद्धव्युत्पत्तित एव "अनिमित्तं विद्यमानोपलम्भनत्वात्" इति सूत्रावयवान्तरेण शब्दस्यानपेक्षता औत्पत्तिकसूत्रावयवोक्ताक्षिप्यते। तत्समाधित्सया सम्बन्धौत्पत्तिकत्वे प्रक्रान्ते तस्मिन्नप्याक्षिप्ते समाधातैकदेशी शाब्दः शब्देऽर्थे च सम्बन्धे चान्यथास्थितो यावन्न बोध्यते तावत्सम्यक् समाधिरशक्य इत्येवं वादस्थानानेकान्तरितोऽत्र प्रस्तुतसमाधिरिति चित्रापरिहारान्तानां सङ्गतिः। विद्यमानोपलम्भनत्वादित्थमनपेक्षताक्षेपः—लोके हि फलसाधनतया कार्ये लिङादिर्दृष्ट इति वेदेऽपि न स्वतन्त्रकार्यार्थः। अतो विनियोगाधीनमेव नियोगमाहेति फलसाधन-

प्रत्यक्षानन्तरं शास्त्रप्रामाण्याक्षेपः कथं प्रत्यक्षसूत्रार्थतयोपन्यस्यते? तदर्थस्य तल्लक्षणोक्त्यानन्तर्यहानायोगात् तत्समर्थनस्य चानन्तरादर्शनादनेकन्यायव्यवधानेन च तत्समाधानं सूत्रार्जवभङ्गादयुक्तमिति शङ्कां सूत्रघटनोपन्यासेन परिहरति—तत्सद्व्यत्ययेनेत्यादिना। वृत्तिकारव्याख्यापेक्षं लक्षणपरत्वं सूत्रावयवस्य प्रयोजकैक्यात्सर्वप्रमाणव्यापीति तद्विवरणोत्तरकालमेवोत्तरावयवार्थविवरणं प्रस्तुतलोकप्रसिद्धिहेतुबलोपस्थापितोक्तानपेक्षत्वाक्षेपार्थं प्रसक्तमिति न तत्र व्यवधानदोषः। तत्समाधानार्थसम्बन्धौत्पत्तिकत्वार्थमेव तदनन्तरन्यायान्तरव्युत्पादनमपीति न सूत्रगतेरनार्जवदोष इत्यर्थः। सूत्रोक्तहेतोरुक्तानपेक्षत्वहेत्वाक्षेपसामर्थ्यमुपपादयति—विद्यमानोपलम्भनत्वादित्थमिति। लोकव्युत्पत्तेरेव वेदेऽपि शब्दवृत्तिव्यवस्थापकत्वाल्लिङाद्यर्थप्रधानत्वाच्च विधिवाक्यावगतेः कार्यस्य च तदर्थतोक्तेः फलसाधनत्वगर्भत्वनियमाच्च लोके तत्प्रमितेर्वेदेऽपि तदतिरिक्तक्रमासम्भवाल्लिङादेश्च तदशक्तेरुक्तत्वात्तच्छक्तविनियोगगम्यसाधनताधीपूर्विकैव लिङादिवृत्तिरुपेया। विनियोगस्य च सापेक्षत्वसंप्रतिपत्तेः मानान्तरापेक्षतापत्तेः कार्यधीरपि तदपेक्षैवेत्यर्थः। न केवलं शब्दस्वभावमात्रमेवैवं सापेक्षत्वापादकम्, तदर्थस्वभावोऽपि तदनुगुण

१. Omitted ननु. क. ख.

तात्मकविनियोगे मानान्तरापेक्षतयानपेक्षताहानिः । विशेषतश्चित्रायागादेः पश्वादि विद्यमानोपलम्भनम् । यद्धि क्रियानन्तरं भवनार्हं तस्य मानान्तरोपलम्भार्हता विद्यते । तेन मानान्तरापेक्षफलसाधनतया कार्यता व्यक्तेति विशेषतश्चित्रोदाहृता । शुष्यत्सु व्रीहिषु वृष्ट्याद्यनन्तरमेव काम्यं मानान्तरगम्यं व्यक्तम् । कालान्तरफले स्वर्गादौ मानान्तरानर्हेऽपि मानान्तरापेक्षे विनियोगाधीनो नियोगोऽनुगम्यत एव । न च कार्यतामात्रे लिङादिरुक्तेति वेदे फलानपेक्षैव कार्यताधीः; फलादेवानेन कार्यं बुद्धम्, न वेदादप्यन्यथा बोद्धुं शक्यम् । कामी कामोपायमेव कार्यं बुद्ध्यते इत्येवमपूर्वव्युत्पत्तिरुच्यते । कामी तु सर्व एवेति फलसाधनतापेक्षमेव कार्यं मानान्तरार्हमिति नापूर्वे वेदप्रामाण्यं शक्यम् । किन्तु फलसाधनतया क्रियैव

एव चित्रादावित्यभ्युच्चयार्थं तदुदाहरणं भाष्य इति दर्शयति—विशेषतश्चित्रायागादेरिति । तच्चानन्तरनियतफलकार्यादेरप्युपलक्षणमित्याह—शुष्यत्सु व्रीहिष्विति । मानान्तरानर्हार्थविषयेऽप्युक्तशब्दस्वभावहेत्वनुवृत्तेर्व्यापिता प्रामाण्याक्षेपस्य सिद्ध्यतीत्याह—कालान्तरफले स्वर्गादाविति । ननु कार्ये लौकिके फलसाधनत्वाव्यभिचारेऽपि शब्दशक्तिः कार्यमात्रनिष्ठोक्ता, पुंवाक्यत्वप्रयुक्तश्च लोके तदव्यभिचार इति वेदे कार्यमात्रधीः कुतो न स्यादित्यत्राह—न च कार्यतामात्र इति । पुंसः फलापेक्षकार्यधीमात्रार्हत्वात्तज्जनकः शब्दोऽपि तदपेक्षां नातिवर्ततेत्यर्थः । ननु पुंसोऽपि दुःखात्मकक्रियामात्रविषयं तदर्हत्वम्, तदतिरिक्तापूर्वार्थव्युत्पत्त्यपेक्षया वेदादनपेक्षार्थधीरस्त्वित्यत्राह—कामी कामोपायमेवेति । कामिबोधान्वयानुपपत्तिमूलत्वात्तद्व्युत्पत्तेः न काम्यसाधनत्वातिवर्तित्वमिति तदुपदर्शकप्रमाणान्तरापेक्षा न मुच्येत । कामिता च कर्तुर्नियतैवेति मानान्तरापेक्षानतिलङ्घनादपूर्वकार्यार्थतापि न स्यादित्यर्थः । एवं च लौकिकवाक्यमूलसापेक्षत्वस्य प्रागेव निरस्तत्वात् पुनरुक्ताशङ्काप्याक्षेपप्रकारस्यान्यतया परिहृतेत्याह—इत्थमाक्षेप इति । नन्विह मानान्तरबाधितार्थत्वमप्रामाण्यहेतुर्भाष्योक्त इत्याशङ्क्य सापेक्षत्वाभिप्राया तदुक्तिरित्याह—

१. लम्भानर्ह. क, ख,

कार्या। इत्थमाक्षेपः कश्चिन्न निरस्त इत्यपुनरुक्तिः। पश्वनुपलब्ध्यापि मानान्तरापेक्षैवोक्ता। यद्धि मानान्तरापेक्षं तदसति मानान्तरे हेयमित्युक्तम्; न तु विपर्ययाद्धेयताभिप्रेता। क्रियाफल च पशुरनन्तरम्; अतो मानार्हम्। कृषिफलमपि भूविभागोऽनन्तरमेव। प्रयोजनं तु सस्यमन्तरितम्। इह फलमेव पशुः प्रयोजनमित्यनन्तरतया मानान्तरार्हमित्युक्तम्। मूलयुक्तिसापेक्षता स्वर्गादिफलकेऽप्युक्ता। एवं विचितः सापेक्षता। तथार्थवादतोऽपि "एषः" इति शरीरं प्रत्यक्षं निर्दिष्टम्। तद्यातीति दृष्टविरुद्धम्। न चार्थवादतया लक्षणया "एष यज्ञायुधी" इत्यात्मोक्तः "स स्वर्गं यति" इति, देहातिरिक्तात्मासिद्धेः।

विवरणे तु सम्बन्धस्य पौरुषेयतया वेदस्यापि पौरुषेयतेति विद्यमानोपलम्भनं साध्यसधनरूपं वेदार्थः, नापूर्वम्। चित्रेष्टिफलस्य चैहिकत्वानुमतेरनन्तरादर्शने नेष्टिजन्यता संस्कारद्वारा कल्प्या, कालान्तरे च प्रति-

पश्वनुपलब्ध्यापीति। सापेक्षत्वं विना वाधानुपपत्तेः फलमुखेन सापेक्षतैव विवक्षिता। तत एवामानत्वसिद्धेर्न तत्फलं विवक्षितमित्यर्थः। अनन्तरानुपलब्धेः सापेक्षतोपस्थापनसामर्थ्यमाह — क्रियाफलं चेति। क्रियाफलत्वप्रयुक्तोऽनन्तरोपलम्भप्रसङ्ग इति तन्मुखेन सापेक्षता दर्शितेत्यर्थः। ननु क्रियाफलत्वमनन्तरत्वव्यभिचारीति शङ्कां परिहरति—कृषिफलमपीति। एवं साक्षाद्भाष्योक्तमानान्तरार्हार्थत्वहेतोरुदाहरणमात्रवर्तित्वेऽपि तदापादकतया विवक्षितस्य मूलहेतोः सर्वव्यापित्वात् सर्वापेक्षासिद्धिरित्याह—मूलयुक्तिरिति। उक्तविवेकेनोत्तरभाष्यार्थमाह — एवं विधित इति।

विवरणे विधान्तरेण मानान्तरगम्यार्थत्वमाक्षेपहेतुरिष्ट इत्याह—विवरणे तु सम्बन्धस्येति। साक्षादुत्तरसूत्रार्थनिवर्त्यपरत्वमेव पूर्वपक्षसूत्रस्य स्वतः प्राप्तमित्यभिप्रायः। चित्रादेरैहिकफलत्वानुज्ञानाच्च विद्यमानोपलम्भनत्वमित्याह— चित्रेष्टिफलस्य चेति। तथापि कथमनन्तरफलत्वापादनेन भाष्ये दूषणोक्तिर्घटते? तैलपानादिवत्संस्कारद्वारेण व्यवहितफलत्वसम्भवादित्याशङ्क्य व्यवहितफलस्य प्रतिग्रहादिहेत्वन्तरदर्शनान्न संस्कारकल्पनावकाश इति परिहरति—अनन्तरादर्शन

ग्रहादिहेतुदर्शनात् मानान्तरार्हफलनिष्ठे च नापूर्वमित्युक्तम्। कामश्रुतिरपि न नियोज्यपरा; किन्तु 'आरोग्यकामः पथ्यमश्नीयात्' इतिवत् फलपरेत्यनपेक्षता हता, सत्यार्थताप्यनन्तरादर्शनहता। आमुष्मिकफलेऽप्यपूर्वार्थज्ञानान्मानान्तरार्हतया नाश्वासः। दृष्टविरुद्धश्च "एष यज्ञायुधी" इति। चित्रेष्टौ संवादाभावः, इह विरोध इत्युदाहृतमात्मसाधनार्थम्। "न चैष यातीति विधिशब्दः" इत्यनेन वेदगम्य आत्मेति वेदान्तिमतं निरस्तम्; विधिशब्द[1] एव कदाचिदात्मप्रमितिशक्तः, न चायं तथा।

मतद्वये राद्धान्तमुपक्रमते—"औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः तस्य ज्ञानम्" इत्यनेन। स्यान्मानान्तरार्हता, यदि पौरुषेयः सम्बन्धः, न चैवम्[2]।

इति। क्रियोत्पाद्यफलार्थे च क्रियाविधौ मानान्तरार्हत्वादपूर्वाभावः प्रोक्षणादावुक्त इति चित्रादौ विद्यमानोपलम्भत्वान्तमेव तदैहिकफलत्वं स्यादित्याह—मानान्तरार्हफलनिष्ठे चेति। ननु पशुकामनियोज्यश्रुतिबलादिना अपूर्वनिष्ठो विधिरस्त्वित्यत्राह—कामश्रुतिरपीति। सा ह्यन्यथानुपपन्नेति न प्रोक्षणादिविधितुल्यताप्राप्तं साध्यसाधनमात्रनिष्ठत्वं विधेरपहरेदित्यर्थः। तन्निष्ठतोक्त्या फलद्वयमिह भाष्याभिमतमित्याह—इत्यनपेक्षतेति। अनुदाहृतविपर्यव्याप्तिमाक्षेपस्याह—आमुष्मिकफलेऽपीति। "दृष्टविरुद्धं च" इति भाष्याभिप्रायमाह—दृष्टविरुद्धं चेति। ननु च "एषः" इति विधिनिरासयत्नोऽनर्थकः, प्रसङ्गाभावात् फलाप्रसिद्धेश्चेत्याशङ्क्य तदभिप्रायमाह—न चैष यातीति। देहव्यतिरिक्तात्मनोऽनुभवमात्रसिद्ध्यभावेऽपि वेदादेव सिद्धिरस्त्विति वेदान्तैकदेशिमतानुसारिशङ्कानिरासेनार्थवानेवेत्यर्थः। कथं तन्निरासासामर्थ्यमित्यत्राह—विधिशब्द एव कदाचिदिति। तेऽपि तदुपासनविध्याक्षेपगम्य इति मन्यन्ते, नास्य तदनुसारेणापि तच्छक्तिरस्ति; वस्तुतस्तु विधिनिष्ठवाक्यानां न तद्गमकत्वमित्यभिप्रायः।

पूर्वपक्षवच्च सिद्धान्ते प्रतिपाद्यभेदोऽस्तीत्याह—मतद्वय इति। निराकार्यपूर्वपक्षभेदे कथं तन्निराकरणरूप सिद्धान्तस्यैकरूपतेति शङ्कां परिहरन्नेकरूपेण सूत्रमवतारयति—स्यान्मानान्तरार्हतेति। निबन्धनोक्तगत्या सापेक्षत्वापत्तिमुद्भाव्य

१. अविधिशब्द. क. २. न त्वेवम्. क.

नन्वौत्पत्तिकत्वेऽपि लोके फलसाधनताधीनं कार्यं मानान्तरार्हमुक्तम् । मैवम्, मानान्तरप्रमिते लोके प्रयोगोऽस्तु; शक्तिस्तु कार्यमात्रे, स्वर्गकामान्वयादपूर्वे, पदार्थस्यैव वाक्यार्थत्वात्। वाक्यार्थसम्बन्ध एव सूत्रेणौत्पत्तिक उक्त इत्याक्षिप्तवाक्यार्थसमाध्यर्थं सूत्रम् । तर्हि पूर्वव्याख्ययैव समाधिसिद्धेः पुनर्व्याख्या व्यर्था । न, शङ्कान्तरनिरासाय पुनर्व्याख्या । शङ्का च—सम्बन्ध एव नास्ति, कस्यौत्पत्तिकतयानपेक्षता वेदस्य? संश्लेषो हि पाटनाद्यापत्तेरशक्यः । यद्यपि राद्धान्ती वाच्यवाचकतामिच्छति न संश्लेषम्, तथापि प्रथमश्रुतादर्थाप्रतीतेर्धूमादेरिव सम्बन्धान्तरपूर्विकैव गम्यगमकतेत्यापाद्य शाब्दानुमतः संश्लेषः पाटनाद्यापत्तेर्वारितः । यौनादिस्तु केनाप्य-

परिहरति—नन्वौत्पत्तिकत्वेऽपीति । अयमर्थः—सहायद्वयापेक्षं सर्वत्रार्थबोधकत्वं शब्दानाम् । शक्तितात्पर्यग्रहात्मकं तत् । तत्र तात्पर्यग्रहः प्रतिवाक्यावसायीति शक्तिमात्रे लौकिकप्रयोगात्तु वृत्तिः, न तात्पर्ये, प्रयोगगततात्पर्यनिष्ठं च यथोक्तं मानान्तरापेक्षत्वं लोकदृष्टम्; न तद्वेदेऽनुसरणीयम् । शक्तिग्रहस्तु कार्यमात्रनिष्ठश्चोदनासूत्र उक्तः । स च स्वर्गकामसमभिव्याहारादपूर्वावसायीति, न वेदे मानान्तरापेक्षाहेतुरस्तीति । नन्वेवंशक्तिमात्रपृथक्कारेणौत्पत्तिकत्वोक्तौ, वाक्यविषयानिमित्तसूत्रेणैवविषयत्वासिद्धेः कथं तदुत्तरत्वमित्यत्राह—पदार्थस्यैव वाक्यार्थत्वादिति । अन्वितस्यैव पदार्थत्वान्न शक्तितात्पर्ययोर्ग्राहकभेदेऽपि विषयभेद इत्यर्थः । नन्वेवं अनिमित्तादेरिवौत्पत्तिकसूत्रस्यार्थान्यत्वाभावात् व्याख्यानान्तरयत्नोऽनर्थक इति चोदयति—तर्हि पूर्वव्याख्ययैवेति । यथोक्तोपक्रमेण सम्बन्धाभावशङ्कानिरासेऽपि सूत्रस्य वृत्तिरस्तीत्यधिकार्थपरताविष्करणेनार्थवत्तेति परिहरति—शङ्कान्तरनिरासायेति । तच्छङ्कां विवृणोति—संश्लेषो हीति । किमित्यनङ्गीकृततादात्म्यनिरासादर इत्याशङ्क्य बोधकत्वातिरिक्तसम्बन्धापादनाभिप्राय इत्याह—यद्यपि राद्धान्तीति । यौनादिनिरासानादरो बाधनङ्गीकारादित्याह—यौनादिस्त्विति । संश्लेषे शाब्दाभिमतहेत्वनुवादेन वक्ष्यमाणासम्भवाभि-

१. कत्वे लोके. क, ख. २. प्रतीतानि. क.

ननुमतो हेत्वनपेक्षहानः। शब्दाध्यासरूपोऽर्थः, 'गौः' इति शब्दार्थयोस्तुल्यनिर्देशात् इति शब्दाः। न निर्देशसाम्यादध्यास इत्याकृतिग्रन्थे वक्ष्यते। अतः सम्बन्धान्तराभावात् संज्ञासंज्ञिता प्रयत्नजन्या। उत्पत्तिमत्ता तु धीक्रियागर्भत्वात् सिद्धैव, चक्षुष आलोकापेक्षास्तु, शब्दस्तु गमकत्वावगतो गमयति; तत्रात्माश्रयदोष इति हेत्वन्तरापेक्षायां चैत्रादौ समयदर्शनात् समय एव गवादिष्वर्थधीहेतुः। तदाह कीर्तिः—

"यज्जातीयो यतः सिद्धः स तस्मादग्निकाष्ठवत्।
अदृष्टहेतुरप्यन्यो विशिष्टः संप्रतीयते" ॥ इति।

द्विविधा यत्नाधीनता संज्ञा वास्तु सङ्केतो वा—यदायमर्थो बोधयितुमिष्टस्तदा

प्रायेणेहानुद्घाटनमित्याह — शब्दाध्यासरूप इति। एवं चेद्देवदत्तादिसंज्ञासाम्यमनिवार्यमित्याह—अतः सम्बन्धान्तराभावादिति। ननु नित्यार्थतयौत्पत्तिकपदस्य राद्धान्तिना व्याख्यातत्वात् जन्यत्वस्याप्यनिष्टत्वे किमर्थं प्रयत्नेन विशेष्यत इत्याशङ्क्य नित्यत्वोक्तिर्यत्नजत्वनिवृत्त्यर्था, न निष्पत्तिनिषेधार्थेत्याह—उत्पत्तिमत्ता तु धीक्रियागर्भत्वादिति। ननु शाब्दश्रुतेरर्थधीव्यभिचारःसहा यापेक्षामात्रमापादयेत् चक्षुरादेरिव, सहायत्वव्युत्पत्तिरूपः प्रसिद्ध एवेति कुतश्चैत्रादिसाम्यापत्तिरित्याशङ्क्य चक्षुरादिवैषम्यमुखेन तदापत्तिमुपपादयति—चक्षुष आलोकापेक्षास्त्विति। व्युत्पत्तेर्नालोकादिवदविचारितसिद्धं सहायत्वम्, सम्बन्धज्ञानरूपत्वात्; तत्र यत्नोपाधिकसम्बन्धज्ञानं वा तदनपेक्षं वा तदिति विचारणीयम्। तदनपेक्षत्वेऽर्थबोधकत्वज्ञानमेव तदित्यापतेत्। तदा च ज्ञानस्य ज्ञेयानपेक्षस्य सर्वसाधारणस्याहेतुत्वसंप्रतिपत्तेः तदपेक्षत्वेऽर्थबोधकत्वमेव स्वहेतुरित्याश्रितं स्यात्। तदसम्भवादन्यापेक्षायां व्युत्पत्त्यपेक्षबोधकप्रसिद्धचैत्रादिसाम्यनिवारणात् समयज्ञानमेव व्युत्पत्तिस्वरूपं स्यादित्यर्थः। वाद्यन्तरसंमतिं चाह—तदाह कीर्तिरिति। ग्रन्थोक्तं द्वैविध्यविवेकार्थमाह—द्विधा यत्नाधीनतेति। तत्र संज्ञायां चैत्रादौ सर्वप्रसिद्धत्वात् सङ्केतस्वरूपमाह — यदायमर्थ इति। हस्तसङ्केतादितुल्यः स

१. रूपोऽर्थः क. ख. २. गतौ. क. ख.

चायं शब्दः प्रयोज्यः इत्येवम् । तदेवं नरयत्नापेक्षार्थधीः वेदादपीति पौरुषेयवेदा मानान्तरगम्यार्थाः । एवं सम्बन्धाक्षेपाच्चित्राक्षेपसमाध्यपर्यवसानम् ॥

इत्यर्थः । उपसंहरति—तदेवमिति । चित्राक्षेपोपक्रमोक्तसिद्धान्तव्यवधाननिदानं चाव्यक्तोक्तमेवं विवृतमित्याह—एवं सम्बन्धाक्षेपादिति ॥

इति सम्बन्धाक्षेपवादः

अथ स्फोटवादः

"अथ गौरित्यत्र कः शब्दः" इति सम्बन्धसमाधित्सोर्नायं प्रश्नः; एवं हि "गकारौकारविसर्जनीयाः" इत्युत्तरमाचिक्षिप्सोः स्यात्; अतः शाब्दस्यैवायमनुयोगः। पूर्वपक्षिणा राद्धान्ति निर्जिते निर्जितं मत्वाह शाब्दः— संज्ञासंज्ञितां वदतः संश्लेषं त्यजतः अवर्णात्मकशब्दाध्यासमनिच्छतः कस्ते शब्दोऽभिमतः? न हि संश्लेषो यत्रापेक्षः। राद्धान्ती श्रोत्रग्राह्या वर्णा इत्याह। न तेऽर्थसंश्लिष्टाः, भिन्नदेशत्वाद्वर्णार्थयोः। शाब्दस्तु—अर्थधीकार्याद्वर्णादन्यः शब्दः; स संश्लिष्टोऽस्तु। वर्णा हि धीस्था अर्थधीहेतवो वाच्याः; उच्चारणक्रमात्तत्क्रमवन्तो धीस्थाः; तद्धियां च क्षणिकत्वान्न साहित्यम्। न च तत्स्मृतीनां साहित्यमुत्पत्तौ स्थितौ वा अनुभूतिवदेव। न च संस्कारसाहित्यादनेकवर्णविषयता, एकस्मृतिस्थत्वेऽपि व्यतिक्रमोच्चरितस्मृतिस्थे-

नन्वनन्तरप्राप्तसम्बन्धसमर्थनशेषत्वं कथं प्रश्नोक्तेरित्याशङ्क्य सिद्धान्तिकर्तृकत्वे तदुपयोगो वाच्यः, न तत्कर्तृकः प्रश्न इत्याह—अथ गौरित्यत्र कः शब्द इतीति। क्रमात्तत्कर्तृकत्वोपगमे तदुत्तरान्वये सामर्थ्यविरोधान्न तत्कर्तृक इत्यर्थः। कस्य तर्हीत्यत्राह—अतः शाब्दस्यैवेति। उत्तरग्रन्थसामर्थ्यप्राप्तशाब्दकर्तृक एव नेय इत्यर्थः। न च तदनवकाशदोषोऽपीत्याह—पूर्वपक्षिणेति। पूर्वपक्षनिषेधसमर्थः संश्लेष एव त्वयाभ्युपेय इति तदर्थं वर्णात्मकशब्दपक्षत्यागेनावर्णात्मकाभ्युपगम एव कार्य इत्यापादनाभिप्रायावकाशसम्भवादित्यर्थः। तत्पक्षे कथमुत्तरग्रन्थसम्बन्ध इत्यत्राह—राद्धान्ती श्रोत्रग्राह्या वर्णा इति। तदापादितसंश्लेषोत्तरत्वं कथमुत्तरग्रन्थस्येत्याशङ्क्य उक्तवर्णसामर्थ्यलब्धस्तन्निषेध इत्याह—न तेऽर्थसंश्लिष्टा इति। एवं ग्रन्थगतिं प्रदर्श्य अवर्णात्मकशब्दापादकाभिमतहेतुं विवृणोति—शाब्दस्त्वर्थधीकार्यादिति। वर्णवाचकत्वपक्षे तत्सहत्वेऽवश्याभ्युपेये श्रौत्रधिया चाशक्ये स्मृत्यपेक्षया च स्वतोऽनुपपन्नेऽर्थधीकार्यबलेन संस्काराणामेकस्मृतिजनकत्वकल्पनया तदुपेयम्; तच्चोच्चारणाद्युपाधिगतक्रमाक्रमानिवृत्तेः क्रमानपेक्षत्वे चातिप्रसङ्गादयुक्तमिति वर्णव्यतिरिक्तवाक्यात्मकशब्दविवर्तरूपतार्थस्योपेया; वर्णविवर्तनव-

१. स हि. ख.

भ्योऽप्यर्थधीप्रसक्तेः स्मृतावक्रमकत्वादुच्चारणक्रमानुपयोगात् । अतो वर्णेभ्योऽर्थधीरशक्येति वर्णादन्यस्यार्थविवर्तोपगमः । नत्र न मानान्तरविरोधः । ननु विवर्तपक्षेऽपि श्रोत्रादेः शब्दार्थभेदधीः समाधेया । तन्न ; श्रोत्राद्युपधानादेव सास्तु, मणिदर्पणाद्युपाधेरिव मुखानेकत्वधीः । ननु च मुखैकता ग्राहकचक्षुरेकतया, इह तु ग्राहकश्रोत्रादिभेदान्नैकता । न तत्रापि ग्राहकैक्यादेकता, किन्त्वेकधिया ; सेहास्ति शब्द इत्येका धीः ; अभिव्यञ्जकध्वनिभेदाद्भेदः । एवं शब्दस्य जात्यादिभिरभेदस्तुल्यनिर्देशात्, भेदस्तु श्रोत्राद्युपाधेः । एवं विश्वमेकम् । श्रोत्रादिभेदोऽपि शब्दादिधीभेदात् । अन्योन्याश्रयमविद्यानुगुणम् । तत्त्वपक्षे वर्णेभ्योऽर्थधीतः संस्कारैः

न्मानान्तरविरोधाभावादित्यौत्पत्तिकत्वनिर्वाह इत्यर्थः । नन्वयमपि पक्षः श्रोत्रादीन्द्रियनिमित्तभेदधीविरोधसमाध्यभावादयुक्त इति चोदयति—**ननु विवर्तपक्षेऽपीति** । श्रोत्राद्युपाधिभेदमात्रेणापि तत्समाधिसिद्धिरिति परिहरति — **तन्न श्रोत्रादीति** । ननु मुखादिपरिमाणाद्यन्यतया तदन्यत्वानुपगमः, तद्ग्राहकचक्षुराद्यनिवृत्त्या तदेकत्वधीबलाद्ग्राहकभेदाच्छब्दार्थभेदो दुर्वार इति पृच्छति—**ननु च मुखैकतेति** । परिहरति—**न तत्रापीति** । तत्राप्येकधीमात्रमैक्यधीहेतुः, नेन्द्रियैक्यम् ; एकधीश्च शब्दे स्पष्टा ; नानात्वोपाधिश्च ध्वनिभेदः । शब्दार्थयोस्तु निर्देश्यैक्यफलव्यङ्ग्यैक्यधीः , युगपदेकशब्दनिर्देशो हि न विलक्षणधीस्थेषु दृष्टः, नानार्थविवक्षया 'गावः' इत्यभिधानादर्शनात् । एकजातीयविषयस्य दर्शनादेकधीगर्भैव व्युत्पन्नस्यान्योन्यानुरज्यानुरञ्जकतया शब्दार्थज्ञानेषु एकशब्दनिर्देशोपगूढा धीर्युगपत् भेदधीश्च ग्राहकभेदौपाधिकी स्यादित्यर्थः । एवं यथोक्तभेदाभेदधियोरौपाधिकत्वानौपाधिकत्वभेदोक्त्या स्पष्टास्पष्टत्वविशेषाद्भेद एव तात्त्विक इति विवर्तपक्षो नावतरेत् इति शङ्का निरस्ता । सर्वव्यापि च तदेकत्वं स्यान्न प्रकृतवाच्यवाचकमात्रवर्तीत्याह—**एवं विश्वमेकमिति** । नन्वेवं श्रोत्रादिभेदोऽप्यन्यनिमित्त एवोपेयः, किं तदित्यत्राह—**श्रोत्रादिभेदोऽपीति** । नन्वेवमन्योन्याश्रयदोषापत्तिरित्यत्राह — **अन्योन्याश्रयमिति** । तात्त्विकार्थनिर्धारणाङ्गतर्कविरोधरूपत्वात् तस्याविद्योत्थत्वापादकतयास्मद्राद्धान्तानुगुणत्वान्न दोष इत्यर्थः । वर्णमात्रं तात्त्विकमिति वदतश्चायं दोषोऽपरिहार्य इत्याह—**तत्त्वपक्ष इति** । एतेनैव वर्णनिमित्तस्फोटाभिव्यक्तिप्रति-

१. एवं तत्त्व. क. ख.

सम्भूय स्मृतिः; ततो वर्णेभ्योऽर्थधीरित्यन्योन्याश्रयदोषः । अत एव [1]न स्फोटाभिव्यक्तेः साम्यमर्थधिया; नैकैकेन वर्णेन ध्वनिना [2]वाभिव्यक्तिः; न मिलितैः; न भागशः, निर्भागत्वात् स्फोटस्येति दुर्घटतयैवाविद्याश्रयणान्न दोषः । तत्त्वपक्षेऽप्यन्योन्याश्रयता बीजाङ्कुरवदिति चेत्, न; व्यक्तिभेदादनादितया च बीजाङ्कुरयोर्नान्योन्याश्रयम्; अर्थधीस्तु न तथा । ननु शब्दाभेदपक्षे चोदनार्थभेदधीर्न स्यात् । मैवम्; अर्थैकत्वे वर्णपदभेदो न वाक्ये; अर्थभेदे तु न वाक्यानामेकता । ननु शब्दाद्वैतमुक्तम् । ब्रह्मावस्थायां तत्, शास्त्रार्थदशायां तूपाधितो भेदः । ननु शास्त्रार्थो विद्येष्यते, ततोऽभ्युदयोक्तिः; अविद्या हि प्रत्यवायहेतुः । सत्यं निषिद्धापेक्षया स्वर्गादिकरमुदयहेतुः;

बन्द्या तन्निमित्तार्थबोधोपपादनमपि प्रत्युक्तमित्याह—अत एव न स्फोटाभिव्यक्तेरिति । ननु वर्णश्रुत्यर्थधियोरन्वयव्यतिरेकसिद्धे हेतुहेतुमत्त्वे अनन्तरत्वासिद्धिसमाधिर्बीजाङ्कुरवत् संस्कारापेक्षः कल्प्य इत्यन्योन्याश्रयपरिहारसम्भवात् तात्त्विकत्वोपपत्तिरिति शङ्कते—तत्त्वपक्षेऽपीति । परिहरति—न व्यक्तिभेदादिति । कारणान्तरशङ्कारूपप्रतिबन्धकशङ्काभावात्तत्र तन्निर्वाहकसंस्कारकल्पनापेक्षया स्यात् व्यक्तिभेदादनादितया चान्योन्याश्रयसमाधिः । इह तु पदवाक्यविषयैकधीः संस्कारकल्पनाविरोधितयानुवर्तत इति न वर्णकारणत्वनिर्वाहाय संस्कारकल्पनावकाश इति न साम्यमित्यर्थः । ननु भेदापह्नवेनाभेदोपगमे चोदनार्थभेदस्यापि निवृत्तेस्तद्भेदापेक्षं चोदनाप्रामाण्यं न स्यादिति चोदयति—ननु शब्दाभेदपक्ष इति । परिहरति—मैवं अर्थैकत्व इति । अर्थप्रतीत्यनुगुणपदवाक्यैकधीबाध्यत्वात् अभेदस्य अर्थाभेदे वाक्याभेदस्यानुपगमात् न प्रामाण्यभङ्ग इत्यर्थः । ननु पूर्वोक्तशब्दाद्वैतविरुद्धमेतदित्याह — ननु शब्दाद्वैतमिति । परिहरति—ब्रह्मावस्थायां तदिति । वाक्यजप्रमितिसमकालैव भेदनिवृत्तिधीः प्रामाण्यविरोधिनी, तदातूपाध्यनिवृत्तेः न तन्निमित्तभेदबाध इत्यर्थः । नन्वेवमप्यविद्याकल्पितत्वं भेदस्याङ्गीकृतमित्यङ्गीकृताभ्युदयकरत्वहानिरित्याह — ननु शास्त्रार्थ इति । परिहरति—सत्यं निषिद्धापेक्षयेति । अभ्युदयप्रत्यवाययोः आपेक्षिकत्वात् परमाभ्युदयमोक्षापेक्षया स्वर्गादिकं प्रत्यवायकरमपि नरकादिफलनिषिद्धापेक्षयाभ्युदयकरमिति न प्रामाण्यहानिरित्यर्थः । नन्वेवं गुणविधिकर्मविधिवाक्यानामर्थ-

१. Omitted. न. ख.
२. Omitted. वा. क. ख.

मोक्षापेक्षया प्रत्यवायतैव तत्त्वत इति। गुणविधिकर्मविधिवाक्यानामेकतैकानुष्ठानोपाधेः। तदेवम् 'शब्दः' इति सर्वत्रैकतानिर्देशाच्छब्दानामेकता शब्दजात्यादिनिर्देशसाम्यात् जात्यादेः शब्दरूपतेत्यद्वैतम्। अर्थरूपत्वाच्छब्दस्य तादात्म्यादौत्पत्तिकादर्थधीः। तात्त्विके त्वेकत्वे उपाधितः सर्वभेदधियामुपपत्तिः शब्दप्रामाण्यं चाविद्यावस्थायाम्॥

राद्धान्तस्तु—नैकनिर्देशादेकधीसिद्धिः; एकनिमित्ता ह्येकशब्दवाच्यता, न पुनरेकताकृता। एकं च निमित्तं जातिः क्रिया गुणो द्रव्यं वा गौर्गन्ता शुक्लो विषाणीति, यथाक्रमम्। क्वचिद्वस्त्वेकता निमित्तमाकाशमिति। शब्दशब्दप्रवृत्तौ च श्रोत्रग्रहणक्रिया निमित्तम्। न च सत्त्ववर्णत्वादेरपि शब्द-

भेदे सत्येवैकशास्त्रत्वाभ्युपगमः कथमित्यत्राह—गुणविधीति। सत्यपि गुणविधेः विधेयान्तरे कर्मविधिवाक्यप्राप्तानुष्ठानानुवादेन गुणमात्रविधेरेकानुष्ठानोपाधिकृतमेकशास्त्रत्वमद्वतमेवेत्यर्थः। अतः पूर्वोक्ततात्त्विकाद्वैतमचलितमेव भेदापेक्षविधिप्रामाण्येनेत्याह—तदेवं शब्द इतीति। ततः पुरुषानपेक्षमेव श्रुतिप्रामाण्यं सिध्यतीत्याह—अर्थरूपत्वाच्छब्दस्येति। न चाविसंवाद्यशेषप्रमाणप्रसिद्धभेदबाधदोषः, सर्वभेदधियामुपाधिनिमित्ततयोपपत्तेरित्याह—तात्त्विके त्वेकत्व इति। न चोपाधिनिवृत्तौ भेदापेक्षप्रामाण्यभङ्गदोषोऽपि, तदवधिकत्वेनैव तदुपगमादित्याह—शब्दप्रामाण्यं चेति।

सिद्धान्ताभिप्रायमाह—राद्धान्तस्त्विति। यद्यपि सर्ववर्णेषु शब्दपदनिर्देशोऽनुवृत्तः, तथाप्येकबोधानुवृत्तिरसिद्धैव। यथा हि उच्चनीचभेदेन उदात्तादिभेदेन चैकवर्णोच्चारणे प्रसिद्धा तत्प्रत्यभिज्ञा सर्वत्रापि तच्छ्रवणनिमित्तवर्णलेखनस्यैकरूपतयैव सर्वश्रोतृसंप्रतिपत्तेः, न तथा नानावर्णोच्चारणेऽप्येकधीः कस्यचिदुदेति, यतो भेदधीरुपाधिमात्रनिमित्ता स्यात्। तेनैकनिर्देश एवोपाधिकृतः स्यात्। तच्च निमित्तं प्रसिद्धमेवानेकविधम्। तत्र पराभ्युपगतव्यक्त्यर्थत्वाङ्गीकारेण गौरित्येकोपाधिकानेकप्रत्युदाहरणं नेयम्। तत्र प्रकृते निमित्तविशेषमाह—शब्दशब्दप्रवृत्ताविति। श्रोत्रग्रहणरूपोपाधेः जातावपि प्रवृत्तेः शब्दपदवृत्त्युपाधित्वमयुक्तमिति

१. सर्वप्रामाण्यम्. क २. एवं च. क.

तापत्तिः, सत्त्वादिजातेरसिद्धेरश्रोत्रग्राह्यत्वात् । न च शब्दत्वजातेर्निर्निमित्तता, शब्दत्वासिद्धेः । यद्वस्तुग्रहे हि पूर्वदृष्टावमर्शः, तत्र जातिधीसिद्धिः ; न च वर्णान्तरग्रहे तथेति शब्दत्वासिद्धिः । एवं सत्त्वाद्यसिद्धिः । प्रमाणक्रियातः सच्छब्दः । अतः शब्दैकत्वासिद्धेर्दूरे निर्देशसाम्याच्छब्दरूपतार्थानाम् । अतः श्रोत्राद्युपाधेर्भेद इत्ययुक्तम् । मुखादौ बिम्बाकारप्रत्यभिज्ञया उपाधितो भेदधीर्युक्ता । एवं विवर्तपक्षे मानहतेऽर्थधीकार्यात् संस्कारैः सम्भूयानेकवर्णस्मृतिः कृतेति युक्तम् । व्यतिक्रमोच्चरितेषु कार्यादर्शनात् क्रमविशेषोच्चरितवर्णधीभिर्जनितैः संस्कारैः सम्भूय[1] स्मृतिसिद्धिः । अथ स्वरूपतो न क्रमः, किन्तु धीकृत एव ; एका चानेकवर्णस्मृतिरिति न क्रमः, तन्न ; क्रमवदनेकधीस्थताप्यनुभूतेति सक्रमानेकवर्णस्मृतिसिद्धिः । विच्छेदोच्चारणे च नार्थ-

शङ्कां परिहरति—न च सत्त्ववर्णत्वादेरपीति । ननु शब्दत्वजातिहानेन कुतः श्रोत्रग्रहणक्रियोपाधिराश्रितेत्याशङ्क्य तदसिद्धेरित्याह — न च शब्दत्वजातेरिति । एकशब्दनिर्देशानपेक्षानेकव्यक्तिदर्शने पूर्वदृष्टाकारप्रत्यभिज्ञैव जात्युपगमे निमित्तम्, नानाविधवर्णेषु तदसिद्धेः शब्दत्वजात्यभावात् क्रियानिमित्ततोपेयेत्यर्थः । प्राक्तनसत्त्वादिजातिनिषेधेऽप्ययमेव हेतुरभिप्रेत इत्याह—एवं सत्त्वाद्यसिद्धिरिति । कस्तर्हि तत्रोपाधिरित्यत्राह—प्रमाणक्रियात इति । एवं प्रत्यभिज्ञानुत्पत्तेरेकत्वासिद्धेर्निर्देश्यैक्यस्यौपाधिकत्वेऽनपेक्षितैकोपाधिकनिर्देशसाम्यमात्रेण दूरापेतार्थज्ञानानां शब्दात्मकतेत्याह—अतः शब्दैकत्वासिद्धेरिति । ततश्च शब्दार्थभेदस्यौपाधिकत्वमपि निरस्तमित्याह—अतः श्रोत्राद्युपाधेरिति । तत्साधकोक्तदृष्टान्तवैषम्यमाह—मुखादाविति । अतोऽर्थधीकार्योन्नेयं संस्कारसाहित्यं निष्प्रतिबन्धकमित्याह—एवं विवर्तपक्ष इति । कार्योन्नेयत्वादेवातिप्रसङ्गदोषोऽपि सुनिवार इत्याह—व्यतिक्रमोच्चरितेष्विति । ननु निराश्रयः क्रमो नातिप्रसङ्गनिवारणक्षम इति शङ्कते—अथ स्वरूपतो न क्रम इति । परिहरति—तन्न क्रमवदनेकधीस्थतापीति । संस्कारजनकश्रोत्रोत्थधियस्तावत् क्रमवत्य एव ; ताश्च तदुत्थस्मृतौ वर्णानुरञ्जकतया भान्त्येवेति स्वकालस्थस्वक्रमानुरक्तानेव वर्णानेकवृत्तिस्थान् संपादयन्तीति तथैवार्थधीरित्यर्थः । निरन्तरोच्चारणमप्येकस्मृतिकारणोपाधिः कार्यकल्प्य इत्याह—विच्छेदोच्चारणे चेति । बहुकल्पनाप्येवं कार्योप-

१. Omitted. सम्भूय. क.

धीरिति न तदानेकवर्णस्मृतिसिद्धिः । एवं कार्यानुरूपं सर्वं सिद्धम् । भाष्ये तु "पूर्ववर्णजनितसंस्कारसहितोऽन्त्यो वर्णो वाचकः" इत्यनास्थावादः ; तत्त्वतो हि स्मृतिस्थवर्णेभ्योऽर्थधीः, अन्विताभिधानस्य न्यायसंपादनाधीनतया विलम्बात् । वर्णभेद उपाधिकल्पना एकशब्दकल्पना च "सा च शब्दकल्पना च" इत्युक्तम् । शब्दार्थभेदश्चाकृतिग्रन्थे पुनर्वाच्यः । 'शब्दादर्थम्' इत्येकवचनं लोके शास्त्रे चैकार्थधीकरतोपाधेः । पदं वाक्यं लौकिकं वैदिकमित्येकवचनमुपाधित एव । अतः सिद्धं गकारादय एव गौरित्यत्र, न ततोऽन्यः शब्दः । अकारस्तु प्रत्यभिज्ञानादेकोऽष्टादशधोपाधिभिन्नो युक्तः । न शब्दे प्रत्यभिज्ञा, येन वर्णभेद उपाधितः स्यात् ॥

पादकतया न दोष इत्याह—एवं कार्यानुरूपमिति । नन्वेकस्मृतिकरत्वं भाष्यविरुद्धमित्याशङ्क्योपपादकप्रदर्शनमात्रे भाष्यतात्पर्यम्, नान्त्यवर्णस्यातत्संस्कार्यत्व इत्याह—भाष्ये त्विति । अन्त्यवर्णस्यार्थबोधानन्तर्यनियमाभावान्नोक्तमात्रे तात्पर्यमित्यर्थः । भाष्ये 'ननु च संस्कारकल्पनायामप्यदृष्टकल्पना' इति चोद्यस्य कल्पनागौरवापत्तिः परिहार उक्तः, किं तद्गौरवं स्फोटवाद इत्याशङ्क्य वर्णभेदनिर्वाहकोपाधिकल्पनापेक्षया तदापादनमित्याह—वर्णभेद उपाधिकल्पनेति । ननु सत्येव बाह्येऽर्थे गौरवभिया स्फोटपक्षनिरासासिद्धिः, तदभावेऽपि शाब्दधीर्दृष्टेति गौरवाभ्युपगमेनापि तत्पक्षापत्तिरित्याशङ्क्य तन्निरासो भाष्ये यत्नान्तराधीन इति नेदानीं वाच्य इत्याह—शब्दार्थभेदश्चेति । ननु स्फोटपक्षानुसारिव्यवहारः प्रसिद्ध इति तत्सिद्धिरित्याशङ्क्यान्यथासिद्ध्या परिहरति—'शब्दादर्थम्' इत्येकवचनमिति । उपसंहरति—अतः सिद्धमिति । ननु वर्णभेदस्यापि क्वचिदौपाधिकत्वसंप्रतिपत्तेस्तत्तुल्यतया सर्वत्रापि तदापत्तिरित्याशङ्क्य विशेषप्रदर्शनेन परिहरति—अकारस्तु प्रत्यभिज्ञानादिति ॥

इति स्फोटवादः ॥

---

१. शब्दार्थभेदश्च. क. २. कं वाक्यमि. ख.

अथाकृतिवादः

"अथ गौरित्यस्य शब्दस्य कोऽर्थः" इति वाचकरूपैव वाच्येषु धीर्वनादौ वाच्या, सा वर्णाधिके वाचके युक्ता इति विधान्तरेण पूर्वाक्षेपः प्रश्नार्थः। उत्तरं राद्धान्तिनः—वाचकाद्भिन्नं वाच्यमाकृत्यादि गवादेः। प्रश्नोत्तरयोर्विशेषनिर्देशः प्रदर्शनार्थः, अरुणादेर्गुणार्थतोपगमात्। ननु प्रतिगुण्यरुणादिभेदादरुणादिजातिरेवार्थः। तन्न, भेदभाने हि यत्रैकावमर्शस्तत्र जात्युपगमे जात्यर्थता; न चारुण्यभेदधीः गुणिभेदधीरेव परम्। पटुमन्दतादयस्तु वस्तुतत्त्वाधीना न वस्तुभेदायालम्, गवाद्याकृतेरपि पटुमन्दतया भेदापत्तेः। यत्तु परमाणुषु पाकजं कार्यद्रव्ये कारणगुणजं न तदरुणादि, किन्तु तत्समवाय इति नो मतम्।

नन्वर्थविषयप्रश्नस्येदानीं कः प्रसङ्ग इत्याशङ्क्य मुखान्तरेण पूर्वाक्षेपाभिप्रायेणेत्याह—अथ गौरित्यस्येति। कथं तर्ह्याकृत्यर्थतयोत्तरघटनेत्याशङ्क्य प्रभृतिपरतयेत्याह—उत्तरं राद्धान्तिन इति। नन्वरुणादावप्याकृत्यर्थतानुगतेति नाकृत्युक्तेरविवक्षा युक्तेति चोदयति—ननु प्रतिगुण्यरुणादिभेदादिति। परिहरति—तन्न, भेदभाने हीति। 'अरुणा एते गाव एते' इति भेदधियो विशेष्यमात्रविषयतया विशेषणभेदो नावसीयत इति जातिगुणविषयैवोभयत्रापि प्रत्यभिज्ञा, तेन गुणभेदोपगमेन तज्जात्यर्थता गुणशब्दाना न युक्तेत्यर्थः। ननु पटुमन्दतया तरतमभावेन च भेदधीर्गुणमात्रनिष्ठेति प्रत्यभिज्ञा तज्जातिविषयैवोपेयेत्यत्राह—पटुमन्दतेति। तादृशी भेदधीः स्वरूपैक्यभेदोपजीवितयौपाधिकभेदावगाहिनीति न स्वरूपभेदनियतजातिविषयतापादिकेत्यर्थः। गवादावपि चागन्तुकहेत्वधीनान्यसादृश्यप्राप्त पटुमन्दधिया जातेरपि भेदापत्तेरित्याह—गवाद्याकृतेरपीति। नन्वरुणादेरेकत्वोपगमः पाकजत्वाद्यभ्युपगमविरुद्ध इत्याशङ्क्य तत्समवायमात्रं पाकजमिष्यत इति न विरोध इत्याह—यत्तु परमाणुष्विति। केचित्तु अरुणादिगुणजातेर्विशेष्यावगतद्रव्यविशेषणत्वाभावात् तद्विशेषणभूतगुणमात्रं स्वजात्युपलक्षितं वाच्यम्, द्रव्य-

केचित्तु सत्यप्यरुणादिजातिर्न वाच्येत्याहुः—गुणिन्यरुणादिशब्दप्रवृत्तेर्गुणार्थता जातिमति प्रवृत्ताविव जात्यर्थता; गुणाश्रया जातिरुपलक्षणं गुणाभिधाने। स्यादेवं यद्यरुणभेदः स्यात्। स नेति नाथः। वाचकरूपा वाच्येषु धीः। इत्थम् 'वनम्' इति बहुषु तरुष्वेकवचनम्। तदेकस्मिन्नर्थे शब्दश्चैकः। शब्दानां स यद्यर्थः तदेकवचनं युक्तम्। वर्णात्मकं तु पदं स्पष्टभेदं नार्थरूपार्हम्। न च तदेकवचनार्हम्। एवं च वस्तु बाह्यमव्यपदेश्यमस्तु, शब्दादर्थधीस्तु शब्दविवर्त एव। न च प्रयोगसाध्वेकवचनम्, "एकस्मिन्नेकवचनम्" इत्यनुशासनोपगमात्॥

राद्धान्तस्तु—व्युत्पत्तितः स्पष्टं बाह्यमेव वाच्यं स्थितम्। वनादावेकवचनं तु प्रयोगसाधुतया। प्रायिकमेकस्मिन्नेकवचनं स्मृतम्, प्रयोगमूलत्वात् स्मृतेः। यद्यपि वनादौ समुदायावस्थयैकार्थता शक्या 'दाराः' इत्यादौ

वृत्त्यन्यथानुपपत्तेरित्याहुः, तद्गुणभेदसाधकमानाभावान्नाङ्गीकृतमित्याह — केचित्तु सत्यपीति। एवं प्रासङ्गिकीं गुणार्थतां समर्थ्य प्रस्तुतं वनादिशब्दोत्थधीमुखं पूर्वोक्ताक्षेपप्रकारमुपपादयति—वाचकरूपा वाच्येषु धीरित्थमिति। मानान्तराविसंवादविषये यथोक्तविधया शब्दवाच्यस्याशब्दात्मकत्वसम्भवेऽपि तद्विसंवादे तदयोगात्तत्र शाब्दाभ्युपगतविवर्तवादस्याहेयत्वात् शब्दोत्थप्रतीतेरपि लक्षणत्वादितरत्रापि तदापादकाहानात्सदपि बाह्यमव्यपदेश्यम्, व्यपदेश्यं तु शब्दात्मकमेव स्यादित्यर्थः। नन्वेकवचनस्य प्रयोगसाधुत्वार्थतया तत्रापि बाह्यस्यैव वाच्यतोपेयेति शङ्कां साधुत्वस्य शाब्दस्मृतिमात्रलभ्यत्वात्तद्विरोधात् प्रयोगसाधुत्वगतेरनुपेयत्वात्तदुक्तैव गतिरिति परिहरति — न च प्रयोगसाध्वेकवचनमिति।

सिद्धान्तमाह—राद्धान्तस्त्विति। व्युत्पत्त्येकनिमित्तत्वाच्छाब्दप्रतीतेः बाह्यनियतत्वाच्च व्युत्पत्तेरविचाल्यमेव बाह्यार्थत्वं शब्दानाम्; प्रयोगसाधुतयाप्येकवचनमुपपन्नम्। न च "एकस्मिन्नेकवचनम्" इति स्मृतिविरोधात्तदसम्भवः, प्रयोगमूलत्वात्स्मृतेः प्रायिकतया चोक्त्युपपत्तेः अनादिप्रयोगोपस्थापकतयैव स्मृतेरपि नियन्तृत्वादविगीतप्रयोगादिह साधुत्वसिद्धिरित्यर्थः। समुदायावस्थैक्यानादरेण तत्समर्थनेऽभिप्रायमाह—यद्यपि वनादाविति। दारादिष्वपि जघन्यावस्थया बहु-

प्रयोगसाधुतैव गतिरिति सैव वनादावुक्ता व्यापितया। दारादिष्ववयवापेक्षया बहुवचनं परोक्तं हेयम्, प्रातिपदिकार्थसंख्यां विभक्तिराह ; न चावयवपरं प्रातिपदिकमिति "पाशान्" इत्यत्र स्थितम्। एवं समर्थिते वनाद्येकवचने बाह्ये चाकृत्यादौ वृत्तिकारग्रन्थे स्थिते संविदद्वैते च विज्ञानवादनिरस्ते शब्दरूपा न वाच्ये धीः। अत्राकृतिव्युत्पत्तिरिति परोक्तं हेयम्। भाष्ये त्वाकृत्याद्यपलापो यदि परमाकृत्यादिरेवाभिधीयेतेत्येवंपरतया गुरुणा प्रपञ्चितम्॥

थैतां पराभिप्रेतां दूषयति—दारादिष्ववयवापेक्षयेति। प्रातिपदिकस्याप्यवयवपरत्वे तदपेक्षं बहुवचनं नेयम्; तच्च पाशादिषु नास्तीति पाशाधिकरण उक्तम्; तेन प्रयोगसाधुतैवोपेयेत्यर्थः। मानान्तरविषयार्थतां शब्दानां स्थानान्तरस्थापिततत्स्मरणपूर्वकमुपसंहरति—एवं समर्थित इति। इहैवाकृतिसमर्थनमिति परव्याख्यानं भाष्यस्थतदुक्तेरन्यपरत्वप्रदर्शनमुखेनेतरबाह्यार्थसमतामाकृतेरप्यभिप्रेत्यापाकरोति—अत्रेति।

इत्याकृतिवादः॥

---

१. बाह्ये. ख. २. वाहूयेते. क. ख.

अथ सम्बन्धाक्षेपपरिहारः

"अथ सम्बन्धः कः" इति प्रश्नः शाब्दस्यैव। यदि युतसिद्धौ शब्दार्थौ, न तु विवर्तपक्षः; तर्हि संज्ञासंज्ञिसम्बन्धः कृतक इत्यनपेक्षताहतिरुक्ता दुस्तरा। मत्पक्षे हि तादात्म्यसम्बन्धः। स हि न कृत्यइ इत्यनपेक्षता। संज्ञा तु चैत्रादिः कृतैव दृष्टा इति कृतकसम्बन्धानुबन्धा वेदा अपि कृतका एव। अन्यथा सङ्केतात् प्राच्यत्वे वेदानामर्थबोधकता न स्यात्। अतः सङ्केतयितृ-वेदकर्तृसंप्रतिपत्तिर्वा एकतैव वा वाच्येति सम्बन्धाक्षेपवादस्थानोक्त-सङ्केतवादिपक्षनिवेशान्मीमांसकमतमाक्षिपतः शाब्दस्यैव पुनः प्रश्नः। उत्तरं तु वृद्धव्यवहार.नादितावलात् सङ्केतकल्पनाहानात् संज्ञासंज्ञित्वापौरुषेयत्व-सिद्धेः। व्यवहारानादित्वेऽपि यत्र सम्बन्धृदर्शनं तत्र सङ्केत एव; सोऽत्र मा भूदिति सम्बन्धुरभावादित्युक्तम्। न सम्बन्धरि प्रत्यक्षम्। अतस्तत्पूर्वकानु-मागमासम्भवः। न चाप्रत्यक्षपूर्वकार्थधीकार्यानुमागम्यः, व्यवहारानादि-तयापि कार्योपपत्तेः। न चाप्रत्यक्षपूर्वको वेदगम्यः, अपूर्वानात्मकत्वात्। न च पूर्वेषां प्रत्यक्षाभावासिद्धिः, परेषामस्मृतेः तत्सिद्धेः। न च स्मृत्यनर्हता, व्यव-

ननु सम्बन्धाक्षेपसमाधानार्थे स्फोटनिरासे कृते पुनः सम्बन्धप्रश्नस्य कः प्रसङ्ग इत्याशङ्क्य राद्धान्तिनं प्रति निराकृतस्वपक्षस्फोटवाद्यापाद्यानपेक्षत्वक्षति-परतयेत्याह—अथ सम्बन्धः क इतीति। परिहाराभिप्रायमाह—उत्तरं वृद्धव्यव-हारेति। यद्यपि वाच्यवाचके पृथक् सिद्धे तथापि न कृत्रिमस्तत्सम्बन्ध उपेयः, व्यवहारावधारितवाच्यवाचकत्वधर्ममात्रेणार्थधीदर्शनात् तत्सन्तत्यनादित्वकल्पनाया एवोचितत्वात्। ततश्चापौरुषेयतयानपेक्षत्वं वेदानां सिध्येदित्यर्थः। कथं तर्हि भाष्ये हेत्वन्तरोपादानमित्याशङ्क्य बाधकनिरासपरतयेत्याह—व्यवहारानादित्वेऽपीति। सम्बन्धभावसिद्धिरेव कथमित्यत्राह—न सम्बन्धरि प्रत्यक्षमिति। ननु पूर्वपुरु-षाणां प्रत्यक्षसिद्धोऽपि सम्बन्धकर्ता परेषामप्रत्यक्षः स्यादित्यत्राह—न च पूर्वेषा-

१. Omitted. हि. क.
२. शाब्दस्य पुनः. क.
३. Omitted तु. व्याख्या.
४. कार्यानुपगमागमा. क.

हाराविच्छेदादुपयोगाच्च ; सम्बन्धृसंप्रतिपत्त्या हि व्यवहारार्थं स्मृत्युपयोगो महान्। न चेह विस्मरणम् ; [1]ज्ञातास्मृतौ हि विस्मरणम्। नन्वर्थधीकार्यात्, न प्रथमश्रुतात् ; अस्ति चातोऽर्थात् सम्बन्धनुमापत्तिरिति। इयमेव भाष्येऽर्थापत्तिरुक्ता, न तु सम्बन्धुर्गम्यस्यानुपपत्तिरत्र इति न प्रसिद्धार्थापत्तिरियम्। इत्थं चार्थधीर्व्यवहाराद्व्युत्पत्त्यपेक्षयापि इति न सम्बन्धुर्गमिका, प्रथमश्रुतादप्रतीतेश्च न भागासिद्धता। वेदात् प्रथममेव प्रतीतेर्व्याप्त्या; पदं हि

मिति। सङ्केतितशब्दाधीनार्थप्रतिपत्तेः सम्बन्धृव्यवहर्तृसंप्रतिपत्त्यपेक्षनया वृद्धयादिषु प्रसिद्धत्वात् गवादावपि तद्वदेव सम्बन्धृस्मृतिः प्राप्तैवेति तन्निवृत्तिः पूर्वेपामपि प्रत्यक्षं निवर्तयितुमलमिति न तच्छङ्केत्यर्थः। अत्र भाष्ये "यद्यपि" इत्यादिना विस्मरणसम्भवाभ्युपगमेनापि प्रमाणाभावादेव सम्बन्धृनिषेधः कृतः ; सोऽयुक्तः, विस्मरणस्य स्वयमेव प्रमाणत्वादित्याशङ्क्य न सम्बन्धृविषयमेव विस्मरणमभ्युपेतम्, सामान्येनैव तदुपगम इत्याह—न चेह विस्मरणमिति। एवं प्रत्यक्षनिरासेऽपि सामान्यतोदृष्टानुमानं सम्बन्धृविषयेऽपि स्यादिति चोदयति--नन्वर्थधीकार्यादिति। शब्दधीकार्यतया दृष्टाप्यर्थधीः शब्दसहायभूतान्यापेक्षा चैत्रादिवर्तिदृष्टसङ्केतापेक्षैव युक्ता, व्यवहारदर्शनमात्रस्य गवादिवर्तिदृष्टस्य चैत्रादौ सङ्केतपूर्वकत्वप्रसिद्धेः सङ्केतस्य तदनपेक्षत्वप्रसिद्धेश्च सङ्केतानुमानस्यैव युक्तत्वादिति भावः। ससहायशब्दजाप्यर्थधीरनवगतसङ्केतस्य व्युत्पत्तिमात्रापेक्षयापि भवतीति न सङ्केतानुमानसमर्थेति परिहरति—इत्थं चार्थधीरिति। ज्ञातस्यैव सहायतार्हत्वात्तदज्ञानेऽप्यर्थधीदर्शनाद्व्यभिचारिणो न कार्यानुमेयतेत्यर्थः। ननु सहायापेक्षोत्थापकतयोक्ता प्रथमश्रुतादप्रतिपत्तिर्वेदवाक्ये नास्तीत्यसिद्धिरपि स्यादित्याशङ्क्य पदापेक्षया तदुक्तिर्न वाक्यापेक्षयेति नासिद्धिर्वाच्येति व्यभिचार एव दोष इति दर्शयति—प्रथमश्रुतादप्रतीतेश्चेति। यदि पुनः स्वोत्थसम्बन्धव्यवधानेन सङ्केतस्य सहायताभिमता, तदा सम्बन्धमात्रादपेक्षापूर्तेः न तत्कर्त्रवसाय्यनुमानमित्यर्थानुपपत्तिगौरवक्ष्योद्भावनार्थः "इत्थं चार्थधीः" इत्यादिग्रन्थो द्रष्टव्यः। भाष्ये यथोक्तानुमान-

१. Omitted. ज्ञातास्मृतौ हि विस्मरणम्. } क.

प्रथमश्रुतं नान्वितपदार्थधीव्याप्त्या वाक्यार्थं बोधयतीति वेदवाक्येऽपि तुल्यम्। सौत्रं पदम् "उपदेशः" इति पञ्चम्यन्ततया विपरिणमय्य सिद्धवदित्यध्याहृत्य भाष्ये व्याख्यातम्। सिद्धमपौरुषेयत्वम्, वृद्धोपदेशात् वृद्धान्तरानुष्ठानोपदेशे पार्श्वस्थस्य सम्बन्धग्रहणसंस्कारादेवार्थधीसिद्धेः सम्बन्धकल्पनानुपपत्तेः। यदि व्यवहारोऽनादिर्न स्यात् तदा प्रथमवृद्धयोः सम्बन्धग्रहोपायाभावात् शब्दप्रयोगार्थप्रतीती न स्याताम्; ततः पार्श्वस्थस्य सम्बन्धग्रहो न स्यात्। अनादिस्तु वृद्धव्यवहारः, पुरुषान्तरपूर्वकत्वात् पुरुषान्तरोत्पत्तेः। यथाद्यतना नरा नरान्तरपूर्वकाः तथा प्राच्या अपि। न चायोनिजा धर्माधिपत्यजाः स्वर्गिणः संस्वेदजाश्चाधर्माधिपत्यजा इति जरायुजाण्डजा अप्ययोनिजाः; तेषां योनिजत्वव्याप्तेरित्यनादिरेव नरपरंपरा। न च भुवनादेः कार्यतया विनाशित्वान्निराश्रयतया परम्परोच्छेदः; सृष्टिस्थितियोग्यावयवविभागादपि विनाशः अवयवान्तरोत्पादाच्च पुनरुत्पत्तिरस्तु; एकदा कृत्स्नसृष्टिविलयौ मानशून्यौ प्रत्युत यथादर्शनं क्रमेण तदनुमेति जगतीश्वरकर्तृकेऽपि न गुरुनय-

निरासः "सिद्धवदुपदेशात्" इत्युक्तः, तदर्थं स्वतोऽनभिव्यक्तमाह—सौत्रं पदमिति। वृद्धोपदेशस्य हेतुत्वप्रकारमाह—वृद्धान्तरेति। हेत्वसम्भवप्रकारानुवादेन तत्परिहारमुखं सम्भवं साधयति—यदि व्यवहार इति। पुरुषोत्पत्तेर्योनिजत्वनियमे पुरुषान्तरपूर्वकत्वनियमादनादित्वं व्यवहारपरम्परायाः स्यात्, तन्नियम एव नास्तीति शङ्कामपाकरोति—न चायोनिजा इति। देहोत्पत्तेर्देहान्तरपूर्वकत्वनियमाभावेऽपि जरायुजाण्डजविशेषोत्पत्तेर्योनिजत्वाव्यभिचाराद्व्यवहारसन्तत्यनादिता सुलभेत्यर्थः। ननु पुरुषसन्तत्याश्रयभूता पृथिवी सावयवत्वात् कार्येति कादाचित्काश्रया पुरुषसन्ततिर्नानाद्यन्ता स्यात्, तत एव तत्स्थितिहेत्वोषध्युदकादेश्चाभावात्तन्नित्यता दुर्लभेत्याशङ्क्य देहादिसृष्टिस्थितियोग्यात्तद्योगार्हादप्यवयवविभागाद्विनाशोपपत्तिः उत्पत्तिश्च तथेति न सन्ततिनित्यताविरोधिनी तत्कार्यतेति परिहरति—न च भुवनादेः कार्यतयेति। ननु व्यवहारानादित्वकल्पनयैवं शब्दानां स्वाभाविकबोधकत्वाश्रयणे तुल्यन्यायतया हस्तसंज्ञादेः कशाद्यभिघातादेश्च तदापत्तिरित्या-

विरोध इति गुरोरवधीरणम् । अनादित्वेऽपि कशाद्यभिघाताद्धस्तसंज्ञातश्चाभिप्रायादर्थधीतः पार्श्वस्थानां व्युत्पत्तिः । चैत्रादौ सङ्केतदर्शनात्; न गवादौ "यज्जातीयो यतः सिद्धः" इति सामान्यतोदृष्टम्, विशेषानुमाबाधात् । पूर्वेऽपि जना गवादिभ्यो व्यवहारादेवार्थधीमन्तः, गवादिभ्योऽर्थधीमत्त्वात् अर्वाचीनजनवत् । किञ्च वेदं कृत्वा तदर्थव्यवहारार्थः सङ्केतो दुर्गस्थम्लेच्छेषु व्यर्थः । किञ्च व्यवहारानर्हदेवतादौ व्यर्थः । संप्रति सुहृद्भावेनाह नाथः—केषां-

शङ्क्य परिहरति—अनादित्वेऽपीति । सत्यप्यनादित्वे तस्य पुरुषस्वातन्त्र्यानपायात् पुंवाक्यादिवाभिप्रायपरिच्छेदपूर्वकधीनियमाद्व्युत्पत्तिरपि तद्विषयैवेति न स्वाभाविकबोधकतापत्तिः; तदा च वस्तुतोऽनादित्वकल्पनापि नावश्यकीत्यर्थः । ननु सङ्केतस्यैवमर्थधीकार्यलिङ्गत्वासम्भवेऽपि चैत्रादिदृष्टसङ्केतानुमानं गवादावपि पदत्वसामान्यलिङ्गकं युक्तमेवेत्याशङ्क्य विशेषानुमानाविरुद्धमेव सामान्यतोदृष्टमेयम्, तद्बाधितविषयं त्विदमित्याह—चैत्रादाविति । विमतकालव्यवहर्तृपक्षीकरणेनाविमतकालकदृष्टान्तकस्य तद्दृष्टहेत्वनुमानस्य विपर्यैक्याद्विशेषनिष्ठतेति तदेव बलवदित्यर्थः । सङ्केतनिरासे हेत्वन्तरम् "अव्यतिरेकश्च" इति सूत्रपदोक्तमाह—किञ्च वेदं कृत्वा तदर्थेति । वेदार्थानुष्ठानार्थमेव हि वेदकर्तृकृतसङ्केतापेक्षान्येषाम्, न स्वतन्त्रव्यवहारार्थमिति तत्कर्तृभिरेव सोऽनुवर्तनीयः स्यात्; यथा व्याकरणव्यवहारिभिरेव तत्कर्तृकृतः सङ्केतः तदनुष्ठानहीनैस्त्वेकदेशवर्तिभिरपि तद्वदेव नानुवर्तनीयः स्यात्, सुतरां दुर्गदेशस्थैः, सर्वेषामपि त्वेकार्थतयैव गवादिशब्दव्यवहारदर्शनात् वेदकर्तृकृतत्वमर्थसम्बन्धस्य नाङ्गीकारार्हमित्यर्थः । "बहवः सम्बन्धारः कथं संगंस्यन्ते" इत्याद्यसम्भवोक्तिर्भाष्येऽभ्युच्चयार्थेत्यभिप्रायः । "अर्थेऽनुपलब्धे" इति सूत्रपदसूचितं हेत्वन्तरं स्पष्टयति—किंच व्यवहारानर्हेति । सङ्केतो हि मानान्तरेण विषयमुपस्थाप्य 'अस्येयं संज्ञा' इत्येवं कार्यः; मानान्तरामेयत्वेनाभ्युपगम्यमानोऽव्यर्थो निर्विषयः स्यादित्याशङ्क्यैवेत्यर्थः । जगतीश्वरकर्तृकेऽपि न गुरुनयविरोध इति प्रागुक्तम्, तदभ्युपेत्यैव परोक्तानुमानिकेश्वरनिरासयत्नः प्रकरणादौ वास्तवं तदनुमानदूषणं दर्शयितुम्, न स्वपक्षविरोधाभिप्रायेणेत्याह—संप्रति सुहृद्भावेनेति ।

चिच्चेतनाधिष्ठानानुमानमयुक्तम्। अथ तेषां तत्रैवं प्रयोगः—अदृष्टमणुद्वयसंयोगहेतुकर्मकरं चेतनाधिष्ठितम्, अचेतनत्वात्; यदचेतनं कार्यकरं तच्चेतनाधिष्ठितम्, यथा वास्यादि; तथा चेदम्, तस्मात्तथा। ज्ञाताधिष्ठेयस्वरूपशक्तिकार्यश्चाधिष्ठातेति क्षेत्रज्ञान्यज्ञातृविशेषानुमा; सामान्यतोऽपि व्याप्तावन्तर्भावितज्ञातृविशेषमेव सामान्यं पक्षधर्मतयाधिकरणसिद्धान्तापरपर्यायया साध्यधर्मिण्यनुमेयं पर्वतगताज्ञाताग्निविशेषवत्। न चान्यस्यापि हेत्वभावादधिष्ठेयस्वरूपादिज्ञानासम्भवः, तद्बुद्धेर्नित्यत्वात्। न च नित्या क्षेत्रज्ञधीर्दृष्टेति तन्नित्यत्वासम्भवः; न हि पार्थिवाणौ रूपादि कार्यमिति जलाणौ रूपादि तथा;

सर्वदूषणपरिहारेण तदुपपादितमनुमानप्रकारमाशङ्कते—अथ तेषामिति। संप्रतिपन्नमेव तावत् स्थूलद्रव्योत्पत्तेः परमाणुसंयोगपूर्वकत्वम्, द्व्यणुकोपक्रमश्च तत्तत्कर्मजश्च तत्संयोगः, तत्कर्म चादृष्टनिमित्तम्, तददृष्टं चेतनाधिष्ठानाधीनवृत्तिकं तत्कर्मकरमिति वास्यादिदृष्टान्तेनानुमीयते। न चादृष्टस्य चेतनाश्रितत्वसिद्धेः सिद्धसाध्यतादोषः, अधिष्ठेयस्वरूपशक्तिकार्यज्ञस्यैव कार्यार्थवृत्त्यधिष्ठातृत्वसम्भवादिति विलक्षण एवानुमेय इत्यर्थः। ननु दृष्टान्ताननुगतविलक्षणरूपस्य व्याप्त्यसिद्धेः नानुमेयानुप्रवेश इत्यत्राह — सामान्यतोऽपि व्याप्ताविति। सर्वानुमानेष्वपि पक्षविशेषसम्बन्धज्ञानान्तेऽनुमेये तदनुसार्यज्ञातविशेषानुप्रवेशस्यापरिहार्यत्वात् क्षेत्रज्ञाननुगतज्ञानातिशयसिद्धिर्नायुक्तेत्यर्थः। नन्वदृष्टस्वरूपादिज्ञाने हेत्वभावस्य लोकसिद्धत्वात् व्यापकाभावनिश्चये तज्ज्ञानं नानुमानान्तर्भावार्हमित्यत्राह — न चान्यस्यापीति। हेत्वभावनिश्चयः कार्यत्वमात्रं निवर्तयेत्, न ज्ञानमपीत्यकार्यज्ञानावसाय्यनुमानमित्यर्थः। ननु व्याप्तिधीबलप्रवृत्तमनुमानं नात्यन्तादृष्टं ज्ञाननित्यत्वं विषयीकुर्यादिति शङ्कां परिहरति—न च नित्या क्षेत्रज्ञधीरिति। दृष्टव्याप्तिकाधिष्ठेयज्ञानानुमानानुषङ्गायातं तन्नित्यत्वं स्वतोऽदृष्टमपि पक्षधर्मबलप्राप्तं रूपादिनित्यत्ववदाश्रयविशेषोपाधित्वसम्भवाद्विषयतार्हमेवेत्यर्थः। नन्वधिष्ठेयसम्बन्धापेक्षमधिष्ठातृत्वं दृष्टम्, न च क्षेत्रज्ञवदस्यादृष्टसम्बन्धोऽन्यस्यास्तीति न तत्सम्भव

अधिष्ठानं च तत्संयुक्तक्षेत्रज्ञादृष्टे संयुक्तसमवायात्। अजसंयोगेऽप्यसति तत्संयुक्ताणुसंयुक्तक्षेत्रज्ञादृष्टे संयुक्तसंयोगिसमवायात्। वृत्तिरप्यदृष्टस्य कार्याभिमुख्यम्। तच्च देशकालाद्यपेक्षमिवाधिष्ठातृयत्नापेक्षं विपर्विद्यत्नापेक्षविपप्रवृत्तिः। धीच्छायत्ननित्यत्वे च न तदुत्पत्त्युपयोगिदेहानुमा। न च तस्य प्रयोजना भावादकर्तृतानुमा। न च तद्धीरनित्या धीत्वादित्यनुमा, तदनुमा-

इत्यत्राह—अधिष्ठानं च तत्संयुक्तेति। संयोगस्य तावद्देहे तत्संयुक्तवास्यादौ चाव्यवधानाद्व्यवधानाच्चाधिष्ठानप्रयोजकत्वं प्रसिद्धमेव, समवायस्यापि तत एव प्रसिद्धं समवायापेक्षयैव संयोगस्य तत्प्रयोजकत्वात्। ततः क्षेत्रज्ञवर्त्यदृष्टेऽप्यन्यस्य तथैवोपपत्तिरित्यर्थः। नन्वजसंयोगाभावात् क्षेत्रज्ञसंयोग एवान्यस्य न स्यादित्याशङ्क्य व्यवधानापेक्षया तद्धीस्त्वित्याह— अजसंयोगेऽप्यसतीति। नन्वदृष्टेऽधिष्ठात्रधीना वृत्तिर्वास्यादेः स्वकार्यानुगुणक्रिया तदुत्थसंयोगादिवन्न काचिन्निरूप्यत इत्यधिष्ठात्रपेक्षा न स्यादित्याशङ्क्य न दुर्निरूपा वृत्तिरित्याह—वृत्तिरप्यदृष्टस्येति। चिरकालानुवर्तिनोऽप्यदृष्टस्य कदाचित्कार्यकरत्वमागन्तुकावस्थापेक्षमिति सैव वृत्तिरित्यर्थः। ननु वास्यादिवृत्तिविशिष्टवृत्तेरेवाधिष्ठातृप्रयुक्तत्वं दृष्टम्, न कार्यान्तरादृष्टवृत्तेरिति कथं तदनुमानमित्यत्राह—तच्च देशकालाद्यपेक्षमिवेति। यद्यदृष्टं स्वकार्यारम्भे कर्मेव विभागाद्यारम्भे सहायापेक्षं न स्यात्, तदा स्यादप्यधिष्ठात्रनपेक्षम्; तत्तु देशकालादिबहुतरसहायापेक्षमित्यविवादमेवेत्यधिष्ठात्रपेक्षमप्यचेतनत्वाद्युक्तम्। न च वास्यादेः स्वमात्राद्यवसायि विशेषप्रयुक्तमधिष्ठात्रपेक्षत्वम्, तद्विलक्षणविषयवृत्तेरपि विशिष्टपुरुषध्यानादियत्नापेक्षत्वप्रसिद्धेः सर्वानुगतचेतनत्वनिश्चयादित्यर्थः। ननु मुक्तात्मनोऽचेतनप्रेरकत्वाभावात् देहित्वमप्यधिष्ठातृत्वप्रयोजकमिति देहोऽप्यनुमेयः स्यात्, स्वप्रयोजनाभावे च तद्यत्नानुपपत्तिः; धीत्वस्य च विनाशित्वव्याप्तेः नाशानुमानं च स्यादिति शङ्कां परिहरति—धीच्छायत्ननित्यत्व इति। देहस्तावज्ज्ञानाद्युत्पत्तिव्यवधानेनाधिष्ठातृतोपयोगी, न साक्षाद्देहाधिष्ठाने, देहान्तराभावादिति तन्नित्यत्वे तदपेक्षा नास्ति, देहाभावादेव देहित्वप्रयुक्तप्रयोजनापेक्षापि नास्ति, यत्नविषयसिद्धिप्रयोजनं त्वस्त्येव। धीत्वादनित्यत्वानुमानं धीसाधकानुमानप्राप्तनित्यत्वबाधितम्। तदनपेक्षत्वे त्वाश्रयासिद्धि-

विवादाध्यासिता धीमत्कर्तृकाः, कार्यत्वादचेतनापादानत्वाद्वा इति तु नोक्तम्, सिद्धसाधनत्वात्। तदाहुः—

"कस्यचिद्धेतुमात्रत्वं यद्यधिष्ठातृतेष्यते।
कर्मभिः सर्वजीवानां तत्सिद्धेस्सिद्धसाधनम्॥" इति।

अथोपादानोपकरणसंप्रदानप्रयोजनज्ञधीमत्कर्तृका इत्युच्यते, तन्न; सर्वोत्पत्तिमतामदृष्टमुपकरणम्, न च तज्ज्ञः कुलालादिरपीति व्याप्त्यसिद्धिः। दृष्टान्तश्च साध्यविकलः बालोन्मत्तादिश्च प्रयोजनाद्यज्ञः कर्तेत्युक्तदोषद्वयम्। अचेतनं तत्स्वरूपशक्तिकार्यविच्चेतनाधिष्ठितं कार्यकरमित्येतत् कुलालबालादौ

शङ्कां तदनुक्तिहेतूक्त्या परिहरति—विवादाध्यासिता इति। धीमत्कर्तृकत्वं हि अनेककारणककार्याणामशेषकारणविषयबुद्ध्यपेक्षमल्पविषयापेक्षं च स्यात् व्यवहितकारणविषयबुद्ध्यपेक्षमव्यवहितविषयापेक्षं च, तत्र व्यवहितकारणविषयधीजन्यत्वं कार्याणां प्रसिद्धकर्तृकरणान्न नियतम्, कृष्यादिजेषु व्यभिचारात्। तेन निमित्तत्वमात्रं धियः सपक्षे प्रसिद्धम्। तच्चादृष्टजकार्ये पक्षेऽप्यदृष्टहेतुकर्मविषयधीजन्यतया सिद्धमेव, तत्कर्मणश्च तत्कार्यहेतुत्वं तत्तत्कामस्य तत्तद्विधेः श्रुतिप्रसिद्धमेव। तेनाल्पविषयबुद्ध्यपेक्षया धीमत्कर्तृत्वं सिद्धमेवेति साध्यत्वानुपपत्तिः। सर्वकारणविषयधीमत्कर्तृकत्वं सपक्षे कचिदपि न दृष्टमिति नानुमानार्हम्। प्रयोजनादिधीश्च बालादौ व्यभिचारिणीति परोक्तमपि सकर्तृकमित्यनुमानमनादृतमित्यर्थः। अधिष्ठात्रनुमाने तूक्तदोषाप्रसक्तेः तदेवोक्तमित्याह—अचेतनं तत्स्वरूपेति। ननु बालोन्मत्तादिश्च प्रयोजनाद्यज्ञः कर्तेत्यनेन कार्यतच्छक्त्यज्ञस्यापि कर्तृतोक्तेः कतृत्वफलकाधिष्ठातृत्वं तदज्ञस्याभ्युपेतमिति कथं तद्विपरीतं तद्विदधिष्ठितं कार्यकरमित्येतद्बालादावपि दृष्टमित्युच्यते; दृष्टं चाज्ञातशक्तिकबालाद्यधिष्ठितशस्त्रादिकृतच्छेदनादिकार्यमिति अधिष्ठात्रनुमानेऽपि तुल्यो व्यभिचारदोषः। उच्यते—न तावत्प्रयोजनाद्यज्ञ इत्यनेन कार्यशक्त्यज्ञानमपि कर्तुरङ्गीक्रियते, तदज्ञाने कर्तृत्वासिद्धेः; बालाद्यधिष्ठितशस्त्रादिजच्छेदनं तु न तत्कर्तृकम्, तद्योजनमात्रं तत्कर्तृकम्; तच्च ज्ञानकृतम्, छेदनं तु तच्छक्तिमात्रजं तत्पक्षनिवेशीति न व्यभिचारावकाशः। नन्वेवमज्ञानकृतप्रतिषिद्धप्रायश्चित्तश्रुतिरनवकाशा स्यात्। न, तच्छक्तिज्ञस्यैव प्रतिषिद्ध-

दृष्टम्, न चेह सिद्धसाधनतेति। न च श्रुतितः स्मृतितश्च तत्सिद्धिरुक्ता। श्रुतिः "द्यावापृथिवी जनयन् देव एकः" इति। स्मृतिः "ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा" इति। श्रुतिः "पश्यत्यचक्षुः स शृणोत्यकर्णः। स वेत्ति विश्वम्" इति। स्मृतिस्तावन्मूलापेक्षा। श्रुतिरपि कार्यानुगुणे मानान्तराविरुद्धे स्वर्गादौ युक्ता, न तु धीमत्कर्तृकत्वे भूम्यादेरपूर्वकार्याननुगुणे मानान्तरविरुद्धे। धीहेत्वभावेन धीमत्त्वाभावान्मानान्तरविरुद्धता; न तु स्वर्गे तथा; स्वर्गशब्दस्य प्रकृष्टप्रीतिहेतौ प्रयोगात् प्रकृष्टप्रीत्यर्थताभानम्; प्रकर्षश्चापेक्षिकोऽनवस्थित इति नियोज्यविशेषणं स्वर्गः किंरूप इत्यपेक्षायां वाक्यशेषस्थप्रकृष्टरूप इत्येवं कार्यानुगुणता। तदनुगुणता च विशिष्टदेहदेशयोरिति तत्र चापूर्वस्य हेतुत्वान्न हेत्वभावान्मानान्तरविरोधः। किं च

क्रियानिष्पत्त्यनवमर्शनिमित्ततत्परिहारयत्नाकरणकृतदोषपरिहारार्था तच्छ्रुतिरिति न कश्चिद्विरोधः। ननु श्रुतिस्मृती किमिति तत्प्रमाणतया नोपन्यस्ते इत्यत्राह— न च श्रुतितः स्मृतितश्चेति। स्मृतिस्तावदनपेक्षत्वाभावान्न मानतार्हा, श्रुतिः स्वर्गादौ सिद्धरूपे मानतयाभ्युपेतापि कार्यैकविषयोक्ता तत्प्रमित्यन्तर्गतस्वर्गादावेव मानं स्यात्, न तदननुगुण मानान्तरविरुद्धे च कर्तरीत्यर्थः। मानान्तरविरोधमुपपादयति— धीहेत्वभावेनेति। "पश्यत्यचक्षुः स शृणोत्यकर्णः" इति धीहेत्वभाववचनविरुद्धा "पश्यति" इत्यादिश्रुतिः स्तुतिपरैव नेयेत्यर्थः। नन्वेवं स्वर्गश्रुतिरपि लौकिकसुखविलक्षणत्वोक्तिपूर्विकैवेति स्तुतिमात्रार्थैव स्यादिति शङ्कां परिहरति— न तु स्वर्गे तथेति। लोकप्रयोगावगतार्थस्य प्रकर्षोपाधिकत्वात् प्रकर्षस्य चानियतरूपतया विशेषापेक्षत्वात् वाक्यशेषोपस्थापितविशेषशब्दप्रवृत्तिमनाश्रित्य विधिपर्यवसानायोगात्तदाश्रयणमेव तत्र स्यात्. लौकिकाविलक्षणता च तद्योग्यदेहदेशकल्पनया विध्यनुमतेत्येवं वाक्यशेषस्य विध्यानुगुण्यं हेत्वभावनिमित्तश्च मानान्तरविरोधोऽपूर्वस्य तद्धेतुत्वावगमात् परिहृत इत्यर्थः। मानान्तरविषयातिवर्तितयैव श्रुत्या स्वर्गाद्यवगतिर्न कर्त्रवगतिरिवेत्येवमप्यविरोध इत्याह— किं च कार्ये स्वर्गदेहदेशादाविति। ननु

१. भम्यादेः. क. २. हेतुत्वानहेतुत्वा. क.

कार्ये स्वर्गदेहदेशादौ शब्दगम्ये न मानान्तरविरोधः। सिद्धे तु बुद्धिमद्भेदे मानान्तरविषये युक्तो मानान्तरविरोधः। देवता तु कार्यानुगुणापि शाब्द-स्मृतिनिश्चिता सूक्तहविर्भागित्वरूपा न वाक्यशेषावसेयविग्रहादिमती। न च देहदेशविशेषार्हा; देशान्तरस्था हि आराधनाद्यनर्हा स्यात्। यथा-श्रुतवाक्यशेषाच्च "गृभ्णाते दक्षिणमिन्द्र हस्तम्" इति मानान्तरविरोधः अननुगुणता च। न चोत्पाद्या देवतेत्युक्तम्। अतोऽनुमानादेव चेतनाधिष्ठातृ-सिद्धिः।

अत्र समाधिः—उक्तं हि, यो यत्स्वरूपकार्यशक्तिज्ञः, स तदधिष्ठाता; नान्य इति। शक्यज्ञानमेवाचेतनं चेतनाधिष्ठितमिति व्याप्तिः। अशक्य-

विध्यनुप्रवेशनद्भावनिमित्ते श्रुतेः सिद्धार्थपरत्वातत्परत्वविभागे वाक्यशेषार्पित-विग्रहादिमती देवता स्यादित्यत्राह—देवता तु कार्यानुगुणापीति। फलसाधने-ऽपूर्वकार्ये श्रुतिप्रमिते कारकत्वमात्रेण देवतान्वये देवतापदार्थे च शाब्दस्मृति-प्रसिद्धेऽपेक्षाभावाद्वाक्यशेषोपस्थापितोऽपि विग्रहादिर्न स्तुत्यधिकोपयोगितया विधिग्रहणार्ह इत्यर्थः। विरोधितया च न तद्ग्रह इत्याह—न च देहदेशविशेषेति। मानान्तरविरोधश्च क्वचिदित्याह—यथाश्रुतेति। ननु वाक्यशेषश्रुतिबलात् स्वर्गा-दाविवास्मदृश्यत्वाद्यवान्तरवैलक्षण्याभ्युपगमेन मानान्तरविरोधः परिहार्य इति शङ्काहानार्थमाह—अननुगुणता चेति। वैलक्षण्यकल्पना ह्यावश्यकापेक्षापूरणेन विध्यनुगुणतयैवाकल्पनयापि स्तुतिपरत्वसिद्धौ न स्यादिति न सेहाश्रयणीया; उत्पाद्यतया च तत्र तत्सिद्धिः तदभावाच्चात्र न विरोध इत्यर्थः। तस्मादधिष्ठात्रनु-मानोक्तिरित्युपसंहरति—अतोऽनुमानादेवेति।

एवं परसंशोधितप्रकारं तत्पक्षं निर्दिश्य तद्दूषणमपि परोक्तप्रकारोपदर्शित-मेवेति सिद्धान्तयति—अत्र समाधिरिति। त्वयैव हि ज्ञाताधिष्ठेयस्वरूपशक्ति-कार्यश्चाधिष्ठातेति वदता अधिष्ठातुः क्षेत्रज्ञव्यतिरेकाङ्गीकारेणैव व्याप्तेस्तत्समर्थो-पाधियोगः; तेन चादृष्टाद्यचेतनस्य अधिष्ठात्रनपेक्षत्वमर्थोक्तं स्यात्। यदा ह्यधि-ष्ठातुरधिष्ठेयापरोक्षज्ञानमधिष्ठानोपाधिमाश्रित्य तद्धीनो निवर्त्यते, तदाधिष्ठेय-

ज्ञानं चादृष्टम्, क्षेत्रज्ञवदन्यस्यापि तज्ज्ञानहेत्वभावात्। एवं च तज्ज्ञानहेत्वभावेनाचेतनविशेषे चेतनाधिष्ठानं वार्यते। अचेतनसामान्ये चेतनाधिष्ठानं विशेषानुमाबाधितम्। न चान्तर्भावितज्ञानेऽनुमिते तज्ज्ञानहेत्वभाव उक्तः, येन तत्पूर्वकत्वे तदनुमाबाधः; अतत्पूर्वकत्वे चाश्रयासिद्धिरिति वाच्यम्, अधिष्ठेयाश्रयचेतनाधिष्ठानस्य वारणात्। पक्षधर्मतापि हेत्व-

स्यापि तद्योग्यत्वं तद्विषयत्वोपाधितया नियतदृष्टं तदुपजीव्यधिष्ठेयत्वेऽप्युपाधितया निवारयितुं न शक्यत इत्यतदर्हस्याधिष्ठात्रधीनं कार्यकरत्वमिति मानहीनमेतत्। न च दृष्टविशेषावधिकमदृष्टादेरपरोक्षज्ञानानर्हत्वम्, कदाचिदपि तददर्शनेन स्वाभाविकत्वावधारणादिति नाधिष्ठात्रनुमेत्यर्थः। यस्मादेवं शक्यज्ञानत्वोपाधिकमचेतनस्य ज्ञानाद्यधिष्ठितत्वमवधारितम्, तस्माद्यत्पूर्वपक्षवादिनाधिष्ठात्रनुमानस्य विशेषविषयत्वेन सामान्यविषयात्तन्निषेधानुमानात् बलवत्त्वमुक्तम्, तस्य वैपरीत्यापत्त्या विशेषानुमाबाधितमधिष्ठात्रनुमानमित्यपि शक्यं वक्तुमिति। दूषणान्तरं चोपाध्युद्भावनेन फलितमित्याह—एवं च तज्ज्ञानहेत्वभावेनेति। यत्पुनर्निषेधानुमानस्य निषेध्यानुमानपूर्वकत्वात् तत्पूर्वकत्वविकल्पेन दूषणान्तरमापादितम्, तच्चानवकाशमिति दर्शयति—न चान्तर्भावितज्ञानेऽनुमित इति। यद्यनुमेयाधिष्ठात्राश्रयं तन्निषेधानुमानं तदन्तर्भूतज्ञानाश्रयं वा, तदोक्तदूषणं स्यात्, तदधिष्ठेयादृष्टाश्रयं तूच्यते—तत्स्वोत्पत्तिकर्त्रपरोक्षाधिष्ठितं न कार्यकरम्, तदिन्द्रियामेयत्वात्, यद्यदिन्द्रियामेयम्, न तत्तदपरोक्षाधिष्ठितम् यथान्धादिना वास्यादीति। तस्मात्तद्बाधितमधिष्ठात्रनुमानमित्यर्थः। यद्वा विमतं स्वग्राहकेन्द्रियहीनचेतनाधिष्ठानापेक्षं न कार्यकरम्, अतद्ग्राह्यत्वादिति प्रयोगः। नन्वचेतनत्वसामान्याद्वास्यादिवत्त्वयैवधारिताधिष्ठितत्वानुमानानुषङ्गसिद्धज्ञानस्य पक्षधर्मताबलान्नित्यत्वापत्तेर्नैन्द्रियाभावो बाधक इति शङ्कामपाकरोति—पक्षधर्मतापीति। सति हि ज्ञानानुमाने तस्य नित्यता; विशेषानुमाननिवारितस्य त्वनुमानान्तर्भाव एव नास्तीति तन्नित्यतान्तर्भाव एव नास्तीति तन्नित्यतान्तर्भावो दूरनिरस्त एवेत्यर्थः। परोक्तं दूषणान्तरं

१. अनुमिते तेन ज्ञान. क.

भावात् विशेषतो वारितं ज्ञानं सामान्यतोऽन्तर्भावयितुमर्हति । यत्तु परेण ज्ञाननित्यतामास्थाय चिकीर्षायत्नोत्पत्तये मुक्तात्ममनोयोगमुपेत्य तन्मनोधिष्ठानं चिकीर्षायत्नप्रवाहानादितयोपपाद्य दूषणमुक्तम्, सृष्टिं संहृत्य पुनः सिसृक्षोः प्रवाहविच्छेदे कुत इच्छाप्रयत्नयोर्जन्मेति । अथ ज्ञानेच्छादि नित्यम्, तत्तद्भावोपधानात्तत्तद्विषयं रविप्रकाशवत्; तन्न, अन्योन्याश्रयात्। उपधानेऽधिष्ठानमधिष्ठाने चोपधानम् । अतो नेदृशो विशेषः पक्षधर्मतया ।

स्वाभ्युपगमशङ्काहानार्थमुपन्यस्य दूषयति—यत्तु परेणेति । कर्तुर्हि कार्यानुकूलागन्तुकक्रियापेक्षं कर्तृत्वम् । तत्र ज्ञानस्यानागन्तुकत्वेऽपि इच्छायत्नयोः कार्यतयागन्तुकत्वात् तदुपपत्तिं साधयितुं मुक्तात्ममनोयोगं तदुत्पत्त्यसमवायिकारणमाश्रित्य तन्मनसश्च अधिष्ठातृयत्नाधीनं तदुत्पादकत्वमपीति तदर्थमपीच्छायत्नान्तरापेक्षायां तत्प्रवाहानादितया तदुपपत्तिमुक्त्वा कर्तृत्वं संशोध्य पुनस्तदूषणमुक्तम् । स्थितिकाल एव हि निरन्तरानन्तकार्योत्पत्तेस्तत्प्रवाहानुवृत्तिर्मानोपेता । प्रलये तदसम्भवात् प्रवाहविच्छेदे कर्तृत्वासिद्धिरित्यर्थः । इच्छाद्यपि नित्यमेवेति न कारणाभावदोष इति मतान्तरमाशङ्कते—अथ ज्ञानेच्छादीति । नन्वेवं सर्वकार्योत्पत्तिस्थितिलयाना तद्विषयत्वाविशेषात् सकृदेव सर्वोत्पत्तिस्थितिलयापत्तिः सदा चेत्याशङ्क्य क्रमेण तद्विषयत्वाङ्गीकारान्न तदापत्तिरित्याह—तत्तद्भावोपधानादिति । कार्योत्पत्तिसामग्र्युपधानमात्रेण तावन्नित्येच्छायत्नयोः तच्चिकीर्षात्वं तत्कृतित्वं च स्यात्, यथोक्तप्रवाहविच्छेदविषये तदयोगात्। न चैवमाद्यस्य कार्यस्यागन्तुकशून्यतापत्त्या सृष्ट्यभावापत्तेरवश्यं केनचिदागन्तुना भाव्यमिति वाच्यम्, तत्पक्षे कदाचिदपि कार्यसन्ततिविच्छेदकप्रलयस्यानङ्गीकारेण कालावच्छेदकतत्सन्तानसम्भवादाद्यासिद्धेः स्मृतभाविकार्योद्देशप्रवृत्त्या चेच्छायत्नयोः तद्विषयता लोकसिद्धेति। नित्यत्वपक्षे कार्योत्पत्तिपूर्वकोपधाने सत्येव तदुद्देशेन तत्कारणमधिष्ठाय प्रवर्तयेत् तत्पूर्विका चोत्पत्तिरित्यन्योन्याश्रयतापत्त्या सोऽपि पक्षोऽनुपपन्न एवेति दूषयति—तन्न अन्योन्याश्रयादिति । एवं न पक्षधर्मतयापि सामान्यतोदृष्टम् । लोकदृष्टविपरीतमनुपपन्नं विशेषं साधयितुमलमिति तदुक्तदूषणमुपसंहरति—अतो नेदृशो विशेष इति । नन्वसिद्धादिपरिगणितदूष-

नेदं साधनदूषणम्; किन्तु वादिन इत्युपसंहृतम्; तद्वैदग्ध्यमात्रम्; न हि साधनमदुष्टं वादी च दुष्ट इति। अथानुमिते विशेषे तदनुमाबाधः, अननुमिते आश्रयासिद्धिप्रसङ्गापादनमपि एतद्विकल्पासहमिति न साधनदोषः; तर्हि न वादिनोऽपीति परसमाधानं हेयमेव। तथाधिष्ठानानर्हमदृष्टम्; करादिसंयोगो हि वास्याद्यधिष्ठानम्; न चादृष्टे गुणे संयोगः। न च समवायोऽप्यन्यगुणे अयुक्ते युक्ते चासंयोगे संयुक्तसंयोगिसमवायो वाच्यः। न चेयमधिष्ठानविधा दृष्टा, उत्पत्तावेवादृष्टस्येयं विधेति तयैव प्रवृत्तिः स्यात्। तथा प्रवृत्त्यनर्हमदृष्टम्; क्रिया हि वास्यादिप्रवृत्तिः; न च गुणे क्रिया;

णेषु नेदं दूषणमन्तर्भवतीति कथमस्य दूषणत्वमित्याशङ्क्य तल्लक्षणलक्ष्यत्वाभावात् तदन्तर्भावाभावेऽपि न दुष्टत्वं निवर्तते, साध्यसाधनभूतानुमानदूषणत्वासम्भवेऽपि वादिनं प्रति, दूषणत्वानिवृत्तेस्तदनुमितस्य कर्तृत्वप्रकारावधारणाशक्तेरिति परोक्तं दूषणमुपसंहरति—नेदं साधनदूषणमिति। तदनुपपत्तिमुद्भावयति—तद्वैदग्ध्यमात्रमिति। शिल्पिनो दारुखण्डादिषु स्वाभिप्रेतपुरुषविशेषादिधीसंपादनकौशलवत् वस्त्वनपेक्षतद्धीसंपादनं कौशलमात्रं तदित्यर्थः। तदेव दर्शयति—न हि साधनमिति। तदभिप्रेतं साधनस्यादुष्टत्वहेतुमाशङ्कते—अथानुमित इति। दूषयति—तर्हि न वादिनोऽपीति। वादसमये हि साधनदूषणनिरासाधिककृत्याभावाददुष्टे साधने तदनुमेयकर्तृत्वस्य सामान्येन तदुचितप्रकारस्याक्षेपसिद्धत्वात् तद्विशेषो वादिनो न वाच्य इति तद्दोषाभावात् साधनदोष एवोद्भाव्य इति तन्मतं नाङ्गीकारार्हमित्यर्थः। दूषणान्तरं प्रकरणोक्तं समर्थयते—तथाधिष्ठानानर्हमिति। चेतनाधिष्ठितमिति उक्तसाध्यस्वरूपं क्वचित्कार्यकरत्वोपाधित्वेनादृष्टम्, न व्यापकतयानुमेयम्, व्याप्त्यसिद्धेरागन्तुकरूपभावात् कार्यकरत्वानुपयोगितया चेत्यर्थः। चेतनाधिष्ठानलभ्यावस्थान्तरात्मकवृत्त्यनिरूपणाच्चानुमानासिद्धिरित्याह—तथा वृत्त्यनर्हमिति। नन्वनुमेयक्रियावादिना द्रव्यवृत्तिनियमानवगमात् कथं न क्रिया गुण इति नियन्तुं शक्यत इति शङ्कां परिहरति—विशेष्ये

१. अयुक्ते चासं. क.

विशेष्ये तु द्रव्ये सा युक्ता । न चोत्पत्तिरेव प्रवृत्तिर्दृष्टा । न चाभिमुख्येऽवस्थाभेदेऽधिष्ठानापेक्षा । देशकालापेक्षा तु दृष्टा । न चेच्छामात्रमधिष्ठनम्, अणूनामदृष्टस्य वा तथाविधाधिष्ठानादर्शनात् । स्वदेहस्यापि नेच्छामात्रमधिष्ठानम्; किन्तु यत्नः; स्वादृष्टोपगृहीते देहे, नान्यत्र । अधिष्ठानं च देहान्तर्भावात्

तु द्रव्ये सेति । सा हि देशान्तरसंयोगाद्यनुमेया, तद्वद्द्रव्यविशेषणतयैवानुमेयेति तद्वर्तितयैव तत्स्वरूपसिद्धिरिति न तदतिक्रमार्हा सेत्यर्थः । ततः परिशेषात् कार्योत्पत्तिरेव वृत्तिरुक्ता स्यात्, न तु सा क्वचिद्वृत्तितयावधारितेत्याह — न चोत्पत्तिरेवेति । ननु कार्याभिमुख्यमदृष्टस्य वृत्तिरस्त्विति शङ्कां परिहरति— न चाभिमुख्येऽवस्थाभेद इति । अन्वयव्यतिरेकनिर्धारितसहकारियोगो ह्याभिमुख्यम्; तत्रादृष्टस्याधिष्ठातृव्यापारापेक्षा नास्ति, सहकारिसाधकमात्राधीनत्वात्तस्येत्यर्थः । ननु देशकालापेक्षातुल्या तदपेक्षेत्याह—देशकालापेक्षा त्विति । जलगतानामेव केषाचिदङ्कुरादिजनकत्वम्, स्थलगतानामेव केषाञ्चित्—इत्यन्वयव्यतिरेकसिद्धा देशकालापेक्षाप्यृतुभेदेन पुष्पाद्युत्पत्तिदर्शनसिद्धा, वास्यादिवृत्तीनामेव तु चेतनाधिष्ठानमात्रायत्तकार्याभिमुख्यं दृष्टमिति कालाद्यपेक्षाणां तन्मन्त्रकृतमाभिमुख्यम्, चेतनाधिष्ठानापेक्षिणां (न) तन्मात्रमिति नादृष्टे देशकालापेक्षावच्चेतनापेक्षेति शक्यं वक्तुमित्यर्थः । यत्पुनस्तद्विषयेच्छामात्रमदृष्टादिवत्यधिष्ठानं चेतनस्येति कैश्चिदभ्युपगतम्, तच्चायुक्तमित्याह—न चेच्छामात्रमिति । न तन्मात्रमचेतनस्य कार्यकरतोपाधितया क्वचिद्दृष्टमिति तन्नोपेयमित्यर्थः । यत्तु स्वदेहे दृष्टमित्युक्तं केनचित्, तच्चायुक्तमित्याह—स्वदेहस्यापीति । नन्विच्छामात्रमिति न यत्ननिवृत्त्यर्थं मात्रग्रहणम्, तदधिकक्रियानिवृत्त्यर्थमेवेति सयत्नमिच्छामात्रमस्त्वधिष्ठानमित्यत्राह — स्वादृष्टोपगृहीत इति । यत्नमात्राधीनमधिष्ठातृत्वं स्वदेहनियतं दृष्टं नान्यत्र; देहत्वं च स्वादृष्टापादिताशेषभोगोपाधिभावनस्यैवेति नाधिष्ठात्रपेक्षं युक्तमिति नेह यत्नमात्रं तदर्हमित्यर्थः । स्वरूपादिष्वचेतनाधिष्ठितत्ववदेव देहिचेतनाधिष्ठितत्वं चाचेतनस्य दृष्टमिति ज्ञानाहाने देहहाने चाशक्यमुपयोगाविशेषात् । देहाधिष्ठानेऽपि हि देहदेहित्वसम्बन्धसंद्रुपयोग्येवेति ज्ञानबाध इव देहबाधेऽप्यनुमानावतार इत्याह—अधिष्ठानं चेति ।

व्याप्तमिति देहहानं दुष्करं युक्तं नरहानम्, वल्मीकेऽन्याधिष्ठानदर्शनात् । अतो दृष्टविपरीतहानार्थं चेतनाधिष्ठानताहानमेव । एवं चेश्वरे परोक्तमेवानुमानं निरस्तम् । नेश्वरोऽपि निरस्तः ॥*

न च वास्यादिदृष्टनरहानवद्देहहानमपि स्यादिति वाच्यम्, नरहानेनाप्यधिष्ठानं दृष्टम्, न देहहानेनेति वैषम्यादित्याह—युक्तं नरहानमिति । तस्माद्व्याप्यव्यापकत्वदर्शनसमयदृष्टस्वव्यापकहीनं नाधिष्ठातृत्वमनुमानार्हमित्युपसंहरति — अतो दृष्टविपरीतताहानार्थमिति । न चैवं श्रुतिस्मृतिनिषिद्धेश्वरनिरासापत्त्या साधुबहिष्कार्यत्वापत्तिः, श्रुतेश्वरविषयत्वात्तस्येत्याह—एवं चेश्वर इति ।

इति सम्बन्धाक्षेपपरिहारः ॥

---

* जय, जनकरहित, वरयुवतिसहित, जय, तपसि निरत, स्वभुज हित (हरिण), जय, विषमनयन, गलनिहितगरल, जय, विजितमदन, कृतसततनयन, जय, वृषभवहन, धृतरजनिजनक, जय, भुजग वलय, कलिकलुषशमन, जय, कलितभुवन (भगवन्) तव नमस्ते नमस्ते ॥ क.

अथ चित्राक्षेपपरिहारौ ॥

"अथ यदुक्तमनिमित्तं शब्दः" इति भाष्यम्। तस्यार्थः—कृते सम्बन्धे बलात् वेदेऽपि कृततया सापेक्षतापत्तिरौत्पत्तिकतया प्रतिकृता। लोके इष्टसाधनतानुरक्ता कार्यता मानान्तरत इति वेदेऽपि तथा लिङर्थ इत्येतच्चोदना चोद्यमनुभाषितम्। कर्मकाले फलाभावादिति भाष्यार्थः। यद्यपि कर्मानन्तरं न फलम्, तथाप्यपूर्वात् फलं वाच्यम्। मानान्तरगम्यं चेत् कार्यम्, तर्हि नापूर्वम्; अतः फले विपर्ययात्स्फुटं वेदाप्रामाण्यम्॥

राद्धान्तस्तु—यद्यपीष्टसाधनतानुरक्ता कार्यता; कार्यमात्रं तु लिङर्थः, तन्मात्रस्यैव प्रवृत्तिहेतुत्वेन व्युत्पत्तेः। इष्टसाधनतानुरागोऽपि कार्यधीहेतुः। तत्स्थान एव लिङिति नेष्टसाधनतापेक्षा शब्दात् कार्यधीः। अतः कामिनियोज्यान्वयादपूर्वं कार्यं लिङर्थः फलसाधनमिति न विपर्ययात् स्फुटमप्रामाण्यम्। न च सापेक्षतापत्तिः। भाष्यं शब्दातिरेकि मानपञ्चकमाह। व्यवहार-

"अथ यदुक्तमनिमित्तं शब्दः" इत्यनुभाषणमयुक्तम्, औत्पत्तिकसूत्रव्याख्ययैव परिहृतत्वात् इति शङ्कां परिहरति—तस्यार्थ इति। मानान्तरमेयार्थत्वं हेतुद्वयप्राप्तं निमित्तसूत्रभागेन पूर्वपक्षितम्, तत्रेष्टसाधनत्वोपाहितकार्यार्थतया लोकदृष्टप्रयोगप्राप्तया प्राप्तं सापेक्षत्वं न परिहृतमिति तत्परिहारार्थं तदित्यर्थः। ननु नैतदनुगुणो भाष्योक्तो बाधितत्वात्मको हेतुरित्याशङ्क्य तदनुगुणतयैव तदर्थमाह—कर्मकले[1] फलादर्शनादिति। यथोक्तसापेक्षत्वापनीतापूर्वार्थत्वापेक्षमानान्तरबाधितार्थतोक्त्यापि सापेक्षतैव स्पष्टीकृतेत्यर्थः॥

सिद्धान्ताभिप्रायमाह—राद्धान्तस्त्विति। इष्टसाधनत्वाव्यभिचारेऽपि कार्यमात्रस्य लिङर्थत्वव्युत्पत्तेरन्यथासिद्धोपाधित्वशङ्कायाश्च निवृत्तेः नियोज्यपदसमभिव्याहारादपूर्वात्मककार्यार्थतापाताच्च मानान्तरबाधः सापेक्षता चेत्यर्थः। यदि पञ्चैव प्रमाणानीति शब्दव्यतिरिक्तमानपञ्चकाभिधायिभाष्यस्याभिप्रायमाह—भाष्यं शब्दातिरेकीति। सर्वाणि तावन्मानानि स्वमेयतत्त्वोपदर्शनद्वारेण प्रवृत्तिनिवृ-

१. कर्मकर्मकाले. क. २. साधनं कृति न. क.

हेतुभेदोपाधेरभावव्यवहारहेतोरपि भेदाद्व्यवहारावसरे मानप्रक्रमे त्वभावः प्रमाणं न भवतीत्याह । तच्चोपपादितम् । आत्माक्षेपसमाधिस्तु वादान्तराधीनः ॥

त्यादिव्यवहारफलानि; तत्र फलं स्वोद्देश्यफलस्वभावानुसारेण स्वमेवानन्तर्गतार्थनिरूप्यतया विलक्षणावस्थतन्मेयमानविकल्परूपापेक्षोत्पत्त्यपि भवति यथा परिमाणगुरुत्वाद्यवच्छिन्नद्रव्योपादानमन्यापेक्षसमह्रस्वदीर्घतादिरूपापेक्षं समगुरुलघुत्वापेक्षं च । न हि तत्र स्वनियतपरिमाणगुरुत्वाधिकं तात्त्विकं रूपं परनिरूप्यमस्ति, तथापि तदुपदर्शकयत्नान्तरापेक्षं तदुपादानम् । एवं भावोपदर्शकमानपञ्चकमपि भावव्यवहारानुपयोग्युपाध्यन्तरापेक्षमभावव्यवहारकरमित्युपाधिभेदेन फलान्तरवन्मानान्तरतुल्यमिति मानान्तरप्रसिद्धिबीजोपदर्शनार्थं व्यवहारफलविचारकाले मानान्तरतयार्हेत्यर्थः । ननु मुख्यार्थत्वार्थमितरतुल्यमेदपरमेव युक्तमिति शङ्काहानार्थमाह—मानप्रक्रमे त्विति । लोकप्रसिद्धिनिमित्तलक्ष्यत्वविवक्षायां मानतया प्रसिद्धोऽपि मानाभाव एवेति नास्तिशब्दवाच्यप्रतियोगिग्रहणयोग्यमाननिवृत्तिमात्रस्य व्यवहारहेत्वभिमताभावस्वरूपतोक्त्या मानान्तरनिरासाभिप्रायस्य व्यक्तत्वान्न तद्युक्तमित्यर्थः । बाधितार्थतोक्त्यात्माक्षेपस्यैतदेकयत्नत्वेऽपि परिहारः पृथग्यत्नार्ह इति पृथगुक्त इत्याह—आत्माक्षेपसमाधिस्त्विति ॥

इति चित्राक्षेपपरिहारौ ॥

अथात्मवादस्थानकम्.

"एष यज्ञायुधी" इतिपदे देहादिभिन्न एवात्मनि गौणे स्तुत्याः एषपदार्थो हि स्पष्टसत्त्वः प्रत्यक्षः; आत्मापि देहादिभिन्नस्तद्विध एवात्र वादे साध्य इति गुणयोगः। तथा यज्ञायुधी देहः स्फुटसङ्घातः; सोऽपि तद्विध इति गौणता। धीरेण देहार्थे पदे सम्बन्धादात्मनि लक्षणे उक्ते, "मञ्चाः क्रोशन्तीति वत्" इति गुरूक्तेः। तन्नः गुरोरभेदोपचारवाचा गौण्येन वृत्तिर्मताः परशब्दतासाम्यात् "मञ्चाः क्रोशन्तीतिवत्" इत्युक्तम्। सति हि गौणे ततो जघन्या लक्षणा न युक्ता। गौणे च स्तुतेः स्पष्टसत्त्वादाञ्जस्यम्। पूर्वपक्षी देहादिभिन्नानुपलब्धिमाह। राद्धान्तैकदेशिनस्तु योगाः प्राणादिलिङ्गगम्यं[१] भिन्नमाहुः। आन्तरवायुक्रियाभेदैः कार्यैर्देहादिभिन्नकर्त्रनुमा। भूतात्मवादी त्वाह—देह एव तत्कर्तास्तु क्लृप्तः। योगास्तु देहकार्यत्वासम्भवात् प्राणादिबुद्ध्यादेः भिन्नानुमामाहुः। देहो हि भूतसमवायिकारणकः[२]; पञ्चभूतारब्धो ह्यचा-

तमेव समाधिं देहव्यतिरिक्तात्मनि गौणवृत्त्युक्त्याह—एष यज्ञायुधीति पदे इति। लक्षणावृत्तिः परोक्तेति सैवोपेयेति शङ्कां निवर्तयितुमाह—धीरेणेति। व्यक्तस्तदर्थः। एवं वाक्यवृत्तिमुक्त्वा "कोऽसावन्यः" इति अनन्तरभाष्येण पूर्वपक्ष उक्त इत्याह — पूर्वपक्षीति। तदनन्तरम् "प्राणादिभिरेनमुपलभामहे" इति भाष्यमेकदेशिमतेनेत्याह—राद्धान्तैकदेशिनस्त्विति। तदभिप्रायमेव विवरीतुं तन्निवर्त्यपूर्वपक्षमाह — भूतात्मवादी त्विति। प्रत्यक्षत्वादात्मतया देहस्य तद्धर्मत्वाभ्युपगम एव न्याय्यः, न कल्प्यान्यधर्मताश्रयणमित्यर्थः। तदनुपपत्त्यैवान्यधर्मताश्रयणमित्येकदेश्यभिप्रायं विवृणोति — योगास्त्विति। देहस्तावत्पार्थिवोऽभ्युपेयः; पराभ्युपेतपञ्चभूतारब्धत्वे वायोरचाक्षुषत्वसम्मतेश्चाक्षुषत्वापत्तेः। चतुर्भौतिकत्वनिरासार्थं नभोऽपि न चाक्षुषमिति साध्यते—द्रव्यत्वे सत्यरूपत्वादीति। नन्वरूपत्वमसिद्धम्, तेजोहिमप्रचारे रूपदृष्टेरन्यथासिद्धत्वेऽपि तदप्रचारे नील-

१. गम्यमभिन्न. क. ख.   २. कारणतः. क.

क्षुषः स्यात्, चाक्षुषाचाक्षुषद्रव्यारब्धस्याचाक्षुषत्वात् वाततरुसंयोगवत्; वायोरचाक्षुषत्वं सिद्धम्। नभोऽपि न चाक्षुषम्, द्रव्यत्वे सत्यरूपत्वात्। न च रूपवन्नभः, तेजोहि[१]महानेऽपि निशि नीलबुद्धेरिति वाच्यम्, नीलबुद्धेर्हेत्वभावेनासिद्धेः। आलोकानपेक्षं चक्षुर्न हेतुः। एतेन तमसि नीलधीः प्रत्युक्ता तमोधीरपि। किञ्च रूपवत्तमोऽनेकद्रव्यारब्धं सच्चाक्षुषं स्यात्। न चास्यारम्भकद्रव्याणि सन्ति; सन्ति चेत् सतेजोदेशे[२]ऽप्यारभेरन्। "स्वतो दिवा सतेजसो देशाः" इति दिवाग्रहणं सतेजोदेशपरं प्रकरणे। न च तेजसा विरोधादनारम्भः; तेजोविरुद्धमपि जलं सालोके देशे दृष्टमारम्भकम्। न च कार्यधिया दृष्टहेतुस्वभावान्यत्वम्। भ्रमरूपा हि[३] धीर्दृष्टा। न चेन्द्रि-

दृष्टेरिति शङ्कामपनुदति — न च रूपवन्नभ इति। तेजःप्रचाराभावे चक्षुषो धीकरत्वायोगान्नीलदृष्टेरभावान्न तद्बलाद्रूपवत्त्वमित्यर्थः। नन्वालोकसहायस्यैव चक्षुषो धीहेतुत्वमिति नियमो नास्ति, तमोदृष्टेरन्यथापि प्रसिद्धत्वाद्विषयविशेषनिष्ठतयैव तन्नियमस्योपेयत्वादित्यत्राह—एतेन तमसीति। सहायनिवृत्त्या तद्धियोऽप्यचाक्षुषतानुमानादुक्तहेतोरेव तच्छङ्कानिरासशक्तत्वात्सिध्यत्येव तन्नियम इत्यर्थः। तमोद्रव्यासम्भवाच्च नियमासिद्धिर्न शङ्क्येत्याह — किं च रूपवत्तम इति। तमोद्रव्यसत्तायास्तदारम्भकसत्तानियतत्वात् तत्सत्त्वे च तेजोदेशेऽपि तदारम्भापत्तेस्तत्सत्त्वैव दुरुपगमेत्यर्थः। ननु तेजसस्तमसा विरोधिस्वभावत्वात्तत्सत्त्वेऽनारम्भसम्भवात्तच्छून्यदेशनियम इत्यत्राह—न च तेजसा विरोधादिति। द्रव्यत्वे हि तमसो नाश्यनाशकत्वरूपं विरोधित्वम्, न भावाभावयोरिव स्वभावप्रयुक्तम्, तच्च जलतेजसोरप्यस्त्येव, तथापि सतेजोदेशे जलारम्भदर्शनाज्जलेऽपि विद्युद्वैद्युतान्नयारम्भात्तमसोऽपि सालोकदेशे दर्शनापत्तिरित्यर्थः। ननु तद्दर्शनबलात् कार्यसिद्धेः तद्धेतोरितरविलक्षणस्वभावत्वमुपेयमित्यत्राह —न च कार्यधियेति। न तद्दर्शनस्य तत्कल्पनाक्षमबलमस्ति, भ्रमतयापि तदुपपत्तेः; अनन्यथासिद्धधिय एव प्रसिद्धव्याप्तेरुपाधिकल्पनया विलक्षणस्वभावकल्पकता, नान्यथासिद्धाया इत्यर्थः। ननु स्वतःप्रामाण्यबलादिन्द्रियान्तरकल्पनास्त्वित्यत्राह — न चेन्द्रियान्तरमिति।

१. हि महानपि. क.
२. देशो. क. ख.
३. Omitted हि. क. ख.

यान्तरं कल्प्यम्, चक्षुरेकग्राह्यत्वनियमाद्रूपस्य। न च भ्रमो धीभेदः। सर्वथा धीहाने कथमिति वाच्यम्; न हि सर्वधीहानिरुक्ता, किन्तु 'नीलं तमः' इति मित्यभावेऽपि मितिभ्रम उक्तः। उन्मीलिताक्षस्य हि तेजसो रूपमपश्यतः तद्रूपविपरीतनीलरूपि द्रव्यं सामान्यतः स्मरतः स्मृतित्वमगृह्णतो 'नीलद्रव्यम्' इत्यभिमानात् स्यादेव तमोव्यवहारः। अन्धानां नीलाभिमानासिद्धिरित्यपि न, 'तमसि प्रविष्टोऽहम्' इत्यन्धवाक्यात्। निमीलिताक्षस्य च सर्वस्य नीलधीः। न च सा पक्ष्मच्छायाधीः, अप्रसरतो नेत्ररश्मेरग्राहक-

रूपदृष्टेश्चाक्षुषत्वव्याप्तिबाधापत्तेः साध्ययुक्तैवेत्यर्थः। इह प्रकरणे "अबुध्यमाने-बुद्धिभ्रमोऽयम्" इति भ्रमविधोक्ता, तदसम्भवशङ्कानिषेधेन तदभिप्रायमाह— न च भ्रमो धीभेद इति। कथं मित्यभावे मितिभ्रमोपपत्तिरपीत्याशङ्क्योपपत्ति-माह—उन्मीलिताक्षस्य हीति। चक्षुरुन्मीलनस्यानन्तरभावितेजोरूपदर्शनसम्बन्धितया प्रचुरानुभूतस्य तदितरदृश्यानामन्योन्यव्यभिचारात् तत्सर्वानुरञ्जकभूतानुगततत्स्मृतिहेतुत्वात् प्राप्तोत्पत्तिः स्मृतिः तद्दर्शननिवृत्तिः तद्दर्शनहीनात्मभानरूपा तेजोरूपविपरीतरूपत्वाच्छुक्लाद्यर्थदर्शनकरोन्मीलनजदर्शनविषयत्वान्नीलद्रव्यस्मृतिकरी तदुन्मीलनानभिव्यङ्ग्यत्वसाम्यात्; सा च नीलस्मृतिस्तेजोरूपस्मृति-तद्दर्शननिवृत्तिव्यवधानेनोन्मीलनोत्थाप्येति चाक्षुषदृष्टितुल्यव्यवहारकरीति भवेत् तत्सिद्धिरित्यर्थः। ननु सर्वसंवाद्यबाधितनीलतमोदृष्टेर्भ्रमत्वाश्रयणमयुक्तमिति शङ्कानिवृत्त्यर्थमन्धानामिव नीलरूपाभिमान इत्युक्तदृष्टान्तासिद्धिशङ्कां परिहरति— अन्धानां नीलरूपेति। इतरेषामन्धाभिमाने स्वानुभवाभावेऽपि तद्वाक्यैरेव तन्निश्चयः सुकर इत्यर्थः। स्वानुभवोऽपि न नास्तीत्याह—निमीलिताक्षस्य चेति। निमीलिताक्षनीलाभिमानाविशेषात्तमोदृष्टेरमानत्वं सुगममित्यर्थः। ननु तमोवादिना छायावस्तुनोऽभ्युपगतत्वान्निमीलिताक्षधियस्तद्विषयत्वसम्भवात् कथममानधीदृष्टान्ततेत्याशङ्क्य अतद्विषयत्वं साधयति—न च सा पक्ष्मच्छायाधीरिति। अप्रसरतोऽपि तद्रश्मेः स्वविषयग्राहकत्वे छायाकरपक्ष्मणोऽपि ग्रहणापत्तेरग्राहकत्वनिश्चयात् सत्त्वेऽपि छायावस्तुनो ग्राह्यत्वायोगादमानत्वसिद्धिरित्यर्थः। ननु छायोपगमे तमो-

१. न च. क. २. मानसिद्धिः. ख.

त्वात् । छायैव तम इति तु छायावस्त्वसिद्धेरसिद्धम् । भूगुणादितापि तु परैरेव प्रत्युक्ता । नभस्त्वचाक्षुपमपि शब्दगुणानुमेयम्—शब्दो गुणः स्पर्शान्यैकेन्द्रियग्राह्यत्वात् । भूजलतेजोवायुगुणानां गुणिना सह ग्रहणम्, शब्दस्य न तथेति न तद्गुणता । अणुमनोगुणत्वमशक्यम् । दिक्कालात्मगुणनामबहि-

बुद्धेरप्यनवच्छिन्नच्छायाविषयतया मानत्वनिर्वाह इत्यत्राह—छायैव तम इति त्विति । तदभ्युपगममात्रेणाप्रसरतोऽपि ग्राहकत्वमुक्तम्, वस्तुतस्तु निवारितालोकयोगदेशाधिकवस्तुविषयत्वं छायाधियोऽसिद्धमिति तदेकविषयतया तमोबुद्धेर्न मानतेत्यर्थः । केचित्तु भूम्यादेः स्वाभाविकं रूपं तमोरूपं दृश्यते, तेजसा तदभिभवे तदपगमे चान्यथेत्याहुः, तन्निरासाय नास्माभिर्यत्नः कार्यः, परैरेव निरस्तत्वादित्याह—भूगुणादितेति । नन्वन्धनिमीलिताक्षानुगता नीलधीः किमित्युन्मीलिताक्षस्येत्युन्मीलितोपक्रमैवोक्ता? उच्यते—सैव हि चाक्षुषतया प्रमाणम् न तथेति विवादालम्बनमिति तच्चाक्षुषत्वाभिमाननिदानतया तदुपक्रमोक्ता, तदन्या तेजोरूपादर्शनमात्रोत्थापिततद्विरुद्धनीलस्मृतितत्क्रमभागभिमतेति न दोषः । एवं प्रासङ्गिकं समाप्य नभसोऽचाक्षुषत्वे स्वरूपासिद्धिरेव स्यादिति परापादितदोषं परिहरति—नभस्त्वचाक्षुषमपीति । ननु गुणत्वमेवासिद्धं शब्दस्येत्यत्राह—शब्दो गुण इति । यत्स्पर्शेन्द्रियव्यतिरिक्तबाह्यैकेन्द्रियग्राह्यं तद्गुण इति व्याप्तेरनुमेयं गुणत्वमित्यर्थः । तार्किकाणां रूपत्वादिसामान्याभ्युपगमेऽपि सामान्यपदार्थापेक्षया शब्दस्यान्यत्वं सम्मतमिति द्रव्यव्यवच्छेदमात्रफलं गुणग्रहणमित्ययत्नलभ्यफलव्यक्तिमात्रार्थं तदिति नानेकान्तोद्भावनावकाशः । ननु गुणत्वमात्रसिद्धावपि कथं नभोऽनुमानलिङ्गतेत्याशङ्क्य पारिशेष्यादिति वक्तुं तदन्यगुणत्वं निरस्यति—भूजलेति । एकधीस्थतया गुणिना सह धीनियमाभावेऽपि भूम्यादिगुणानां गुणविशेषवृत्त्यवधारणक्षमसहबोधनियमत्वसंप्रतिपत्तेः तद्गुणत्वे तदापत्तेस्तन्निवृत्त्यान्यगुणतैव स्यात्, अणुगुणानामप्रत्यक्षत्वान्मनोगुणत्वं च न स्यात् । तथान्यगुणत्वे चासति गुण्यन्तरानुमानं परिशेषसिद्धमित्यर्थः । एवं पाञ्चभौतिकत्वं चातुर्भौतिकत्वं च निरस्तमित्युपसंह-

१. भूतगुणादिता तु. ख.

रिन्द्रियग्राह्यता, न शब्दस्तथेति गुण्यन्तरं नभः। एवं न पञ्चारब्धो देहः। भूम्यप्तेजोभिरनुष्णाशीतशीतोष्णैरारब्धोऽपि तदन्यस्पर्शः स्यात् नानागुणतन्त्वारब्धतदन्यगुणचित्ररूपपटवत्। अनुष्णाशीतस्तु देहः; सगन्धागन्धारब्धत्वेऽप्यगन्धतापत्तिः। एवमरसतापत्तिः। तदतद्धर्मारब्धं चातद्धर्म वाततरुसंयोगवत्। धीरेण चतुर्भिरारब्धताप्युक्ता। संयोगो हि निःशेषसंयोगिग्रहाच्चाक्षुषः रज्जुघटसंयोगवदिति युक्तम्। वाततरुसंयोगोऽचाक्षुषः; अवयवी तु न सर्वावयवग्रह एव चाक्षुषो दृष्ट इत्यचाक्षुषारब्धोऽपि चाक्षुषो युक्तः। स्पर्शश्चान्योऽप्यनुद्भूतो भूवाय्वोरनुष्णाशीत उद्भूतो भाति। सगन्धरसावयवगन्धानां रसानां च गन्धरसारम्भकतास्त्विवति। तन्न, भुजजङ्घादिकतिपयावयवचाक्षुषत्वे हि देहावयवी चाक्षुषो दृष्टः, चतुर्भिरारम्भे च न कश्चिदवयवश्चाक्षुषः स्यात्, भुजादेरपि चाक्षुषाचाक्षुषारब्धत्वात्तदवयवानामपि तथात्वात्। अथ चाक्षुषखण्डावयविग्रहात् भुजाद्यवयविग्रहे देहग्रहः; तन्न, अचाक्षुषानपेक्षेण चाक्षुषेण खण्डावयव्यारम्भे सिद्धे

रति—एवं न पञ्चारब्ध इति। न च त्र्यारब्धोऽपीत्याह—भूम्यप्तेजोभिरिति। द्व्यारब्धोऽपि नेत्याह—सगन्धागन्धेति। यथोक्तदूषणपरिहारेण चतुर्भूतारब्धत्वमेव धीरेणाश्रितमित्याह—धीरेण चतुर्भिरारब्धतेति। न तावद्वाततरुसंयोगवदचाक्षुषत्वभीत्या तदनारभ्यतोपेयेत्याह—संयोगो हीति। आश्रयैकदेशग्रहाधीनग्रहावयविनः संयोगासाम्यात् चाक्षुषाचाक्षुषारब्धत्वेऽपि चाक्षुषत्वार्हतास्त्येवेत्यर्थः। भासमानानुष्णाशीतस्पर्शविरोधोऽपि नास्तीत्याह—स्पर्शश्चेति। गन्धरसोत्पत्तिश्च तद्वतामवयवानां बहुत्वात्तद्गतानामेवारम्भकत्वसम्भवान्नायुक्तेत्याह—सगन्धरसावयवेति। तदनुपगमहेत्वभिव्यक्त्यर्थं तन्मतं दूषयति—तन्न भुजजङ्घादीति। सत्यप्येवं संयोगवैलक्षण्ये केषुचिदवयवेषु प्रत्यक्षेष्वेवावयवी प्रत्यक्ष इति तावत् संप्रतिपन्नम्, तत्तु दुर्लभम्, चतुर्णां सहारम्भकत्वे तत्तदवयवारम्भे तदग्रहानापत्तेरित्यर्थः। नन्वेवमपि चाक्षुषाणामप्यन्योन्यसंयोगोऽपरिहार्य एव, ततः खण्डावयव्युत्पत्तिश्चापरिहार्येति तच्चाक्षुषत्वापेक्षमवयविप्रत्यक्षत्वं घटत इति शङ्कते—अथ चाक्षुषखण्डावयवीति। दूषयति—तन्नेति।

१. योगाच्चाक्षुषत्वम्. क. ख.
२. रसगन्धानाम्. क.
३. ननु. क.

महावयव्यारम्भोऽपि तथैवोपेयः । [1]सगन्धरसावयवानां गन्धैरसैर्गन्धर-सारम्भे समवायिकारणं न समर्थितम् । अन्यश्च [2]स्पर्शः कदाचिदननुभवान्नास्तीत्येवोक्तम् ॥

गुरुणा तु यत् "चातुर्भौतिकः सङ्घातः" इत्युक्तम् तद्भूतान्तरारब्ध चक्षुरादिकार्य[3]द्रव्यान्तरयोगाच्चतुर्भूतसमूहोपलक्षणम् । योगमते देहस्य पार्थिवत्वस्थापनात्तस्यैव गुरुणोपन्यासात् । एवं पार्थिवो देहः । न स [4]बुद्ध्यादेः समवायिकारणम् । कारणगुणपूर्वको हि [5]वैशेषिकगुणः । न च कारणेषु बुद्ध्यादिः । यदि स्यात्तदारब्धे तत्कार्यान्तरेऽपि घटादौ स्यात् । न च करकाकाठिन्यमकारणगुणपूर्वकमित्यनेकान्तः । काठिन्यं ह्यवयवसंयोगभेदः; न च

एवं चाक्षुषैकारब्धस्यैव प्रथमचाक्षुषत्वसम्प्रतिपत्तेः तन्यायेनैवोत्तरेषामप्यद्धमानमनिवार्यम्, तदन्यस्वभावोपस्थापकहेत्वभावादित्यर्थः । गन्धरसोत्पत्तिनिर्वाहोक्तिश्चायुक्तेत्याह—सगन्धरसावयवानामिति । तदुत्पत्त्यसमवायिकारणमात्रमेवं सिध्येत्, समवायिकारणं तु खण्डावयव्यधिकं न स्यादित्यर्थः । विलक्षणस्पर्शस्यानुपलभ्यतोक्तिरसत्त्वापादिकेत्याह—अन्यश्च स्पर्श इति । ननु पृथिवीमात्रारभ्यत्वं टीकाविरुद्धमिति नाभ्युपेयमिति शङ्कां परिहरति—गुरुणा त्विति । देहसंयोगापेक्षस्वकार्यकराप्यतैजसवायवीयद्रव्यसंयोगितयैव देहस्यात्मभोगकार्यकरतेति तत्संयोगप्राप्तसमुदायावस्थापेक्षस्वकार्यकरदेहोपलक्षणार्था तदुक्तिरिति न विरोध इत्यर्थः । कुत एवंपरत्वनिश्चय इत्यत्राह— योगमते देहस्येति । उक्तोपसंहारपूर्वकं तत्फलमाह—एवं पार्थिव इति । रूपादिविशेषगुणानां कार्यवर्तिनां कारणगुणपूर्वकत्वनियमात् बुद्ध्यादेश्च विशेषगुणत्वनिश्चयात् कार्यान्तरे तदनुपलब्ध्या कारणे तदभावनिर्णयाच्च देहधर्मत्वासिद्धिरित्यर्थः । ननु कारणगुणपूर्वकत्वव्याप्तिरेव नास्ति, जलकार्यकरकायां काठिन्यस्यापि दर्शनादित्याशङ्क्य विशेषगुणत्वाभावेन परिहरति—न च कारकाकाठिन्यमिति । दृढावयवसंयोगस्यैव

१. Omitted स. क.
२. Omitted स्पर्श. क. ख.
३. Omitted द्रव्य. क.
४. सम्बुद्ध्यदेः क.
५. गविशेषः ख.

संयोगो वैशेषिकगुणः। न च गोमयाच्चेतनोत्पत्त्यानेकान्तः, वृश्चिकदेहचैतन्यासिद्धेः। वैशेषिकगुणास्तु रूपादयो यावद्भूतभाविन एव। भाष्ये च "अयावच्छरीरभावित्वात्" इत्यृजु न, युक्तम्—"अयावद्भूतभावित्वात्" इत्येवं गुरुः, न च देहाधर्मत्वं[1] मृतेऽननुवृत्तेर्युक्तम्[2]; अविगुणदेहधर्मोपगमे मृते विगुणे धर्मनिवृत्तिर्ना युक्ता। निजरूपादिनिवृत्त्या च विगुणत्वसिद्धिः। किञ्च भूतगणा रूपादयः परेन्द्रियग्राह्याः, न तथा सुखादय इत्यभूतगुणास्ते। किञ्च गुण्यग्रहे गुणग्रहात्तद्गुणता दुर्भणा। प्रत्यक्षगुणिगुणयोर्गुणस्य गुणिना सह ग्रह-

काठिन्यपदार्थत्वात् संयोगस्य च विशेषगुणत्वाभावान्न हेतोर्व्याप्तिभङ्ग इत्यर्थः। संप्रतिपन्नविशेषगुणविषयेऽपि तद्दृष्टिप्राप्तानेकान्तशङ्कामनूद्य कारणसमवायात्मकव्यापकनिवृत्तिहेतुकार्यसमवायनिषेधस्य तद्विषयत्वात् पक्षभूते तत्रानेकान्तापादनमशक्यमित्याह—न च गोमयाच्चेतनोत्पत्तेरिति। कारणगुणपूर्वको हि वैशेषिकगुण इति संक्षिप्तां व्याप्तिं विषयोक्त्या साधयति—वैशेषिकगुणास्त्विति। सजातीयसर्वभूतवृत्तिसिद्धेः कारणगुणपूर्वका बुद्ध्यादिविलक्षणाः प्रसिद्धा एवेत्यर्थः। नन्वशरीरगुणत्वमयावच्छरीरभाविता भाष्योक्तम्; तत्र किमयावद्भूतभावित्वेनेत्याशङ्क्य भाष्यमप्येतत्परमेवेत्याह—भाष्ये चेति। कृत्स्नभूमेरप्यन्यावस्थापत्त्या तदर्हत्वाविशेषात् तदर्हतापेक्षया भूतपरमेव शरीरपदं नेयमन्यथानुपपत्त्येत्यर्थः। शरीरगुणत्वे परेन्द्रियग्राह्यतापत्त्यापि तन्नोपेयमित्याह — किं च भूतगुणा इति। भूतगुणत्वे गुणिना सह ग्रहणापत्तिः; तन्निवृत्तिश्चातद्गुणत्वगमिकेत्याह—किं च गुण्यग्रहे गुणग्रहादिति। शब्दादेर्गुणस्य सहग्रहणाभावेऽपि भूतगुणत्वाङ्गीकारात् व्याप्त्यसिद्धिरित्याशङ्क्य गुणिनोऽपि प्रत्यक्षत्वविषय इदमुच्यत इति परिहरति—प्रत्यक्षगुणिगुणयोरिति। ननु गन्धादेरपि सहग्रहणं नास्ति; भूतगुणत्वं त्वस्त्येव। सुखादेश्चास्त्येव सहग्रहणम्। न हि गन्धवत्सुखमात्रग्रहमविज्ञाताश्रयं कस्यचित्प्रतिभासमानं प्रसिद्धम्; 'अहं सुखी' इत्येव तद्भानात्। अतः किमिदमुक्तं गुण्यग्रह इत्यादिना? उच्यते—यदा हि 'अहं सुखी' इत्यादिना देहधर्मत्वमे-

१. न हि देहाधर्म. ख.   २. युक्तमपिगुण. क. ख.

णात्। संप्रति योगोक्तदोषानुपेत्य भूतचैतन्यवादी बौद्धदृष्ट्या बुद्ध्यादिहेतुं बुद्ध्याद्यन्तरमाह। योगाभिमतविजातीयसमवायिकारणं प्रक्रियामात्रम्। भाष्ये च सम्बन्ध्यन्तरनिषेधो विजातीयाभिप्राय एव। अन्तरशब्दो जात्यन्तरे स्वरसात्। व्यक्त्यन्तरेऽपि च शक्यः। भाष्यान्तरात् "समानायां सन्ततौ" इत्यस्मात् सजातीयोपगमात् विजातीयनिषेधार्थ एवान्तरशब्दः। विजातीयहेतूपगमेऽनवस्था। विजातिह्यात्मा कार्यप्राक्क्षणसत्तामात्रेणानुमेयः क्षणिक इति तस्य विजातिहेतूपगमादनवस्थैव। प्रत्यक्षे च बुद्ध्यादेर्बुद्ध्यादिहेतौ न

वोच्यत इत्याश्रीयते, तदा देहस्य बहिरिन्द्रियग्राह्यत्वात् तद्ग्राह्यतैव सुखादेरप्याश्रयणीया। तदन्यग्राह्यत्वे गन्धादिवत् स्वतन्त्रावभासापत्त्या नियमेन विशेष्यनिष्ठप्रतीत्यसम्भवापत्तेः। न च बाह्येन्द्रियग्राह्यतास्तीति भूतचैतन्यवादिनोऽपि संमतम्। तेनोष्णजलज्ञानादिवत् भ्रान्तिरेव 'अहं सुखी' इत्यादिधीरिति न तद्बलाद्देहगुणता साधयितुं शक्येति तदर्थ इति न काचिदनुपपत्तिः। तद्भ्रान्तित्वापादनोपजीवनेनैवं तर्हि विज्ञानवादिमतापत्तिरनिवार्येति भूतचैतन्यवाद्येव योगोक्तदोषाभ्युपगममात्रेण तन्मतं निरस्यति "कुत एष संप्रत्ययः" इत्यादिनेति ग्रन्थसम्बन्धमाह—संप्रति योगोक्तदोषानिति। ननु समवायिकारणशून्यतापत्तिदोषस्तन्मतापत्तिं निवारयेदित्यत्राह—योगाभिमतेति। ननु भाष्ये सजातीयकारणमपि निवारितम्, न विजातीयमात्रमिति कार्यत्वनिर्वाह एव न स्यादित्याशङ्क्य विजातीयाभिप्रायमेव तदित्याह—भाष्ये च सम्बन्ध्यन्तरेति। केन विशेषेण सजातीयाङ्गीकारेण विजातीयनिषेधः कृत इत्यत्राह—विजातीयहेतूपगम इति। क्षणिकस्यैव कारणत्वोपपत्तिरिति तदुक्तन्यायबलेनानुमेयस्य क्षणिकत्वापत्तेस्तस्यापि तद्विधानुमापत्तेः; प्रत्यक्षसजातीयमात्रेणाकाङ्क्षानिवृत्तेश्चानुमानानुपपत्तिरित्यर्थः। ननु देहेन्द्रियादिव्यतिरिक्तात्मसाधकतया योगमतस्यापि राद्धान्तानुगुण्ये सत्यपि कुतस्तन्निरासे भाष्यकारो यतत इत्याशङ्क्य तत्साधना-

१. दृष्ट्वा. क. ख.
२. विजातिहेतू. क.
३. तस्या विजातिहेतू. ख.

हेत्वन्तरानुमा । देहादिभिन्ने साध्येऽपि यत्प्राणादिलिङ्गात्तत्सिद्धिः परोक्ता निरस्ता तत्प्राणादेर्भिन्नसिद्धिरशक्येत्येवम् । प्राणादेश्चलनभेदत्वात् बाह्यवायौ चलनदर्शनादयावद्भूतभावित्वासिद्धेर्न भिन्नात्मसिद्धिः । सुखादयोऽपि भूतगुणाः, देहे प्रसादादिविकारासमवायिकारणत्वात्; देहतद्धेत्वनाश्रितत्वे च द्विधा समवाय्यप्रत्यासत्तेरसमवायिकारणता नेति भूतधर्मः सुखादिः विशेषत इत्ययावद्भूतभावित्वासिद्धिः । उपेत्याभूतधर्मतां बौद्धदृष्ट्या "कामं सुखादय एवं स्युः" इति भाष्यम् । "कामम्" इत्युक्तेरुपेत्यवादनिश्चयः । बौद्धा हि सर्वभावानां क्षणिकतया कारणकार्ययोः पूर्वापरक्षणतामाहुः । अतो न

सामर्थ्यादित्याह—देहादिभिन्ने साध्येऽपीति । चलनप्रकारमात्रं प्राणादेरितरवायुवैलक्षण्यमवान्तरभेदमात्रं सर्वत्राप्यस्त्येवेति सामान्यनिष्ठैव व्याप्तिरित्ययावद्भूतभावित्वासिद्धेर्न तस्य तत्सामर्थ्यमित्यर्थः । तथापि सुखादेस्तत्सामर्थ्यमविहतमेवेत्याशङ्क्य विशेषानुमानबाधितत्वात्तदपि नास्तीत्याह—सुखादयोऽपीति । देहगतप्रसादादिविकारकारणत्वं तावदविवादम्, तदसमवायिकारणत्वमप्यसमवायिकारणान्तराप्रसिद्धेः सिद्धम्, सुखादेर्देहव्यतिरिक्तगुणत्वे मानान्तरसिद्ध एव हि तत्संयोगस्यासमवायिकारणत्वप्रसङ्गः, न प्रागिति स्वतःप्राप्तमसमवायिकारणत्वम्; तद्बलाद्देहधर्मत्वे विशेषानुमानमिति चैतन्यसामग्रीयोगिनां भूतानामपि सुखाद्यर्हत्वादयावद्भूतभावित्वहेतुरसिद्ध एवेत्यर्थः । नन्वेवमभिप्रेतहेतुदोष एव वाच्यः, कुतस्तदनुक्त्यानभिमतं स्वातन्त्र्यमुच्यत इत्यत्राह—उपेत्याभूतधर्मतामिति । संप्रतिपन्नदेहवृत्त्यर्हधीबलत्यागेऽनुमानसिद्धेऽनुमानस्यादुष्टत्वेऽपि बौद्धोक्तयुक्तिबलायातं स्वातन्त्र्यमेवोपेयं स्यादिति भाष्याभिप्रायः, न हेतोरदुष्टत्वमभ्युपेतम्, तावता च परितोष्यसीति कामोक्तिबलादित्यर्थः । नन्वभूतधर्मकत्वसिद्धौ कार्यस्य समवायिकारणजन्यत्वनियमादन्यगुणत्वं स्यादेवेत्यत्राह—बौद्धा हीति । प्रत्यभिज्ञाप्रत्यक्षबलात् स्थायिनोऽपि सहकारिक्रमापेक्षया कारणत्वे समर्थित एव हि पूर्वोत्तरकालानुवृत्त्यपेक्षया समवायिकारणजन्यत्वनियमः कार्याणां सिध्येत्, नान्यथा; प्रत्य-

१. Omitted अपि. क. २. लिङ्गात्सिद्धि. क.

समवायिकारणं भिन्नं सुखादिगम्यम्, सुखान्तरादिहेतुकमेव सुखादीति। एवमनाश्रयित्वे स्वातन्त्र्ये च सुखादेर्न भिन्नात्मसिद्धिः। अथ वायोस्तिर्यग्गतेर्देहे चान्यथावृत्तिरन्याधीना भस्त्रायामिव, निमेषोन्मेषौ चान्याधीनौ दारुयन्त्र इव, तन्न; अचेतने ह्यन्याधीनता, न सा देहे। योगमतं निरस्य सांख्यमतमुपन्यस्य निरस्यति। जानातीति कर्त्रभिधानान्महदादिभूतान्ताद्देहात् भिन्न आत्मेति सांख्याः। तत्र प्रक्रियेयम्—सुखदुःखमोहात्मिका प्रकृतिः महदात्मकबुद्धितया परिणमते; महतोऽहङ्कारः परिणामः। अहंकारस्य पञ्चतन्मात्राणि गन्धरसरूपस्पर्शशब्दात्मकानि एकादश चेन्द्रियाणि ज्ञानेन्द्रियकर्मेन्द्रियमनांसि। पञ्चतन्मात्राणां पृथिवी चतुर्णामापः त्रयाणां तेजः द्वयोर्वायुः एकस्याकाशं यथाक्रमम्। देहश्च सर्वः प्राकृत उक्तः। तन्मध्ये महदहङ्कारमनांसि ज्ञानात्मकमन्तःकरणमुक्तम्। अन्यत् ज्ञेयम्। अतः कर्मकरणाधिकः कर्ता पुरुषः, जानातीत्यभिधानात्। यद्यपि निष्क्रियः पुरुष उक्तः;

भिन्नाप्रत्यक्षं च ज्ञानव्यतिरिक्तप्रत्यभिज्ञात्मनिश्चयपूर्वकमिति न तज्जन्यत्वव्याप्तिबलादात्मसिद्धिरिति तदनुमेयात्मवादिनो बौद्धपक्षनिषेधासिद्धिप्रकटनार्थस्तन्मतोपन्यासो भाष्य इत्यर्थः। एवं योगमताङ्गीकारेणात्मसिद्धिर्दुर्लभेत्युपसंहरति—एवमनाश्रयित्व इति। प्राणादेर्विधान्तरेणैवात्मगमकत्वं तदभिप्रेतम्, न सुखादितुल्यतयेति तस्य तल्लिङ्गत्वमदुष्टमेवेति शङ्कते—अथ वायोरिति। तदनुमानस्याप्युपाधिशङ्काहतव्याप्तिकत्वादसम्भव एवेति दूषयति—तन्न अचेतने ह्यन्याधीनतेति। "कस्तर्हि जानाति इत्युच्यते" इत्यादिभाष्याभिप्रायमाह—योगमतं निरस्येति। स्वतन्त्रत्वे ज्ञानस्य कर्तृतन्त्रत्वप्रसिद्धिर्न स्यादिति तत्प्रसिद्धिबलात्तदन्यात्मसिद्धिरिति सांख्यमतमुपन्यस्य तेन च देह एव कर्तास्त्विति शङ्क्यम्, तस्य कोष्ठ्यन्तरनिविष्टतया तदनर्हत्वादिति तदभ्युपगमादित्यर्थः। देहस्य कर्मकरणमात्रत्वं तदंशविवेकेन प्रपञ्चयति—तत्र प्रक्रियेयमिति। ननु कर्तृत्वस्य परिणामक्रियापेक्षत्वात् तद्धीनत्वात्तदभिमतात्मनः कथं कर्तृतयोपस्थितिः तत्प्रक्रियानुवादेनेति शङ्कानुवादपूर्वकं तदविरोधमाह—यद्यपि निष्क्रिय इति। कर्तृत्वाभावेऽप्यात्मनो भोक्तृत्वं तदभ्यु-

१. अचेतनेऽप्यन्या. क. २. अत. ख.

बुद्धिधर्मा ज्ञानधर्मवैराग्यादय उक्ताः; तेन साक्षादात्मनो न ज्ञानकर्तृता, तथाप्यात्मनो भोगार्थं बुद्धिर्ज्ञानपरिणत्या भोग्यरूपेति निमित्ततया कर्तोक्तः; तथा पूर्वभुक्त इच्छोत्पत्तेर्भिन्नात्मसिद्धिः। बौद्धमते हि क्षणिकेषु विज्ञानरूपवेदनासंज्ञासंस्कारस्कन्धेषु पूर्वभोक्तुः परभोक्तुर्भेदात् पूर्वभुक्तिः पूर्वापरक्षणस्थं विना नेति स्कन्धाधिकसिद्धिः। तथा स्मृतिरिच्छावदनुभूतविषयेति[1] ततोऽप्यक्षणिकात्मसिद्धिः। परबोधनार्थं चेदं युक्तित्रयम्; अनुभवादेवात्म-

पगतमेव। जलादिप्रतिबिंबस्थार्कतुल्यो ह्यात्मा देहान्तःस्थाचेतनान्तःकरणात्मकबुद्धिमिश्र एव व्यवहारगोचरस्तैरुपेयते। तेन जलचलनेऽर्कचलनवत्तद्विकारादेवात्मनः सर्वविकारभानम्। निर्विकारप्रकाशमात्रं स्वाभाविकं रूपम्। तस्य तु तद्विकारोत्पत्तिनाशारोपनिमित्तं नानात्वम्। तदागमापायदर्शितया प्रकाशस्वरूपानुवृत्त्यनवभासादुत्पत्त्यादिशून्यत्वभानमव्यक्तत्वादसत्कल्पमिति वस्तुतः साक्ष्यवस्थाशेषदृश्यदर्शिप्रकाशमात्ररूपोऽप्यात्मा विकारिबुद्ध्यैक्यभ्रान्त्या विकारीव भासते तद्गुणप्रकाशः। तद्दर्शित्वमेव कर्तृत्वं तात्त्विकमिति तदर्थैव बुद्धेर्ज्ञानपरिणतिरिति तन्निमित्तत्वमात्रेणात्मा कर्तेति कर्तृतयापि तत्सिद्धिरविरुद्धैवेत्यर्थः। पूर्वानुभूतनियतविषयेच्छोत्पत्तिश्च व्यतिरिक्तात्मसाधिकेत्याह—तथा पूर्वभुक्त इच्छोत्पत्तेरिति। प्रकाशस्वभावक्षणिकज्ञानमात्रं सर्वव्यवहारास्पदभूतं तत्त्वम्। तच्च मानमेयमितिसंज्ञासंस्कारात्मकस्वशाखाभूतानृतव्याप्त्या तदास्पदम्। सर्वं चैतत्क्षणध्वंसीति बौद्धमतम्। ततस्तन्मते पूर्वभोक्तुः सपरिकरस्य लेशमात्रमप्युत्तरभोक्त्रनुगामि नास्ति, देवदत्तयज्ञदत्तयोरिवात्यन्तिकभेदस्याभ्युपेतत्वात्। तेनान्यभुक्तेऽन्यस्य तद्वदेवेच्छोत्पत्त्ययोगात्तदन्यात्मसिद्धिरित्यर्थः। स्मृतिरप्येवमेव तत्प्रमाणमित्याह—तथा स्मृतिरिति। ननूक्तान्यथानुपपत्तिगम्य आत्मा अनुमेयः स्यात्, सांख्यमते तदनुपगमात् कथं तदुक्त्युपपत्तिः? व्याप्तिमूला चान्यथानुपपत्तिः, व्याप्तिश्च प्रत्यक्षं विना गृहीतुमशक्येति दृष्टत्वात् स्कन्धाधिकात्माभावेऽपि नानुपपन्नमिति वक्तुं शक्यमिति कथं तदुक्तिर्नैयेत्यत्राह—परबोधनार्थं चेदमिति। यथोक्तसाक्ष्यनुभवादेव स्वरूपसिद्धिरिष्टा, विप्रतिपन्नं प्रति तन्निवृत्त्यर्थमिदं युक्तित्रयम्; तन्निवृत्तौ

१. भूतिविषयेति. क.

सिद्धिः । तन्न, बौद्धयुक्तिभिरनुभव एवानुभूयते । इच्छास्मृती चैकसन्ततिजे एव दृष्टे; जानातीत्यधिकाभिमान इत्यात्मशून्याः स्कन्धाः । ब्राह्मणमपि "विज्ञानघन एव" इत्याद्यनुगुणं भूतचैतन्ये । विज्ञानचैतन्यमुपेत्योक्तम्; भूतचैतन्यमेवोपसंहृतम् । जानातीच्छास्मृतीनां भूतचैतन्ये युक्ततरता व्यक्तैव ॥

राद्धान्तस्तु अमिश्रितेदंप्रत्ययात् 'अहम्' इति प्रत्यक्षाद्देहादिभिन्नात्मसिद्धिः ।

तस्याप्यात्मसिद्धिः साक्ष्यनुभवविवेकाधीनैवेत्यर्थः । नन्वेवमनुभवबलात्स्यादेव तत्सिद्धिः, केनाभिप्रायेण भाष्येऽनुपपत्त्यभावेन तदसिद्धिरुक्तेत्याशङ्क्य तदभिप्रायमाह—तन्न बौद्धयुक्तिभिरिति । क्वचिदनुभवव्यतिरिक्तविषयाभ्युपगमे स्यात्स्कन्धाधिकात्माभावेऽप्यनुपपत्तिः, क्वचिदपि तदनुपगमान्नानुपपत्तिः । तेनानुभवबलात् तत्सिद्धिरित्ययुक्तम् । इच्छास्मृत्योः सन्ततिभेदेऽनुपपत्तावपि सन्तत्यैक्ये दृष्टत्वान्नानुपपत्तिः । कर्तृनिर्देशश्चात्र भ्रान्त्याप्युपपन्न इति भाष्याभिप्राय इत्यर्थः । यथाभाष्यं ब्राह्मणमुखेन भूतचैतन्यमेवोपसंहरति—ब्राह्मणमपीति । तदुपसंहारः पूर्वोक्तविज्ञानचैतन्यस्य अतत्परत्वे हेतुर्द्रष्टव्य इत्याह—विज्ञानचैतन्यमुपेत्येति ॥

राद्धान्तभाष्याभिप्रायमाह — राद्धान्तस्तु अमिश्रितेदंप्रत्ययादिति । यदि प्रत्यक्षव्यतिरिक्तप्रमाणबलमाश्रित्य देहादिभिन्नात्मसिद्धिं वदेम तदा भूतचैतन्यवादिनेत्थमुपालभ्येमहि, 'अहम्' इतिप्रत्यक्षबलात्तूच्यते । न चैतद्देहविषयमिति शङ्कनीयम्, देहस्येदंप्रत्ययविषयत्वाविवादादहंप्रत्ययस्य चातद्विषयत्वनियमात् । धीकर्म हीदमाकारमवभासते, तत्कर्ता तु 'अहम्' इति; तयोश्चान्योन्यव्यावृत्तत्वात् । न चैकत्र कर्तुरन्यत्र कर्मत्वसम्भवादविरोधः, दृष्टृन्तरदृश्यत्वे ह्येवमविरोधः स्यात्, तदभावात्त्वकर्मतयैवात्मभानमिति नास्त्येवेदन्तामिश्रणमहंधीस्थस्येति देहविषयत्वशङ्का तद्विवेकाग्रहशक्तिमूलैवेत्यर्थः । नन्वहधीस्थस्येदन्ताभिश्रणानर्हतोक्तिरेवाविवेकमूला यथा हि 'अयं घटः' 'अयं पटः' इति तत्तदर्थभानं पृथक्पृथक्प्रसिद्धम्, तथा 'अयमहम्' इत्यपि तत्सामग्र्यपेक्षमात्मभानमिति कर्मतयैवात्मा भाति; सत्यपि वास्तवे स्वस्य कर्तृत्वे तेन भानावस्थापेक्षया देहस्याप्यविरुद्धमात्मत्वमित्याशङ्क्य भानाविवेकमूलेयमाशङ्का, कर्तृशून्यसंविद्वादिनोऽपि

'अहम्' इति कर्तृतया संविदः प्रतिभानं च बौद्धस्यापि भ्रमतया मतम्, संविदाकारनिवेशात्; तद्विज्ञानवादे निरस्तमिति न भ्रमः। संविच्च धात्वर्थत्वात् क्रिया, क्रियार्थस्यैव धातुसंज्ञित्वादिति वेद्यज्ञानात्मककर्मकरणभिन्नार्थप्रत्यभिज्ञामुखेन नैरात्म्यं निरस्तम्। क्षणिकत्वे हि संविद्रूपक्रियायोगिता न स्यात्; 'अहम्' इति भिन्नकर्तृभ्रम एव स्यात्। इदंधीविषये तु देहादौ गौणाहंपदानुविद्धा धीः, अहंमात्रानुविद्धं द्राक् धीस्थं मुख्यम्। एवं सप्रत्यभिज्ञानात् स्थिरस्य नित्यतां प्रसाध्य स्वमधिकं निश्चित्य भाष्यकृत्

तन्निरासार्थं तद्विवेकात्संवित्कर्तृतयैवाहंभानमिति संमतमेवेत्याह—अहमिति कर्तृतयेति। वेत्तृशून्यवेद्यभानशङ्कया हीदमाशङ्कनीयम्, तत्तु ग्रन्थगत्युक्त्यनन्तरं निरस्यते, बौद्धसंमतिमात्रापेक्षया ग्रन्थगतिरिदानीं प्रदर्श्यते, कृत्स्नस्यापि धीस्थाकारस्य संविदनन्यतया योऽयमात्मापलापः, स प्रागेव बाह्यार्थसमर्थनन्यायनिरस्त इत्यात्मस्वरूपमपि देहाद्यन्यतया धीबलसिद्धमेवेत्यर्थः। नन्वेवमप्यन्यकर्मकसंवित्कर्तृभानप्रदर्शनार्थम् 'अहमिदं पश्यामि' इत्येवंरूपमात्मभानमुपन्यसनीयं स्वरूपाक्षेपपरिहारार्थम्, किमर्थोऽयम् "अन्येद्युर्दृष्टे" इत्यादिना प्रत्यभिज्ञोपन्यास इत्याशङ्क्य संवित्कर्तृत्वोपयोगेनेति वक्तुं संविदः क्रियात्वं तावदाह—संविच्चधात्वर्थत्वादिति। तमेवोपयोगं क्रियात्वोपजीविनमाह— इति वेद्यज्ञानात्मकेति। क्रियावाचिधातूत्पन्नकर्तृप्रत्ययार्थसंवित्कर्तृधीबललभ्य एव तत्कर्मकरणदेहेन्द्रियव्यतिरेकं कर्तृतोपयोगि प्रत्यभिज्ञोपस्थाप्यं स्थायित्वम्; बौद्धोपपादितक्षणिकत्वबाधकानुक्तौ हि प्रस्तुततन्मतप्राप्तक्रियातदाश्रयत्वभङ्गात्कर्तृत्वासिद्धेः प्रत्यभिज्ञापि प्रमाणोक्त्युपजीविन्येवेत्यर्थः। ननु 'अहं स्थूलः' 'अहं कृशः' 'अहं गच्छामि' इत्यादिव्यवहारप्रसिद्धेः कथमहंधीरमिश्रितेदंप्रत्ययेत्यत्राह—इदंधीविषये त्विति। सकृत्कर्तृकर्मत्वविरोधात् समावेशासम्भवनिश्चये पदवृत्तिमात्रं गौणमस्तु; देहाद्युपस्थापकात् प्राक् तदुपस्थापकार्थधीरप्यहंधीग्रस्तैवेति वक्ष्यत इति सैव विविक्तात्मविषयोपेया, कालभेदानवमर्शादविवेकिनां मिश्रणभ्रममात्रमित्यभिप्रायः। ननु कृतसमाधानोपक्रान्तशेषानुष्ठानप्रवृत्त्यनुमेयत्वमप्यात्मन उपगच्छतो भाष्यकारस्य तद्विरुद्धमकर्मत्वाभिप्रायोन्नयनमित्याशङ्क्य विरोधपरिहारार्थं तदभिप्रायमाह—एवं सप्रत्यभिज्ञानादिति। स्थिरत्वान्तात्मसिद्धिः मानबलायातेति तदुक्त्य-

परार्थं शास्त्रमित्येवं परबोधनार्थमनुमामाह। 'अहम्' 'मम' इति देहाद्भिन्नधीरिति भ्रम इति भूतचैतन्यवादिनो ब्रह्मविदश्च तदर्द्धकृतसमापनादिचेष्टयाभिन्नधियमनुमायाविपर्ययान्न भ्रम इत्याह; न तु चेष्टया भोक्तृरूपधीः, तद्रूपस्याप्रमेयत्वात्। स्वसंवेद्यमपि सुखादि परगतं भ्रूभङ्गादिकार्यानुमेयम्, मेयत्वात्; अहंशब्दात् भिन्नधीः परबोधनार्था। परस्याहंशब्दः साक्षा-

न्तरमेवानुमानं वाच्यं स्यात्. तदपि स्वरूपासाधकतया विवक्षितं चेत्; न तु तथोक्तम्, तदनन्तरं हि तदेव "अशीर्यो न हि शीर्यते" इति श्रुतिसंवादेन दृढीकृत्य "अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा" इत्यादिश्रुतिमुखेन तस्य नित्यता प्रसाधिता। एवं स्वात्मविषयं यत्नं समाप्य पुनः परप्रतीतिमात्रार्थमनुमानमुपन्यस्तम्, नात्मसाधकतयेति न कर्मतापादकं तदित्यर्थः। नन्वनुमानस्य तदसाधकत्वे परप्रतीत्यर्थता न स्यात्, परस्यापि तत्समर्थाहंधीमात्रबोध्यत्वादित्याशङ्क्य परविप्रतिपत्तिमूलसंशयनिरासेन मन्दधीबुद्धिदार्ढ्यापादकतया स्यादेवेत्याह — अहंममेति देहाद् भिन्नधीरिति। अहंधियो देहव्यतिरिक्तविषयत्वं भ्रमारोपितमिति परोक्तिप्रसक्तं तत्त्वन्नेति परधियोऽपि तद्विषयत्वानुमानेनाह भाष्यकार इत्यतद्विषयमप्युपयोग्येवानुमानमित्यर्थः। कुतस्तद्विषयत्वं स्वतः प्राप्तमनुपेत्यान्यथा व्याख्यायत इत्यत्राह—न तु चेष्टया भोक्तृरूपधीरिति। तत्प्रमाणोक्ताहंधीविषयसाधकत्वसम्भवे हि तदुपेयम्, तदभावाद्युक्तमेवोक्तमित्यर्थः। नन्वनुकूलस्वभावावभासिनः सुखस्य प्रत्यक्षत्वनियमेऽपि परसुखस्यानुमेयतोपगमवत् परात्मनोऽप्यनुमेयत्वमविरुद्धमित्याशङ्क्य विशेषमाह—स्वसंवेद्यमपि सुखादीति। तत्रानुकूलादिरूपाभानेऽपि मेयत्वरूपस्य प्रत्यक्षावस्थानुवर्तित्वात् कार्यानुमानमपि तद्रूपेण तद्विषयनार्हमेव. इह प्रत्यक्षावस्थानुगतरूपाभावात्तदेकविषयतानर्हमनुमानमित्यर्थः। नन्वनुमानोक्तेर्भ्रमशङ्कापोहार्थतया परप्रतिपत्त्यर्थत्वं परस्य स्वरूपसिद्धिपूर्वकमुपेयम्, किं तत्साधकमभिप्रेत्य तदपोहार्थतोच्यते, न तावत्स्वनिश्चयहेतूक्ताहंधीरेवेति वाच्यम्; सापि ह्यहंशब्दानुविद्धोक्ता भिन्नेति तन्निषेधस्तर्ह्यनर्थक इत्याशङ्क्य तद्भ्रमापनयेनार्थवानित्याह — परस्याहंशब्द इति। नन्वकर्मतार्थमहंधीमात्रगोचरत्वे भाष्यार्थे इष्टे "विज्ञानमपास्य तन्निदर्श्यतम्" इत्युक्ताक्षेपभाष्यमसम्बद्धार्थं स्यात्;

द्भिन्नधीहेतुरिति भ्रमः; तमपनेतुम् "न वयमहंशब्दम्" इत्यादिभाष्यम्। अहंधीरेव शब्दद्वारोच्यते विज्ञानमपास्येति भाष्यार्थः। अहंधीमेयत्वे मेयान्तरे ज्ञानज्ञानान्तरमनिच्छता ज्ञानज्ञानानपेक्षाहंधीर्वाच्येति परं प्रत्यपि ज्ञानमपास्य कथ्यताम्। उत्तरं तु स्वसंवेद्यतया; मेयत्वे हि कर्मकर्तृतादिदोषः; मेयान्तरधीषु च भानम्; न ज्ञानं विना कथनम्। ज्ञानाकारता तु निरस्ता, ज्ञानस्यानुमेयत्वात्। अनीलाद्याकारापि संवित् प्रत्यक्षेत्यप्युक्तम्। पुनश्च भाष्यम् "विज्ञानमपास्य" इति; न तत्पुनरुक्तम्; अधिकेयं शङ्का—धीज्ञानयोरेकतां मत्वा यद्यर्थधीष्वात्मभानं धीप्रत्यक्षतानुज्ञानात् ज्ञानप्रत्यक्षता इत्यात्माकारो ज्ञान एवेति तद-

स्वरूपोपस्थापकाहंधियोऽनपास्यत्वादन्यस्याप्रसक्तत्वादित्यर्थान्तरपरमेव भाष्यमित्याशङ्क्य आक्षेपघटनमाह—विज्ञानमपास्येति भाष्यार्थ इति। अकर्मतयैवाहंधीगोचरत्व आत्मनोऽङ्गीक्रियमाणे वस्त्वन्तरविलक्षण एवात्मा प्रकाशत इत्याश्रितं स्यात्; ततश्च कर्तृकरणशून्य एव स प्रकाशते, कर्त्रन्तरानुपगमात् करणस्य च तत्प्रवर्त्यस्य तन्निवृत्त्यैव निवृत्तिसिद्धेः। ततश्चात्मप्रकाशरूपाहंधीर्बाह्यप्रकाशवत् स्वतन्त्रैवाकर्तृतन्त्रास्यात्; कर्तृत्वे कर्मत्वस्याप्यवर्जनीयत्वात् तदनुपगमेऽहंधीरेव पुरुषान्तरं प्रत्यपि स्वविषयोपनेत्री स्यादित्यापादनरूपोऽयमाक्षेप इत्यर्थः। कथं तर्हि स्वसंवेद्यतया तन्निरास इत्यत्राह—उत्तरं त्विति। यदि बाह्यार्थभानहीनाहंधीः पृथग्भूतात्मनि मानतयेष्टा स्यात्, तदा मेयत्वस्यापरिहार्यतया कर्मकर्तृतापत्तिः तदापादितविकल्पमात्रतया मिथ्यात्वं देहाद्यनन्यत्वं वा स्यात्; अनात्मकर्मकधीषु तत्कर्तृतयैवात्मा भातीत्युच्यत इति कर्तृकरणशून्यतया अतिप्रसङ्गापादनमनवकाशम्। न च ज्ञानापेक्षामात्रेण बौद्धोक्ततदाकारमात्रतात्मनः, ज्ञानस्य प्रत्यक्षत्वानुपगमात् प्रत्यक्षोपगतसंविदस्त्वाकारानपेक्षत्वात्। तेन स्वसंवेद्यतयोत्तरमपि घटत इत्यर्थः। नन्वेवमुक्तेऽप्युत्तरे पुनश्च यदुच्यते "विज्ञानमपास्य तन्निदर्श्यताम्" इति तदुपन्यासो न घटत इत्याशङ्क्य तद्घटनं चाह—पुनश्च भाष्यमिति। बौद्धमते प्रमाणफलयोरेकतोपगमात् फलस्य प्रत्यक्षत्वोपगमेनैव ज्ञानस्यापि प्रत्यक्षतापादनेन प्रत्यक्षात्माकारस्तद्गत एव स्यादित्युक्तोत्तरासमाप्तिशङ्कयाक्षेपोपन्यास इत्यर्थः। कथं

१. भानान्न ज्ञानम्. ख. २. न तत्प्रत्युक्तम्. क. ख.

पास्य नात्मा दर्शयितुं शक्यः। उत्तरं तु "यद्युपायमेव" इति भाष्यम्। अस्यार्थः—उक्तं शून्ये, ग्राह्याकारा धीर्न ग्राहकभूतज्ञानाकारेति; अनाकारं ज्ञानमनुमेयम्, धीस्तु स्वरूपतः प्रत्यक्षेति भेदः। आत्ममनोयोगो ज्ञानमुपायमात्रमर्थधियः। तथाप्युपायमपास्येत्युक्तम्, तच्छक्योपेयधीः यथा शुक्लतां विना न शुक्लधीः। यद्यपि शुक्लता धीस्योपायः, तथाप्युपायत्वमात्रात्साम्यम्। शून्ये प्रत्युक्तमपि ज्ञानप्रत्यक्षत्वमुपेत्यात्मसिद्धिं वक्तुमुक्तम्। साकारमपि ज्ञानं ज्ञेयप्रवणं ज्ञेयाकारमेव वाच्यम्, न ज्ञात्राकारमित्यात्मसिद्धिः। उपमापि भाष्ये कथनोपायवाक्याभिप्राया, न मानान्तररूपा। प्रत्यभिज्ञया च मातृस्थैर्ये शब्दादिविषयस्थैर्यमपीति शब्दाधिकरणसमीपोक्तावुपयोगः। मातृक्षणिकत्वे तु नार्थस्यानेकक्षणानुवृत्त्यनुभूतिः स्यात्। 'प्रत्यगात्मन्यहम्' इति भाष्यम्। तस्यार्थः—भोक्ता हि साध्यः, प्रत्यगात्मनि भोग-

तद्धुपायप्रतिषेधापादनेनोत्तरोपपत्तिरित्याशङ्क्य तदुपपत्तिमाह — उत्तरं त्विति। स्वाकारेण प्रकाशस्वभावसंविदवच्छेदकत्वं ह्यप्रकाशस्वभावार्थस्य प्रत्यक्षत्वम्; ग्राह्यस्यैव तत्, न संविज्जनकज्ञानस्येत्यनुमेयं तदित्यनाकारमिति न तत्स्थः प्रत्यक्षभूत आत्माकारः, ज्ञानं त्वनाविर्भूतस्वाकारमुपायमात्रम्, तदप्यपास्येति तु न वाच्यम्, असम्भवादित्यर्थः। कथं तर्हि ज्ञात्रवस्थात्मभाने ज्ञानस्यापि प्रत्यक्षत्वमङ्गीकृतं भाष्यकारेणेत्याशङ्क्य तदभिप्रायमाह—शून्ये प्रत्युक्तमपीति। ज्ञानस्य प्रत्यक्षत्वेन सत्यामप्याकारापेक्षायां ज्ञेयप्रवणत्वाज्ज्ञेयाकारेणैव साकारमुपेयम्, न ज्ञात्राकारेणेत्यकर्मोपस्थापकाहंधियात्मसिद्धिदार्ढ्यमनेन दर्शितमित्यर्थः। ननूपमाज्ञाप्यताङ्गीकाराज्ज्ञेयतात्मनोऽप्यङ्गीकृतेति गम्यत इत्याशङ्क्य अनन्यानुगतात्मोपदर्शकपरवर्त्यहंधीरेव स्वधीविपर्यासशङ्काहानाय येन वाक्येन प्रदर्श्यते, तद्वाक्यमुपमानपदेनोच्यत इत्यज्ञेयत्वपरतोक्त्या परिहरति—उपमापि भाष्य इति। एवमाद्यभाष्यस्याकर्मात्मोपस्थापकाहंधीपरत्वाविरोधित्वमुत्तरभाष्याणामुपदर्श्य प्रत्यभिज्ञोक्तेः प्रयोजनान्तरमप्यस्तीत्याह—प्रत्यभिज्ञया चेति। "प्रत्यगात्मनि" इत्यनन्तरभाष्योक्तमनूद्य व्यावर्त्याप्रतीतेरानर्थक्यशङ्काहानाय व्याचष्टे—अस्यार्थ इति। संवेत्ता ह्यत्र वादे साध्यः;

१. Omitted मात्र. क.
२. क्योपायधीः. क. ख.
३. आत्मसिद्धिः. क.
४. Omitted. र्ये शब्दादि विषयस्थै. ख.
५. वृत्तिः. क. } वृत्त्यानु. ख.
६. अस्यार्थः. व्याख्या.

दर्शनात्; तत्रैवाहमिति। ब्राह्मणं तु भूतचैतन्यं निरस्याविनाशित्वमात्मन आह॥

अत्रेदं सारम्—सर्वार्थधीषु 'अहम्' इति भानमास्थेयम्; ज्ञातृशून्ये हि ज्ञेये भाते 'मयेदं विदितम्' इत्येवं धीर्न स्यात्; तदा च स्वपरवेद्ययोरनतिशयः। अयं भावः—स्ववेद्यपरवेद्ये अन्योन्यं विलक्षणस्वरूपे विलक्षणफले च, स्ववेद्ये स्वव्यवहारात् परवेद्ये परव्यवहारात्। न च वेद्यभाताभातयोः स्वपरयोर्वेद्यरूपे वैलक्षण्यापादकता; न च वेद्यभाताभातयोर्वेद्ये व्यवहर्तृत्वम्, अभातस्य व्यवहारानन्तर्भावात्; वित्त्यन्तराद्भानोपगमे चानित्यत्वात्

'यजमानः स्वर्गं लोकं याति' इति कर्तुः फलित्वश्रुतेः, अहंव्यवहारप्रसिद्धेः प्रयोगव्यापारदर्शनाच्च देहस्य कर्तृत्वप्रसङ्गाद्बाधितार्थत्वशङ्काहानार्थं शास्त्रार्थवेत्तुरधिकृतस्य कर्तृत्वमित्येतत्सिद्धये व्यवहारप्रसक्तरूपव्यावृत्त्या वेत्रात्मेह साध्यः, ततश्च वेद्यात्मकपराग्भूतदेहादिविपरीताकारावभासप्रत्यगात्मनियतसंविद्भानात्तन्नियताहंप्रत्ययव्यवस्थापकतया पूर्वभाष्यविवक्षितार्थाभिव्यक्त्यार्थवदेवेत्यर्थः। पूर्वपक्ष्युक्तश्रुतिपरिहारः पूर्वपक्षसिद्धान्तवाक्यवृत्त्याश्रयणेन तदुत्तरवाक्योक्त इत्याह— ब्राह्मणं तु भूतचैतन्यं निरस्येति। इदानीमात्मनः प्रमेयत्वनिवृत्तिनिदानभूतं सर्वार्थधीनिष्ठभाननियमं ग्रन्थस्थमाह—अत्रेदं सारमिति। ननु वेत्तुरभानेऽपि तत्समवायादेवान्यवेद्यवैलक्षण्यं वस्तुतोऽस्त्येव, प्रातीतिकं तु तद्भासिप्रतीत्यन्तरापेक्षमस्त्विति कथमनतिशयोक्तिरित्याशङ्क्याभिप्रायमाह—अयं भाव इति। भासमानस्वभावविर्त्ति प्रत्युपरज्योपरञ्जकत्वमेव तावत्तच्छून्यावस्थाव्युदास्यर्थस्य वेद्यत्वमिति प्रागेव स्थापितम्। तत्र वेत्तुस्तदन्तर्भावाभावे 'विदितमिदं केन'? इति सन्देहाहं तद्रूपमवभासेत, न तु तथा भासत इति प्रतिपुरुषनियतस्वरूपमेव वेद्यावस्थमर्थजातं प्रसिद्धं नियतफलं च; न तद्धीसमवायित्वमात्रकृतम्, विशिष्टावस्थापादनस्य व्यवहारगोचरत्वस्य च भाननियतत्वात्, वित्त्यन्तरापेक्षत्वे च तदसिद्धेः कदाचित्तदभावप्रसङ्गात् तन्नित्यत्वस्य चानुभवसिद्धत्वात् सर्वधीस्थतैव वेत्तुरुपेयेत्यर्थः। वित्त्यन्तराद्भानोपगमे चेति आत्मनो वित्त्यन्तरवेद्यतोक्तिरसदभ्युपगममात्रेणानित्यत्वदोषोक्त्यर्थैव। वस्तुतस्तु स्वकर्मकवित्तौ स्वस्य कर्तृत्वासम्भवात् तदवभासमानात्म-

१. त्वादात्मनः. क.
२. Omitted स्वपरयोः. क.
३. वैलक्षण्यपहता. ख.
४. भानोपमे. क.

वित्त्यन्तरस्य नित्यं वैलक्षण्यद्वयं न स्यात्। वित्त्यन्तरं चेत् स्वपरवेद्यभेदकम्, वेत्तृता न स्यादिति वस्तुतोऽपि धीसमवायो दुःसाधः। न च वस्तुतो धीसमवायात् स्ववेद्यता; न हि यस्य दीपेन यत्प्रकाश्यं तत्तस्यैव वेद्यं दृष्टम्; कर्मत्वकर्तृत्वयोरेकस्यैकस्यां क्रियायां चासम्भवः; परस्था क्रियाफलवत्ता हि कर्मता, न तथा कर्तृतेति। विवक्षया च न वस्तुसिद्धिः। यद्वीरेणोक्तम्—यथा 'अहम्'इत्यभाने तत्सम्बन्धितयार्थो न भासेत, एवं स्वपरभानभेदो न स्यादिति, तस्याप्युक्तविधैव। प्रत्यक्षश्चायमहंधीभातः, साक्षज्ञानात्। तेनांशेन धियां प्रत्यक्षत्वेऽपि वेद्यांशेनानुमादिव्यवस्था; वेद्यभूतकर्मप्रवणा हि गुणकर्मभूता धीर्वेद्यभेदात् भिन्ना; बुद्धीन्द्रियदेहान्यता चाहंधीत एव। ज्ञेयज्ञानरूपा

नोऽर्थवित्तिसमवायित्वसिद्धिरपि न स्यादित्याह-वित्त्यन्तरं चेदिति। वेत्तुर्धीस्थतया वेद्यावस्थोपरञ्जकत्वानुपगमेन धीसमवायित्वमात्रोपगमे धीस्वभावप्रकाशितार्थस्य प्रकाश्यावस्थया सर्वसाधारण्यमहेयमित्याह—न च वस्तुतो धीसमवायादिति। ननु कर्मणोऽपि कर्तृत्वं व्यवहारप्रसिद्धं शाब्दस्मृतिसङ्गृहीतं चेति कथं वेत्तृता न स्यादित्युच्यत इत्याशङ्क्य तदसम्भवमुपपादयति—कर्मत्वकर्तृत्वयोरिति। धात्वर्थक्रियाश्रयः कर्ता, परस्थक्रियाफलवत्कर्मेति नैकस्य द्विरूपतोपपद्यते। विवक्षामात्रेण लोके व्यवहारः। न च विवक्षामात्रेण वस्तुसिद्धिरित्यकर्मतैवेत्यर्थः। नन्वर्थवित्त्यगोचरत्वे वेत्तुर्वेद्यत्वव्यवस्थानुपपत्त्यतिरेकेण भानव्यवस्थानुपपत्तिः परेणोक्ता, सा ग्राह्या चेत्तन्निदानं वाच्यम्, न चेद्दूषणम्, इत्याशङ्क्योक्तमेव तन्निदानमित्याह—यद्वीरेणोक्तमिति। समवायव्यवस्थायां सत्यामपि समवायस्याव्यवस्थापकत्वोक्त्या वेद्यत्वाव्यवस्थैवेत्थमुपपादितेत्यर्थः। नन्वहंधीः प्रत्यक्षादिषु क्रान्तर्भूता आत्मनि प्रमाणमित्यत्राह—प्रत्यक्षश्चायमिति। न चैतावता मानभेदासिद्धिरपीत्याह—तेनांशेनेति। ननु धीस्वभावप्राप्ते कर्मप्रवणत्वे काचिदपि धीर्नात्मनि स्वतन्त्रेति देहादिभ्यो भेदधीरपि न स्यात्, 'इदमस्माद्भिन्नम्' इति स्वतन्त्रधीग्राह्यत्वाद्भेदस्येत्यत्राह—बुद्धीन्द्रियदेहान्यता चेति। मेयोपसर्जनात्मभासिन्यप्यहंधीरेव भेदग्राहिणी, न भेदभानार्थं स्वतन्त्रमेव भानान्तरमाश्रीयते, यतः कर्मकर्तृत्वाविरोधाङ्गीकारः स्यादित्यर्थः। कुत इत्यत्राह—ज्ञानज्ञेयरूपा हीति। विलक्षणाकारभानमेव भेदभानम्।

१. स्वेद्यक वेद्यता. क. ख.
२. यस्यात् दी. क.
३. सकर्मकर्तृत्वयोः ख.
४. न तथा न कर्तृ. क.

हि स्कंधाः अहंधीविरुद्धेदंधीग्राह्या नाहमित्यर्हाः। किञ्च देहादिभिन्न एव 'अहं जानामि' इति भाति। न हि कराद्यवयवं वस्तु 'अहम्' इति भाति। एवं च 'अहं गच्छामि' इति गौणेन लाक्षणिकेन वाहंशब्देनानुविद्धा देहधीः; 'ममात्मा' इत्यपि लक्षणया देह एव ममशब्दः; चेतन एवात्मशब्दो मुख्यः। वेद्यासमवेतापि धीर्वेद्यव्यवहारानुगुण्यात् वेद्यस्योच्यते। अहंधिया चात्मा स्वरूपत्वेन भातः सन्नकारणश्च, कारणकल्पने मानाभावात्। अतो नित्यः। अर्थविचय-धीनभानतया सदा न भाति। सर्वगतश्च, सर्वत्र तद्गुणोपलम्भात्, गुणदेश-गतिकल्पने गतेश्चासमवायिकल्पने गौरवापत्तेः। न च सर्वगतत्वे देहाद्बहि-रपि तद्गुणधिया भाव्यमिति वाच्यम्; तद्गुणानामात्ममनःसंप्रयोगज-त्वात् संयोगस्य च द्विष्ठतया मनसि वृत्तेः मनसश्च देहान्तरवस्थितेरसमवायिदेशे च कार्योत्पत्तेर्न वहिस्तद्गुणधीः। न चैवं देहेऽपि गत्यकल्पनम्; तत्र हि

'अहम्' 'इदम्' इति चान्योन्यविलक्षणाकारत्वाद्वेत्तृव्यतिरिक्तस्य सर्वस्येदंधीनिय-तत्वात्तदन्यत्वं व्यक्तमेवेत्यर्थः। प्रातिस्विकरूपनियतभानं च देहादि; तन्नियम-हीनमहंभानमित्यपि भेदसिद्धिरित्याह—किं च देहादिभिन्न एवेति। तत्तद्ग्राह-केन्द्रियादिव्यापाराभावेऽपि सुसूक्ष्मार्थनिमग्नचित्तस्य तद्धीः 'अहं जानामि' इत्येवं-रूपैवेत्युक्तम्, 'कस्यापीदं विदितम्' इत्येतदवसायिधीजन्माप्रसिद्धेः। अतोऽ-नुभवसिद्ध एव भेद इत्यर्थः। ततश्च देहादौ प्रयोगो युक्त इत्याह—एवं चाहं ग-च्छामीतीति। नन्वात्मसमवायित्वेऽर्थधियो वेद्यनिरूप्यत्वायोगाद्वेद्यसमवायितैवेति सैवात्मधीरिति न घटत इत्यत्राह—वेद्यासमवेतापि धीरिति। एतच्च प्रागेवोप-पादितम्। बुद्ध्याद्यन्यत्वसिद्धौ नित्यत्वं विभुत्वं च सुलभमेवेत्याह—अहंधिया चात्मेति। ननु तद्गुणानां प्रादेशिकत्वं गुणिनो विभुत्वविरोधीति शङ्कां निर-स्यति—न च सर्वगतत्व इति। गुणानामपि कार्याणामसमवायिकारणे प्रादेशिके प्रादेशिकत्वं स्यादिति न तद्गुणिनः प्रादेशिकत्वगमकमित्यर्थः। नन्वात्मनो गति-कल्पनादिहानार्थं विभुत्वाश्रयणे देहेऽपि तदापत्तिरित्याशङ्क्य विशेषमाह—न चैवं

१. एवासच्छब्दः. क.
२. चात्मना स्वरूप. ख.
३. Omitted आत्म. क.
४. नायिनो दशे. ख.

सर्वत्र स्थितिः योग्यधीनिवृत्तिबाधिता ; आत्मनि तु न सर्वत्र धीर्योग्या। अग्न्यूर्ध्वज्वलनादौ चादृष्टं निमित्तम् ; अदृष्टवदात्माग्निसंयोगोऽसमवायिकारणम् ; न च निमित्तमपि स्वदेशे कार्यकरमिति देहाद्बहिरूर्ध्वज्वलनादि। न च स्वप्रकाश एवात्मा, एवं तुरीयेऽपि प्रकाशान्मोक्षस्य पुरुषार्थतेति वाच्यम् ; स्वप्रकाशत्वे हि जाग्रत्स्वप्नतुरीयेष्विव सुषुप्तेऽपि प्रकाशापत्तिः। प्रकाशस्वभावो हि न सुष्वापेत्यन्यथा। न च मोक्षस्यापुरुषार्थता ; अर्थविन्युपरमे सन्मात्रतया स्थितिरप्यर्थ्यते विवेकिभिर्विविधदुःखसंभिन्नसुखजिहासया। न च वाच्यम्—विभुश्चेदात्मा सर्वदेहेष्वेक एवास्त्विति। न हि स्वात्मनीव परात्मनि 'अहम्' इति धीः ; किन्तु परात्मनोऽनुमाग्राह्यता, न भोक्तृतया धीरित्यन्यथाभानान्नानात्वे सुखदुःखादिव्यवस्थापि नोपाधेः कल्प्या ; देहेऽपीति।

नन्वग्न्यूर्ध्वज्वलनादेरदृष्टकारणकत्वमभ्युपगतम्, तस्यादृष्टनियतदेशत्वं च नास्तीति; तत्साम्येन बुद्ध्यादेरपि बहिर्वृत्तितापद्येतेत्याशङ्क्य तद्वैषम्यमाह—अग्न्यूर्ध्वज्वलनादाविति। ननु मोक्षचिन्तकाङ्गीकृतं स्वप्रकाशत्वमनादृत्य किमित्यहंधीगोचरत्वमाश्रितमित्याशङ्क्य तदनुपपत्तिमाह—न च स्वप्रकाश एवात्मेति। सुषुप्त्यनुपपत्तिप्रसङ्गात्तन्नाङ्गीक्रियते ; मोक्षस्य तु पुरुषार्थत्वमतितीव्रापरिहरणीयदुःखनिवृत्त्युपायतयैव विवेकिभिरिष्यते अल्पकालानेकविधदुःखग्रस्तबह्वायाससाध्यक्षयिष्णुसुखनिवृत्त्यभ्युपगमेनैवेति स्वप्रकाशत्वानङ्गीकारेऽपि न हानिरित्यर्थः। नन्वात्मनो विभुत्वाश्रयणे नानाभूतः प्रतिक्षेत्रमिति किमित्यङ्गीक्रियते? एकस्यैवाकाशस्य सर्वजीवश्रोत्रत्वमुपाधिभेदमात्रेणेष्यते ; तथा देहाद्युपाधिभेदादेकस्यैव नानाजीवत्वोपपत्तेः नानात्वममानकमिति शङ्कां निरस्यति—न च वाच्यं विभुश्चेदात्मेति। न तावच्छब्दगुणकद्रव्यं शब्देन्द्रियमितिवत् स्वात्मनः परात्मनश्चैकरूप्येण स्वस्वरूपभानमस्ति, परात्मनि 'अहम्' इति भानाभावात्। अहंधीगोचरतया च स्वरूपधीरुक्तेति विलक्षणधीरन्यत्वमेव नयेत्। सुखदुःखादिव्यवस्थोपाधिकल्पनाहानमपीति लाभः। एकत्वस्यानाद्यविद्यातत्कार्यदेहोपाधिनिर्वाह्यसंसारानु-

१. येनोधिता. क.
२. नादौ त्वदृष्टम्. ख.
३. यतोऽर्थविन्युप. ख.
४. °न्नसुखयोर्दुःखतया. ख.

आत्माद्वैते ह्यनाद्यविद्यया देहाद्युपहितः सद्वितीय इव जीवात्मा भाति। अनाद्यविद्यैव संसारः, विद्योदय एव तदस्तमयो मोक्ष इत्यास्थेयम्। न चाद्वैते मानम्। अथ प्रत्यक्षं विधातृ अस्पृष्टान्योन्यभेदमद्वैते मानम्, तन्न; विधात्रपि रूपं रूपतया रसं रसतया विधत्ते, न पुनः सर्वमेकस्वरूपतया; यदि हि यथा रूपे धीधारा तथाभूता यदि रसं रसयतः स्यात्, तदा प्रत्यक्षादद्वैतं स्यात्; न त्वेवं सर्वबोद्धृधीः। यच्च मेयविकल्पात् सामान्यमेवं तत्त्वमित्युक्तम्, तत्सामान्यविशेषवस्तुनोः सम्बद्धयोः 'इह' इति बुद्ध्यभावेऽपि साधित्वाद-

भवाविद्यानिवर्तकविद्यालभ्यतन्निवृत्तिरूपमोक्षाङ्गीकाराधीनत्वात् तदङ्गीकारश्चैकात्म्ये दृढसिद्धे स्यात्, न च तत्र मानमस्तीति तत्कल्पनालाघवमेवाश्रयणीयमित्यर्थः। ननु मानाभावोऽसिद्धः, प्रत्यक्षमेव तत्प्रमाणमिति शङ्कते—अथ प्रत्यक्षं विधातृ-स्पृष्टान्योन्यभेदमिति। व्यावृत्तिपुरःसरत्वात् द्वैतप्रतीतेः व्यावृत्तेश्चाभावरूपत्वान्न प्रत्यक्षग्राह्यतेति सर्वानुगतसन्मात्रग्राहि प्रत्यक्षं स्यात्; तथाप्यात्मत्वासिद्धिरिति न शङ्कनीयम्; 'अहमस्मि' इत्यात्मानुगतत्वात्सत्प्रतीतेः तत्रास्तिबुद्धेरात्मापेक्षत्वादन-पेक्षास्मिधीरेवावशिष्यते, तत्र भ्रान्त्यारोपितरूपान्तरतिरोधानात् 'अस्मि' इत्यनुवृत्त्य-प्रसिद्धिरिति सद्रूपानुवृत्त्यैव सिद्धमिति प्रत्यक्षमेवात्माद्वैतमिति शङ्कार्थः। दूषयति—तन्न विधात्रपि रूपं रूपतयेति। व्यावृत्तिर्हि विशेषणयोगधिया विशेष्यवर्तिन्येव भातीति तत्स्वरूपभेदधीपूर्विकैवेति स्वरूपभेदस्य प्रत्यक्षत्वमनिवार्यम्, अन्यथा धारा-वाहिकरूपधीतुल्यैव रसधीरप्यनुभूयेत; न तु कस्यचिदभ्रान्तस्य तथानुभव इति न प्रत्यक्षत्वमित्यर्थः। यच्च भावरूपस्यापि भेदस्याप्रत्यक्षतार्थं विशेषणविशेष्यतयाभिम-तयोः सामान्यविशेषयोरन्योन्यमन्यानन्यतयानुवृत्तव्यावृत्ततया सम्बन्ध्यसम्बन्धि-तया च मेयत्वायोगादेकस्यैव मेयत्वे सर्वमित्यनुगतं महासामान्यमेव तत्त्वमित्युक्तम्, तच्चायुक्तम्; निर्विकल्पकावस्थायामव्यक्तत्वेऽपि सविकल्पकधिया द्वयोरन्यत्वस्य व्यक्तत्वादर्थनिष्ठसम्बन्धास्फुरणेऽपि नियतबौद्धसम्बन्धभाक्त्वस्य प्रागेवोपपादि-तत्वादिहप्रत्ययनिवृत्तेश्च अर्थनिष्ठसम्बन्धास्फूर्त्यैवोपपत्तेरित्याह — यच्च मेयविक-

१. विधात्रविरूपम्. क. विधतृरूपम्. ख.
२. पे धियातथा. क. प्रेधीधारतथा. ख.
३. ता एव यदि. ख.
४. मेव सत्ताख्यं वस्त्विति सन्मात्रमेव तत्त्व. ख.

युक्तम्। अथागमादेवाद्वैतम्, तन्न; अगमस्य कार्यैकपरस्य सिद्धे तत्त्वे न मानता। किञ्च वाक्यात्मनोऽनेकपदार्थात्मनि वाक्यार्थे धीजननाचतो नाद्वैतम्। अथ "एष नेति नेति" इति सर्वोपाधिनिषेधान्नानावस्त्वन्तरवारणादद्वैतम्, तन्न; यो हि 'एषः' इति सद्रूपतया निर्दिष्टः पदार्थः, सोऽसद्रूपापादकेन नञा सह संबन्धुमयोग्यः अस्ति नास्तीतिवत्। अन्वयायोग्ययोश्च पदार्थयोः न वाक्यार्थीभवनम्। निषेधवाक्यैर्हि नात्यन्तिको निषेधः; किन्तु कचित् कस्यचित्; अद्वैतवादे चात्यन्तनिषेधः; स स्वोक्तिपराहतः। "लब्धरूपे कचित् किञ्चित्तादृगेव निषिध्यते।" इति हि स्वोक्तिः। प्रत्यक्षविरुद्धश्चाद्वैतबोधक आम्नायो न यथाश्रुति युक्तः। यच्च प्रपञ्चेन भाषितम्—"प्रत्यक्षादिविरोधेऽप्याम्नायस्य बलीयस्त्वात् प्रत्यक्षादेर्भ्रान्तता" इति, तन्न; प्रत्यक्षादिविरोधे हि पदानामन्वयायोग्यत्वात् आम्नायार्थाबोधात्। अतः प्रत्यक्षादिविरोधादाम्नाये गौणी लाक्षणिकी वा वृत्तिः। तत्रानन्दश्रुतयः स्वाभाविकदुःखा-

ल्पादिति। ननु श्रुतिप्रसिद्धमद्वैततत्त्वमिति न मानाभाव इति शङ्कते—अथागमादेवेति। दूषयति—तन्नेति। कार्यैकविषयत्वाभावेऽपि स्फोटपक्षानङ्गीकारात् पदार्थान्वयपुरस्सरैव वाक्यार्थधीरिष्टेति द्वैतोपजीविनो वाक्यान्नाद्वैतधीरित्याह—किंच वाक्यात्मन इति। तथापि निषेधमुखप्रवृत्तानि वाक्यानि तत्साधकानीति शङ्कते—अथैष नेति नेतीति। दूषयति—तन्नेति। परस्परान्वयायोग्यत्वान्न तत्परतेत्यर्थः। नन्वेवं सर्वनिषेधवाक्यानुपपत्त्यापत्तिरित्याशङ्क्य अन्येषामुपपत्तिमिहानुपपत्तिं चाह—निषेधवाक्यैर्हीति। प्रत्यक्षविरोधेनान्यार्थतोपेयाद्वैतश्रुतेरित्याह—प्रत्यक्षविरुद्धश्चेति। यदुक्तम्—श्रुतेस्तात्पर्यलिङ्गवत्याः प्रत्यक्षादिबाधेऽपि सामर्थ्यमस्ति, भ्रान्तित्वेनापि तदुत्पत्तेः प्राचुर्येण दर्शनात्तदुचितदोषकल्पनयापि तत्प्राचुर्यस्याङ्गीकारार्हत्वादिति, तदनूद्य दूषयति—यच्च प्रपञ्चेनेति। पदतदर्थतदन्वययोग्यत्वग्राहकतया तदुपजीविनी श्रुतिरेव गौणादिवृत्त्यर्हतयान्यथानेयेत्यर्थः। तदन्यथानयनं विशेषनिष्ठं दर्शयति — तत्रानन्दश्रुतय इति। दुःखाभावमात्रार्थत्वे कथं

१. युक्तम्. क.

२. परामृष्टः. ख.

३. केन नञ्तासह. क.

४. Omitted. परा. क.

भावपराः। लौकिकानन्दाल्पतोक्तिः दुःखानुषङ्गात्। एकत्वश्रुतय एकस्मिन् देह एक एव स्वमीत्येवंपराः। नानात्वनिषेधश्रुतिरनेकदेहग्रहेऽप्येक एवात्मेत्येवंपरा। "एष नेति नेति" इति देहादीनामात्मत्वनिषेधः। विज्ञानश्रुतयश्चिच्छक्तियोगपरा व्योमादिभ्यो भेदफलाः। सर्वात्मश्रुतयः सर्वस्यात्मार्थत्वेनोपचारात्। "आत्मनि ज्ञाते सर्वं ज्ञातम्"इति श्रुतिरात्मज्ञानं परमपुरुषार्थमोक्षफलम्, तदन्यत् सर्वं ज्ञानं कृतार्थमित्येवंपरा इति दिक्। अथ यत् प्रकाशते तत्प्रकाशादभिन्नम्; प्रकाशात्मकं च ब्रह्म, अतो[१] ब्रह्मात्मकं सर्वमित्यद्वैतं ब्रह्म, तन्न; एवं हि नानाभूताकाराणां प्रकाशादभेदे प्रकाशस्यापि नानात्वापत्तेः नाद्वैतम्। अथ विविधोऽयमाकारप्रपञ्चोऽविद्याध्यासात् भाति, तन्न; सदात्मा

लौकिकानन्दस्य ततो न्यूनतोक्तिर्नैयेत्यत्राह — लौकिकानन्दाल्पतोक्तिरिति। एकत्वावधारणश्रुतेर्गतिमाह—एकत्वश्रुतय इति। नानात्वनिषेधश्रुतेस्तदनधिगतार्थत्वमाह—नानात्वनिषेधेति। निषेधश्रुत्यभिप्रायमाह—एष नेति नेतीति। विज्ञानरूपतोक्त्यर्थमाह—विज्ञानश्रुतय इति। सर्वस्यात्मश्रुतिरौपचारिकीत्याह—सर्वात्मश्रुतय इति। आत्मज्ञानमात्रात्सर्वस्य ज्ञातताश्रुतिश्चानात्मनः काल्पनिकत्वं विनापि सदर्थैवेत्याह—आत्मनि ज्ञात इति। एवं श्रुतेः प्रामाण्यमन्यथाप्युपपद्यमानं न स्वमूलप्रत्यक्षादिबाधे समर्थमिति भावः। पुनश्च परोक्तं विधान्तरमाशङ्कते—अथ यत्प्रकाशत इति। ननु यत्प्रकाशत इति प्रकाशकर्तृतोच्यते, प्रकाशादभिन्नमिति तत्क्रियैक्यम्, न च क्वचित्कर्तुः क्रियैक्यं प्रसिद्धमिति केयमाशङ्का? उच्यते—न कर्तृविवक्षया प्रकाशत इत्युच्यते, वित्तेर्हि स्वभाव एव प्रकाशमानत्वम्, अन्यथार्थस्य तदपेक्षया प्रख्यापनिवृत्तिर्न स्यादित्युक्तम्। तेन प्रकाशः प्रकाशमानस्वभाव इति संमतम्; तेन तद्दृष्टान्तेन सर्वस्यापि प्रकाशमानस्य तत्स्वभावतैवेत्युच्यते। न चागन्तुकत्वात्तदवस्थायाः स्वभावत्वानुपपत्तिः, ब्रह्मप्रकाशस्य नित्यत्वात्, तेन तदपेक्षया स्वभावत्वमविरुद्धमेवेत्यभिप्रायः। दूषयति—तन्न एवं हीति। तदभेदे प्रकाशस्यापि तद्धर्मत्वापत्तेरेकत्वोपगमविरोधः, विरुद्धधर्मकयोरैक्यायोगादित्यर्थः। नन्वविद्यारोपितानां नानात्वेऽपि तदधिष्ठानस्य प्रकाशस्य न नानात्वापत्तिरिति शङ्कते—अथ विविधोऽयमिति। परिहरति—तन्न सदात्मा प्रकाश इति। तदुपगमे

१. Omitted अतो ब्रह्म. क.

प्रकाशः तेन सहाभिन्ना असदात्मान आकारा इति स्वमतहतम्; अप्रकाशात्मानस्ते कथं प्रकाशेरन्? किञ्च अप्रकाशात्मन एव प्रकाशः सम्बन्धीति बाह्यार्थसिद्धावुक्तम् । किञ्च अत्यन्तासन्तं प्रपञ्चं कथमविद्यापि दर्शयितुमलम्? न ह्यसत्ख्यातिरविद्या इति शक्यम्; अग्रहरूपा सा इत्युक्तम् । अतो नाविद्यास्तमयो मोक्षः; किन्तु अत्यन्तदेहेन्द्रियोच्छेदः । स च निःशेषसुखदुःखदकर्मक्षयात्तदधिकारानुत्पादाच्च; अनादिदेहसन्ततिसञ्चितोल्पकर्मक्षयो भोगात्, निःशेषक्षयः शमदमब्रह्मचर्याद्यङ्गकेनात्मज्ञानेनापुनरावृत्तये श्रुतेन । आत्मज्ञानविधावपरार्थेऽपुनरावृत्तिफलश्रुतिः नियोज्यविशेषणम् रात्रिसत्रवत् ॥

> बुद्धीन्द्रियशरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः ।
> नानाभूतः प्रतिक्षेत्रमर्थवित्तिषु भासते ॥

ह्यैक्यानुमानोक्तिविरोधः, सत्यानृतयोरन्योन्यैक्यस्य सिद्धान्तविरोधात्, तदैक्यानुपगमे च प्रकाशस्यैव प्रकाशमानतेति नियमोक्तिर्बाधिता स्यादित्यर्थः । प्रकाशसम्बन्धितैवार्थस्य प्रकाशमानत्वम्, व्यक्तत्वादन्यत्वस्य, अन्यथा विशिष्टवित्त्ययोगाच्चेत्यैक्यानुमानं बाधितविषयमित्याह—किंच अप्रकाशात्मन एवेति । एवमनुमानोक्त्यसम्भवमुक्त्वैकात्म्यपक्षनिष्ठमाह—किंचात्यन्तासन्तं प्रपञ्चमिति । अनुभवबलात् तावदर्थस्य सत्त्वमेव प्रसक्तम्, यदि पुनरसदनुभवकरतयाऽविद्या कॢप्तशक्तिः स्यात्, तदा तदाश्रयणेनासत्त्वं शङ्कार्हम्, तदसम्भवस्तूक्त इति मोक्षशास्त्रगतिरप्यविद्यास्तमयापेक्षया न नेयेत्यर्थः । कथं तर्हि नेयेत्यत्राह—किं त्वन्त्यन्तदेहेन्द्रियोच्छेद इति । तस्य गत्यन्तरासम्भवे हि लौकिकप्रमाणतदनुवर्तिकर्मशास्त्रविरोधेनाप्यविद्यानिवृत्तिमात्रपरतोपेया, तत्सम्भवान्न सेत्यर्थः । नन्वत्यन्तदुःखोच्छेदहेतुरन्यो नास्तीत्यत्राह—स च निःशेषेति । नन्वनादिजन्मसन्ततिसञ्चितकर्मक्षयस्तन्निवर्तकभोगादसम्भाव्य इति कस्तत्रोपाय इत्याशङ्क्य ततोऽप्यल्पनिवृत्तिरस्तु, निःशेषनिवृत्तिस्तदर्थचोदितात्मोपासनात् स्यादित्याह—अनादिदेहसन्ततीति । नन्वपुनरावृत्त्युक्तिः स्तुतिपरेति नात्मज्ञानस्य विधेयतोपगम इत्याशङ्क्य नियोज्यविशेषणत्वकल्पनया फलपरताप्यस्येवेत्याह—आत्मज्ञानविधाविति ।

इत्यात्मवादस्थानम्

---

१. दुःखकर्म. क.
२. तात्मकर्म.
३. क्षमः. क. ख.
४. रार्थे. क.
५. Omitted रात्रिसत्रवत्. क.
६. अयं नास्ति. क.

अथ शब्दनित्यताधिकरणम् ॥

"विद्यमानोपलम्भनत्वात्" इति मूलावयवोक्तमानान्तरगम्यार्थत्वमानान्तरविरुद्धार्थत्वे सम्बन्धनित्यताबलादौत्पत्तिकसूत्रोक्ताद्वादद्वयेन निरस्ते। अथ शब्दानित्यतया सम्बन्धानित्यता तत्समाधिश्च मूलैरधिकरणम्। पूर्वपक्षस्तु—उत्पन्नविनाशिनः शब्दस्य न वृद्धव्यवहारात्सम्बन्धग्रहः; किन्तु समयादेवार्थधीः। शब्दत्वजातिनिरासाद्धि न शब्दत्वेन सम्बन्धग्रहः। न च शब्दत्वे विशेषोपहिते शक्तिग्रहः। श्रोत्रग्राह्यत्वोपाधेः सम्बन्धग्रह इति चेन्न। अस्तु तावदुपाधिरेकः; स तु सकलवर्णेष्विति न गौरित्यादिविशेषस्य स्वार्थे

"कर्मैके तत्र दर्शनात् ॥" कथमस्य सङ्गतिद्वयमित्याशङ्क्योपरितनशब्दनित्यतामात्रापेक्षया तदलाभेऽपि पूर्वसूत्रस्थसम्बन्धनित्यताव्यावृत्त्योपयोग्युक्तात्मविवेकानन्तराद्दृसम्बन्धाक्षेपतत्समाधानपरतया सूत्रसङ्गतिलाभ इत्याह—विद्यमानोपलम्भनत्वादितीति। ननु तदुक्तस्य सम्बन्धस्य शब्दानित्यत्वेनाक्षेपो नास्तीत्याशङ्क्य पूर्वपक्षमाह—पूर्वपक्षस्त्विति। वृद्धव्यवहारगृहीतशक्तिमूलार्थधीकरता हि सम्बन्धः, स चानित्यत्वस्य क्षणिकत्वरूपत्वादनुपपन्नः, समयमूलत्वस्याहानादित्यर्थः। ननु व्यक्तिमात्रं क्षणिकम्, तत्स्था जातिर्नित्येति तदवच्छेदेन व्यक्तीनां वा व्यक्त्युपहितजातेरेव वा शक्तिग्रहणसम्भवात् कुतः समयापत्तिरित्याशङ्क्य शब्दत्वजात्यपेक्षया तावदुभयथापि तदूहो न स्यादित्याह—शब्दत्वजातिनिरासाद्धीति। सर्वशब्देषु गवादितुल्यानुवृत्तप्रत्ययप्रसिद्धेः शब्दत्वासिद्धेः न तदपेक्षया तत्सिद्धिरित्यर्थः। ननु जात्यसिद्धावपि शब्दस्यैकनिमित्तप्रवृत्त्युपगमात् तदपेक्षयैव जातिसिद्धाविव सम्बन्धः सुग्रह इति शङ्कते—श्रोत्रग्राह्यत्वोपाधेरिति। दूषयति—अस्तु तावदुपाधिरेक इति। जातिसिद्धौ जातेर्व्यक्तिस्थतया व्यक्तिकार्ये सर्वत्र कारणत्वानपायादस्त्ववच्छेद्यतयावच्छेदकतया वा शक्तिग्रहनिवेशः, उपाधिस्तु बहिष्ठो न शक्ति-

१. विरुद्धत्वे. क.
२. निरासाद्धि. क.
३. शक्तित्वग्रहः. क
४. न तु. क. ख.
५. स्वार्थेन सम्बन्ध. ख.

सम्बन्धग्रहहेतुः । न च क्षणिकगादिव्यक्तिषु गत्वादिजात्या सम्बन्धग्रहः, गत्वादेरेव वा वाचकत्वग्रहः; गत्वादिजात्युपगमाशक्तेः; भेदे भातेऽप्य-भेदधिया जातिसिद्धिः; गादिभेदाभाने त्वभेदधीः बौद्धोक्तयुक्तिहता भेदा-ग्रहव्यवस्थाप्या ज्वालैकत्वधीरिव । एतेन ये ज्वालायां प्रत्यभिज्ञा जाता-वित्याहुः, ते निरस्ताः । न च गादिभेदभानं नरशुकादिवक्तृभेदेऽपि, किन्तु वक्तृमात्रभेदे । अत एवैकस्य पुनर्वक्तृत्वे मनागपि न भेदधीः । नन्वेवं यत्नकृतोऽपि सम्बन्धो गादेरननुवृत्तस्य व्यवहाराङ्गं न स्यात् । तन्न, भिन्नेष्वपि गादिषु भेदाग्रहादभिन्नतामास्थाय समयक्रियाभिप्रायधिया लोकेऽर्थधीरित्येवं व्यवहाराविसंवादात् सफलता यत्नस्य । वेदे तु नाभि-

स्पर्शीति शक्तिमन्नियामकतयैव शक्तिग्रहहेतुरित्यतिव्याप्त्ययत्न हेतुताहे इति भेदान्न साम्यमित्यर्थः । अस्तु तर्हि गादिव्यक्तिस्थगत्वादिजात्यपेक्षया सम्बन्ध-ग्रह इत्याशङ्क्य तज्जात्यसम्भवान्न तदपेक्षयेत्याह—न च क्षणिकगादिव्यक्ति-ष्विति । व्यक्तिभेदद्दष्टिसहभाविन्येवानुवृत्तिधीर्जातिविषयोपेता तद्भेदादर्शने भेदाग्रहमात्रेणापि ज्वालादिषु तद्ग्रहस्य प्रचुरदृष्टत्वान्न मानत्वमित्यर्थः । ज्वालो-दाहरणे मानत्वविप्रतिपत्तिर्युक्तिहतेत्याह—एतेनेति । ननु गादिव्यक्तेर्भेदाग्रहणम-सिद्धमित्याशङ्क्य तत्साधयति—न च गादिभेदभानमिति । वक्तृतद्यत्नभेदा-द्युपाध्यधिकस्वरूपभेदः सूक्ष्मदशामपि न भातीति व्यक्त एव व्यक्तिभेदाग्रह इत्यर्थः । नन्वेवं समयापेक्षयापि व्यवहारानिर्वाहादनित्यतया पूर्वपक्षोऽप्यनुपपन्न एवेति पृच्छति—नन्वेवं यत्नकृतोऽपीति । परिहरति—तन्न भिन्नेष्वपीति । यदि समयकृतसम्बन्धव्यक्तेरेव पुनर्दर्शनादर्थधीः, न व्यक्त्यन्तरदर्शनादिति तत्पक्षेऽपि नियमः स्यात्; तदायं दोषः स्यात्; तत्पक्षे त्वन्यदर्शनादपि स्यात्, भेदाग्रह-निमित्ताभेदाभिमानाश्रयत्वात् समयस्य वक्त्रभिप्रायाविसंवादमात्राच्च लोकोक्ते-रर्थवत्तेति व्यवहारनिर्वाहक एव समयः स्वविषयशब्दस्य पुनः प्रयोगाद्यभावेऽपि इति नोक्तदोष इत्यर्थः । वेदे तु वास्तवसम्बन्धापेक्षो व्यवहार इति तदर्थं नित्यत्वसाधनमित्याह—वेदे तु नाभिप्रायादिति । नन्वेवं सत्यपि शब्दत्वे तस्य

१. मात्रभेदः. क. २. भात्यप्यभेद. क.

प्रायादर्थधीः, वास्तवसम्बन्धादित्यभिधानस्य नित्यत्वं प्रसाध्यम् । न चानित्यत्वेऽपि व्यक्तिकारकादेर्जातिक्रियादिसम्बन्धो यत्नानपेक्ष इति शब्दस्यापि तथास्त्विति वाच्यम् । समावायोऽसावयुतसिद्धयो र्यत्नानपेक्षः, शब्दार्थयोर्न तथा ; तयोर्हि पृथगाश्रयाश्रयित्वं पृथग्गतिश्च युतसिद्धिः । इयं च यथासम्भवम् । एवं चानित्ये शब्दे वाच्यवाचकसम्बन्धो यत्नादेव । न च चक्षुरादेरिवानित्यस्य स्वभावादेव प्रमाजनकत्वं शब्दस्यापि वाच्यम् ।

साधारणत्वादर्थविशेषनियताभिधानशक्तिग्रहायोगाद्वर्णानामनित्यत्वे समयस्यावारणीयत्वात् किमिति प्राक् तदभावादेव समयापत्तिरभ्युपेता? उच्यते—सतोऽपि हि तस्य व्युत्पत्त्यर्थधीकालानुवर्तितया व्युत्पत्तिविषयत्वसिद्धौ नियतार्थधीनियन्तृत्वमात्रमगृहीतभेदवर्णानामपि वर्णक्रमस्यैवास्तु, न तावता समयापत्तिः, तस्याप्यभावे व्युत्पत्तेः कथंचिदप्युपायत्वासिद्धेः समयः सावकाश इत्यभिप्रायः । तदभिप्रायाग्रहणेनानित्यस्यापि लोके यत्नानपेक्षसम्बन्धप्रसिद्धेरभिधानाभिधेयसम्बन्धस्यापि तदनपेक्षत्वमित्याशङ्क्य विषयभेदप्रदर्शनेन परिहरति—न चानित्यत्वेऽपीति । समवायस्यापृथक्सिद्धनियतत्वात् स्वाभाविकत्वसम्भवाद्यत्नानपेक्षत्वं युक्तम्, शब्दार्थयोः पृथक्सिद्धयोः योगस्यान्याधीनत्वनियमाद्रज्जुघटयोरिव यत्नापेक्षः स उपेय इत्यर्थः । पृथक्सिद्धेर्विधाद्वयोक्तिः पृथगाश्रयाश्रयित्वं पृथग्गतिश्चेति योग्यतानुसारेण ग्राह्येत्याश्रितत्वगतिमत्त्वव्यवस्थया तत्सहभावासहभावेन च विषयभेदाद्विवक्षितेत्याह — इयं च यथासम्भवमिति । एवं सम्बन्धान्तरे यत्नानपेक्षे सिद्धेऽपि यत्नजन्यशब्दस्य सम्बन्धोऽपि यत्नापेक्ष एवेत्याह—एवं चानित्ये शब्द इति । ननु विषयप्रमितिजननशक्तिरूपोऽपि सम्बन्धोऽनित्यस्यापि यत्नानपेक्षो दृष्ट इति शब्दस्यापि तथास्त्वित्याशङ्क्य प्रथमश्रुतात्तदनुपपत्तेरन्यापेक्षत्वनियमे यत्नापेक्षैव कल्प्येत्याह—न च चक्षुरादेरिवेति । एवं नित्यतोक्तेरर्थवत्त्वं प्रदर्श्यानित्यत्वसाधकहेतोरुक्तस्य दूषणप्रसङ्गहानार्थं शब्दविशेषस्यैव पक्षत्व-

१. गतिमत्त्वचं युतसिद्धि. क.
२. यत्नादेरिव. क.
३. Omitted न च. क.
४. जननं श. क.

प्रथमश्रुताच्छब्दाद्बुद्धेः सम्बन्धग्रहापेक्षोक्ता। यत्नजता च शब्दस्याभिधानात्मकस्योच्यते, तत्प्रामाण्यप्रतिज्ञया तदधिकारात्। अतो यत्नानन्तरदर्शनादिति हेतोर्न भागासिद्धता; अब्धिघोषादेरतथात्वाद्वाच्या पक्षस्य वा मानान्तरहतिः। न च मूलजलादिनानैकान्तता, पूर्वास्तित्वमानेऽसतीति हेतोर्विशेषणात्। ननु शब्दे विशेषणासिद्धिः, प्रत्यभिज्ञया पूर्वस्थितिमितेः। एवं च पूर्वोऽपि यत्नोऽभिव्यञ्जकः परयत्नवत्। तन्न; विशेषधीपूर्विका ह्यभेदधीः प्रत्यभिज्ञा; भेदाग्रहे तु प्रत्यभिज्ञाभ्रमः। ध्वस्तोत्पन्नयोरन्यतानुमया, न तु साक्षाद्विशेषग्रहादिति ज्वालादिवदप्रत्यभिज्ञैव। यदि हि विशेषाग्रहमात्रं प्रत्यभिज्ञा, कर्मण्यपि सा स्यात्। अथ स्वरूपग्रहे विशेषाग्रहो न कर्मणीति न प्रत्यभिज्ञा, तर्हि ज्वालादेः स्वरूपग्रहे सा स्यात्। अथ स्वरूपग्रहे-

मित्याह—यत्नजता च शब्दस्येति। नन्वेवमपि हेतोर्व्यभिचारदोषोऽपरिहार्य इत्याशङ्क्य विशेषणविवक्षोद्भावनेन परिहरति—न च मूलजलादिनेति। ननु पूर्वस्थितिग्राहिमानाभावरूपविशेषणमसिद्धम्, शब्दे प्रत्यभिज्ञाबलात् पूर्वास्तित्वावगमात्, तेनोत्तरयत्नस्याजनकत्वे सिद्धे प्रथमयत्नस्याप्युत्तरतुल्यत्वेनानुत्पादकत्वे व्यञ्जकत्वापत्तेः सदकारणत्वान्नित्यतैव स्यादिति चोदयति—ननु शब्दे विशेषणासिद्धिरिति। परिहरति—तन्न विशेषधीपूर्विका हीति। स्वरूपभेदे मानसिद्धे तदनुसन्धायिन्येवाभेदधीः प्रत्यभिज्ञात्मकप्रमाणभावार्हा, तदननुसन्धानादियं भ्रान्तिरेव। न च भेदग्राहिप्रत्यक्षाभावादेव मानतासिद्धिः, तदभावेऽपि ज्वालादावनुमयैव भेदाभ्युपगमादिहाप्यनुमानविरोधात् भ्रान्तितेत्यर्थः। विशेषाग्रहमात्रात्मकप्रत्यभिज्ञादिशङ्कया ग्रन्थे कर्मादिनित्यतापत्त्यादिक्रमेणायमेवार्थो दर्शित इति दर्शयति—यदि हि विशेषाग्रहमात्रमित्यादिना। नन्वख्यानादिसिद्धविशेषणविशिष्टयत्नानन्तरदर्शनहेतुसाधितयत्नकार्यत्वे सत्यपि यत्नजघटादेर्व्यवहाराङ्गत्वानपायाच्छब्दस्यापि तत्सम्भवाद्व्यवहारसिद्धशक्तिकस्य मानत्वसिद्धिरित्याशङ्क्य

१. जतापिशब्द. क.
२. वाच्यपक्ष. ख.
३. अनेकान्त्वात् पूर्वास्तित्वामाने. क.
४. Omitted तु. क.
५. कर्मणतीति. क.

ऽप्यनुमया ज्वालाभेदे प्रत्यभिज्ञा भ्रमः, तर्हि शब्देऽप्यस्थानाद्यनुमया भिन्ने प्रत्यभिज्ञा भ्रम इति यत्नात् प्रागस्तित्वासिद्धेर्यत्नानन्तरधिया यत्नजता। न चास्थानं घटादेरिव, येन तद्वद्व्यवहाराङ्गता स्यात्, अपि तु क्षणान्तरास्थानात्। न चोन्मीलितावस्थं चक्षुः क्षणिकमपि रूपधीव्यवहाराङ्गम्, शब्दोऽपि स्वार्थधियोऽङ्गमस्त्विति। उक्तं हि— 'सम्बन्धबुद्ध्यपेक्षाच्छब्दादर्थधीः; न सा क्षणिकात् इति' अस्थानात् समयादेवार्थधीः॥

किञ्च लोके शब्दं कुर्वित्युच्यते; करोतिश्चोत्पादने मुख्य इत्युत्पादनं लोकोऽपि मन्यते। यद्यप्यनेकहेतुप्रयोग एकत्र साध्ये निन्दितो वादेऽपि विशेषतोऽमन्दत्वे हेत्वन्तराणाम्; तथापि मन्दामन्दधीशिक्षार्थे शास्त्रे युक्तः। अन्यथा हि मन्दधियामुक्तेऽप्यमन्दे राद्धान्तहेतौ मन्दामन्दविपक्षहेत्वाच्छादनाशक्तेर्न राद्धान्तधीः स्यादिति सफलावनेकहेतूपन्यासनिरासौ मन्दविषदष्टचिकित्सेवेत्युक्तं द्वितीये भाष्ये। किञ्च नानादेशेषु युगपच्छब्दधीः; सा चैकत्वान्निवृत्ता

अस्थानत्वसामर्थ्येनैव शङ्कां निरस्यति—न चास्थानं घटादेरिवेति। न च क्षणिकत्वेऽपि चक्षुरादिवत्प्रमाजनकत्वसिद्धिः पूर्वसिद्धशक्त्यपेक्षत्वादिति प्रामाण्यानिर्वाहात् समय एवानित्यत्वे गतिरित्याह —न चोन्मीलितावस्थमिति। एवं सूत्रद्वयेनैव पूर्वपक्षं समर्थ्य हेत्वन्तरार्थं तृतीयसूत्रमित्याह—किञ्च लोके शब्दं कुर्वित्युच्यत इति। नन्वनेकहेतूक्तिरयुक्ता अल्पाक्षरनियते सूत्रे, अमन्दत्वे सुतरामिति शङ्कामनूद्य परिहरति—यद्यप्यनेकहेतुप्रयोग इति। निशितधीपुरुषमात्रार्थे सूत्रे स्यादानर्थक्यम्, मन्दामन्दप्रज्ञाध्येत्रर्थं त्विदम्; ततो मन्दहेतुनिरासोऽप्यर्थवान्, तन्निरासाभावे हेतुबहुत्वमात्रधिया मन्दानां प्रामाणिकविपरीतार्थविश्वसापत्तेरिति शास्त्रे मन्दबुद्ध्यधिकारसूचनेनार्थवत्त्वमनेकहेतूक्तिनिरासयोरित्यर्थः। हेत्वन्तरं च यथाग्रन्थमाह — किंच नानादेशेष्विति। तत्राव्यक्तार्थभाष्यव्याख्याद्वारेणार्थोपपाद-

१. शब्देऽप्यनुमयां. क.
२. Omitted स्यात्. क.
३. स्वार्थमङ्गधियः. क.
४. दन लोकेऽपि- क.
५. नानदेशेषु. क.

भेदे स्थिता शब्दभेदे हेतुः । अत्र भाष्यम् "असति विशेषे नित्यस्य नानेकत्वम्" इति । नानेकदेशत्वमित्यर्थः । भाष्यं चेदं शङ्कानिराकारणार्थमित्युक्तम् । गोत्वादेरेकस्याप्यनेकत्र युगपद्धीदृष्टेति न शब्दानेकत्वे लिङ्गमिति शङ्का; निरासस्तु गोत्वादेरप्यसति विशेषस्य देशत्वे नानेकदेशत्वम्; विशेषा एव नानादेशा भान्ति, न गोत्वम्; न हि 'इह गोत्वम्' इति भानम् । किन्तु गोत्वादिधर्मनिरूपितव्यक्तिधर्मभानम् । यदपि "इहप्रत्ययहेतुः समवायः" इति, तत् क्रियासमवायविषयम्; क्रिया हि धर्मान्तरनिरूपिते धर्मिण्यनुमेयेति इहधीहेतुः । अतः "सत्त्वान्तरे च यौगपद्यात्" इत्यनेन भेदद्वारा कार्यता शब्दस्य ॥

किञ्च प्रकृतिविकृतिता शब्दस्य शाब्दस्मृतेरनुगुणा कार्यत्वे । सादृश्यमपि अवयवसामान्यात्; सावयवत्वात् कार्यः शब्दः । कर्तृभूम्ना च हेतुर्बहुत्वात् सावयवतया शब्दस्यापि कार्यता ॥

नार्थं भाष्यमनूद्याक्षरार्थमाह—अत्र भाष्यमिति । तत्प्रयोजनमाह—भाष्यं चेति । नित्यानित्यविवादविषयशब्दस्य नानात्वद्वारेणानित्यत्वसाधनार्थं हि युगपदनेकदेशवृत्त्युपलब्धिरुक्ता; तत्र हेतोर्व्यभिचारादसाधकत्वमाशङ्क्यते—सामान्यस्यैकस्य नित्यस्य युगपदनेकव्यक्तिवृत्तिदर्शनादिति । तन्निवृत्त्यर्थम् "असति विशेषे नित्यस्य" इत्युच्यते । व्यक्तिर्विशेष उक्तः, तस्य सामान्यं प्रति देशत्वे हि व्यभिचारः स्यात्, तस्मिन्देशत्वेनादृश्यमाने व्यभिचारो नास्ति; न तु देशत्वेन दृश्यते, न हि 'इह गोत्वमस्ति' इति तद्दृश्यते; 'गौरयम्' इति दर्शनप्रकारस्य सर्वानुभवसिद्धत्वादिति हेतुसमर्थनार्थं तदित्यर्थः । नन्वेवं पदार्थवित्प्रसिद्धिर्बाधिना स्यादिति शङ्कां तत्प्रसिद्धेः क्रियासमवायविषयतोक्त्या परिहरति—यदपीहप्रत्ययहेतुरिति ॥

हेत्वन्तरं शाब्दस्मृतिप्रसिद्धं चास्तीत्याह–किञ्च प्रकृतिविकृतिता शब्दस्येति । सादृश्यानुभवानुगृहीतं च तत्, सादृश्यस्यावयवसामान्यनिमित्तत्वादवयवानां च कार्यत्वनियतत्वादित्याह— सादृश्यमप्यवयवसामान्यादिति । पुनश्च हेत्वन्तरमाह—कर्तृभूम्ना चेति । कार्यभूतं महत्त्वं सावयवत्वद्वारेण कार्यत्वहेतुरित्यर्थः ॥

१. च शङ्कानिवृत्त्यर्थम्. क.
२. कत्वस्या. क.
३. धर्मिनिरू. क.
४. महत्त्वात्. क.

संप्रति पूर्वपक्षहेत्वनैकान्तिकतोच्यते । यदि हि प्रत्यभिज्ञा स्थास्यति, तदा प्रागस्तित्वे मानात् यत्नानन्तरधीरभिव्यङ्ग्येऽपीत्यनैकान्तिकता । एवं सतोऽप्यदर्शनमित्यदर्शनमस्थानेऽनेकान्तम् । ननु नित्यत्वेऽपि विषयानागमाददर्शनम्, तच्च न स्वाश्रयस्वग्राह्यैकशब्दे । अतो नष्टस्यैवादर्शनम् । अथावरणादि तदग्रहबलात् कल्प्यम्; तन्न; दृष्टविरोधात् । एकदेशस्थैकेन्द्रियग्राह्याभिव्यक्तौ सर्वशब्दधीः सर्वेषां च स्यात् दीपाभिव्यक्तघटदेशस्वरूपपरिमाणादिवत् । न च प्रतिशब्दमभिव्यञ्जकभेदान्न सर्वशब्दधीः, अभिव्यक्तिर्हि न शब्दगता, सर्वेषां प्रसक्तेः; किन्तु श्रोत्रसंस्काररूपा । न चेन्द्रियाभिव्यक्तिस्तत्त-

उपरितनसूत्रतात्पर्यमाह—संप्रति पूर्वपक्षहेत्वनैकान्तिकतेति । तत्र यत्नानन्तरदर्शनहेतोः प्राक्सत्त्वग्राहिमानाभावविशेषणापेक्षतोक्तेः पूर्वोत्तरोपलब्ध्यैक्यग्राहिवक्ष्यमाणप्रत्यभिज्ञया प्रागस्तित्वसिद्धौ विशेषणहीनस्यानैकान्तिकत्वमुच्यत इत्याह—यदि हि प्रत्यभिज्ञेति । तथास्थानहेतोरपीत्याह—एवं सतोऽप्यदर्शनमितीति । द्वितीयहेतोरनैकान्तिकतोक्तिरयुक्तेत्याक्षिपति—ननु नित्यत्व इति । सत एवानुपलब्धिधीहेत्वभावात् स्यात्, प्रत्यक्षे चेन्द्रियसन्निकर्षो हेतुः; न च नित्यत्वे तदभाव इति पारिशेष्याद्विषयाभावादेवासन्निकर्ष इति दर्शनाननुवृत्तिः शब्दस्य क्षणनाशित्वे हेतुरेवेत्यर्थः । नन्वदर्शनकालेऽप्यस्तित्वे प्रत्यभिज्ञासिद्धे तद्दर्शनस्य हेत्वन्तरापेक्षत्वाश्रयणेन तदननुवृत्तिकृता दर्शनाननुवृत्तिरिति शङ्कते—अथावरणादीति । दूषयति—तन्न दृष्टविरोधादिति । विषयेन्द्रियसन्निकर्षाधिकहेत्वाश्रयणे हि तादृक्प्रसिद्धालोकसमस्वभावतापत्तेः दृष्टप्रतिनियतशब्दधीबाधः स्यात्, सन्निकृष्टेन्द्रियसर्वपुरुषधीश्च स्यादिति नाशाश्रयणेनैवाविरोध इत्यर्थः । ननु प्रतिशब्दं व्यञ्जकभेदाश्रयणेन विरोधः परिहार्य इत्यत्राह—न च प्रतिशब्दमिति । शब्दगते व्यञ्जककार्ये नियतशब्दधीरबाधिता स्यात्, तदा तूपलब्धृनियमो न स्यात्, तेन श्रोत्रसंस्कार उपेयः; तदुपगमे चेन्द्रियान्तरसंस्कारसाम्यापत्तेः सर्वविषयत्वापत्तिरवारणीयेत्यर्थः । ननु तदसाम्यमपि धीबलादाश्र-

१. नित्यत्वे वि. ख.
२. सर्वशक्तिधीः. क.
३. Omitted शब्द. ख.

दिन्द्रियग्राह्यविशेषार्था दृष्टेति सर्वशब्दधीर्दुस्तरा ; प्रत्यभिज्ञास्थितौ हि[१] दृष्टान्यता ; न हि प्रत्यभिज्ञाख्यं प्रत्यक्षमसन्निहितदेशकालग्राहि । अथ संस्कारसहितेन्द्रियजा प्रत्यभिज्ञा, तथापि भेदाग्रहतुल्या भेदग्राहिकयानुमया बाध्या प्रत्यक्षान्तराद्विपर्ययाभावेऽपि कारणदोषधीतः । शुक्तिकारजतादौ प्रत्यक्षतो विपर्यये भेदाग्रहे तद्ग्रहभ्रमः इति ज्वालाशब्दादावपि भेदाग्रहे तद्ग्रहभ्रमः । अन्यथाख्यातिपक्षेऽन्यथाभातेऽनुमा न स्यात् ; अख्यातिपक्षे तु नानुमा शक्यबाधा । यद्यपि शब्दे प्रत्यक्षान्न कदाचिदपि[४] भेदग्रहः, तथाप्यनुमया भेदग्रहो ज्वलादिष्विव । न च यथा मण्डूकवसाक्तं चक्षुर्वंशमुरगरूपं गृह्णाति, तथा

यणीयमित्यत्राह—प्रत्यभिज्ञास्थितौ हि दृष्टान्यतेति । प्रत्यक्षस्य सन्निहितदेश[२]कालग्राहित्वप्रसिद्धेस्तदन्यस्वभावकल्पनया तत्स्वरूपमेव तावद्दुःस्थम् । यदि पुनः सहकार्यन्तरयोगादसन्निहितग्राह्यपि कथंचिदाश्रीयेत, तथापि भेदाग्रहमात्रादपि तादृग्धीप्रचारान्मानान्तराविरोधबलादेव तत्संशयनिवृत्त्या प्रामाण्यलाभ इति, इहानुमानबाधात् न तल्लाभः, प्रत्यक्षत्वप्रयुक्तबलस्य भेदाग्रहरूपकारणदोषदर्शनबाध्यत्वादित्यर्थः । कथमिह कारणदोषधीतस्तद्बाधीरित्यत्राह—शुक्तिकारजतादाविति । प्रत्यक्षबाधविषये भेदाग्रहस्यान्वयव्यतिरेकाभ्यां तद्ग्रहभ्रमकरत्वावधारणाज्ज्वालाशब्दयोः प्रत्यक्षबाधाभावेऽपि तद्धीमात्रेण भ्रान्तिता सुग्रहेत्यर्थः । भ्रान्तेरभेदग्राहित्वपक्ष एव च प्रत्यक्षविरोधादनुमानानुदयशङ्कापि, भेदाग्रहमात्ररूपत्वे विरोधाभावान्न तच्छङ्केत्याह — अन्यथाख्यातिपक्ष इति । ननु भेदाग्रहरूपकारणदोषधीरिहानुमानप्राबल्यप्रयुक्तभेदनिश्चयोत्तरकालभाविनी, प्रत्यक्षेणैव कदाचिच्छब्दभेदभान एव तदनपेक्षा स्यात्, न तु तदस्तीति कथं कारणदोषधीतः प्रत्यक्षस्य दौर्बल्याभिधानमित्यत्राह—यद्यपि शब्दे प्रत्यक्षान्न कदाचिदिति । आनुमानिकभेदधियैव ज्वालायां प्रत्यभिज्ञाया भेदाग्रहरूपतोपगमात् शब्देऽपि तदुपगमो नानुपपन्न इत्यर्थः । ननु चक्षुषोऽपि सहायव्यवस्थया नियतार्थग्राहित्वं दृष्टमिति श्रोत्रस्यापि नानुपपन्नमित्याशङ्कां व्युदस्यति—न च यथा मण्डू-

१. Omitted हि. क.
२. Omitted देश. क.
३. दग्राहितया. क.
४. कदापि. ख.

संस्कारभेदाच्छ्रोत्रमपि कञ्चिदेव शब्दं ग्रहीष्यतीति; तत्र हि भेदाग्रहोऽशक्तेः शक्तिप्रतिबन्धात्; श्रोत्रे तु शब्दग्रहणार्थः संस्कारः सर्वशब्दार्थ इत्युक्तम्। अथ व्यञ्जकमणिदर्पणभेदान्मुखे नानारूपधीर्दृष्टा, तन्न; मण्यादिरूपानुरक्तमुखग्रहात्तत्र नानात्वम्; ससंस्कारश्रोत्रानुरक्तशब्दग्रहो नेह। अतो न तुल्यतेति श्रद्धयैव शब्दनित्यतोक्ता शब्दात्मके वेदेऽप्यनित्यतया निन्दा मा भूदिति। एवं वेदवेदार्थादरोऽन्धपरम्परया। इयं यदि नेष्टा, तर्हि वेदार्थज्ञप्रणीताद्वेदादर्थं निश्चित्य लोको व्यवहरतीति कल्प्यम्। अथ मानान्तरागम्यज्ञो न शक्यः कल्पयितुम्, तर्हि प्राज्ञैः स्वभोजनाद्यर्थमृजवः सुप्रयुक्तदम्भविस्रब्धाः। वेदवादिनोऽपि हि दृष्टलोभादिमूलसम्भवे नादृष्टार्थानां स्मृतिमाहुः। तथा

कवसाक्तं चक्षुरिति। तत्र तदञ्जनस्य शक्तिप्रतिबन्धकत्वं वंशरूपग्रहविरोधित्वात्, न संस्काररूपतया अनेकरूपवस्तुनो नियतरूपग्रहहेतुनेति न श्रोत्रसंस्कारस्य नियतविषयत्वे दृष्टान्ततेत्यर्थः। ननु मुखादिवस्त्वनेकत्वं संमतम्, मणिदर्पणादेर्व्यवस्थितरूपग्राहित्वं च प्रसिद्धमिति तत्तुल्यत्वं श्रोत्रसंस्काराणामिति शङ्कते—अथ व्यञ्जकमणिदर्पणादिभेदादिति। दूषयति — तन्न मण्यादिरूपानुरक्तेति। व्यञ्जकभूतमण्यादिवर्तिदृष्टरूपाविविक्तमुखग्रहमात्रं तत्र, न मुखादिवर्तिव्यवस्थितरूपभानम्, शब्दवस्त्वयंवभासमाननानात्वं न व्यञ्जकवर्तीति व्यवस्थितग्रहो व्यञ्जकत्वेऽनुपपन्न एवेत्यर्थः। नन्वेवं वेदस्यामानत्वे तदादरो लोकेऽनुपपन्न इत्याशङ्क्य मानासम्भवाद्भ्रान्तिमूलः स उपेय इत्याह—एवं वेदवेदार्थादर इति। तदनुपगमे मानानपेक्षयथार्थज्ञानवत्पुरुषप्रणीतवेदादर्थं निश्चित्य व्यवहरतीति कल्पनीयमित्याह — इयं यदि नेष्टेति। तत्रापि मानविरोधे प्रतारणकुशलैः प्रतारिता ऋजुबुद्धय इति कल्पनीयमित्याह — अथ मानान्तरागम्यज्ञ इति। एतन्मीमांसकाभ्युपेतं चेत्याह—वेदवादिनोऽपि हीति। लोकायतिकशास्त्रकारोक्तश्चायं प्रकार इत्याह—तथा वेदेऽप्यस्त्वित्याहेति। तदनुपगमे शब्दविषयप्रत्यभिज्ञाप्रामाण्यं

१. कथं चित्. क.
२. अभिव्यञ्जक. क.
३. वेदार्थारोऽर्थ. क.
४. ताद्वेदार्थम्. क.

वेदेऽप्यस्त्वित्याह बृहस्पतिः। अथैतन्नेष्टम्, तर्हि कार्यः सप्रत्यभिज्ञप्रत्यक्षगम्यत्वे शब्दस्य यत्नः। उच्यते—परं शब्दं बोधयितुं वायवीयसंयोगविभागावारभ्येते। तयोश्च श्रोत्रसंस्कारद्वारा शब्दाभिव्यञ्जकता। तत्र दीपादेरिन्द्रियसंस्कारेण व्यञ्जकत्वादेकदेशस्थसर्वव्यक्तिदृष्टेस्तन्निवृत्त्यानभिव्यञ्जकत्वानुमा पारिशेष्याच्चोत्पादकतानुमा तत्पूर्विका; प्रत्यभिज्ञया पूर्वस्थितेर्व्यञ्जकतान्तरसाधर्म्यबाधान्नियतविषयतानुमा; प्रत्यक्षपूर्विकानुमापूर्विकाया बलीयसी। न च तद्ग्रहो भ्रमः, अनुमितानुमया भेदासिद्धेः। ज्वालाभेदस्तु प्रभाततिकार्यस्य प्रत्यक्षत्वात् सिद्धः। इह तु न किञ्चित्प्रत्यक्षं भेदलिङ्गं कार्यम्, वायुसंयोगविभागात्मकश्रोत्रसंस्कारानुमितेर्व्यञ्जकान्तरसाम्यात्

समर्थनीयमित्याह—अथैतन्नेष्टमिति। तत्समर्थनमाह—उच्यत इति। श्रोतुरर्थबोधनार्थं तदुपायावधारितशब्दबोधं कर्तुं शब्दोच्चारणयत्नेन साक्षात् वायवीय संयोगविभागौ क्रियेते इति तावत्सम्मतम्। तत्र शब्दस्य व्युत्पन्नतया प्रत्यभिज्ञायमानत्वाच्छ्रोत्रसंस्कारद्वारेण शब्दाभिव्यञ्जकत्वं तयोः स्वतः प्राप्तम्। तत्र दीपादिदृष्टसर्वाभिव्यक्तिप्रसङ्गधिया तन्निवृत्तिमनुसन्धाय तथाभिव्यञ्जकत्वनिवृत्तिरनुमेया, तत्पूर्वकमुत्पादकत्वानुमानमित्यनुमानान्तरपूर्वकं तत्, प्रत्यभिज्ञाप्रत्यक्षपूर्वकं नियताभिव्यञ्जकत्वानुमानमिति तद्बलान्नियतेत्यर्थः। ननु ज्वालायामिवान्यथोपपत्त्यैव दुर्बला प्रत्यभिज्ञेत्यनुमानपूर्वकमप्यनुमानमुत्पत्तिसाधकमित्यत्राह—न च तद्ग्रहो भ्रम इति। भ्रान्त्यैव हि तत्रान्यथासिद्धिः; भेदप्रसङ्गधिया च तच्छङ्का, उत्पत्तिलिङ्गं च तत्प्रसञ्जकम्; तत्त्विहासिद्धम्, तत्सिद्धेरिहाभिव्यञ्जकत्वनिवृत्त्यनुमानाधीनत्वात्; तस्य च प्रत्यभिज्ञाबाधधीपूर्वकत्वेनान्योन्याश्रयतयानुदयान्न दौर्बल्यशङ्केत्यर्थः। ज्वालायां तर्हि कथमित्यत्राह—ज्वालाभेदस्त्विति। तत्र भेदोपस्थापकलिङ्गं प्रत्यक्षमेवेत्यस्त्यन्यथासिद्धिशङ्केत्यर्थः। शब्दे तदभावं स्पष्टयति—इह तु न किञ्चिदिति। ननु ज्वालोत्थप्रभाततिदृष्टिस्तदवयवविशरणमात्रे लिङ्गम्, विशीर्णावयवत्वात् ध्वंसधीरनुमानान्तराधीना। ततो दृश्यमानान्येति अत्रापि न प्रत्यक्षमात्रसिद्धं

१. Omitted च. क.
२. व्यञ्जकदे. क.
३. तत्प्रग्रहः. ख.
४. Omitted तु. ख.

सर्वव्यञ्जकताप्रसक्तेस्तन्निवृत्त्योत्पादकताप्यनुमितेः। प्रत्यक्षप्रभातत्या शीर्णावयवा ज्वालेत्यनुमैव ध्वंसानुमा; पुनर्ज्वालाप्रत्यक्षात् भेदानुमेति प्रत्यक्षद्वयं भेदाग्रहानर्हम्; तद्वद् एव भेदाग्रहार्हो व्यवस्थाप्यः। किञ्च संयोगविभागौ लोकतः परनरार्थौ। तत्र श्रोतरि संस्कारानर्हे श्रोत्रसंस्कारकौ, न तु शब्दोत्पादकौ; तथाहि शब्दार्थौ स्याताम्। एवं चैकैकशब्दधीकार्यात् संस्कारकसंयोगविभागा नानेति कल्प्यम्। भाष्ये 'संयोगविभागोपरमे शब्दश्रुतेर्न तौ व्यञ्जकौ' इति चोद्यं तात्वादिसंयोगविभागाभिप्रायम्।

भेदलिङ्गम्। प्रत्यक्षत्वेऽपि च लिङ्गस्य तदनुमेयभेदस्य प्रत्यभिज्ञाप्रत्यक्षदृष्टाभेदबाध्यत्वमनिवार्यं तस्य प्रामाण्यसिद्धौ। तदसिद्धावनुमितलिङ्गानुमेयभेदधियोऽपि प्रामाण्यमहतमेवेति शङ्कां निरस्यति—प्रत्यक्षप्रभातत्येति। विभक्तावस्थावयवस्थित्यधिकाभावस्य निरस्तत्वाद्ध्वंसग्राह्यनुमानान्तरं नास्तीति नानुमेयलिङ्गानुमेयो ज्वालाभेदः, प्रत्यक्षसिद्धप्रभातत्युपरितनप्रत्यक्षसिद्धज्वालामात्रानुमेय इतीदं तावद्वैषम्यं स्थितम्। न च तत्साध्यानुमानदौर्बल्यात्तद्वैफल्यम्; भेदोपस्थापकप्रत्यक्षद्वयं भेदं विनानुपपन्नम्, प्रत्यभिज्ञा त्वभेदाभावेऽपि शुक्तिविषयरजतप्रत्यभिज्ञेवोपपन्नेत्येतद्विवेकलभ्यत्वात् बलवदबलभावस्येत्यर्थः। वायुसंयोगविभागयोः शब्दश्रोत्रसंस्कारकार्यकरत्वाविशेष एव च प्रत्यभिज्ञाबलावष्टम्भेन नियतविषयत्वकल्पना समर्थनीया। श्रोत्रसंस्कारौन्मुख्ये तु नियतधीदृष्टेः सैव प्रसक्ता, नेन्द्रियान्तरसंस्कारकसाम्यं प्रसक्तम्, संस्कार्यनानात्वात्तदनुपस्थितेः। तदुन्मुखत्वं च स्वतःसिद्धमित्याह—किंच संयोगविभागाविति। श्रोत्रर्थत्वं तावदुक्तम्; तस्य चानियतदेशत्वात् नियतदेशसंस्कारानर्हत्वे तदीयश्रोत्रसंस्कार एव तत्कार्यतयोपेयः, नाप्रसक्ता शब्दोत्पत्तिरिति व्यवस्थितवर्णधीकार्यतो व्यञ्जकनानात्वं न पूर्वधीबाधितमित्यर्थः। नन्वभिव्यञ्जकत्वे स्वतःप्राप्ते कार्यकल्प्ययोः संयोगविभागयोः कथमुपरतत्वादनभिव्यञ्जकत्वशङ्का भाष्यगतेत्याशङ्क्य संप्रतिपन्नतात्वादिसंयोगविभागाभिप्राया सेति वदति—भाष्ये संयोगविभागोपरम इति। कथं तर्ह्युत्तरमित्याशङ्क्य कार्यकल्प्य-

१. प्रसिद्धेः. क.

२. दाग्रहव्यव. क.

३. Omitted विभाग. क.

उत्तरम्—"न नूनमुपरमन्ति" इति कार्यकल्प्यवायवीयाभिप्रायम्। परभाष्येणापि वायवीयाभिप्रायं चोद्यम्—अभिव्यक्तिः कार्या अभिव्यञ्जकदेशस्थास्तु; व्यङ्ग्यं तु खदेशमेकम्, श्रोत्रान्तर्बहिश्च खमित्यन्यत्रस्थैर्व्यक्तं तदन्यदेशस्थैरपि ज्ञायेत। उत्तरभाष्यम्—शब्दव्यक्तौ स्यादेवम्, श्रोत्रसंस्काररूपा तु व्यक्तिरिष्टा; खमवच्छिन्नं श्रोत्रमिति न सर्वेषां धीः। अपरमापाद्यचोद्यम्—आसन्नानासन्नयोर्धिया वायवीयाः प्राप्त्यनपेक्षाः; अन्यथा ते व्यञ्जकाः व्यञ्जकान्तरकरा इति द्विविधा शक्तिः स्यादित्येक एव वायवीया यावत्संस्कारं श्रोत्राण्यप्राप्य संस्कुर्युः। अतो दूरासन्नयोर्युगपद्धीः स्यात्। शब्दोत्पत्तिपक्षे न चोद्यम्; वायवीयाः शब्दारम्भकाः; ततः शब्दादेव शब्दपर-

श्रोत्रवर्त्यभिप्रायं तदित्याह—उत्तरं न नूनमुपरमन्तीति। नन्वेवं तदनन्तरमपि कथं वक्तृसन्निध्यभावेऽपि शब्दश्रवणं स्यादित्यापाद्यते इत्याशङ्क्य वायवीयानां व्यञ्जकत्वमवधार्यापि तत्कार्याभिव्यक्तिनिष्पत्तावेव निष्पादकतदपेक्षया तत्सन्निध्युपयोगो नातत्कार्यव्यङ्ग्यस्येति व्यङ्ग्यमन्यदेशेऽप्युपलभ्येतेति चोद्यमुपपद्यत इति परिहरति—परभाष्येणापीति। परिहाराभिप्रायमाह—उत्तरभाष्यमिति। कर्णशष्कुल्युपहितावस्थश्रोत्ररूपेण नानात्मकमेव खं संस्कार्यमुपेयते, न शब्द इति नातिप्रसङ्ग इत्यर्थः। कथं तर्हि तदुत्तरभाष्येण दूरस्थासन्नयोः युगपच्छब्दोपलब्धिः स्यादित्यप्राप्त्यनुवादेन चोद्यत इत्याशङ्क्य तदभिप्रायमाह—अपरमापाद्यचोद्यमिति। यद्यपि ताल्वादिसंयोगाद्यतुल्यतया वायवीयाः श्रोत्रदेशगत्यापि संस्कारारम्भार्हाः, तथाप्यप्राप्यैवारभन्त इत्युपेयम्, प्राप्तिपक्षे आसन्नश्रोत्रे प्रथमं संस्कारका भूत्वानासन्नश्रोत्रसंस्कारार्थं संस्कारकान्तरकराश्चेति द्वैविध्यकल्पनापत्तेः तद्धानार्थमप्राप्य संस्कुर्वन्तीत्युपेयमित्यापाद्य युगपच्छ्रवणप्रसङ्गश्चोद्यत इत्यर्थः। ननूत्पत्तिपक्षेऽपि क्रमधीबलादासन्नदेशे शब्दोत्पादका भूत्वानासन्नदेशस्थशब्दोत्पादकराश्चेति कल्पना तुल्यैवेत्याशङ्क्य न वायवीयानां द्वैविध्यकल्पनेति परिहरति—शब्दोत्पत्तिपक्षे न चोद्यमिति। ननु शब्दपरम्पराश्रयणेऽपि द्वैविध्यमपरिहृतमेव; कार्यवर्ति तत्र कारणवर्ति इति को लाभ इत्याशङ्क्य तत्पक्षे लोकदृष्टमेव द्वैविध्यमङ्गीकृतम्

म्पराक्रमेण दूरस्थश्रोत्रे शब्द इति क्रमेण शब्दधीः। दृष्टं हि लोके मूलहेत्वपेक्षया कार्यं स्वकार्यापेक्षया कारणम्, न तु व्यक्तिर्व्यञ्जिका दृष्टा। न च नायनतेजोव्यक्त आलोको व्यञ्जकः, तद्वद्व्यक्तः शब्दो व्यञ्जकोऽस्त्विति वाच्यम्; धीयोग्यताभिव्यक्तिरालोके स्वतः, न सजात्यपेक्षेति वायवीयः शब्दः संयुक्तसमवायाच्छ्रोत्रग्राह्योऽस्तु। योगोक्ता वा संयोगाद्विभागाच्छब्दाच्च शब्दोत्पत्तिरस्तु। भेरीदण्डसंयोगसचिवाद्भेरीखसंयोगात् खे शब्दजन्म, ततः शब्दादेव शब्दः। एवं वीचीचयसञ्चारवत् कर्णशष्कुल्यवच्छिन्ने खे जातः समवायात् ग्राह्यः। एवं वंशदलविभागसचिवाद्वंशदलखविभागात् खे शब्दजन्म, ततः शब्दपरम्परा। तथैवाद्यः शब्दः कार्यबाध्यः; अन्त्यः कारणबाध्यः; मध्यस्थाः कार्यबाध्याः कारणबाधकाः। योगोक्तविधापि क्रमेण

व्यङ्ग्यपक्षे त्वप्रसिद्धकल्पना स्यादिति विशेषमाह—दृष्टं हि लोक इति। कार्यद्वैविध्यं स्थावरजङ्गमकार्यवर्ति प्रसिद्धमेव, व्यक्तौ व्यञ्जके चाप्रसिद्धमिति व्यक्तिपक्षे तदाश्रयणं दोष इत्यर्थः। ननु व्यक्तिपक्षेऽपि व्यक्तस्यास्तु व्यञ्जकत्वम्, तच्च लोकदृष्टमिति शङ्कामपनुदति—न च नायनतेजोव्यक्त इति। यादृशमालोकस्यान्यव्यञ्जकत्वम्, तादृशं नायनतेजसो नास्त्यालोकं प्रति धीयोग्यतापादनम्, तद्योग्यता स्वाभाविक्यालोकस्येति नान्यापेक्षा। तत्स्वभावत्वाभावादेवान्यस्यालोकापेक्षेति न तत्स्वभावस्य सजातीयापेक्षोपेयेति धीकरतयैव नायनापेक्षा, न तद्योग्यतार्थेत्यनुपपत्तिः व्यक्तिपक्षे स्थितेत्यर्थः। एवमप्रसिद्धकल्पनाश्रयात्कार्यपक्ष एव स्यादित्युपसंहरति—इति वायवीयः शब्द इति। कार्यतैव पूर्वपक्षे विवक्षितेति अवायवीयपक्षोऽभ्युपेयत एवेत्याह—योगोक्ता वेति। ननु भाष्यानुक्ता योगोक्तविधा किमित्यनुज्ञायत इत्याशङ्क्य न्यायसाम्यात् साप्युपेतेत्याह—योगोक्तविधापीति। कार्यपक्षनिरासकाले पृथग्योगपक्षनिरासयत्नादर्शनात्तदभ्युपगमः सिद्ध इत्याह—

१. Omitted कार्यं-स्वकार्यपेक्षया. क.
२. वासयोगैवाद्धि. क.
३. वाद्भेरीदण्डसयो. क.
४. एवं योगो. ख.

धिया तुल्यनयादभिमता भाष्ये तद्द्वान्निरस्ता 'अनुवाते दूरेऽपि शब्दधीः' इति। अनेन योगोक्तबौद्धोक्तयोर्निरासः, शब्दपरम्परायामप्राप्त्याग्रहे अनु-वातानुपयोगात्। शीक्षाकारोक्ते वायवीयशब्दे अनुवाते दूरे धीर्युक्तैव। दूरा-दूरयोर्युगपद्धीचोद्ये समाधिभाष्यम् "अभिघातेन" इत्यादि। तदेवं न व्यक्तिकरी व्यक्तिः। अभिघातप्रेरितकोष्ठ्यवायुना श्रोत्राच्छादकस्तिमितवातबाधः। सर्वत्र हि स्तिमितवातसत्ता तूललवधारणाल्लिङ्गात्। बहवश्च कोष्ठ्या एकैकश्रोत्रव्य-ञ्जकाः क्रमगतयः क्रमाद्दूरादूरधीहेतवो यथाकार्यकल्प्याः उत्पत्तिपक्षवत्। श्रोत्रस्थस्तिमितवातबाधेऽपि न सर्वबाध इत्यसर्वशब्दधिया कल्प्यम्॥ 'शब्दं कुरु' इति च निर्देशो मानपूर्वकः शब्दप्रयोगाभिप्रायः। युगपन्नानादेशेषु

अनुवाते दूरेऽपीति। कथं वायवीयपक्षानुगतिस्तद्यत्नस्येत्यत्राह—शीक्षाकारोक्त इति। वायवीयपक्षे बाह्यवायुनोदनानुग्रहाद्दूरतरगत्युपपत्तेर्योगबौद्धमतनिरासार्थै-वानुवातदूरश्रुत्युक्तिरिति पूर्वपक्षे तदनुज्ञा व्यक्तैवेत्यर्थः। यथोक्तचोद्यनिरासे सामर्थ्यं कथमुत्तरभाष्यस्येत्याशङ्क्य तदनुवादपूर्वकं व्याचष्टे—दूरादूरयोर्युगपद्धी-चोद्य इति। शब्दाभिव्यक्तिपक्षेऽपि दूरादूरोपलम्भक्रमार्थं न लोकाप्रसिद्धं वायु-कार्यमुपेयते, अभिघातसंयोगादिजवेगवद्वायुना स्तिमितवाय्वपनयनकारिणा श्रोत्र-कुहरस्थस्तिमितवाय्वपनयनाङ्गीकारात्; स्तिमितवायोश्च सर्वत्र सदा स्थितिः प्रसिद्धैव। न च तदापि सन्निहिततत्कुहरस्थापनेतुरेव दूरस्थतदपनायकत्वापत्त्योक्तदोषावकाशः, बहुत्वात् तद्वायूनामन्योन्यानपेक्षाणामेव क्रमेण दूरासन्नश्रोत्रगत्या व्यञ्जकत्वाङ्गी-कारात्; कार्यानुगुणकारणकल्पना चोत्पत्तिपक्षेऽपि तुल्येति व्यक्तिपक्षे न दोष इत्यर्थः। ननु विरोध्यपनयने कार्ये सर्वोपलब्धिः स्यादित्याशङ्क्य कार्यबलादेकैक-विरोध्यपनयनस्यैकैककार्यत्वोपगमान्न सर्वोपलब्धिरिति परिहरति—श्रोत्रस्थस्ति-मितवातबाधेऽपि इति। लोकप्रसिद्धकार्यतैवमुक्ता; प्रथमभावित्वात्संयोग एव कार्य-मिति लाघवादुक्तमित्यविरोधः॥ पूर्वोक्तं हेत्वन्तरं परिहरति—शब्दं कुर्विति चेति। अनन्तरोक्तं परिहरति—युगपन्नानादेशेष्विति। प्रमित्यात्मिकैव धीः स्वार्थसाधिकेति

१. पातानुप. ख.
२. स्तिमित......बा. क.
३. Omitted शब्द. क.

शब्दधिया नानात्वधीर्भ्रान्तिरेव । नानात्वं वस्तूनां स्वरूपमेव, यद्वैलक्षण्येन विमृश्यते; न तत् तद्ग्रहे सति । भ्रमबीजम्—अन्यानपेक्षध्वनिभिः श्रोत्रसंस्कारभेदाद्धीभेदे भेदाग्रहाच्छब्दभेदभ्रमः नेत्रवृत्तिभेदादिव चन्द्रभेदभ्रमः। एवं सान्तरालधीरपि भ्रमः । शब्दो हि स्वदेशशून्यः श्रोत्रग्राह्यः, श्रोत्रेन्द्रियस्य शब्ददेशत्वादिन्द्रियाणां स्वबोधाशक्तेः; शब्दं गृह्णच्छ्रोत्रं व्यञ्जकध्वनिमूलदेशग्राहीति धीबलसिद्धम् । मूलदेशलिङ्गभेदं व्याहर्तुं विमतं प्रत्यशक्तेः श्रोत्रशक्ति-

सर्वसंमतम् । नानादेशावच्छिन्नशब्दनानात्वधीश्च भ्रान्तिरेवेति न तद्व्यवस्थापनक्षमा, वस्तुभेदनियताद्दष्टक्रमकनानादेशतोपलब्धेर्भ्रान्तिहेतोरनुवृत्तेरित्यर्थः । ननु तदनुवृत्तावप्यबाधितत्वात् प्रमितिरेवास्त्वित्याशङ्क्य अबाधितत्वं नास्तीत्याह— नानात्वं वस्तूनां स्वरूपमेवेति । विलक्षणावभासमानस्वरूपमेव नानात्वम्, न तदन्यदिति स्वरूपप्रत्यभिज्ञाबाधितत्वात् न तात्त्विकं नानात्वमिति भ्रान्तिरेव तद्धीरित्यर्थः । ननु शब्दनानात्वोपस्थाप्यमिह देशनानात्वं न स्वत एव भानार्हमिति कथं ततः शब्दनानात्वभ्रान्तिरुक्तेत्याशङ्क्य तद्भ्रान्त्युपपत्तिमाह—भ्रमबीजमिति । अनपेक्षाभिव्यञ्जकवायूनां नानात्वात् नेत्ररश्मिद्वैविध्यादिनेवाभिन्नशब्दधीभेदे विवेकाभावाच्छब्दभेदभ्रमः सिद्ध्येदित्यर्थः । नेत्ररश्मिभेदाच्चन्द्रभेदधीदृष्टान्तोक्त्यैव भिन्नचन्द्रयोरन्योन्यान्तरालभ्रान्तितुल्यतया शब्दस्यापि सान्तरालधीगतिर्दर्शितेत्याह— एवं सान्तरालधीरपीति । ननु विषयनिरूप्यधीभेदो विषयाभेदे कालभेदाभावे च सन्नपि निरूपकाभावादविकल्पितो न धीविषय आरोपार्ह इति न शब्दभेदभ्रान्तिकरः, न देशाभानात् सान्तरालभ्रमकरश्चोपपद्यत इत्याशङ्क्य द्वयोपपत्तिमाह—शब्दो हि स्वदेशशून्य इति । श्रोत्रं स्वतो देशाग्राहकमपि शब्दग्राहकावश्यं तदभिव्यञ्जकजन्मदेशग्राहीति तद्धीबलकल्प्यमिति देशात्मकनिरूपकभेदाद्भ्रान्तिद्वयोपपत्तिरित्यर्थः । ननु प्रकरणविरुद्धा श्रोत्रस्य तद्देशग्राहितोक्तिरित्याशङ्क्याविरोधमाह—मूलदेशलिङ्गभेदं व्याहर्तुमिति । वादसमये श्रोत्रशक्तिर्वाच्या, इक्षुक्षीरगुडादिमाधुर्यान्तरभेदवत्सूक्ष्मदृगनुभवसिद्धत्वेऽपि देशभेदव्याप्तलिङ्गभेदस्य शब्दविशेषावाच्यतया विमतबोधायोग्यत्वात्, वस्तुतस्तु वक्तृभेदस्याश्रोत्रवेद्यत्वप्रसिद्धेरनुमेयत्व-

१. त्वधीः शब्दभ्रान्ति. क. २. Omitted मूल. क.

रुक्तर्जुविमलायाम्। सौहार्दे तु न्यायशुद्धौ। सूक्ष्मधियां लिङ्गभेदाद्देशभेदधीः; स्थूलधियां देशं प्रति भ्रम एव, मूलदेशलिङ्गाद्यभावात्। एवं देशशब्दयोरसम्बन्धाग्रहात्तद्देशत्वधीः। कोष्ठ्यध्वनिरष्टस्थानाभिघातजसंस्कारभेदाच्छ्रोत्रसंस्कारभेदान् कुर्वन् वर्णधीभेदहेतुः। अतो व्यञ्जकध्वनिमूलदेशतोक्ता। "कामं देशा एव भिन्नाः" इति भाष्यमन्वारुह्यवादः। प्राप्यकारिश्रोत्रदेश एव शब्दधीरिति वस्तुतो न देशभेदः। एकस्य वेद्यस्यानेकत्र धीर्युगपदित्येवं रविदृष्टान्तः; रवावनेकनराणाम्, शब्दे त्वेकस्येति भेदोऽस्तु। इक्स्थाने यणुच्चार्य इत्येवं पाणिनेर्विकारोक्तिः, विकारे मानाभावात्। न च सादृश्याद्विकारता, दधिकुन्दयोरदृष्टेः। शब्दो महान्—इत्यपि भ्रमः। व्यञ्जकनादाः प्रचिताः कृत्स्नकर्णच्छिद्रव्याप्त्या निरन्तरधियः कुर्वन्तोऽसम्बन्धाग्रहाच्छब्दनै-

नियमात्तल्लिङ्गवद्देशभेदलिङ्गस्यापि स्वानुभवसिद्धिरनिर्देश्यत्वेऽपि प्रसिद्धैवेत्यर्थः। सूक्ष्ममनोऽवधानाभावे शब्दग्रहणे सत्यपि देशभेदानवमर्शाश्चानुमेयतैवेत्याह— सूक्ष्मधियां लिङ्गभेदादिति। एवं देशभेदभाने तदवच्छेदापेक्षया धीभेदः शब्दनानात्वभ्रान्तिकरः स्यादित्याह—एवं देशशब्दयोरिति। ननु व्यक्तिपक्षे कोष्ठ्यवायोः श्रोत्रसंयोगो व्यञ्जक इति कथं वक्तृदेशो व्यञ्जकदेश उक्त इत्याशङ्क्य सोऽपि व्यञ्जकदेशभेद एवेति परिहरति— कोष्ठ्यध्वनिरष्टस्थानाभिघातज-संस्कारभेदादिति। ननु देशभेदस्यारोप्यत्वे कथं तदुपगम इत्याशङ्क्य असदङ्गीकारमात्रं तदित्याह — कामं देशा एव भिन्ना इतीति। देशभेदेऽपि देशैक्ये कथमादित्यो दृष्टान्तः, शब्ददेशभेदवत् तस्य नानादेशत्वप्रतीत्यसिद्धेरित्याशङ्क्य तद्वदेकस्य द्रष्टुस्तदसिद्धावपि नानाद्रष्ट्रपेक्षया तत्सिद्धेर्द्रष्टृभेदाविवक्षया तदुक्तिरित्याह— एकस्य वेद्यस्यानेकत्र धीर्युगपदित्येवमिति। विकारहेतुपरिहारमाह—इकः स्थाने यणुच्चार्य इति। कर्त्रधीनमहत्त्वहेतुपरिहारमाह—शब्दो महानित्यपि भ्रम इति। नन्वेककालैककर्णच्छिद्रव्याप्त्याप्येकविषयबहुधीकरत्वं नादानां न युक्तम्, इन्द्रियान्तरेष्वभावात्; शब्दनानात्वधीकरतोक्त्या एकविषयमहत्त्वभ्रान्त्यनानुगुण्या-

१. प्राप्त्या. ख.

रन्तर्यमिव बोधयन्तो नैरन्तर्याग्रहान्महत्त्वमिव बोधयन्ति तरुषु 'वनं महत्' इतिवत्। तद्ग्रहे स्थास्यति पूर्वोक्तहेतुजातमनेकान्तम्। संप्रति तद्ग्रहः शब्देऽनुमया साध्यते। शब्दो नित्यः परार्थदर्शनसम्बन्धित्वात् धूमादिवदिति। एवमपक्षधर्मता हेतोः प्रत्युक्ता, दर्शनसम्बन्धस्य पक्षधर्मत्वात्। धूमादिदर्शनस्य स्वबुद्ध्यर्थत्वेऽपि परबुद्ध्यर्थताप्यस्तीति न हेत्वसिद्धिः दृष्टान्ते। दर्शन-

स्यानुपयुक्ता तदुक्तिः। उच्यते—भाष्ये तावत् भिन्नविषया नादा उदाहृताः। भिन्नधीकरतया क्लृप्तशक्तयः सहभावे विभिन्नधीकराः प्रातिस्विकविषयवैलक्षण्यतिरोधानाद्वर्णात्मकैकैकशब्दभ्रमकरास्तद्व्यञ्जकस्थानबहुदेशव्यापित्वान्महाशब्दभ्रान्तिकराश्च युक्ताः। वर्णव्यक्तिविषयेऽपि च विभिन्नविषयत्वं नादानामनपेतम्; स्वरव्यञ्जनभेदो हि वर्णानां व्यक्त एव; स्वरसाहित्येनैव व्यञ्जनाभिव्यक्तिः, न पृथगिति व्यक्तम्, परस्परसंश्लेषाच्चैकतया व्यञ्जनाभिव्यक्तिः, स्वराणां चोदात्तादिस्वरसंश्लेषः. तेन वर्णेष्वपि यथाभिव्यक्त्येकत्वभानमन्यसंश्लिष्टेष्वेवाविवेकमूलमभिव्यक्तिकालमात्रवर्तीति सिद्धम्। वस्तुतस्त्वन्वयव्यतिरेकावधारितप्रातिस्विकरूपेणैव पृथगभिव्यक्त्यनर्हेण जातितुल्येन प्रत्यभिज्ञाबलान्नित्यतयेष्यन्ते वर्णाः। अत एव पञ्चसु वर्गेषु एकैकनिष्ठायां प्रत्यभिज्ञायां सत्यामपि न जातिः तद्ग्राह्येष्यते, तद्वर्तिप्रथमद्वितीयतृतीयचतुर्थपञ्चमेषु च न जात्यन्तराणि; अतस्तद्रूपेण व्यक्तावस्थानां सङ्घातमात्रत्वात् सङ्घातस्य च जात्याश्रयत्वायोगात् तदवस्थायां प्रत्यभिज्ञायमानाः सङ्घातिन एव तात्त्विका वर्णाः, अभिव्यक्तावस्थया अर्थधीशक्ततया अनुसन्धीयमानाः तत्प्रमितिकराः इति रहस्यम्। अत एव शब्दत्वजातिमात्रापेक्षमपि श्रुतिप्रामाण्यमङ्गीकृतम्। एवं वर्णव्यक्तावपि नादानामन्वयव्यतिरेकसिद्धैकैकविषयशक्तिभेदानुरोधेन धीबहुत्वमाश्रित्य महत्त्वभ्रान्तिसमर्थनं सुस्थम्। उक्तानुवादेन अनन्तरसूत्रव्युत्पाद्यमर्थमाह — तद्ग्रहे स्थास्यतीति। सूत्रार्थं तद्ग्रहसाधकमनुमानं स्वरूपेण दर्शयति — शब्दो नित्यः परार्थदर्शनसम्बन्धित्वादिति। साक्षात्पक्षधर्मत्वेनानुक्तोऽपि हेतुरर्थसामर्थ्याद्दर्शनविषयतया विवक्षित इत्यदोष इत्यर्थः। दर्शनोक्त्या धीग्रहेऽपि परगतानुमेयधीहेतुतया परार्थतापीति नासिद्धिदोषोऽपीत्याह — धूमादिदर्शनस्येति। ननु धूमादेर्नित्यत्वाभावात् साध्य-

कालात् कालान्तरस्थायितात्मकं नित्यत्वं साध्यतयाभिप्रेतम् । एवं हि धूमादिव्यक्तेर्दृष्टान्तता । कालान्तरस्थायित्वे च परयत्नस्यानुत्पादकत्वात् पूर्वयत्नोऽपि तथेति सदकारणत्वसिद्धिः । न च क्षणिकेऽपि शब्दे सङ्केतितार्थे तत्सदृशेऽभेदभ्रमादर्थधीरित्येवमपि परार्थमुच्चारणमितीतरथापि हेतुसिद्धिरिति; यतस्तद्ग्रहे न प्रत्यक्षबाधो नानुमाबाध इत्युक्तम् । सदृशत्वबोधे चार्थधीर्न स्यात् । शालाशब्दान्मालार्थधीर्मालासदृशधियेव बाध्येत । न च गावीशब्दात् गोशब्दभ्रान्त्यार्थधीः सादृश्यधियापि न विपर्येतीति वच्यम्; यो हि गोशब्द एव साधुरिति वेत्ति, सः अशक्त्या 'गावी' इत्युच्चारितं गोविवक्षोः इत्येवं ज्ञात्वा गोशब्दादेवार्थमवैति; यस्त्वेवं न वेत्ति, स गावीशब्दादेव;

वैकल्यमिति शङ्कां स्थायित्वमात्रं विवक्षितमिति परिहरति—कालान्तरस्थायितात्मकमिति । नन्वेवं विवक्षितनित्यत्वासिद्धिरिति शङ्कामर्थादपि तत्सिद्धेस्तदनुक्तावपि न हानिरिति परिहरति—कालान्तरस्थायित्वे चेति । ननु क्षणिकत्वेऽपि सङ्केतापेक्षया परार्थत्वोपपत्तेः न स्थायितापि स्यादिति शङ्कां बाधकाभात् तासिद्धप्रामाण्येन परिहरति—न च क्षणिकेऽपि शब्द इति । सादृश्यधिया बाधनियता च तन्मूलार्थधीः दृष्टा, तदभावाच्च न सादृश्यनिमित्तभ्रान्तिमूलेत्याह—सादृश्यबोधे चेति । ननु गावीशब्दजबोधवत् सादृश्यधियापि बाध्या न स्यादित्यत्राह—न च गावीशब्दादिति । 'गावीशब्दोऽशक्त्योच्चारितः' इति विजानतस्तावत्तदुच्चारितगोशब्दादेवार्थधीरिति न बाधप्रसङ्गः । वक्तृविवक्षासंवादात् व्यवहारदर्शनात् गावीशब्दस्तदर्थ इति जानतो न सादृश्यान्तर्भाव इति सादृश्यभ्रान्त्युत्थधियः तदभिव्यक्तौ बाधनियमोऽस्त्येवेत्यर्थः । ननु सङ्केतस्यैक्यभ्रान्तिनिष्ठस्यार्थधीहेतुत्वात् सदृशत्वज्ञानेऽप्यबाधोपपत्तिरित्याशङ्क्य गत्यन्तराभावमूलैषा कल्पना, व्यवहारपरम्पराविमत्तायाश्च तदभावः, तदनादित्वाच्चैतत्कल्पनावकाश

१. त्वात्मक. क.

२. Omitted च. क.

३. भ्रान्त्यर्थ. क. ख.

न गोभ्रमात् । न चाद्यः शब्दः सङ्केतितः तत्सादृश्यादितरेभ्योऽर्थधीरिति शक्यम्, अनादिसंसारे आद्याभावात् । अतः प्रत्यभिज्ञयार्थधीः । सा च स्मृतिग्रहणच्छायावाहिनी संस्कारेन्द्रियाभ्यां प्रत्येकं तत्तेदन्ताशक्ताभ्यामेकबोद्धरि जन्यत इति हेत्वभावोऽप्यस्या न युक्तः । न च क्षणिकत्वादभिव्यक्तेरेकैव शब्दधीः, न सा संस्कारबोधिता प्रत्यभिज्ञा युक्तेति वाच्यम्; हेत्वान्तरोद्बुद्धसंस्कारस्य प्रत्यभिज्ञास्तु । अन्वयव्यतिरेकाधीनाकृतिवाचिता च स्थायिशब्दस्य, न क्षणिकस्य; अङ्गुल्यादिनिर्देशादियं गौरित्याकृतिवाचनता शक्या; पिण्डलीना हि न पृथङ्निर्देशार्हा । किञ्च अष्टकृत्वो गोशब्द उच्चरितः—इति कृत्वसुच् क्रियावृत्तौ । अनुमेयक्रियावृत्तिः कार्यावृत्तिगम्या

इत्याह—न चाद्यः शब्दः सङ्केतित इति । साधितमुपसंहरति—अतः प्रत्यभिज्ञयेति । यदुक्तम्—तस्याः प्रत्यक्षरूपतयेन्द्रियजत्वनियमादिन्द्रियाणां चासन्नदेशकालवस्तुग्राहित्वनियमाद्यथानुभवमेकज्ञानत्वे हेत्वभावात् ज्ञानद्वयमैक्यभ्रान्तिकरं तदिति, तत्परिहरति—सा च स्मृतिग्रहणच्छायावाहिनीति । सर्वकारणानां कार्यानुभवबलनियमितस्वभावत्वादबाधितकार्यानुगुणतयैव स्वभावस्योपेयत्वात् संस्कारसाचिव्यादिन्द्रियशक्त्युद्दीपनाभ्युपगमेन बोद्धुश्च स्थासित्वाङ्गीकारेण प्रमाणतयैव सोपेयेत्यर्थः । ननु शब्दाभिव्यक्तेः क्षणिकतया स्वमतानुवृत्त्यापि संस्कारोद्बोधकापेक्षप्रत्यभिज्ञानुपपत्तिरपरिहार्येत्याशङ्क्य अनियतत्वात्तदुद्बोधकानां हेत्वन्तरापेक्षयाप्युपपत्तिरभ्युपेयेति परिहरति— न च क्षणिकत्वादिति । गवादिशब्दानामाकृत्यर्थत्वप्रसिद्धिश्च शब्दप्रत्यभिज्ञोपबृंहितेत्याह— अन्वयव्यतिरेकाधीनेति ॥ एवं शब्दोच्चारणविषयकृत्वसुच्प्रयोगोऽपीत्याह—किञ्चाष्टकृत्वो गोशब्द इति । शब्दस्य कार्यत्वे भेदापत्तेः कर्मकारकोपाधितोऽपि क्रियैक्यमाश्रित्य तदावृत्तिर्न सिध्येत्; व्यङ्ग्यत्वे तु तदैक्योपाधेः सिध्येदित्यर्थः । उक्तहेत्वाक्षेपाभिप्रायेण बुद्धिकर्मणोरपि प्रत्यभिज्ञापादनेन नित्यत्वापत्तिर्भाष्येऽभिहिता, तदापत्तिः कथमित्याशङ्क्य ज्ञाप्यैक्यापेक्षया क्रियावृत्त्यभ्युत्युपगमे अत्र क्रियान्यत्वधीर्नास्तीत्युपेयम्, अन्यत्वस्यावृत्तिविरोधित्वात्; क्रियैक्यधिया च तदावृत्तिधीः इत्यपरामृष्टान्य-

१. ढस्य......शासु. क. २. वृत्तानुमेयाक्रिया. क. ख.

न वाच्या ; कार्यं ह्यन्यदन्यत् कार्यत्वात् । अतो ज्ञाप्यैकशब्दापेक्षया क्रियैकतामाश्रित्य क्रियावृत्तौ कृत्वसुचूस्मृतिः प्रत्यभिज्ञाबृंहिका । एकहेतुसिद्धेऽपि साध्ये आहार्यधियां हेतुप्रचयः । यदि ज्ञाप्यात्मककार्यैक्यात् क्रियाभ्यासं कृत्वसुजाह, तर्हि न क्रियान्यत्वधीः । अनन्यताधियैव प्रत्यभिज्ञामिच्छतः क्रियायां प्रत्यभिज्ञा स्यात् । बौद्ध्यैक्यात् बुद्धावपि स्यात् । अतश्च स्थायितापत्तिरिति "बुद्धिकर्मणी" इत्यादिचोद्यभाष्यार्थः । उत्तरभाष्यम्—"अथ प्रत्यक्षे नित्ये एव" इति । अस्यार्थः—यदि प्रत्यभिज्ञात्मकप्रत्यक्षवेद्ये तदा स्थायिनी ; स्वलक्षणाग्रहणार्हे हि तद्ग्रहः, न तु कार्यतोऽस्तीत्येवमनुमेये; न ह्यन्यत्वाग्रहः तद्ग्रहः क्रियावृत्तिरुपाधित ऐक्यायुक्ता । बुद्धस्यान्तराबोधो नास्तीतिधीव्यवहारारोहः; अन्यथा नास्तीति निर्विषयमिति चोद्यभाष्यम् "ह्यस्तनस्य" इत्यादि । तन्न; बुद्धस्य हि पुनरत्यन्ताबोधो नास्तीति; तद्ग्रहात्मके पुनर्बोधे न नास्तीति, भावधीनिवृत्त्यपेक्षत्वान्नास्तीत्यस्य । अत एव लोको

त्वक्रियाधीरेव प्रत्यभिज्ञेत्यङ्गीकृतं स्यादित्यापाद्य क्रियाबुद्धयोश्च तत्पक्षे प्रत्यभिज्ञेयतापत्त्या स्थायितापत्तिरुच्यत इति भाष्यार्थमाह — यदि ज्ञाप्यात्मककार्यैक्यादिति । परिहारभाष्ये प्रत्यक्षत्वाभाव उक्तः । प्रत्यक्षत्वे च नित्यत्वमङ्गीकृतम् ; तत्कथमित्याशङ्क्य प्रत्यभिज्ञात्मकप्रत्यक्षापेक्षो नित्योक्त्या स्थायित्वाङ्गीकारः । प्रत्यक्षत्वनिवृत्त्यैव प्रत्यभिज्ञानिवृत्तिः सिद्धा ; स्वरूपग्रहापेक्षा हि सा, भेदाग्रहमात्रत्वानुपगमात् । क्रियाभ्यावृत्तिस्तु भेदसिद्धावप्यौपाधिकैक्यमात्रापेक्षेत्यर्थविवरणेन परिहरति— उत्तरभाष्यमित्यादिना । ननूपलब्धविषयानुपलब्धिरभावनियन्त्रीति पूर्वस्य नाशनियमात् भेदाग्रहमात्ररूपत्वमुपेयमेवेत्यनन्तरभाष्येण चोद्यत इत्याह— बुद्धस्यान्तराबोध इति । बुद्धस्यात्यन्तिकानुपलब्धिः तन्नियन्त्री नानुपलब्धिमात्रं प्रत्यभिज्ञया मध्येऽपि भावस्फूर्तेरिति तन्निवृत्तावेवाभाव इत्युत्तरार्थमाह — तन्न; बुद्धस्य पुनरिति । तदेव लोकसम्मत्या दृढीकरोति — अत एव

१. न्यकार्यं. ख.
२. क्रियाकृत्वसुच्. क. ख.
३. त्यभिज्ञोद्बृंहिता. ख.
४. हारारोपा. अन्य. क.
५. Omitted. हि. क.

जायादि दृष्ट्वान्तरा अपश्यन् पुनर्बोधे नास्तितां हित्वा विश्वासं याति । यापि सर्वभावानां नाशितान्ते क्षयात् बौद्धैरुक्ता, सा न शब्दस्य, न हि शब्दस्यान्तक्षयौ धीसिद्धौ । यत्रापि घटादौ तौ स्तः, तत्रापि न नाशिस्वभावतया क्षणिकतानुमा प्रत्यभिज्ञां बाधते । इत्थमनुमा वाच्या—भावस्वभावाः क्षणिकाः, स्वहेतुतो नश्वरत्वात् । न चासिद्धो हेतुः ; हेत्वन्तराधीने हि नाशे भावस्वभावानन्तर्भूते जातेऽपि प्रागिव भावधीः स्यात् ; न च हेत्वन्तरजन्यो नाशो भावस्वभावार्हः, हेतुभेदात् भेदापत्तेः ; अन्ते नाशान्नश्वरक्षणात्मकाद्भावात् सदृशपरम्परोत्पत्तेः स्थिरभ्रमः । विसदृशहेतोस्तु विसदृश-

लोको जायादि दृष्ट्वेति । सर्वभाववत्युक्तक्षणनाशितापि तदापादकहेत्वसिद्धेर्न शब्दस्पर्शिनीति नाशानर्हतातिशयमाह — यापि सर्वभावानामिति । एतच्च प्रत्यभिज्ञास्थैर्यार्थमभ्युपगममात्रेणोक्तम्, वस्तुतस्तु स्थितिकालावधिनाशयोर्दर्शनेऽपि तदुक्तप्रत्यभिज्ञाबाधो नास्तीत्याह — यत्रापि घटादाविति । तत्साधनार्थं तदुक्तानुमानं दर्शयति — इत्थमनुमा वाच्येति । सर्वकार्यवर्तिक्षणिकत्वे स्वकारणमात्रप्रयुक्तनाशस्वभावत्वं तैर्हेतुतयोच्यते । तत्र हेत्वसिद्धिं विपक्षे बाधकोक्त्या परिहरति — न चासिद्धो हेतुरिति । नाशो हि नाश्यभ्युपगतभावाभिन्न एवोपेयः । भेदोपगमे भावस्य पूर्वावस्थानुवृत्त्यापत्तेः नाशस्वभावत्वे नाशस्य तन्निवृत्त्यात्मकत्वात्तदासिद्धिः स्यात्, हेत्वन्तरजत्वे तत्स्वभावत्वायोगात् स्वहेतुजत्वे च तत्सम्भवात् क्षणध्वंसित्वं सिद्धं स्यादित्यर्थः । ननु क्षणध्वंसित्वे उत्तरक्षणभावरूपानुवृत्तिदर्शनविरोध इति शङ्कां कृतकस्यान्ते क्षयनियमात् नश्वरक्षणात्मकत्वस्यावश्योपेयत्वात् सदृशपरम्परोत्पत्तिनिमित्ता तदनुवृत्तिः, न नाशाभावनिमित्तेति स्थिरत्वं भ्रान्त्यारोपितम्, कालान्तरवर्तिनाशदर्शनं हेत्वन्तरागमनिमित्तविसदृशजन्मनिमित्तमिति क्षणध्वंसित्वे कोऽपि विरोधो नास्तीति दर्शयन्नपाकरोति— अन्ते नाशान्नश्वरक्षणात्मकादिति । कृतकस्य नाशनियमाभ्युपगमाच्च नाशाभिन्नत्वं तस्य स्यात्, भेदे द्वयोः स्वहेतुतन्त्रतया अन्योन्यनियमाभो-

१. स्यान्तक्षयौ. क. २. भावाभावाः ख.

क्षणोत्पत्तावन्ते क्षयधीः । कृतको नाशीत्येवमपि स्वहेतुतो नाशीति; कृतकाश्च सर्वे भावाः । तन्न; भागासिद्धेः हेत्वभावाच्छब्दस्याकृतकत्वात् शङ्कितहेतोर्यत्नस्य व्यञ्जकत्वात् । शब्दधीश्च यत्नसंस्कृतश्रोत्रापेक्षा, न तु शब्दस्तदपेक्षः । तेनास्वभावकरत्वे नापेक्षा;स्वभावकरत्वे शब्दोऽनित्य इत्यनुयोगो हेयः । न च नियतदेशकालप्रकृतितयापि कृतकता, नियमासिद्धेर्विभोर्नित्यस्य; प्रकृतिनियमः काल्पनिकोऽनिदंप्रथमे । न च कृतका भावा विनाशस्वभावाः, गुरुनये नाशवस्त्वसिद्धेः । अथेत्थमनुमा—यत्सत् तत् क्षणिकम्, सन्तश्च सर्वे भावाः । सत्ता हि क्रमयौगपद्याभ्यां व्याप्ता; ते ह्यक्षणिकान्निवृत्ते स्वव्याप्तां सत्ता-

गात्, कृतकत्वं च भावाभिन्नं दृष्टमित्यपि क्षणिकत्वसिद्धिरित्याह— कृतको नाशीत्येवमपीति । सर्वभावानां क्षणिकत्वं तावच्छब्दे कृतकत्वासिद्धेर्न स्यादिति दूषयति— तन्न; भागासिद्धेरिति । ननु व्यञ्जकत्वेनापि यत्नापेक्षत्वं शब्दस्याङ्गीकृतम्, उपकारं विनापेक्षानुपपत्तेः, उपकाराङ्गीकारे स्वानन्यतयैव तत्सिद्धिरिति व्यञ्जकत्वमुखेनापि क्षणिकतापद्येतेति शङ्कां परिहरति—शब्दधीश्च यत्नसंस्कृतश्रोत्रापेक्षेति । कार्यस्यैव कारणापेक्षत्वमिति धीरेव तदपेक्षा, श्रोत्रस्यश्च यत्नोत्थ उपकार इति न शब्दस्य यत्नस्पर्श इति न तस्य निष्पत्त्यापादनावकाश इत्यर्थः । ननु देशकालप्रकृतिनियमस्य उत्पत्तिप्रयुक्तत्वात्तद्धीः कृतकत्वापादिकेत्याशङ्क्याह —न च नियतदेशकालप्रकृतितयापीति । तद्धीमात्रं देशकालनियतमित्यसिद्धः शब्दस्य तन्नियमः; ताल्वादिवीणादिप्रकृतिनियमश्चाभिव्यक्तिगतः कल्पित एव शब्दे इति न तेनाप्युत्पत्त्यापत्तिरित्यर्थः । यत्पुनः कृतकानां नाशस्वभावत्वमुक्तम्, तदप्यनभ्युपगतनाशत्वात्प्रत्यवचनीयमित्याह— न च कृतका भावा इति । एवमुक्तप्रकारक्षणभङ्गस्य शब्दानवगाहित्वे उक्ते तदवगाहार्हं विधान्तरमवतारयति— अथेत्थमनुमा—यत्सत् तत् क्षणिकमिति । कथं सत्तायाः क्षणिकत्वव्याप्तिसिद्धिरित्यत आह —सत्ता हि क्रमयौगपद्याभ्यां व्याप्तेति । यद्यपि द्वयोः क्वचिद्विषये सह-

१. Omitted. च. क.
२. कालदेश. क.
३. Omitted अपि. क. कृतता. ख.
४. प्रथमः न च. ख.
५. कर्मयौग. क. ख.

मपि ततो निवर्त्य क्षणिककोटिं सत्तां नीत्वा तत्कोटिव्याप्तां कुरुत इत्येवं सत्त्वात् क्षणिकत्वसिद्धिः; सत्त्वं ह्यर्थक्रियाकारित्वम्, तदधिकानिरूपणात्। अर्थक्रिया चाक्षणिकस्य न क्रमात्, शक्तस्य कालक्षेपायोगात्; अशक्तौ न कुर्यादेव। अथ शक्तोऽपि सक्रमसहकारिसन्निध्यपेक्षः क्रमात् करोति, तन्न; किञ्चित्करो ह्यपेक्ष्यः; स यदि भावस्वभावकरः, तदा भावस्योत्पत्तेः नाक्षणिकात् क्रमादर्थक्रिया; अथास्वभावकरः, तर्हि पूर्वावस्थात् भावान्नार्थक्रिया; तत एवागन्तोः सा स्यात्, तदनुविधानात्। अथ यौगपद्यादर्थक्रिया, तर्हि क्षणान्तरे तच्छून्यो न अक्षणिकः सन् स्यात्।

वृत्तिसंप्रतिपत्तिर्नास्ति, तथाप्यक्षणिके सत्तायाः बाधकं व्यापकनिवृत्त्यात्मकं दर्शयित्वा ततो व्यावृत्तिं प्रदर्श्य पारिशेष्यात् क्षणिकवृत्तिं तद्व्याप्त्यन्तां संबोध्य लिङ्गलिङ्गित्वधीः सुसंपादेत्यर्थः। कथं पुनः क्रमयौगपद्ययोः सत्ताव्यापकत्वमित्याशङ्क्य तत्समर्थनार्थं सत्तास्वरूपमेव परिशोधयति — सत्त्वं ह्यर्थक्रियाकारित्वमिति। सर्वस्य हि सत्त्वमन्वयव्यतिरेकावधारणार्हम्, न सकृद्दर्शनमात्रावसेयम्, 'सत्' इति सकृन्निश्चितस्यापि जलादेरर्थक्रियानर्हत्वेनासत्त्वावधारणदर्शनात्तदर्हत्वमेव सत्त्वमित्यन्वयव्यतिरेकसिद्धमित्यर्थः। तथा च कथं क्रमयौगपद्यव्याप्तत्वेनाक्षणिकात्तन्निवृत्त्या निवर्तेत इत्याशङ्क्य तदुपपादयति—अर्थक्रिया चाक्षणिकस्येति। शक्तत्वाविशेषेऽनेकार्थक्रियाणामेकक्षण एव प्रथमवदुत्पत्त्यापत्तेर्न क्रमोत्पत्तिरेकस्मादुपपद्यते। प्रथमक्षणे तदनुत्पत्तिरशक्ततयैव स्यात्, तदा चोर्ध्वमपि ततो नोत्पद्येतेत्येकस्मान्नानेकोत्पत्तिः क्रमेण स्यादित्यर्थः। नन्वक्षणिकादपि सहकारिसन्निधिक्रमापेक्षया क्रमेणानेकोत्पत्तिर्घटत इति शङ्कते — अथ शक्तोऽपीति। दूषयति—तन्न; किञ्चित्करो हीति। सहकारिसाध्योपकारस्य स्थाय्यभिमतभावान्यत्वेऽनन्यत्वेऽप्यक्षणिकत्वक्षतिरिति क्रमस्याक्षणिकव्यावृत्तिः सिद्धेत्यर्थः। यौगपद्यपक्षशङ्कामुखेन सोऽपि क्षणिकत्वापादक एवेत्याह—अथ यौगपद्यादर्थक्रियेति। तृतीयविधयास्तु तर्हीत्याशङ्क्य नास्ति विधान्तरमित्याह—

१. कुरुतेत्येवम्. क. २. कारिनि. ख.

क्रमयौगपद्ययोश्चैकाभावे नियमादपरदर्शनात् तृतीयकोट्यभावसिद्धिः । न च असाधारणानैकान्तिकता सत्त्वादिति हेतोः क्षणिकादर्थक्रियानिवृत्तेः; अशक्तादर्थक्रिया न स्यात्; शक्तस्य सहकार्यपेक्षा न स्यत्; न च विधान्तरमस्तीति वाच्यम्; यतोऽन्त्यक्षणप्राप्तः शक्तः सहकार्यनपेक्ष एव कार्यकरः। सहकारिणोऽपि स्वहेतोरन्त्यक्षणप्राप्तास्तत्कार्यशक्ता युगपत्तत्करा अनपक्षैकसामग्रीत्वापन्ना इति नानपेक्षा; न कृतकरता न कार्यभेदः सहकारितापीति यथादृष्टमविरुद्धम् । तन्न; घटते हि स्थिरादपि क्रमादर्थक्रिया सहकार्यधीनस्वाधिकोपकारापेक्षात् । न चागन्त्वनुविधानात् कार्यस्य भाव उदास्ते; आगन्तूपकृतभावानुविधानं हि कार्यस्य, नागन्तुमात्रानुविधानम् ।

क्रमयौगपद्ययोश्चेति । ननु शक्ताशक्तविकल्पमुखानुपपत्त्यार्थक्रियानिवृत्तिः क्षणिकादपि तुल्येत्यसाधारणानैकान्तिकता सत्त्वहेतोरिति शङ्कामनूद्य निरस्यति—न चासाधारणेति । तत्पक्षे प्रतिक्षणमर्थभेदात्कार्यपूर्वक्षणवर्ती शक्तः, तदन्ये त्वशक्ता इति विभागोपपत्तिः । न चैवं सहकार्यनपेक्षत्वापत्तिदोषः, तदनपेक्षतयैवोपगमात् । न चैवं दर्शनविरोधः, तदुत्पत्तौ सहकारिसहत्वमात्रस्य दृष्टस्यानपेक्षत्वे सत्यपि स्वहेतुभिस्तच्छक्तानामेव तेषामासन्नत्वादवर्जनीयतयोपपत्तेरिति सर्वानुपपत्तिहीनत्वात्तत्पक्ष एव प्रमाणवानित्यर्थः । दूषयति— तन्न घटते हि स्थिरादपीति । प्रत्यक्षमेव तावन्मूलभूतं सर्ववस्तुस्वभावोपगमे, तद्बलप्राप्ते स्थिरत्वे तदनुसार्येव सहकारिस्वभावोऽभ्युपेयः, तन सहकार्यधीनस्वव्यतिरिक्तोपकारापेक्षया क्रमेणानेककार्यकरत्वं स्थिरस्याङ्गीकर्तुमुचितम् । न चैवं तन्मात्रमेव कारणं स्यादिति स्थिरस्याकारणत्वापत्तिः, कार्यकारणत्वावधारणसमर्थान्वयव्यतिरेकयोग्याकारहीनतयोपकारमात्रस्य तदवधारणासिद्धेः तद्वदुपकार्योपकारकनिरूप्यतयैवोपकारनिवेशात् स्थिरस्य प्रधानकारणत्वं न हेयम् । न चोपकारनिरूपकतयापि उपकारस्यैव जनकतया तत्सम्बन्धात् कारणत्वम् नोपकार्यस्य असम्बन्धादिति शङ्कनीयम्, जनकादप्याश्रयस्याव्यवहितत्वेन लोके सम्बन्धप्रसिद्ध्याधिक्यादिति स्थिरमेव प्रधानकारणं मान सिद्धमित्यर्थः । एवं क्षणिकत्वहेतोः सत्त्वस्य साधारणानैकान्तिकत्वं प्रत्यक्षावष्टम्भे-

१. अनपेक्षा एक. क. २. सहिकार्य. क.

आगन्तुजोऽप्युपकारो भावश्रयो भावस्योच्यते लोके। न च परोक्तप्रतिवन्दीतोऽसाधारणता सत्त्वादित्यस्य क्षणिकादप्यर्थक्रियानिवृत्तेर्वाच्या। [1]यद्यप्येकं कार्यमनेकस्मात् कारणान्मतम्, तथाप्यन्योन्यानपेक्षाणामपि स्वहेतुवशादप्रेक्षाणां मेलनं युक्तम्। तत्र नायमनुयोगः—कृषीवलः प्रेक्षावान् कुसूलादवनीय बीजं भुवि न वपेत्; कुसूलनिहितबीजः [2]कृती स्यादिति। यथा हि कृषीवलो बीजक्षणसन्ततिजः कोऽपि क्षणभेदोऽङ्कुरहेतुरिति ज्ञात्वा बीजं कुसूले निधत्ते, तथा क्षित्यादिसहभूर्बीजक्षणः कोऽपि हेतुरिति ज्ञात्वा स्वलक्षणसहभूश्च बीजक्षणः क्षित्यादिसहभुवो हेतुरिति च ज्ञात्वा स्वयमपि क्षणात्मको बीजक्षणं स्वसहजं कर्तुं प्रेक्षावानपि चेष्टत इति दिक्। अतो गुरूक्तमेव यत् परोपसंहृतम्—अक्षणिकादपि क्रमेणार्थक्रियेत्येवं साधारणत्वं हेतोः इति तदेव युक्तम्।

एवमनुमया तद्ग्रहाबाधाद्घटाद्यपि स्थिरम्; शब्दस्तु सुतराम्; घटादेर्ह्यवयवसंयोगासमवायिकारणकस्यासमवायिनाशे नाशशङ्का; सापि शब्दे

नोपपाद्य परोद्भावितासाधारणानैकान्तिकत्वं अभ्युपगतसिद्धान्तत्वशङ्कानिवृत्त्यर्थमनूद्य दूषयति—न च परोक्तप्रतिबन्दीत इति। निरपेक्षैककार्यकराणामपि स्वहेतुसन्निधापितानामन्योन्यसाहित्यं संजातम्, न सापेक्षत्वेन क्षणिकत्वपक्ष इति यत् क्षणिकवादिनोक्तं तत् अप्रेक्षापूर्वकारिणां कारणानामङ्गीकृत्य कृषीवलस्य प्रेक्षावत्त्वादनपेक्षकारणत्वपक्षे बीजवपनादिप्रवृत्तिर्न स्यात्, कुसूलनिहितबीज एव कृतकृत्यः स्यात् इत्यसाधारणत्वं परापादितमयुक्तम्, कुसूलनिधानप्रवृत्तिमभ्युपगम्य वपनादिप्रवृत्तिनिषेधासम्भवात्, प्रवृत्तिहेतोः प्रेक्षावद्विषये समत्वादित्यर्थः। कुसूलनिहितबीजावस्थोक्तिरुदासीनोपलक्षणार्था न तन्निधानाङ्गीकारार्थेति प्रेक्षावतां सर्वप्रवृत्त्यसम्भव एवाभिप्रेत इति शङ्काहानार्था दिगुक्तिः, पूर्वसञ्चितेच्छावासनानुवृत्त्या रागादिजप्रवृत्तेरनिवार्यत्वादित्यर्थः। तेन साधारणानैकान्तिकत्वमेव तद्दूषणं परैरप्युपसंहारकालेऽभ्युपगतं स्थिरमित्युपसंहरति—अतो गुरूक्तमेवेति। प्रकृतमुपसंहरति—एवमनुमया तद्ग्रहाबाधादिति। नन्वभ्युपगतप्रमाणाभावशीक्षावचनविरुद्धं

१. यद्यप्यनेककार्यं. क. २. बीजाकृती. क.

तद्विधानपेक्षे नास्तीति "अनपेक्षत्वात्" इति सूत्रम्। न चानपेक्षत्वासिद्धिः, शीक्षाक्षरैः "वायुरापद्यते शब्दताम्" इत्येवंविधैरित्याह सूत्रम् "प्रख्याभावात्" इति। प्रख्या ह्यचाक्षुषस्यापि वायोस्त्वचा, न शब्दप्रख्या तथेति न वायवीयता; शीक्षाक्षराण्युपचारतो वाय्वधीनत्वात्। वेदाक्षराणि "वाचा विरूपनित्यया" इति नित्यत्वे स्पष्टानि। न तु शीक्षा "वायुरापद्यते शब्दताम्" इति स्पष्टमनित्यतामाह।

अत्र पूर्वोत्तरपक्षसंक्षेपः—न यत्नाद्वर्णाश्रयात् व्यक्तिः खेन्द्रिये, खगुणस्य नित्यानावृतसन्निधेः। व्यक्तश्चैकखस्थो दूरस्थैरपि ज्ञायेत, सदा च ज्ञायेत, सर्वश्चैकस्थः सकृद्व्यज्येत एकस्थरूपसंख्यादिवत्। अथ श्रोत्राश्रयः संस्कारो व्यक्तिः, न सा दृष्टेन कोष्ठ्यैः[1] उन्मेषादिनेव चक्षुषः; सकृच्च संस्कृते श्रोत्रे सर्वधीः स्यात् घटार्थोन्मेषे पटादिधीवत्। एवमव्यक्त्यर्थो यत्नः कारकतयापेक्ष्यः[2]। प्रयोगश्च—वर्णा यत्नजन्याः, तदव्यक्तत्वे तदपेक्ष

नित्यत्वप्रयुक्तमनपेक्षत्वमिति शङ्कां परिहरति—न चानपेक्षत्वासिद्धिरिति। कथं प्रख्याभावोक्त्या तन्निरास इत्यत्राह—प्रख्या ह्यचाक्षुषस्यापीति। श्रोत्रातिरिक्तेन्द्रियग्राह्यता प्रख्या, तन्निवृत्त्युक्त्या स्पार्शनत्वनिवृत्तिः विवक्षिता; ततो न वायवीयः शब्द इति सूत्रार्थ इत्यर्थः। शिक्षावाक्यमौपचारिकार्थमित्याह—शीक्षाक्षराणीति। व्यक्तनित्यत्वार्थवेदानुसाराद्व्यक्तानित्यत्वार्थशिक्षागतिर्गौणी युक्तैवेत्याह — वेदाक्षराणीति। तत्त्वजिज्ञासुभिः सारमात्रस्य पृथगवधारणीयत्वात् तदर्थं पक्षद्वयसारं संगृह्याह—अत्र पूर्वोत्तरपक्षसंक्षेप इति। सर्वसाधारणधीसामग्रीसंपादनेन तावद्यत्नव्यङ्ग्यत्वं वर्णानां नास्ति। विधान्तराश्रयणेऽपि श्रोत्राश्रितत्वाविशेषात् सर्वपुरुषश्राव्यत्वम् पुनस्तिरोभावानुपपत्तिः एकाश्रितैकेन्द्रियग्राह्याणां रूपपरिमाणादिवत् सकृद्व्यङ्ग्यतापत्तिश्च स्यात्; श्रोत्रसंस्कारपक्षेऽपि प्रसिद्धप्रकारः संस्कारो दुर्लभः। सर्ववर्णसाधारण्यापत्तिश्चानिवार्येति बाधकैरव्यङ्ग्यत्वे यत्नानन्तरोपलब्धत्वात्कार्यतयैव कुलालयत्नानन्तरोपलब्धघटवदिति पूर्वः पक्षः। तत्र वायवी-

१. संस्कारात्. ख. २. तयैवापेक्ष्यः. क.

वेद्यत्वात् कुलालयत्नापेक्षवेद्यघटवत् । यत्नजत्वे वायवीयता मन्दा त्वचा बधिरवेद्यत्वापत्तेः । न चाभिभूतेतरवेद्यता, श्रोत्रार्हतयेन्द्रियार्हत्वानभिभूतेः । अतो यत्नजः खगुणः । किञ्च यत्नभेदे वर्णनानात्वधिया यत्नजत्वम्; हेतुभेदे हि कार्यं नाना, न व्यञ्जकदीपादिभेदे व्यङ्ग्यं नाना । एवं यत्नमृदुत्वामृदुत्वतो वर्णमृदुत्वामृदुत्वधिया यत्नजत्वम्; न व्यङ्ग्ये तथात्वम् । तन्न, स्पष्टे तद्ग्रहे व्यञ्जकभेदमास्थाय तद्धीव्यवस्था; कोष्ठ्यवायोस्तत्तत्स्थानसंयोगान्यत्वे व्यञ्जकान्यतया नैकस्थानेकधीः सकृत्; व्यञ्जकैक्ये हि सा सकृत् । न चैकस्थैकेन्द्रियग्राह्येषु सकृद्धिया व्यञ्जकैक्यनियमान्न तद्भेद इति वाच्यम्; यतः सकृद्धिया व्यञ्जकैक्यं दृष्टम् । यत्र त्वसकृद्धीः तत्र

यत्वं मन्दमिति आकाशगुणतैवाभिमता । यत्ननानात्वाद्वर्णनानात्वधीर्यत्नमृदुत्वामृदुत्वयोः मृदुत्वामृदुत्वधीश्च तत्कार्यत्वहेतुरिति ।

राद्धान्तसारस्तु—प्रत्यभिज्ञादाढर्याद्कार्यत्वे व्यञ्जकभेदाश्रयणेनोपलब्धिव्यवस्था नेया । स्थानाभिघातसंयोगसंस्कारभेदात् कोष्ठ्यवायोः व्यवस्थया एकैकव्यञ्जकत्वाश्रयणान्नैकव्यङ्ग्यरूपादिसाम्यापत्तिः ।

नन्वेवमेकाश्रितैकेन्द्रियवेद्यानामेकव्यङ्ग्यत्वव्याप्तेः व्यवस्थितानेकव्यङ्ग्यत्वाश्रयणमयुक्तमिति शङ्कामपनयति—न चैकस्थैकेन्द्रियग्राह्येष्विति । सकृत्प्रतीत्युदयकल्प्यत्वात् तत्र तदैक्यस्य असकृद्धीविषये तत्प्राप्त्यभावात् व्याप्तिबलस्य चोपाधिशङ्कापहतत्वादिति । नन्वेकाश्रितैकेन्द्रियग्राह्यत्वैकहेतोः प्रकृतस्य कथं हेतुद्वयं विषयव्यवस्थयोपाधितयोच्यते? साध्यव्यापकत्वं चोपाधिलक्षणं तद्भिन्नैरिष्यते; तच्च द्वयानर्हमिति कोऽयमौपाधिकत्वप्रलापः? उच्यते — साध्यव्यापकत्वं तावत्तद्व्यापकहेतुं प्रत्युपाधित्वनिश्चयोपयोगेनोक्तम् । प्रकृतहेतुसाम्यमात्रं साधनाव्यापकत्वयुक्तं संशयोत्थापनोपयोगीति इह साम्यमेवापेक्षितम् । घटादेरपि च स्वाश्रितरूपादिना सहैकव्यङ्ग्यत्वं साध्यमस्त्येव, न त्वेकाश्रितत्वमिति हेत्वन्तरायत्तैव तत्र साध्यानुगतिः पूर्ववादिनाप्यभ्युपेयेतेति द्वया-

१. वेद्यघट घट. क. २. अभिभूतेरवेद्यता. ख.

व्यञ्जकाभेदो न दृष्ट एव । व्याप्तेश्चानौपाधिकत्वनिश्चयात् स्थिरता । अत्र च किमेकेन्द्रियग्राह्यतया घटादेस्तद्गतरूपादेश्चैको व्यञ्जकः, उत रूपिद्रव्यतया घटादेस्तत्समवायितया रूपादेरित्यनिश्चितव्याप्तिकमेकेन्द्रियग्राह्यत्वं न व्यञ्जकैक्ये शक्तम् । ननूभयमविनाभूतं व्याप्यमित्येकेन्द्रियग्राह्यत्वमेकमपि व्यञ्जकैक्ये शक्तम् । न हि धूमे व्याप्ये भस्माव्याप्यम् । अतोऽसत्यपि धूमे भस्माग्निधीशक्तमेव । तन्न; अत्र ह्येकं व्याप्यं रूपिद्रव्यतद्रूपाद्यात्मकम्; तत् किमनेनैवाकारेण उतैकेन्द्रियग्राह्यत्वेनेत्यनिश्चयः । ननु धूमः कार्यत्वेनापि व्याप्तः संयोगित्वेनापि, तथेहाकारद्वयेनास्तु, तन्न; धूमे हि सम्बन्धद्वयात् द्विधा व्याप्तिः; इह त्वेक एवैकाश्रयत्वसम्बन्ध एकव्यङ्ग्यत्वस्य रूपिद्रव्यतद्रूपादेश्च । सम्बन्धस्य नियतताात्मिका व्याप्तिरेकैव, तत्र विशेषा-

पेक्षयोपाध्युक्तिरिह नानुपपन्नेत्यभिप्रायः । तत्समवायितया रूपादेरित्येवमत्रैकेन्द्रियग्राह्यत्वसहितयेति शेषः; अनुज्ञातः संप्रतिपद्य तदनुक्तिरिति । यदि पुनर्वायुगुणापेक्षयाप्येकव्यङ्ग्यत्वं प्रसिद्धं स्यात् तदा रूपिद्रव्यपदस्थानेस्पर्शवद्द्रव्यपदप्रक्षेपेण समाधिर्वाच्यः, प्रदर्शनपरत्वात्तस्य प्रस्तुतत्वात्तदुक्तिः । ननूपाधिसंशयो न व्याप्तिनिश्चयविरोधी, द्वयोरपि धूमभस्मनोरिव तुल्यतया व्याप्ति सम्भवादिति चोदयति— ननूभयमविनाभूतं व्याप्तमिति । परिहरति—तन्न, अत्र ह्येकं व्याप्यमिति । एकव्यङ्ग्यतया निश्चितानां निजाकारनिरूपितानामेकेन्द्रियग्राह्यत्वोपाधिनिरूपितानां वा तन्निश्चय इत्यस्ति संशय इत्यर्थः । नन्वाकारद्वयेनापि व्याप्यत्वं धूम एव दृष्टमिति इहापि द्वयदर्शने द्वयेनाप्यस्तु, न संशयार्हतेति चोदयति— ननु धूमः कार्यत्वेनापि व्याप्त इति । परिहरति—तन्न धूमे हि सम्बन्धद्वयादिति । सम्बन्धधर्मो हि व्याप्तिः सम्बन्धिसत्तामात्रानुगामित्वरूपा सम्बन्धभेदे भेदार्हा; सम्बन्धाभेदे तन्निरूपकभेदे च सति केनाकारेणेतिसंशयादविनिश्चितव्याप्तिकमेकेन्द्रियग्राह्यत्वं स्वतोऽशक्तं व्यञ्जकैक्यार्पणे; न प्रत्यक्षपूर्वकानियतधीलिङ्गकव्यञ्जकभेदानुमान-

१. सकृद्दिया व्यञ्जकैक्यं दृष्टम्. इत्यधिकं दृश्यते. क.
२. शक्यम्. ख.
३. मपि नाभूतं व्याप्येत्येके. क.

नध्यवसानं केन स्वभावेन नियततेत्यशक्तमेकेन्द्रियग्राह्यत्वं व्यञ्जकैक्ये। न च स्थिरवाय्वपनय एव श्रोतस्य व्यक्तिरिति सर्ववर्णधीः स्यादिति वाच्यम्; यतो यत्नकोष्ठ्यवायुभेदात् स्थिरवायुविभागरूपव्यक्तिभेदो धीव्यवस्थयोपेयः। न च स्थिरवाय्वपनयो व्यक्तिः, किन्तु पूर्वभाविकोष्ठ्यवायुसंयोग एव। भाष्ये तु स्थिरवायुबाधो वायुवेगनाशार्थ उक्तः। सर्वैः सर्वदा च धीर्न युक्ता; एकमपि खं श्रोत्रतया भिन्नं व्यक्तमिति न सर्वेषां धीः। कोष्ठ्यवायुसंयोगक्षणिकतया न सर्वदा धीः। नानात्वधीर्भ्रान्तिरित्युक्तम्। मृदुत्वामृदुत्वे च नादतो भ्रम एवेत्यादि न्यायशुद्धावुक्तम्॥

बलबाध्यत्वमात्रमित्यर्थः। ननु सत्यामप्युपाधिशङ्कायामभ्युतव्यञ्जककार्यसामर्थ्यात् सर्वव्यक्तिरनिवार्येत्याशङ्क्य पूर्वोक्तानुसारेणैव परिहारमाह—न च स्थिरवाय्वपनय एवेति। परिहारान्तरं चाह— न च स्थिरवाय्वपनयो व्यक्तिरिति। भाष्ये तदपनयोक्तिस्तत्कार्यत्वाविवक्षयापि कोष्ठ्यवायुवेगनाशहेतुविवक्षयाप्युपपद्यत इति न कार्यार्थेत्याह—भाष्ये तु स्थिरवायुबाध इति। श्रोत्रसंस्कारपक्षे नभसः श्रोत्रत्वादेकत्वाच्च तस्य सर्वश्रोत्रसंस्कारापत्तेः सर्वपुरुषाणां शब्दश्रवणं स्यात्, पुनस्तिरोभावश्च हेत्वभावान्न स्यादिति पूर्वोक्तदूषणं परिहरति—सर्वैः सर्वदा च धीरिति। दूषणान्तरं च परिहृतमित्याह—नानात्वधीर्भ्रान्तिरिति।

इति शब्दनित्यताधिकरणम्॥

---

१. गात्. क. २. नानार्थ. क.

उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात्॥ २४॥

शब्दे नित्ये तदनित्यतया समयादर्थधीरिति निरस्ते वृद्धव्यवहारादर्थधीर्वाच्या। न चालौकिके वेदार्थे प्रयोज्यवृद्धव्यवहारं हानोपादानात्मकं बालो बुद्ध्वा तेन शब्दशक्तिमनुमाय वेदार्थं बोद्धुमलम्। अतो नाकृतकसम्बन्धादपि वेदप्रामाण्यम्। प्रयोजकवृद्धेन च वैदिकः पदसमुदायो व्यवहारे न प्रयुक्तः; ततोऽपि न तदर्थे बालव्युत्पत्तिः। नन्वावापोद्धाराभ्यां पदानां पदार्थेषु शक्तिः, पदार्थानां च वाक्यार्थे; वेदे च त एव पदपदार्था इति लोकव्युत्पत्तितो वेदादप्यर्थधीः। यदि तु समुदायादर्थधीः स्यात्, तदैकपदोद्धारेऽर्थधीरेव न स्यात् पदादिव वर्णोद्धारे। तन्न; पदार्थेभ्यो हि वाक्यार्थविशेषार्थमाकाङ्क्षासन्निधियोग्यतोपाध्याश्रयणं वृद्धव्यवहारात्;

उत्पत्तौ। ननु शब्दतदर्थसम्बन्धनित्यतामङ्गीकृत्य, तथापि चोदनाप्रामाण्यं न स्यादित्याक्षेपे को हेतुरित्याशङ्क्य अलौकिके व्युत्पत्त्यसम्भव इति हेतुं विवृणोति— शब्दे नित्ये तदनित्यतयेति। व्युत्पत्त्यसम्भवोऽपि नास्ति; वाक्यार्थ एव ह्यलौकिक इष्टो वेदे, न पदार्थोऽपि, पदपदार्थविषया च व्युत्पत्तिरावापोद्धारव्यवधानतः, पदार्थेभ्य एव वाक्यार्थधीरिति नाक्षेपावकाश इति चोदयति— नन्वावापोद्धाराभ्यामिति। पदसमुदायस्य वाक्यार्थे व्युत्पत्तिरिति शङ्कां विपक्षे बाधकोक्तिमुखेन परिहरति— यदि तु समुदायादर्थधीः स्यादिति। तत्पक्षे समुदायस्यैव शक्तिग्रहणमिति पदेभ्यः पदार्थधीर्न स्यादित्यर्थः। परिहरति— तन्न पदार्थेभ्यो हीति। यदि पदनिमित्ता पदार्थधीरेव व्युत्पत्त्यपेक्षा न पदार्थनिमित्ता वाक्यार्थधीः, तदा न स्यादनुपपत्तिः; विशेषान्वयरूपवाक्यार्थबोधार्थं ह्याकाङ्क्षासन्निधियोग्यतोपाधिस्वीकारः पदार्थानामपि व्युत्पत्तिमूल एवेत्यस्त्येव तदपेक्षा, तथापि तदुपाधिबलादेव चोदनार्थधीरप्यस्त्विति न शङ्कनीयम्, पदसमुदायस्य प्रयोज्यवृद्धप्रवृत्त्यनुमिततदीयविशिष्टार्थधीकरत्वं निश्चित्य

१. तत्पदार्थेभ्यः क.

व्यवहारे च यत्र प्रयुक्तः समुदायो यः तत्पदपदार्थशक्तिधीर्मानान्तरगम्य एवार्थे, न वैदिके। न च सामान्यतोदृष्टम्—वेदे पदार्थाः स्वान्वयनिमित्तम्, पदार्थत्वात् लोकवाक्यपदार्थवदिति। सामान्यतोऽप्यन्वयनिमित्तत्वे विशेषार्थमाकाङ्क्षादि व्यवहारत एव वाच्यम्। एवं च वैदिकोऽन्वयभेदो न सिद्ध्येत्। मानान्तरार्हे च वेदार्थे वाक्यत्वादिति पौरुषेयत्वानुमा, शक्यसङ्केते चार्थे चैत्रादिदृष्टसङ्केतानुमा इति सम्बन्धो नौत्पत्तिकः। न च सङ्केतव्युत्पत्तये कश्चिदसङ्केतितः शब्द आस्थेयः। सङ्केतव्युत्प-

तत्प्रकारतयैवावापोद्धारभेदावसिततत्स्थपदार्थानां तदुपाधितो विशिष्टान्वयधीकरत्वशक्तिः पदानां पदार्थधीकरत्वशक्तिश्च निश्चीयत इत्यनवगतसमुदायप्रयोगवैदिकपदानां तदर्थानां च तत्तच्छक्त्यसिद्धेः द्वयधीरपि न सिध्येदित्यर्थः। ननु न प्रतिवाक्यं पृथक् पृथक् पदसमुदायप्रयोगदर्शनापेक्षं पदार्थानामन्वयधीशक्त्यवधारणम्, लौकिकावधारणस्यैव सामान्यतोदृष्टानुमानव्यवधानेन वैदिकव्यापित्वसम्भवात्, तेन वेदार्थधीर्युक्तैवेत्याशङ्क्य न व्यापितेति परिहरति—न च सामान्यतोदृष्टमिति। उपाधिनिवेशाधीनो हि विशेषान्वयावगमः; तन्निवेशश्च व्युत्पत्तिमात्रप्रयुक्तो नानुमानविषयः; तत्प्रयुक्तश्च समुदायप्रयोगावधारणपूर्वक इति न वैदिकव्याप्तिरित्यर्थः। ननु वेदेऽपि पदतदर्थानन्यत्वाल्लोकदृष्टतदुपाध्युपस्थापितान्वयविशेषे पदसमुदायप्रयोगमप्यनुसन्धायोपाधिसामर्थ्येनैव पुनस्तमवधारयेदिति स्यात् वैदिकव्याप्तिरित्याशङ्क्य लोकसिद्धार्थानां लोकप्रसिद्धान्वयधीकरत्वे वाक्यार्थस्य मानान्तरार्हता दुर्निवारेति वेदस्यापि पौरुषेयत्वापत्तिरिति मानान्तरप्रमितार्थतैव वेदस्य सत्यार्थत्वेऽपि इति विवक्षितानपेक्षत्वक्षतिरिति दूषयति—मानान्तरार्हत्वेऽपीति। सम्बन्धस्य चौत्पत्तिकत्वमुक्तं न सिद्ध्येदित्याह—शक्यसङ्केते चेति। ननु सामान्यादिविषयसङ्केतस्य पूर्वसिद्धतद्वाचिशब्दैरेव शक्यत्वाद्यव्यवहारप्रसिद्धशब्दापेक्षत्वान्न सङ्केतमात्राधीनत्वं शब्दार्थसम्बन्धस्य स्यादित्याशङ्क्य परिहरति—न च सङ्केतव्युत्पत्तये कश्चिदिति। व्यवहारपरम्परयेव सङ्केत-

१. पदवाक्यार्थधी. ख.
२. Omitted च. क.
३. च वैदिकःस्वयंभेदः क.
४. सङ्केतान्तरपूर्वकव्यवहारव्यु. ख.

न्नानां सङ्केतोऽनादिपरम्परयास्तु। एवं चान्यत्र दृष्टं साध्यसाधनत्वमन्यत्रारोप्य वक्तुं वेदाः प्रणीताः। न च कार्यान्वयिनः पदार्था लोके, वेदेऽपि कार्य इत्येवं लोकत एव वेदार्थे व्युत्पत्तिर्वाच्या। मानान्तरगम्ये हि कार्ये लोके सङ्गतिग्रहः, नान्यत्र। न चानुबन्धान्यत्वाद्वेदे कार्यान्यत्वम्; अलौकिके हि कार्ये स्थितेऽनुबन्धभेदादवान्तरभेद इति व्यवहारव्युत्पत्त्या मानान्तरगम्यो वेदार्थ इति गहनेयं न्यायपदवी। एवं जैमिनिमते वेदास्वातन्त्र्यात् सूक्तं शब्दब्रह्मविद्भिः "एक एव शब्दो बहुधा प्रकृति-

परम्परया व्युत्पत्तेर्न व्यवहारसिद्धशक्त्यपेक्षः सङ्केत इत्यर्थः। ननु लोकसिद्धयोग्यान्वयपरत्वं न वेदार्थस्य मानान्तरार्हत्वापादकम्, अग्निहोत्रहोमादेः स्वर्गादिसाधनत्वस्य मानान्तरानर्हत्वात्, तदनर्हत्वे च पौरुषेयत्वानुमानं सङ्केतानुमानं च कथमापाद्यत इत्याशङ्क्य मानान्तरार्हतोक्त्या तत्सापेक्षतैव विवक्षिता, न वेदार्थे तत्सत्त्वैवेति वस्तुतः पौरुषेयत्वद्वारमसमर्थत्वमेव फलतीति नोक्तानुमानहतिरित्याह—एवं चान्यत्र दृष्टं सध्यसाधनत्वमिति। ननु सविधिकवाक्ये साध्यसाधनान्वयस्य वाक्यार्थत्वे लोकप्रसिद्धे सत्येवं भवेत्, कार्यान्वय एव तु तत्र प्रसिद्धः; वेदार्थस्यापि च कार्यत्वाविशेषात्तदन्वयोऽन्यपदार्थानां लोकप्रसिद्ध एव स्यात्। स्वरूपेण त्वलौकिकत्वादनपेक्षत्वं च वेदस्येति नोक्तदोष इति शङ्कां लोकव्युत्पत्त्यनुवृत्त्युपगमेन अनपेक्षत्वक्षतिरहेयेति निरस्यति—न च कार्यान्वयिनः पदार्था इति। लोकव्युत्पत्तेः कार्यविषयत्वोपगमेऽपि मानान्तरसिद्धकार्यार्थतैव व्युत्पत्त्युपजीवित्वे; तदनादर एवालौकिककार्यार्थतयानपेक्षत्वमुपेयमित्यर्थः। नन्वनुबन्धाधीनमेव वेदे कार्यस्यान्यत्वम्, न स्वत एवेति पदार्थव्युत्पत्तिर्लौकिकी वेदोपजीव्या; तदनपेक्षत्वं चानुबन्धभेदान्यत्वकृतमिति शङ्कां निरस्यति—न चानुबन्धान्यत्वादिति। लौकिककार्यापेक्षयानुबन्धभेदस्य कार्यभेदकत्वं नोपेयते, अनपेक्षत्वस्थित्युत्तरकालभावित्वात् तदधीनभेदस्येत्यर्थः। व्युत्पत्त्यसम्भवमूलानपेक्षत्वाक्षेपमुपसंहरति—इति व्यवहारव्युत्पत्त्येति। तदनुपपत्त्युपजीवी स्फोटपक्षावतार इत्याह—एवं जैमिनिमते वेदास्वातन्त्र्यादिति। कथं तत्पक्षे स्वातन्त्र्यनिर्वाह इत्य-

प्रत्ययपदविभागविकल्पारोपितभेदो लोके वेदे च वाक्यार्थतया विवर्तते" इति। तेन यद्यपि वेदार्थे न सम्बन्धग्रहः, तथापि वेदवाक्यमर्थतया विवर्तते। प्रत्यक्षवर्णपदभेदेऽप्यपूर्वधीकार्यानुगुणमेकमनुमितं भेदैरुपप्लुतमित्युक्तम्। अस्तमितव्याकरणोक्तप्रकृत्यादिविकल्पं स्वयं ब्रह्म प्रकाशत इति हि शाब्दाः। न च लोके श्रोत्रग्राह्ये शब्दशब्दप्रसिद्धिः; लोके हि गौरिति शब्दो गौरिति धीर्गौरित्यर्थ इति युगपदेकाभिधाननिर्देशाच्छब्दात्मक-

त्राह—तेन यद्यपि वेदार्थ इति। स्वयमर्थतया विवर्तमानः शब्दो नार्थसम्बन्धज्ञानमपेक्षते; तदपेक्षया च तज्ज्ञापकमानापेक्षत्वात् स्वातन्त्र्यहानिरिति तत्पक्षे न तद्धानिरित्यर्थः। ननु शब्दतत्त्वं वर्णादिरूपतया प्रत्यक्षसिद्धमिति तद्विरोधात्तदन्यत्तत्त्वं विवर्तत इति न घटत इत्यत्राह—प्रत्यक्षवर्णपदभेदेऽपीति। अत्रापूर्ववाक्यश्रवणेऽपि ह्यर्थधीकार्यं प्रत्यक्षमिति तदन्यथानुपपत्त्यानुमितमेकं काल्पनिकवर्णपदभेदाच्छादितमर्थतया भातीति न तद्विरोध इत्यर्थः। नन्वेकरूपशब्दतत्त्वस्यानुमेयतोक्तिस्तदापत्त्या मोक्षाङ्गीकारविरोधिनीति कथमप्रत्यक्षत्वं तदुक्तमुच्यत इत्याशङ्क्य तद्विरोधिभेदप्रत्ययस्तमयोत्तरकालं तद्ब्रह्मरूपेण प्रकाशत इत्युपगमात् तदापत्त्या मोक्षोपपत्तिः। ततः पूर्वं स्वसाधकार्थविवर्तसहायप्रकृतिप्रत्ययादिभेदधीतिरोधानान्न साक्षाद्भातीत्युपगमान्न विरोध इत्याह—अस्तमितव्याकरणोक्तेति। ननु श्रोत्रग्राह्यवर्णमात्रविषयशब्दतत्त्वप्रसिद्धिरनुमिततत्त्वान्तरमपि बाधत इत्याशङ्क्य तत्प्रसिद्धिरेवासिद्धेत्याह—न च लोके श्रोत्रग्राह्य इति। सर्वेऽपि हि शब्दाः स्वरूपस्वार्थतद्धीनिर्देशसाधारणा एव लोके दृश्यन्ते; यौगपद्यं च तत्रान्योन्यनिरूप्यतया पृथक्त्वायोगात् सिद्धमित्येकैकपदप्रयोगेऽपि त्रयप्रतिपत्त्यहानात् गोशब्दादेरिवैकैकव्यक्तिनिष्ठे प्रयोगेऽपि साधारणधीबलादनुगतार्थतैव तेषामिति तत्स्वरूपार्थशब्दशब्दस्यापि तत्सर्वानुगतार्थत्वधिया न वर्णमात्रार्थतेत्यर्थः। युगपदिति विशेषणादक्षादिष्वेकाभिधाननिर्देशेऽप्यनुगतैकार्थत्वाभावो न व्यभिचारावह इत्युक्तम्। यौगपद्याभावस्तत्र प्रसिद्ध एवेत्याह—

१. तया च. क. २. रिति चार्थः क.

ताधीः। अनेकार्थोऽक्षादिर्न युगपन्निर्देश्यो दृष्टः। एवं च लोकतः कार्यतश्चैकतावस्थिताऽवतात्त्विकं वर्णादिभेदभानम्। एवं च कल्पितविभागाश्रयव्युत्पत्तये वृद्धव्यवहारापेक्षया वेदार्थधीरदुष्टा। तात्त्विकव्युत्पत्तौ हि मानान्तरावेद्यधीर्न स्यादेव। अतात्त्विकव्युत्पत्तेर्बीजं बहुधा—पदमाद्यम्, वाक्यम्, सर्वाणि पदानि, आख्यातं वा इत्यादि। अतोऽप्युपप्लुतता।

अनेकार्थोऽक्षादिरिति। नन्वेवमप्यबाधितवर्णादिधीबलाच्छब्दाद्वैतसिद्धिर्नेत्याशङ्क्य तन्मिथ्यात्वावसायिहेतुद्वयमित्याह — एवं च लोकतः कार्यतश्चेति। वर्णभेदभानं तावदुच्चारणश्रोत्रेन्द्रि[illegible]कृतम्; पदानां पदार्थानां चान्योन्यभेदभानमर्थनिष्ठव्युत्पत्तिभेदार्थोपस्थापकेन्द्रियादिकृतम्, निर्देशानुगतैक्यभानं शब्दस्वभावमात्रकृतम्, अर्थनिर्देशकत्वसिद्धौ स्वनिर्देशे धीनिर्देशे च व्युत्पत्त्यन्तरानपेक्षत्वात्। एवं चोपाध्यनपेक्षनिर्देशसामर्थ्यसिद्धस्वरूपमात्रं सर्वानुगतं तत्त्वम्, तदन्यत् तत्तदुपाधितो भातीत्यतात्त्विकं युक्तम् मणिकृपाणदर्पणाद्युपाध्यनुगतपरिमाणाद्यन्यत्ववत्। एवमप्रतिपन्नापूर्ववाक्यार्थधीकार्यं च विवर्तापेक्षमित्युक्तमिति शाब्दसिद्धान्तः सुस्थ एवेत्यर्थः। नन्वपरिहार्यैवास्मिन्नपि पक्षे वृद्धव्यवहारापेक्षेति साम्यापत्तिरित्याशङ्क्य नापूर्ववाक्यार्थधीविरोधिनी सेति विशेषमाह—एवं च कल्पितविभागाश्रयेति। मेयानन्तर्भूतोपायसिद्ध्यर्था तदपेक्षा, न मेयाश्रयतयैव मित्युत्पादकतयेति न दोष इत्यर्थः। तदङ्गीकार एव को हेतुरित्याशङ्क्यान्यथापूर्वार्थमित्यसिद्धेरेवेत्याह—तात्त्विकव्युत्पत्तौ हीति। नन्वतात्त्विकव्युत्पत्तेः स्वरूपमेवासिद्धम्, मितिजनकत्वावधारणरूपत्वाद्व्युत्पत्तेरित्याशङ्क्य निरपेक्षजनकत्वाभावेऽपि अखण्डवाक्यनिरूपकतया कथञ्चित्तज्जनकत्वान्न निर्बीजा व्युत्पत्तिरिति परिहरति—अतात्त्विकव्युत्पत्तेर्बीजमिति। वाक्यतदर्थयोरेकत्वसिद्धेः पदतदर्थानां च भेदप्रसिद्धेः कथञ्चिदव्यवस्थिता च व्युत्पत्तिरित्यतोऽपि हेतोरतात्त्विकत्वं व्युत्पत्तेः सिद्धमित्याह—अतोऽप्युपप्लुततेति। ननु वाक्यवाक्यार्थभेदस्याप्येवमतात्त्विकत्वाभ्युपगमात् तद्भेदापेक्षं प्रामाण्यमपि श्रुतेर्विहन्येतेत्याशङ्क्य विवक्षितमोक्षात्मकार्थस्य तात्त्विकत्वान्न प्रामाण्यप्रच्युतिरि-

१. तावस्थितातावतात्विकम्. क.

अतत्त्वोपायतोऽपि तत्त्वभूतमोक्षफलत्वात् श्रुतेः प्रामाण्यम् । न वैदिकी कल्पना प्रत्यवायाय । भेदातात्त्विकत्व एव विनियोगाधीनो मन्त्रार्थः ; तात्त्विकत्वे हि नियतार्थतैव । विनियोगात्तु मन्त्रार्थे "उणादयो बहुलम्" इत्यादि युक्तम् । निरुक्तव्याकरणाद्यङ्गविद्याश्च युक्ताः । भेदे तु लोकत एवार्थे व्यर्थता । लौकिकानां वैदिकानां छन्दसि भाषायां निगम इति चातत्त्वे भेदे युक्तम् । व्याकरणमतभेदश्च—अस्ति सकारमात्रं पठन्ति, केचित् असभ्रुवीति ; अतत्त्वे भेदे युक्तम् । अतत्त्वे भेदे[१] चैकादशद्वादशकपालमेकं कर्म ; सर्वशाखास्वेकं कर्म ; तत्त्वे एकवाक्यार्थधीगम्यमेकं प्रमाणम्, तस्मिन्नानापदार्था-

त्याह–अतत्त्वोपायतोऽपीति । ननु भेदोपजीविमित्युत्पत्तेः कल्पनारूपत्वे कल्पनायाः प्रत्यवायकरत्वान्मोक्षफलत्वमेवायुक्तमित्याशङ्क्य वेदतात्पर्यवती कल्पना पुरुषार्थफला, नेतरेति विशेषमाह — न वैदिकी कल्पनेति । मीमांसकैरपि मन्त्राणां विनियोगानुसारेणानवस्थितार्थतोपगमादतात्त्विकत्व एव तदुपपत्तेः स्वरूपतोऽतात्त्विकत्वं वैदिकस्यापि युक्तमिति सर्वसंमतमित्याह — भेदातात्त्विकत्व एवेति । तन्निर्वाहकोपगतानवस्थितप्रत्ययानुशासनाच्च तदार्ढ्यमित्याह — विनियोगात्तु मन्त्रार्थ इति । वेदाङ्गत्वप्रसिद्धिश्चैवमेव घटत इत्याह — निरुक्तेति । निरुक्तव्याकरणाद्यङ्गानां प्रमाणान्तरसिद्धार्थानुवर्तित्वे मानान्तरवशतया न स्वाङ्गवशतैवेत्यर्थः । लौकिकवैदिकादिविभागश्चानुशासने मानान्तरसिद्धभेदाङ्गीकार एव युक्त इत्याह—लौकिकानां वैदिकानामिति । धातुप्रत्ययादेरनियतरूपपाठश्च भेदस्यातात्त्विकत्वद्योतक इत्याह — व्याकरणमतभेदश्चेति । मानान्तरगम्यभेदस्य काल्पनिकत्व एवैकादशकपालपुरोडाशजन्यं द्वादशकपालजन्यं चैकमेव कर्मेत्युपगमो युक्तः, शब्दविवर्तरूपस्य तदस्पर्शात् ; तत्स्वरूपत्वात्त्वन्यथा न युक्त इत्याह — अतत्त्वे भेदे चैकादशेति । सर्वशाखाविहितकर्मैक्योपगमश्चैवमेवेत्याह — सर्वशाखास्वेकमिति । तस्यान्यथानुपपत्तिमाह — तत्त्व एकवाक्यार्थेति । मानान्तरगम्यभेदानुवर्तिनि हि शास्त्रे तद्गम्यकर्मात्मकार्थैक्ये तत्प्रमितिकार्यैक्यकृत-

१. Omitted भेदे. ख. क.

न्तर्भावेण नानात्वमित्येकत्वनानात्वविरोधः। समासे [2]शिष्टेऽप्यवान्तरार्थभेदादेव वाक्येऽपि प्राप्ते वावचनम्, अतत्त्वे समासवाक्ययोरर्थे युक्तम्। वर्णप्रत्यभिज्ञाने[3]ऽपि नामाख्यातोपसर्गादिभेदः विलम्बते प्रलम्बते विप्र इति न स्यात् तत्त्वे। वर्णप्रत्यभिज्ञानेऽपि भवति—इति सप्तम्याख्यातसंबोधनभेदो न तत्त्वे। वर्णात्मकपदप्रत्यभिज्ञानेऽपि राज्ञः पुरुषस्य द्विपा इति द्वयेन द्विपान्वयो राजपुरुषस्य द्विपा इति पुरुषमात्रान्वयो न तत्त्वे; उपगोरिदमपत्यस्येदमिति द्वयमिदमर्थान्वयि औपगवस्येदमित्यपत्येन न तत्त्वे। करणं करणेनेति पदार्थयोः प्रत्यभिज्ञानेऽपि तृतीयोत्पत्तिर्न चेति न तत्त्वे। सुबन्तो धातुश्चैकोऽश्वोऽश्वतीति न तत्त्वे। अवर्ण एक एवोपाधेरष्टादशधा नानार्थधीहेतुर्न स्यात्; तत्त्वे ह्येकत्वादस्य सदा सर्वार्थधीः सर्वाधीर्वा। उपाधिर्भिर्ह्रस्वदीर्घप्लुताः प्रत्येकमुदात्तानुदात्तस्वरिता नव सानुनासिकनिरनुनासिकतया

मेकशास्त्रत्वं स्यात्। तत्र च शास्त्राभेदप्रयोजकपदार्थभेदानुप्रवेशस्यावश्यकत्वात् तद्भेदाच्छास्त्रतदर्थयोश्च भेदापत्तेरेकत्वनानात्वयोर्विरोधाद्विवर्तापेक्षयैव शास्त्राभेदोक्तिरित्यर्थः। वाक्यसमासविकल्पार्थस्मृतिश्चातात्त्विकशास्त्रोक्तभेदवश्ये वेदार्थेऽर्थवती, न लौकिकभेदवश्य इत्याह—समासे शिष्टेऽपीति। काल्पनिकभेदानभ्युपगमे भेदाभेदयोर्वर्णभेदाभेदमात्रावधिकत्वात्तदभेदेऽपि नामाख्यातोपसर्गनिपातभेदोपगमः, सप्तम्यन्तसम्बोधनाख्यातपदरूपभेदोपगमश्चाशक्य इत्याह—वर्णप्रत्यभिज्ञानेऽपीति। पदावस्थान्ते च वर्णाभेदे पदार्थान्वयप्रकारभेदोपगमश्च समासे तद्धिते चाशक्य इत्याह—वर्णात्मकपदप्रत्यभिज्ञानेऽपीति। पदपदार्थान्ते वर्णाभेदे च विभक्तिविशेषोत्पत्त्यनुत्पत्तिभेदोपगमो नामाख्यातभेदोपगमश्चाशक्य इत्याह—करणं करणेनेति। वर्णैक्येऽप्यौपाधिकभेदापेक्षार्थभेदोक्तिश्चाशक्येत्याह—अवर्ण एक एवेति। स्पष्टे च द्रव्यगुणभेदे शब्दैरभेदोक्तिरप्यतात्त्विकोक्त्यनुपगमे न शा-

१. वननानात्वं. क.
२. Added वि. ख.
३. ज्ञाने नामा. ख.
४. तत्त्वेऽप्येक. क.
५. उपाधिः ह्रस्व. ख.

अष्टादश। भिन्नेन्द्रियादिना भेदेन भातेऽपि गुणद्रव्येऽपि शब्दादेकताभानम्—सुरभि चन्दनम् इत्यादि शब्दविवर्तादेव। एकस्य प्रादेः प्रयातीति प्रकर्षार्थता प्रतिष्ठत इति विपरीतार्थता प्रलम्बत इत्यनर्थकत्वमतत्त्वे;तत्त्वे च पदार्थतो वाक्यार्थे न निर्णयः। प्रयोगे लम्बत इत्यर्थवदिति नानर्थकतेति नः लम्बत इत्यत्र व्युत्पत्तौ प्रलम्बत इत्यतोऽर्थधीर्न स्यादित्यनर्थकतैव। अनर्थकत्वे चैकवाक्यता विभागधीश्च नः किन्तु प्रलम्बत इत्यत्र वर्णाधिक्यम्। अतत्त्वे सर्वं युक्तम्। प्रकृत्यादिविकल्पस्तु व्याकरणपरम्परानादितयोक्तः। वेदान्तैरपि ब्रह्म ज्ञेयमित्येवं-

क्येत्याह—भिन्नेन्द्रियादिनेति। तात्त्विकवर्णाधीने चार्थाभिधाने नानाविधवृत्तिरेकस्योपसर्गस्य क्वचिदानर्थक्यं च न घटत इत्याह—एकस्य प्रादेरिति। न च प्रधानभूतवाक्यार्थानुसारेण वृत्तिव्यवस्था तत्परपदपदार्थानां स्यादिति शङ्कनीयम्, तत्पुरःसरत्वाद्वाक्यार्थधियः प्राक् तदानुकूल्यप्रतीत्ययोगादित्याह—तत्त्वे च पदार्थतो वाक्यार्थ इति। आनर्थक्यासिद्धिमाशङ्क्य परिहरति—प्रयोग इति। आनर्थक्ये चैकार्थ्याभावादेकवाक्यत्वासिद्धिर्वाक्यपदविभागासिद्धिश्चेत्यत्यन्तं दुर्घटतैवेत्याह—अनर्थत्वे चेति। ननु विवर्तपक्षेऽपि भेदकल्पनायास्तदुपयोगित्वोपगमादनर्थकत्वदोषः सम इत्याशङ्क्य न सम इत्याह—अतत्त्वे सर्वं युक्तमिति। प्रशब्दसहितमेकं पदमित्येतस्मिन् पक्षे हि तद्वियुक्तपदव्युत्पत्त्यननुगतिप्रसङ्गदोष उक्तः; विवर्तपक्षे त्वमेयविषयत्वाद्व्युत्पत्तेः कार्यदर्शनकल्प्यं व्युत्पत्तेस्तद्धेतुत्वमिति तद्वियुक्तव्युत्पत्त्यैव कार्यसिद्धेः सैव हेतुरस्त्विति न दोषावकाश इत्युक्तः। तत्पक्षेऽपि प्राग्भाविनी हि प्रकृत्यादिभेदकल्पना - कार्यहेतुरिति मानान्तरं तत्कारणमनुसरणीयम्, तदभावाद्दोष इत्याशङ्क्य व्याकरणान्तरमस्तु तस्याप्यन्यदित्यनादिव्याकरणपरम्पराभ्युपगमेन परिहारसम्भवमाह — प्रकृत्यादिविकल्पास्त्विति। निर्भेदं ब्रह्म तत्त्वम्, भेदजातं स्वतस्तु काल्पनिकमिति तत्त्वमेव वेदमानार्हम्, नान्यदिति साक्षादेव वेदोक्तमित्याह—वेदान्तैरपीति। देशकालवस्तुव्यावृत्तमल्पपदोक्तं तदस्थायीति मर्त्यपदेनोच्यते; स्वविपरीतरूपास्पृष्टत्वं हि स्थायित्वम्; व्यावृत्तं

१. तापि भाग. क.

परैर्विभागः काल्पनिक उक्तः—"यदल्पं तन्मर्त्यं यद्भूम तदमृतम्" इति। अवच्छेदोऽल्पम्, मर्त्यम् अस्थायि, कल्पितत्वादवच्छेदास्थायिता न तत्त्वे स्यात्। तत्त्वसाक्षात्कारपरे "यावद्वाचो गतम्" इत्यद्वैतपरं घटते; अन्यथा कर्मविधयो भिन्नपरा वेदान्ता अद्वैतार्था इति विरोधः। शब्दविवर्तोऽर्थ इत्येवमविरोधः। अत एकब्रह्मानुगुणो वेदराशिरित्येवंविदो ब्रह्मविदो वैयाकरणा एव।

तन्न। यदि व्याकरणोक्तविकल्पादर्थधीः, व्याकरणं बोद्धुं व्यवहारापेक्षा; तद्वरं व्यवहारात्तात्त्विकविभागादेवार्थधीरस्तु। अर्थधीकार्यं च भेदेऽपि घटत इति तत्र तत्रोक्तम्। अद्वैतबोधे च न वेदान्ताः शक्ता इत्युक्तम्। तत्त्वे यद्दोष-

तु सद्धीसमय एवासद्धीग्रस्तमिति व्यक्तमस्थायित्वं तस्य, तेनारोपितसत्ताकमेव तत्सिद्ध्येदित्येतन्मर्त्यपदार्थ इत्यर्थः। एवं व्यावृत्तस्य सर्वस्य मिथ्यात्वमुपदर्श्य सर्वानुवृत्तसत्तत्त्वस्य प्रकाशमानात्मसदैक्यप्रदर्शनेन साक्षात्कारपरे वेदराशौ सर्ववेदवर्त्यद्वैतवाक्योपपत्तिरित्याह—तत्त्वसाक्षात्कारपर इति। एवं कर्मविधीनामपि विवर्तापेक्षमद्वैतपरत्वमुक्त्वा तदनङ्गीकारेऽन्योन्यविरोधः स्यादित्याह — अन्यथा कर्मविधय इति। स्वपक्षे विरोधाभावाभिप्रायं प्रकटयति—शब्दविवर्तोऽर्थ इतीति। अतो विवर्तवादिन एव तत्त्वविद इत्युपसंहरति—अत एक ब्रह्मानुगुण इति।

विवर्तापेक्षमप्यनपेक्षत्वं पूर्वपक्षी निरस्यति — तन्न; यदि व्याकरणेति। तत्पक्षेऽपि व्याकरणार्थनिर्णयार्थतया वृद्धव्यवहारव्युत्पत्तेरुपायतोपगमे विशेषाभावात् तात्त्विकविषयव्युत्पत्तिद्वारेण साक्षादेव वाक्यार्थधीहेतुतोपेतुमुचितेति न विवर्तापादकं किंचिदस्तीत्यर्थः। नन्वपूर्ववाक्यार्थधीकार्यान्यथानुपपत्तिस्तदापादिकेत्यत्राह—अर्थधीकार्यं चेति। नन्वेवमपि वेदान्तवाक्याविरोधार्थस्तदुपगम इत्यत्राह—अद्वैतबोधे चेति। तेषामद्वैतार्थतानुपपत्तिरात्मवादोक्तेति न भेदस्तद्विरोधीत्यर्थः। ननु भेदे तात्त्विके मन्त्रानियतार्थत्वादिदोषजातमुपन्यस्तं किमिति ग्रन्थे न परिहृतमित्यत्राह-तत्त्वे यद्दोषजातमिति। ननु विवर्तनिरासप्रस्तावे "जातिगुणयोरिवैकद्रव्यनिवेशात्" इत्यादेः अन्वितार्थत्वप्रकारशङ्कापरस्य ग्रन्थस्य कथमवतार

जातं तत्तुच्छत्वादुपेक्षितम् । एवं निरस्ते विवर्ते जातिगुणयोरिवैकाश्रयतयान्वयो जातिगुणशब्दार्थयोरपि सन्निध्यादेरस्तु, अनन्वितार्थत्वे वैयर्थ्यात् । तन्न; व्यवहारे पदार्थमात्रे शक्तिः, नान्विते । अतो मानानुसाराद्व्यर्थतैव इत्यकृतकसम्बन्धसाधनेऽपि न वैदिकान्वयधीः शब्दादिति कृतकतापातः । पूर्वपक्षभाष्यव्याख्या विस्तरभयान्नोक्ता ॥

राद्धान्तस्तु—वेदार्थे व्यवहारस्योपायत्वमेकत्वाल्लोके वेदे च पदपदार्थयोः । नन्वेकत्वेऽप्यन्वयात्मकवाक्यार्थधीरहेतुः । न च पदेन पदार्थोऽन्वितो लक्ष्यत इति वाच्यम्; निश्चिते ह्यन्वयपरत्वे लक्षणा । वेदे च तत्परत्वानिश्चये वैयर्थ्येऽपि न हानिः । किञ्च कोऽन्वयः केन लक्ष्यतामित्यपि न निश्चयः । तन्न; पदार्था हि सदा अन्विता एव दृष्टाः, अन्ततोऽस्त्य-

इत्याशङ्क्य न तच्छेषोऽयं ग्रन्थः; तन्निरासस्त्ववसितः, तदनन्तरं भेदपक्षेऽप्यर्थसामर्थ्यद्वारेण पदैरेवापूर्ववाक्यार्थधीः सुकरेति शङ्कोत्थापनेन तन्निरासपरतयावतार इति सम्बन्धमाह—एवं निरस्ते विवर्त इति । आवापोद्धाराभ्यामनन्वितार्थत्वे व्युत्पत्तिसिद्धे प्रयोगवैयर्थ्यं मानप्राप्तं न दोष इत्यपौरुषेयत्वे वाक्यार्थप्रतीत्यनुपपत्तेः पौरुषेयतामेव तत्प्रतीतिरापादयेदित्यर्थः । यथोक्तपूर्वपक्षपरं भाष्यं व्याचक्षाणस्य टीकाग्रन्थस्यापेक्षितमाकाङ्क्षोत्थापनादि पञ्जिकायामेव कृतम्; पुनश्च यत्तत्र शिक्षणीयं तद्ग्रन्थगतिमात्राङ्गम्, न न्यायशरीरावधारणाङ्गमिति विस्तरदोषभीत्या न प्रदर्श्यते, स्वयमेव व्याख्यातृभिरवधारणीयमित्याह—पूर्वपक्षभाष्यव्याख्येति ॥

राद्धान्तमाह—राद्धान्तस्तु वेदार्थे व्यवहारस्येति । लोकव्युत्पत्तेः वेदार्थावगत्यनुपायत्वं पदपदार्थान्यत्व एव स्यात्; तत्तु नास्तीत्यस्त्येव तदुपायत्वमित्यर्थः । ननु तदनन्यत्वं वाक्यार्थावगतौ न हेतुः, तदन्यत्वात्तस्य । न चानन्यत्वेन पदार्थेऽवगते तल्लक्ष्यतया तदन्वयरूपो वाक्यार्थोऽपि प्रतीयेतेत्युपायता; पदोक्तेस्तात्पर्यनिश्चये हि तल्लक्षणाप्राप्तिः, वेदे तु तन्निश्चये मानान्तराभावात् तथापि नोपायतेति चोदयति—नन्वेकत्वेऽपीति । लक्षणानुपपत्तौ हेत्वन्तरं चाह—किंच कोऽन्वय इति । परिहरति—तन्न पदार्था हीति । व्युत्पत्तिसमयदृष्टा-

र्थेन । अतः शब्देनापि यथास्थिता अभिधेयाः । नन्वावापोद्धाराभ्यां स्वरूपमात्रे शक्तिः, अन्विते च शक्तिकल्पनागौरवम् । किञ्च सामान्येनान्विताभिधा व्यर्था । अर्थशक्त्यापि तत्सिद्धेः । विशेषेण चेदानन्त्येन सम्बन्धग्रहाशक्तिः । किञ्च यदि विशेषेणान्वितोक्तेनान्वितो वाच्यः, तदान्योन्याश्रयः; यद्यनुक्तेन, तदा पदान्तरवैयर्थ्यम् । अत एव पदमावापोद्धाराभ्यामर्थस्वरूपे शक्तम्, अर्था एवाकाङ्क्षासन्निधियोग्यतासहिता अदृष्टमेवान्योन्यान्वयमाहुरित्याहुः परे । न च सम्बन्धग्रहाशक्त्यनुयोगः, गृहीतसम्बन्धपदोक्तानामगृहीतसम्बन्धानामेवार्थानामन्वयबोधकत्वदृष्टेः नवकविरचितेषु वैदिकेषु च[1] वाक्येषु तद्बुद्ध्यविवादादिति । तन्न; अन्वित एवावापोद्धाराविति साक्षात्पदान्येवान्वितवाचीनि । न च सम्बन्धग्रहाशक्तिः, आकाङ्क्षाद्यु-

न्वितरूपाहानेनैव शब्दबोध्या इति पदार्थोक्त्यन्तर्भूतैव वाक्यार्थोक्तिरिति न हेत्वन्तरापेक्षेत्यर्थः । तदन्तर्भावासिद्धिमापादयति — नन्वावापोद्धाराभ्यामिति । सामान्यविशेषविकल्पमुखेन दोषान्तरं चाह—किंचेत्यादिना । विशेषपक्षेऽभिहितेनानभिहितेन वा अन्वितोऽर्थो न वाच्य इत्याह—किंच यदीत्यादिना । उक्तान्विताभिधानदोषदार्ढ्यार्थं तद्दूषणवाद्येव तद्दोषे पराभ्युपगमं चाह —अत एवेत्यादिना । नन्वर्थानामन्वयबोधकत्वेऽप्युक्तव्युत्पत्त्यसम्भवदोषोऽपरिहार्य इत्याशङ्क्य व्युत्पन्नपदोक्तार्थानामन्वयधीकरणे व्युत्पत्त्यपेक्षा नास्तीत्याश्रयणीयम् तद्दर्शनादेवेति परिहरति—न च सम्बन्धग्रहाशक्त्यनुयोग इति । परिहरति—तन्न; अन्वित एवावापोद्धाराविति । यदा हि पूर्ववाक्यात् पदान्युद्ध्रियन्ते अन्यानि चोप्यन्ते, तदा तदर्थाः सान्वया एवोद्ध्रियन्ते ओप्यन्ते चेत्यन्वयविशिष्टार्थधीकराण्येव पदानि गृहीतानीति न केवलवाचीन्युपेयानीत्यर्थः । नन्वन्वयविशेषाणामानन्त्याच्च पदार्थतुल्यतया तद्व्युत्पत्तिरित्यनन्वितार्थान्येवेत्याशङ्क्य सर्वानुगतोपाध्यपेक्षया तद्व्युत्पत्तिः सुकरेति परिहरति—न च सम्बन्धग्रहाशक्तिरिति । ननु तदपेक्षाश्रय-

1. Omitted च. क.

पाधेर्व्युत्पत्तेः। पदार्थबोध्येऽप्यन्वयेऽपि विधेयम्। शक्तिकल्पनापि तुल्या। अथ क्लृप्ता पदार्थानामन्वये शक्तिः, श्वेतिमाश्वत्वगन्तृत्वैः प्रत्येकं मानान्तरमितैरन्योन्यान्वयधीजननात्; तन्न; हेषयाश्वत्वं हेषमाणपुरोवर्तिद्रव्यगतमेवानुमीयते। यत्र हि लिङ्गं तत्रैव लिङ्गिधीः; यस्य तु हेषापादानदेशानिश्चयः, तस्य नाश्वत्वाश्रयनिश्चयः। योऽपि पारिशेष्यादाश्रयं वेत्ति, सोऽर्थापत्तेः, न पदार्थादन्वयः। यदि च श्वेतिमादयो मानान्तरगम्या अन्वयबोधिनः तदा तस्मिन्नन्वयेऽशब्दमूले मानमपरमुपेयम्। शक्तिकल्पना चेत्, वरं मुख्ये

णगौरवहानार्थमनन्वितार्थत्वमुपेयमित्याशङ्क्य अन्वयस्यार्थबोध्यत्वेऽपि विशेषव्यवस्थार्थमुपाधेरहेयत्वान्न तदाश्रयणं दोष इत्याह— पदार्थबोध्येऽप्यन्वय इति। शक्त्यपेक्षयापि लाघवमनन्वितार्थपक्षे नास्तीत्याह— शक्तिकल्पनापीति। ननु पदार्थानामन्वयबोधशक्तिर्मानान्तरसिद्धानामपीति न शब्दव्युत्पत्तिस्तत्कल्पनान्तेति तत्र लाघवमनन्वितार्थवादिन इति शङ्कते—अथ क्लृप्ता पदार्थानामिति। परिहरति— तन्न; हेषयाश्वत्वमिति। प्रत्यक्षदृष्टपुरोवर्तिश्वेतकर्तृके हेषाशब्दे तदनुमेयमश्वत्वं तद्वर्त्यैवानुमानार्हमित्यानुमानिकी तदन्वयधीरिति न तत्र पदार्थस्यान्वयधीशक्तिः क्लृप्तेत्यर्थः। ननु हेषाशब्दस्य तदपादानत्वाग्रहविषय एव क्लृप्ततोक्तेत्याशङ्क्य तत्रान्वयधीरप्यसिद्धेति परिहरति— यस्य तु हेषापादानदेशानिश्चय इति। ननु श्वेतस्यापादानत्वानिश्चयेऽपि सन्निहितदेशे तदन्याभावनिश्चयात् श्वेतवर्त्यश्वत्वं भातीति नासिद्धिदोष इत्याशङ्क्य तत्रार्थापत्तिरन्वयगमिका, न पदार्थमात्रमित्याह—योऽपि पारिशेष्यादिति। सन्निहितवस्त्वन्तराभावेऽपि अनुमितमश्वत्वं श्वेतसम्बन्धं विनान्यथानुपपन्नमिति तत्सम्बन्धेऽन्यथानुपपत्तिरेव प्रमाणमित्यर्थः। तदन्वयस्य पदार्थमात्रमेयत्वोपगमे शब्दतात्पर्याभावाच्छाब्दत्वासम्भवात् सप्तमप्रमाणोपगमश्च स्यादित्याह—यदि श्वेतिमादय इति। एवमनन्वितार्थपक्षेऽपि शक्तिकल्पनामवस्थाप्य कल्पनायां च शब्दशक्तिरेव कल्प्या, नार्थशक्तिरिति विशेषमाह—शक्तिकल्पना चेदिति। ननु गत्यन्तराभावाच्छक्तिगौरवमपि न दोष इति

१. गम्या अर्थान्वय. ख.

शब्दे ; नार्थे जघन्ये । शब्दस्य चार्थशक्तावन्वयधर्माधिक्यमात्रम्, अर्थस्य शक्त्याधिक्यं शब्दे च शक्त्याधानशक्तिरिति शक्तित्रयम् । न चान्योन्याश्रयम् ; स्मृतपदार्थमात्रेण ह्यन्विताभिधानम् ; अन्वितान्तर्गतस्वरूपमात्रमपि स्मृत्यर्हम् ; न्यायावधृतवचनव्यक्तिकं ह्यन्वितमभिधेयम् । पदार्था अपि स्मृता एवान्वयबोधिन इत्याहुः । —

"तेऽपि नैवास्मृता यस्माद्वाक्यार्थं गमयन्ति नः" । इति ।

तात्पर्यं पदानामन्वये चेदिष्टम्, शक्तिरपि तत्रैव युक्ता ; किमर्थद्वारतया ? अन्वयवत्तयैवाभिधेत्यन्वयोऽर्थाद्वाच्यांशः, न व्यक्तिमत्तयैव जातेरभिधेति न

शङ्कां हातुं यत्त्वन्विताभिधानपक्षेऽन्योन्याश्रयतापत्तेरनन्वितार्थत्वमुक्तम्, तत्स्मृतपदार्थप्रतियोगिकान्वयोक्त्याश्रयेणेन परिहरति—न चान्योन्याश्रयमिति । ननु अन्विताभिधानपक्षेऽनन्वितस्य सम्बन्धाभावान्न पदस्मार्यतेति न तत्स्मार्यतयान्वयित्वमित्याशङ्क्य वाच्यान्तर्भावरूपप्रत्यासत्तिरपि स्मृतिहेतुः । अन्वयविशेषाणामन्योन्यव्यभिचारात् सर्वानुगतान्वितस्वरूपे संस्कारप्रचयात् तदुद्बोधः शीघ्रभावी चेति तन्मात्रस्मृतिर्नानुपपन्नेति परिहरति—अन्वितान्तर्गतेति । शक्तिविषयप्रमित्युत्पत्तिविलम्बे हि स्मृत्यवकाशः, स किंनिमित्त इत्याशङ्क्य तद्धेतुमाह—न्यायावधृतेति । स्मृतप्रतियोगिकान्वयोक्त्युपगमे प्रत्यासत्तिमात्राधीना स्मृतिर्बहुविषयेति नियतान्वयासिद्धिः, अभिहितान्वये नियतान्वयसिद्धिरिति शङ्काहानाय तन्मतेऽपि स्मृतानामेवान्वयबोधकत्वमुक्तम्, अधिकाभावादुपपत्त्येति वदति—पदार्था अपि स्मृता एवेति । पदानामन्वयतात्पर्योपगमोऽप्यन्विताभिधाननियामक इत्याह—तात्पर्यं पदानामिति । तदर्थिनां तत्करत्वासम्भव एव व्यवधानकल्पना, न सम्भवेऽपीत्यर्थः । कथमन्वितशक्तिकं पदमन्वयशक्ति स्यात्, अन्वयान्वितयोर्भेदात् ? व्यक्तेर्जात्यर्थपदशक्त्यविषयत्ववदन्वयस्यापि तदविषयतैव स्यादित्याशङ्क्य तद्वैषम्येण शाब्दत्वमाह—अन्वयवत्तयैवेति । नान्वयत्यागेनान्वितस्यानन्वितावस्थाव्युदासेनाभिधानासिद्धिरिति न पदशक्तिबाह्योऽन्वयः, न तथा जातेरिति न साम्यमित्यर्थः । नन्वेवं जातिधीविषतापि व्यक्तेर्न स्यादिति साम्योक्त्य-

व्यक्तिर्वाच्यांशः; तथापि रूप्यन्तर्भावाद्रूपधीरित्येवं साम्यमुक्तम्। अर्थाद्वाच्यांशतया पृथगनभिधेति न व्यतिषङ्गाभिधोक्ता। एवं स्थितेऽन्विताभिधाने कार्यव्युत्पत्त्या च कार्यान्वय[1] उक्ते प्रसिद्धार्थान्वयार्हतया च व्युत्पत्तेरुक्तेः वेदे च साध्यस्वर्गविशिष्टावस्थस्य लिङर्थे कार्ये बोद्धृतोक्तेरन्वयार्हस्थायि कार्यं वेदवाक्यार्थो व्युत्पन्नः। लोकव्युत्पत्तिर्वेदानुसारादपूर्वान्ता— इति पदान्येव वाक्यमेकप्रयोजनतयैकमिति अर्थधीतो न भेदापवादादेकता सिद्धिः। यदि हि पदार्थादन्यो वाक्यार्थः, तदा प्रचितसंस्कारस्य पदार्थानवमर्शेऽपि वाक्यार्थधीः स्यात्। यत्र सम्बन्धस्मृतिर्हेतुः तत्र संस्कारप्रचयमात्रमपि दृष्टम् धूमात् सम्बन्धास्मृतावपि प्रचितसंस्कारादग्निधीः। 'अन्धस्य च प्रचितसंस्कारस्य चक्षुर्निरपक्षमेव चलनम्' इति भाष्योक्तम्।

सम्भवश्च स्यादित्याशङ्क्य तद्विषयतास्त्येवेति तदुपपत्तिमाह—रूप्यन्तर्भावादिति। नन्वभिधेयत्वे व्यतिषङ्गाभिधाननिषेधोक्तिविरोध इत्याशङ्क्य शक्तिद्वयशङ्कानिवृत्त्यर्थं स्वतन्त्राभिधानं निषिध्यते नान्विताभिधानान्तर्गताभिधानस्पर्श इत्यविरोधमाह—अर्थाद्वाच्यांशतयेति। व्युत्पत्तिमूलापूर्ववाक्यार्थधीसमर्थनार्थान्विताभिधानशक्त्युक्तिरिति ततस्तत्सिद्धिं दर्शयति—एवं स्थितेऽन्विताभिधान इति। ननूक्तविधया अपूर्वव्युत्पत्तिर्वेदवाक्यवर्तिनीति "लोकव्युत्पत्तिफलमात्रं वेदे स्यात्, न व्युत्पत्तिभूमिर्वेदः" इत्यभ्युपगमभङ्ग इत्याशङ्क्य लोकव्युत्पत्तिफलमेवैतदन्वयविशेषवत् समभिव्याहारान्तरात् स्थायिकार्यरूपान्वितार्थे वाक्यपर्यवसानमित्याह — लोकव्युत्पत्तिर्वेदानुसारादिति। तत एव स्फोटवादिमतनिरासोऽप्यर्थसिद्ध इत्याह — इति पदान्येव वाक्यमिति। पदार्थव्यतिरिक्तो वाक्यार्थ इत्युपगमे पदार्थानवमर्शेऽपि तद्धीर्दुर्वारेति दूषणमाह—यदि हि पदार्थादन्य इति। स्मृतिसाध्यावधृतकार्ये दर्शनसाध्यावधृतकार्ये च संस्कारप्रचयमात्रादपि कचित्सिद्धिदर्शनात् पदार्थस्मृतिव्यतिरेकेणापि कदाचिद्वाक्यार्थधीः स्यादिति दर्शितम् — "अपि च अन्वयव्यतिरेकाभ्यामेतदवगम्यते" इत्यादिना

१. कार्यान्विताभिधाने उक्ते. क.

"पदार्थेभ्यो वाक्यार्थः" इति भाष्येऽन्वयो निष्कर्षाद्वाक्यार्थ उक्तः, सोऽन्वितपदार्थाधीन इत्यभिप्रेत्य। विना पदोच्चारणं शौक्ल्ये बुद्धे शुक्लपदार्थतया गुण्यन्वितगुणस्मृतेरन्वितस्य पदार्थतामाह भाष्यम्। यद्भाष्यं

भाष्येणेत्यर्थः। नन्वनेन पदार्थवाक्यार्थैक्योक्तिः, "पदार्थेभ्यो वाक्यार्थः"—इति व्यतिरेकाभिधायिभाष्यान्तरविरुद्धेत्याशङ्क्य अभिधीयमानान्वितार्थानुषङ्गसिद्धान्वयधीरित्येतत्परं तद्भाष्यम्, न तद्व्यतिरेकपरमिति परिहरति— पदार्थेभ्यो वाक्यार्थ इतीति। "अपि च अन्तरेणापि पदोच्चारणं यः शौक्ल्यमवगच्छति अवगच्छत्येवासौ शुक्लगुणकं द्रव्यम्" इति किमनेन भाष्येणोक्तम्? पूर्वोक्तोऽव्यतिरेको ह्येतदनपेक्ष इत्याशङ्क्य अन्वयस्यापि पदवाच्यान्तर्भावस्मृतिरनेनोक्तेत्याह —विनापि पदोच्चारणमिति। शुक्लशब्दस्यावापोद्धाराभ्यां शौक्ल्यमात्रार्थत्वे गुणिविशेषणतया प्रत्यक्षदृष्टे तस्मिन् तदवस्थस्यान्वितस्य शुक्लपदार्थत्वानुस्मृतिरन्वितार्थत्वमेव गमयति, विशेषणार्थस्य हि तद्द्वारेण विशेष्यवृत्तिरन्वितार्थत्वप्रयुक्ता, अन्यथा रूपादिपदवत्तत्र पदवृत्तिर्न स्यात्, वस्तुस्वभावप्रयुक्तान्वयानुसारात् पदस्य तत्र वृत्तिस्तद्वदेव न स्यात्। अन्वितार्थत्वे स्वभावानुसारित्वादन्वयस्य तदनुसारिणी प्रवृत्तिः क्रियान्वयेऽपि स्वतः स्यात्, रूपादिपदानां गुणस्वभावानतिक्रमेण स्वतन्त्रवृत्तिदर्शनादतथात्वमित्येतदुपपादनार्थं तदित्यर्थः। ननु स्पष्ट एवानन्वितार्थस्य श्रौतत्वाङ्गीकारो भाष्ये "यत्तु श्रौतः पदार्थो न वाक्यानुरोधेन कुतश्चिद्विशेषाद्व्यावर्तितुमर्हति" इति पूर्वोक्तं श्रौतत्वमनुभाष्य श्रौतस्यानर्थकत्वेन हेयत्वे वाक्यार्थोऽप्युपादेय इति परिहारोक्तेः, तेन तद्विरुद्धमन्वितस्य पदार्थत्वाभिधानमित्याशङ्क्य पदश्रुत्यनन्तरभवित्वमात्रेणानन्वितस्मृत्यपेक्षयैव श्रौततोक्ता, नाभिधानशक्त्यपेक्षयेत्यविरोधमाह— यद्भाष्यं पदार्थमात्रं श्रौतमपीति। अनन्वितस्यानुभूताधिकत्वाभावात्तद्धियः स्मृतित्वानपायाच्च श्रौतपदं मुख्यार्थं ग्राह्यमित्यर्थः। नन्वेवमपि धीकार्यैनिष्पत्तेः शक्त्यनुमानान्मुख्यार्थतैवेत्याशङ्क्य शब्दमात्रोद्बुद्धसंस्कारस्यैव धीकरत्वम्, न शब्दस्येत्य-

१. Omitted. भाष्यं क.

पदार्थमात्रं श्रौतमिति, तत् श्रुतिमात्रादन्वितस्मृत्यनभिप्रायम्; स्मृतौ हि पदस्य संस्कारोद्बोधकता, न धीजनकतेति न शक्तिः। बौद्धाः 'गुणान्तरप्रतिषेधः शुक्लपदार्थः' इत्याहुः। तन्नेति भाष्यम्, अन्यापोहकल्पनाप्रत्युक्तेः। 'करणादिवाचिनामतो विभक्तिस्मृतेः करणत्वेनान्वितो नामार्थः' इति भाष्यम्। एवं मानान्तरावेद्यार्थे वेदे कृतकतानुमा प्रत्युक्ता। लोके तु मानान्तरवेद्येन व्यवहारात् क्रियाकार्ये लक्षणया प्रयोगः। विलम्बते प्रलम्बते विप्र इत्यादौ

मुख्यार्थतेत्याह—स्मृतौ हीति। एवं च सति "गुणान्तरप्रतिषेधो न शब्दार्थः—इत्येतदपि परिहृतं भवति" इति भाष्येण किं तदनिष्टं निवृत्ततयोच्यते इत्यत्राह—बौद्धा गुणान्तरप्रतिषेध इति। प्रत्यक्षादेरुक्तविधया बाह्यगुणादिसाधकत्वे सत्यपि शब्दोत्थधियो बौद्धोक्तापोहनिष्ठत्वनिवृत्तिः शुक्लादिशब्दस्योक्तान्वितार्थत्वबललभ्यैव, अनन्वितगुणार्थत्वे लक्षणाया अपि वाक्यावधित्वात् पदव्यापिगुणवृत्त्यसिद्धेः तत्परिहारो दुर्लभ इत्येतदर्थं भाष्यमित्यर्थः। "अपि च प्रातिपदिकादुच्चरन्ती द्वितीयादिविभक्तिः प्रातिपदिकार्थो विशेषक इत्याह" इति भाष्यं किमर्थमित्यत्राह—करणादिवाचिनामत इति। 'करणादिवाचिनः प्रातिपदिकात् तृतीया' इत्यादिस्मृतिविहिता विभक्तयोऽन्वितार्थत्वं प्रकृतीनां नियमयन्ति; ता हि स्वयं तत्स्मृतार्थगतस्वबोध्यान्वयविशेषार्पणेन तद्वारकप्रतियोग्यन्वितार्थाभिधायितां तासां संपादयन्तीत्येतद्दर्शनार्थं तदित्यर्थः। अन्वितार्थत्वसम्भवोक्त्यैव वेदस्य पौरुषेयत्वानुमानमप्यपास्तमित्याह—एवं मानान्तरावेद्यार्थ इति। लोकव्युत्पत्तेर्वेदवाक्यार्थविशेषावगत्यसामर्थ्ये एव लौकिकवाक्यसाम्येन पौरुषेयत्वानुमानमवतरेत्। एवं तत्सामर्थ्ये वेदस्य मानान्तरावेद्यार्थत्वोपपत्तेः पौरुषेयत्वव्यापकनिवृत्तेः तदनुमानं नावतरेदित्यर्थः। ननु लोकव्युत्पत्तिर्मानान्तरविषयनिष्ठैवेति तद्विरुद्धं तदवेद्यार्थत्वमित्यत्राह—लोके तु मानान्तरवेद्येनेति। कार्यार्थत्वमात्रं तावद्व्युत्पत्तिसिद्धम्, न क्रियार्थत्वमपि, तत्र प्रयोगनियमस्तु शक्तिग्रहहेतुव्यवहारस्य मानान्तरविषयनियतत्वात्तदविषये तद्ग्रहाभावात्; न तावता शक्त्यभावनिश्चयः, समभिव्याहारहेतुकान्यार्थत्वस्य तदविरोधित्वात् लक्षणया क्रियायां प्रयोग इति न विरोध इत्यर्थः। स्फोटवाद्युक्तविरोधं विलम्बादिषु वर्णैक्येऽपि शक्त्यन्यत्वेन परिहरति—विलम्बत इति। राजपुरुषस्य राज्ञः पुरुषस्येत्यत्रोक्तान्वयान्यथात्वानुप-

वर्णतत्त्वेऽप्यभिधानान्यत्वान्नानात्वम्, अभिधाविधान्यत्वात् समासासमासयोरन्यथान्वय इतीयं दिक्। श्रीकरोक्तम्—अन्वितेऽभिधेयेऽन्वयो गम्यो नाभिधानिविष्ट इति न शक्तिगौरवमिति। तन्न; न ह्यन्वयात् बहिरन्विते रूपेऽभिधा शक्येति स्वार्थमात्रमविशिष्टम्; तत्तु नान्वयं गमयितुमलम्। अन्वितान्वययोरस्तु भिदा; अभिधा तु न तथा। यदपरं तेनोक्तम्—अन्वितमात्रे पदार्थे न प्रतियोग्यपेक्षा, किन्तु गम्येऽन्वये; सा च पदान्तरोक्तेऽन्विते तत्प्रतियोगिकोऽयमन्वयः — इति धिया पूर्णा। इयं हि शब्दशक्तिः यत्सन्निहिते विशेषे तत्रैव बुद्धिवृत्तिः उत्तरार्धेक्षुखण्डाग्रेयीषूक्तेत्यन्योन्यान्वयसिद्धिः; अन्योन्याश्रयं च न प्रतियोगिस्मृत्यापास्यम्—इति, तन्न; उक्तमन्वयोऽभिधानिवेशी; स चेत् प्रतियोग्यपेक्षः, अभिधैव तदपेक्षेति स्मृत्यैवान्योन्याश्रयमपास्यम्। किञ्च पदार्थः सन्निहित उक्तः, न तु गम्योऽपीति नान्वयविशेषधीसिद्धिः। महोदध्युक्तं सर्वं वृत्तौ निर-

पत्तेः परिहारमाह—अभिधाविधान्यत्वादिति। तत्र शक्तिभेदाभावेऽपि तत्कार्यविधान्यत्वं व्युत्पत्तिसिद्धमिति तद्विरोधोऽपि नास्तीत्यर्थः। तदुक्तविषयान्तरेऽप्युक्तविधाद्वयानुवृत्त्यन्वयार्थां दिगुक्तिः। अन्विताभिधाने परापादितं गौरवमितरेतराश्रयत्वं च श्रीकरेणान्यथा परिहृतम्, तदभ्युपगमशङ्कानिवृत्त्यर्थमनूद्य दूषयति—श्रीकरोक्तमित्यादिना। अन्वितेऽभिधेये तदन्यस्यान्वयस्यार्थसिद्धत्वान्न शक्तिगौरवम्—इत्येतदयुक्तम्; न ह्यन्वितस्यान्वयातिरिक्तमनन्वितावस्थाव्यावृत्तमन्वयाक्षेपक्षमं रूपमस्तीत्यन्वयान्तर्भावेणैव तदभिधानसम्भवात्। प्रतियोगिनिरूप्यत्वमनभिधेयान्वयस्यैव नाभिधेयान्वितस्य, द्वयोर्भेदात्—इत्यन्योन्याश्रयपरिहारोऽप्ययत एवायुक्तः। गम्यान्वयनिष्ठप्रतियोग्यपेक्षा पदान्तरसंनिहितान्वितविशेषपूर्णा न्यायबलात्—इत्यन्योन्यान्वयनियमसिद्धयुक्तिश्चायुक्ता; शब्दवृत्तेरेव सन्निहितपर्यवसायित्वं तत्र तत्र व्युत्पत्तिबलादुक्तम्, न गम्यस्यापीति। महोदधिग्रन्थोक्तमन्विताभिधानदूषणं प्रकरण एव निवारितमिति न यत्नान्तरनिवर्त्यम्, तदभिप्रायविवरणार्थं किंचिदुच्यत इत्याह—महोदध्युक्तमिति। स्मृतार्थप्रतियोगीकोऽन्वयः पदवाक्यः—इत्युपगमे 'उखायामोदनं पचति' इत्यत्र श्रुतान्वयो न स्यात्, पद-

स्तम् । तत्र किञ्चिद्व्यज्यते नोक्तम् । साहचर्यात्स्मृतिरन्वित एवेति कलायान्विता ज्ञाता उखा स्मृता श्रुतमोदनं नाकाङ्क्षेदिति तदन्वयधीर्न स्यात् । किञ्च उखापदादुखार्थसम्बन्धिनोऽपि स्मृतेस्तदन्विताभिधानं स्यात् । अथोखापदं न कलायाविनाभूतम्, किन्तु स्वार्थेनैवेति स्वार्थमात्र एव स्मृतिः; तन्न; अनुमाने ह्यविनाभावस्तन्त्रम्, स्मृतिस्तु साहचर्यमात्रात्। तदेतदनवहितचोद्यम् । अस्त्वन्विते स्मृतिः, अस्त्वस्वार्थेऽपि साहचर्यात्; व्युत्पत्तेस्तु व्याहृतस्वार्थान्वयार्थमाकाङ्क्षाद्यनुसन्धानं स्मृतैकदेशस्वार्थनिष्कर्षाच्छक्यमिति नोक्तदोषद्वयं युक्तम् । किञ्च अभिहितान्वयेऽप्याकाङ्क्षाद्यर्थं स्मृतिस्तथापि पदार्थानामुपेयैव ।

"तेऽपि नैवास्मृता यस्माद्वाक्यार्थं गमयन्ति नः ।"

इति भट्टोक्तेः । स्वमतं तेनोक्तम्—अनुमानाद्यभावेऽपि दृष्टा पदार्थानामन्वये शक्तिः; स्वार्थमात्रे चतुरिन्द्रियसन्निपाते पश्यतो लिहतः स्पृशतो

सम्बन्धिनोऽन्वितस्यैव पदस्यार्थत्वात्तस्य च निराकाङ्क्षत्वात् सति चान्वये स्वसम्बन्धिनोऽर्थान्तरस्यापि स्मृत्यविशेषात्तदन्वयोऽपि स्यात्. स्वार्थेनैव पदस्याविनाभावो न तदन्वय्यर्थान्तरेणेति स्मृत्यसम्भवो न शक्यः, स्मृतौ साहचर्यमात्रस्य व्यापारादिति दूषणमुक्तम्, परिहारमाह—तदेतदनवहितचोद्यमिति । प्रतियोगिविशेषविषयसंस्कारोद्बोधस्य सर्वानुगतानुभूताननिवतार्थसंस्कारोद्बोधसमकालत्वमभ्युपेत्यापि श्रुतान्वयोपपत्तिमाह—अस्त्वन्वित इति । श्रुतान्वयव्युत्पत्तिबलात् स्मृतिस्यैकदेशापृथक्कारेणाकाङ्क्षामापाद्यान्वयसम्भवान्नोक्तदोषस्पर्श इत्यर्थः । मतान्तरेऽप्यभिहितावस्थानामन्योन्यान्वयो न संभवति; तदुपाध्याकाङ्क्षाद्यवमर्शव्यवधाननियमे स्मृतावस्थानामेवान्वयापत्तेः, ततश्चातिप्रसङ्गसाम्ये व्युत्पत्तिसिद्धनियमानुसन्धाननिवर्त्योऽतिप्रसङ्गस्तन्मतेऽपीति साम्यमाह — किंचाभिहितान्वयेऽपीति । शक्तित्रयकल्पनादुष्टोऽभिहितान्वयपक्ष इत्युक्तगौरवपरिहारेण तदुक्तं स्वपक्षनिर्वाहमनुवदति—स्वमतं तेनोक्तमिति । प्रमाणान्तरशङ्काशून्यविषयेऽपि पदार्थानां पृथगव-

१. अस्तु चाखा. क. २. Omitted. युक्तम्. क.

जिघ्रतः 'आम्रो मधुरः शीतः सुरभिः' इत्यन्वितधीः । अतः स्वार्थमात्रेऽपि पदार्थे सन्निध्यादेरन्वयधीरस्तु इति । तन्न; रसादेराश्रयानुमा; 'द्रव्यम् नान्यदिहाम्रात्' इत्येवं पारिशेष्यानुमयान्वयधीः, नार्थाधीना । न चेन्द्रिय-समाहारजा । प्रत्यभिज्ञानेऽपि संस्कारेन्द्रिययोरेकार्थान्वयधीशक्तिः, नार्थयो-स्तत्तेदन्तयोः । अतः सन्निध्याद्युपहितान्मानान्तरगम्यान्नान्वयधीर्दृष्टेति शब्द-स्पर्शाद्वाच्येऽर्थेऽन्वयशक्त्याधानशक्तिः शब्दस्योपेया[1] । महाव्रतेन—आम्राद-न्यत् 'मधुरा शर्करा' इत्युदाहृत्य 'तिक्ता शर्करा' इत्यधिकमुक्तम्—जानत एव मधुरां पित्तदुष्टजिह्वस्य 'तिक्ता' इत्यन्वयधीरनुमानात्मिका बाधिते न स्यात्; सन्निधिस्त्विन्द्रियसमशीला बाधितेऽपि भ्रमयतीति युक्तमिति । तन्न, जानत एव मधुरां पारिशेष्यानुमया तत एव 'तिक्ता' इत्यपि धीर्दु-

गतानाम् 'आम्रोऽयं मधुरः शीतः सुरभिः' इत्यन्वयधीकरत्वदर्शनान्न शब्दस्पर्शा-च्छक्तिकल्पनेति । तत्रापि मानान्तरमस्त्येवेति दूषयति—तन्न रसादेराश्रयानुमेति । गुणानां गुण्यनुमानलिङ्गत्वं तावदसंदिग्धम्; तदेवाम्रातिरिक्तद्रव्याभावधीवशादबा-धिततद्विशेषान्वयावसायीति नार्थशक्तिस्तत्र कल्प्या, पर्वतस्थाग्न्यनुमाने प्रत्यक्षबा-धिताग्न्यन्वयप्रदेशेतरदेशान्वयवदनुमानार्हत्वात् । न चेन्द्रियसमुदायस्य तद्धीकरत्वं कैश्चिदनुमतमभ्युपेयं अन्यथोपपत्तेः । न च प्रत्यभिज्ञायां संस्कारेन्द्रियाभ्यां पृथगव-गतयोस्तत्तेदन्तात्मकार्थयोः एकार्थसंश्लेषधीकरत्वं दृष्टमिति शङ्कनीयम्, संस्कारे-न्द्रिययोरेव धर्मद्वयसंश्लिष्टैकार्थधीकरत्वात् । एवं मानान्तरगम्यार्थानामन्वयबोधे-शक्त्यसिद्धेः गौरवमपरिहार्यमेवेत्यर्थः । तथाप्युदाहरणान्तरेऽर्थस्यैवासन्दिग्धमन्वय-बोधकत्वं दृष्टमिति परोक्तमनुवदति—महाव्रतेनाम्रादन्यदिति । शर्कराया मधुरस्व-भावत्वं जानतोऽपि पित्तदोषात् 'तिक्ता शर्करा' इति धीर्भवति, सा नानुमानार्हत्यर्थ-हेतुकैवेति । दूषयति—तन्न जानत एवेति । पारिशेष्यानुमानेनैव प्राङ्मधुरस्वभावत्व-मवगतं नान्येनेति, तेन तिक्तेति धीरपीति न बाधितविषयत्वादिह तन्निवृत्तिः स्यात् । न चैवं मधुरस्वभावत्वहानिः जिह्वास्थतिक्तपित्तसत्तावगमे पारिशेष्यासिद्धेस्तिक्तानु-मानहानान्मधुरानुमानस्य पारिशेष्यासिद्धिनिमित्तहानाभावादितरस्यानुमाना -

१. तेन. क.
२. पेता. क.
३. Added. उक्त. ख.
४. प्योक्तएव. ख.

वारा; जिह्वास्थतिक्तपित्तनिश्चये तु पारिशेष्यासिद्धिः। 'मधुरा' इति तु जिह्वास्थमधुरद्रव्यान्तरानिश्चयान्न पारिशेष्यासिद्धिरित्यनुमेयम्। 'तिक्तः' इत्यनुमाभासता पश्चाद्बाधात्, न तु प्रत्यक्षबाधितेऽनुमाभासोदय इत्यवधेयम्। विदग्धेनास्मन्मतं दूषितं श्रूयताम्—विरुद्धासिद्धसन्दिग्धोदाहरणानि—

"प्राथम्यादभिधातृत्वात्तात्पर्योपगमादपि" इति ॥

न हि पदान्यन्वयधीतः पूर्वम्; अर्थानन्तरं तद्धीरित्यर्थस्य शक्तिरिति विरुद्धम्; अभिधातृत्वं स्वत एवासिद्धम्; तात्पर्यं साक्षात् प्रणाड्या च सिद्धमिति साक्षात्त्वे सन्देहकरं सन्दिग्धमिति। तन्न, व्युत्पत्तेर्हि शक्तिधीः, सा च पदश्रुत्यनन्तरं प्रयोज्यस्यान्वितेऽर्थे चेष्टादृष्टेः पद एव प्रथमम्; तदा ह्यर्थे

भासत्वनिश्चयादिति तत्रापि नार्थशक्तिरुपेयेत्यर्थः। नन्वेवं बाधितविषये अनुमानानुत्पत्त्युपगमो निर्बीज इत्याशङ्क्य प्रत्यक्षबाध एव तदुपगमः; अनुमानबाधे तूक्तविधया तुल्यताभिमानसम्भवादाभासोदयोऽभ्युपेत एव। प्रत्यक्षबाधे पूर्वोत्पन्नप्रत्यक्षविरोधान्नाभासोदय इति वैषम्यमाह—न तु प्रत्यक्षबाधित इति। परापादितमन्विताभिधानहेतुदूषणं दर्शयति असारतां तस्य दर्शयितुम्—विदग्धेनास्मन्मतमिति। प्राथम्यं पदानां वाक्यार्थबुध्यानन्तर्यविरोधित्वाद्विरुद्धम्, अभिधातृत्वं पदानां स्वार्थस्मारकत्वमात्राङ्गीकारादसिद्धम्; तात्पर्यं साक्षाद्व्यवधानसाधारणत्वात् संशयहेतुतया सन्दिग्धमिति। तदसारतामाह—तन्न व्युत्पत्तेर्हीति। व्युत्पत्तेः शक्तिग्राहकत्वात् शक्तिव्यवस्थापकतया विवक्षितं प्राथम्यं व्युत्पत्त्यपेक्षमेव तावदुपेयम्, न तत्कार्यवाक्यार्थधीकालापेक्षम्; तत्काले च पदान्येवार्थधीहेतुतया प्रसक्तानि, तदर्थानां प्रयोज्यवृद्धधीविषयतया तत्प्रवृत्त्यनुमितानां बोध्यकोटितयैवावगमाद्व्युत्पत्त्युत्तरकालभावित्वादाकाङ्क्षादिविषयानन्वितस्मृतेरिति शक्तिधीकाले पदानां शक्तिप्राप्तिः प्राथम्यपदोक्तेति न विरुद्धत्वापादनावकाशः। अभिधातृत्वहेतुरभिधातृत्वपक्षापेक्ष एवोक्तः, न स्मारकत्वापेक्ष इति व्यक्तमेव प्रकरणे। तात्पर्यमात्रं पदानां नाभिधातृतेति पक्षे स्वतः साक्षादेव तत्परत्वनिर्वाहः प्राप्तः, तदशक्तावेव प्रणाड्येति न दूषणशङ्केत्यर्थः। मुख्यार्थपदहीने च वाक्ये अभिधानानिर्वाहादर्थबोध्यत्व-

१. मधुरेतु. क. २. Omitted. न. ख.

शक्यकोटितया धीर्न शक्ततयेति प्राथम्यमविरुद्धम्। द्विधा हि तन्मतम्–पदमभिधातृ वा, स्मारकं वा वाक्यार्थधीपरम्। तत्र अभिधातृपक्षे नासिद्धाभिधातृता। तात्पर्यपक्षे च यो यत्परः स साक्षात्तत्परत्वसम्भवे न प्रणाड्येति व्याप्तेर्न तात्पर्योपगमादिति सन्दिग्धम्। यत्तेनापादितम्—अमुख्यार्थैकमेये वाक्ये न किञ्चिदभिधायीत्यर्थादेवान्वयधीरुपेया 'प्रियासरसीमवगाहते', 'सागरं ददाति' इत्यादौ, तन्न; द्वयेऽपि तिङः कर्तृसंख्यायां मुख्यार्थत्वात्; एवंविधं सर्वत्रावश्यकम्। अत उक्तम्—"न हि सर्वपदान्येवामुख्यार्थानि वाक्ये" इति। यदि च सर्वममुख्यार्थं परं मुख्यार्थमभिधानपर्यवसानार्थमध्याहार्यमूह्यपदवत्। यद्वा न वाक्यात् स्वार्थधीः, किन्तु अभिप्रायात्, सिद्धार्थपरात्तथानुमितेरित्यवधेयम्। वाचस्पत्युक्तम्—अन्विताभिधानपक्षेऽनेकत्र शक्तिः, अनन्येऽर्थे च, अभिहितान्वये त्वेकत्र स्वार्थे; अन्वितावस्थे तु लक्षकता सम्बन्धात्तत्परपदप्रयोगव्युत्पत्त्यनुपपत्त्या च। यथा मानान्तरदृष्टोऽर्थो लिङ्गम-

मन्वयस्यावश्याभ्युपेयमिति तदापादितमनुवदति—यत्तेनापादितमिति। प्रियासरसीमिति। सरसीपदस्य गौण्या वृत्त्या प्रियात्मकान्वय्युपस्थापकत्वम्, रूपकविशेषणं प्रियापदमिति न स्वार्थान्वयपरम्, अवगाहत इति च गौणार्थमिति नैकमपि मुख्यार्थम्। सागरं ददातीति चान्योन्यान्वयायोग्यमन्वयमुखेनैवादातृत्वोपस्थापकमित्यस्वार्थवृत्त्येव पदजातं वाक्यार्थपरमिति अर्थनिमित्तैव तद्धीरित्यर्थः। परिहरति— तन्न द्वयेऽपीति। प्रकरणादिगम्यकर्तृविशेषनिष्ठं हीदं वाक्यद्वयम्; तद्विशेषणसंख्यायाः तिङर्थत्वादन्विततत्संख्योक्त्यैव तत्परं स्यात्। सर्वत्रापि एवंविधमपेक्ष्यामुख्यार्थाखिलपदं वाक्यं नास्तीत्युक्तं प्रकरणे; तत्सम्भवेऽप्यध्याहारापेक्षया तदुक्तिर्घटते, पदाध्याहारस्याप्यन्यथानुपपत्त्योहविषयेऽङ्गीकृतत्वात्, सिद्धार्थपरवाक्ये वक्तृज्ञानानुमानमात्रावगतार्थेऽभिधानानुपगमाद्वा कार्यार्थवाक्यविषयैव तदुक्तिरिति तद्दूषणापादनमशक्यमेवेत्यर्थः। शक्तिगौरवादन्विताभिधानत्यागः तल्लाभादभिहितान्वयग्रह इति मतान्तरमाह—वाचस्पत्युक्तमिति। ननु लक्षकतयाप्यर्थस्य प्रमितिशक्तिरक्लृप्तेति तत्कल्पना दुर्वारेत्यत्राह—यथा मानान्तरदृष्टोऽर्थ

१. न सिद्धा. क. ख.
२. अमुख्यार्थमेये. क.
३. सादरंददातीत्येवमादौ. ख.
४. मुख्यत्वात्. क.
५. Omitted अर्थ. क.
६. यदि सर्व. क.
७. वाक्यार्थधीः. क.
८. अर्थोऽपि. ख.

नुपपत्त्यान्वयधीहेतुः तथा पदोक्तो व्युत्पत्त्यनुपपत्त्यास्तु । वाच्येऽन्वयायोग्ये योग्यसम्बन्ध्यन्वयो लक्षणावृत्तिर्निरूढा, नेह तथेति चेन्न; अनन्यलभ्ये [1]शब्दशक्तिरिति परं वाच्यानुपपत्तिमात्रात् सम्बन्धिस्वीकारमात्रं व्यापि लक्षणालक्षणमस्तु । अन्वितभेदावस्था सम्बन्धिनी न पूर्वदृष्टेति चेन्न; सन्निद्ध्याद्युपाधेः सामान्यतोऽन्वितभेदस्य [2]धीस्थतास्तु । सम्बन्धस्मृतावेव स्मृते स्वार्थमात्रे नाभिधातृतेति चेन्न; [3]शब्दादर्थधीरेवाभिधोच्यते लोके; अतः स्मृतिरप्यभिधा व्युत्पत्तितः । स्मार्यस्मारकत्वादसत्यपि सम्बन्धान्तरे स्मृति-

इति । व्याप्त्यानुपपत्त्या चार्थस्य तच्छक्तिः क्लृप्तैवेत्युपस्थापकव्याप्त्यनुपपत्त्यो-रन्यान्तरान्यत्वेऽपि सामान्यप्रयुक्तक्लृप्तशक्त्यनुवृत्तेर्न कल्पनेत्यर्थः । ननु प्रसिद्धलक्षणाप्रयोजकरूपाभावान्नेयं लक्षणेति कथं तदपेक्षया शाब्दतावगम इति शङ्कते— वाच्येऽन्वयायोग्य इति । परिहरति—नानन्यलभ्य इति । यद्यपि प्रसिद्धलक्षणायां स्वार्थस्यान्वयायोग्यत्वं अन्यस्य तदर्हत्वं चास्ति, तथापि वाच्यानुपपत्तिमात्रात् तत्सम्बन्धिमेयग्रहमात्रं तल्लक्षणमुपेयम्, न सम्बन्धिनोऽन्यान्वयोऽपि, शब्दस्य तद्धीजननशक्तिकल्पनापत्तेः, कल्पनायाश्चान्यथोपपत्तावयोगादिति लक्षणैवेत्यर्थः । ननु गङ्गाघोषादौ वाच्यसम्बन्धितया स्मर्यमाणस्य वाच्यानुपपत्त्या मेयताग्रहस्तत्र प्रसिद्धः, अन्वितविशेषरूपवाक्यार्थस्य त्वननुभूतत्वादस्मर्यमाणस्य मेयत्वग्रहस्तत्तुल्यो नेति नेयं लक्षणेति शङ्कते—अन्वितभेदावस्थेति । परिहरति — न सन्निध्याद्युपाधेरिति । पूर्वदृष्टोपाधिसामान्यस्यापूर्वविशेषवृत्त्यवगमे तदुपाधिसम्बन्ध्यनुभूतान्वितावस्थास्मृतिरननुभूतविशेषनिष्ठानुषङ्गा स्यादिति स्मर्यमाणस्यैवानुपपत्त्या मेयत्वमत्रापीति प्रसिद्धिसाम्याल्लक्षणैवेत्यर्थः । नन्वेवमप्यभिहितान्वयो न सिध्येत्, स्वार्थमात्रस्यानधिगतत्वाभावात् स्मृतिमात्रार्हत्वादिति शङ्कते— सम्बन्धस्मृतावेव स्मृते स्वार्थमात्र इति । परिहरति—न शब्दादर्थधीरेवेति । न स्मृतिव्यतिरेकाभिप्रायाभिधोक्तिः स्मृतिविशेषार्थतया वृद्धप्रसिद्धेरित्यर्थः । ननु स्मृत्यनतिरेके स्मृतिहेतुसम्बन्धासिद्धिदोष इत्यत्राह— स्मार्यस्मारकत्वादिति । संस्कारोद्बोधमात्रं

१. शक्तिः शब्दस्येति. क.

२. धीस्तथास्तु. क.

३. शब्दार्थधीः. क.

रस्तु । तन्न, अस्त्वेवम्; एवं चेत् लक्षणा विधान्तरेण कल्प्या; कल्पनाद्वयं दुर्वारम् । स्मारकत्वे, लक्षणात्रिधा पदस्मारिते च सेति सूक्तम्; स्मारकत्वे कल्पनाद्वयम्; अन्वयविशिष्टेऽर्थे त्वेकत्वैकस्य शक्तिः; उपेत्यैवेदमुक्तम्; वृत्त्यन्तरे हि कल्प्ये जघन्यं धीहेतुत्वम्, परं शक्तिकल्पनेति दिक् ॥

हि तदपेक्षितम्, न सम्बन्ध एव, पुरुषान्तरस्मृतिकरत्वावगतिमात्रेणापि तदुद्बोधसम्भवात् स्मृत्युपपत्तेः सम्बन्धान्तराभावेऽपि न हानिरित्यर्थः । एवं शक्तिलाघवमुखेनापि तत्समर्थनमयुक्तमित्याह—तन्न अस्त्वेवमिति । विशिष्टार्थपरपदप्रयोगव्युत्पत्तिः पदार्थस्य तत्प्रमितिकरत्वापादिका लक्षणायाम्—इत्येतदेव तावदसिद्धम्, तदभ्युपगमः 'अस्तु' इति दर्शितः । तथापि प्रसिद्धलक्षणातः विधान्तरकल्पनयैव लक्षणागतिरिहोपेयेति कल्पनागौरवं प्रकरणोक्तमलङ्घ्यमेवेत्यर्थः । ननु पदार्थमात्रे स्मारकत्वोपगमान्न गौरवमित्यत्राह—स्मारकत्व इति । लोके व्यवहितलक्षणाया अपि दृष्टत्वादर्थस्मारितस्यापि क्लृप्तप्रमितिशक्तिकत्वाविशेषादव्यवस्थाप्रसङ्गे सर्ववाक्यसाधारणं प्रमितिकरत्वं पदस्मारितमात्रस्यैवेत्युपेयमिति कल्पनाद्वयमुक्तमलङ्घ्यमेव; अन्विताभिधाने त्वेकैव शक्तिरिति स्थितमेवेत्यर्थः । ग्रन्थोक्तानुसारादियं गौरवोक्तिः, वस्तुतस्तु शब्दप्रयोगानुपपत्तिगम्यं प्रमितिकरत्वं शब्दस्यैवोपेयम् स्वतः प्राप्तस्य साक्षात्त्वस्य बाधापत्तेरित्याह—उपेत्यैवेदमुक्तमिति । ननु क्लृप्तशक्त्युपजीवनसम्भवे साक्षात्त्वहानिर्न दोषः, क्लृप्ता च शक्तिर्लक्षणायां स्मर्यमाणस्यार्थस्यान्वयप्रमितौ, तदस्मृतौ तदभावात्, पदस्य चाभिमुख्ये धीशक्त्यनुपगमात्तदन्वयपरपदोक्त्यनुपपत्तिसहायवत्तया चेति शङ्कानिवर्तकहेत्वर्थो दिगुक्तिः । स्वान्वयप्रमितिशक्तिः स्मर्यमाणस्यार्थस्य न क्लृप्ता, पदैः स्वार्थान्वयोक्तौ तदनुषङ्गसिद्धं स्मर्यमाणप्रतियोगिनः तदुत्थप्रमितिविषयत्वम्, न स्वार्थो सेति न तस्य तज्जननशक्तिः, तस्य कारणवत्त्वाभावेऽपि विषयत्वस्य प्रचुरसिद्धत्वात्, तत्स्मृतेश्च तद्विषयसर्वव्यवहारसाधारणकारणता, न प्रमित्यसाधारणकारणतेति लक्षणायामपि नार्थस्य प्रमाणता क्लृप्तेति शब्दस्यैव कल्प्येत्यभिप्रायः ॥

वेदांश्चैके सन्निकर्षं पुरुषाख्याः ।

अपौरुषेयत्वाधिकरणम् ।

अनन्तरचिन्तापर्यन्तेन पदवाक्योत्थमप्रामाण्यं निरस्तम् । विभागतोऽभिधोपाधेः पदता एकपरतोपाधेः पदानामेव वाक्यतेति भेदोक्तिः । अधुना वाक्ये समाख्यानादप्रामाण्यं निरस्यत इति सङ्गतिद्वयम् । पूर्वपक्षस्तु—कर्तुरस्मृतेरलौकिककार्थे कर्तुरनुमानुत्पत्तेरकृतका वेदा इत्युक्तम्; काठकादिसमाख्यया कर्तृस्मृतिरूपया मानान्तराहार्था वेदाः सापेक्षतया न प्रमाणम् । ननु यथा "कृते ग्रन्थे" इति सूत्रात् कृतिनिमित्तता, तथा "तेन प्रोक्तम्" इति सूत्रात् प्रवचननिमित्ततापीति न कृतिनिश्चयः । तन्न; असाधारणेन हि निर्देशाञ्जस्ये कृत्यैवाख्या; प्रोक्तिस्तु बहुभिः शक्येति न "तेन प्रोक्तम्" इत्यस्य विग्रहस्यार्थे समर्थोऽयं तद्धितः । न च सूत्रं निर्विषयम्, यत्र मानान्तरात्तस्मिन् विग्रहार्थे तद्धितनिश्चयः तद्विषयं सामर्थ्यात् सूत्रम् । 'प्रोक्तसूत्रमयु-

वेदांश्चैके । कथं पौरुषेयत्वमुखाक्षेपस्यास्मिन् स्थाने निवेश इत्याशङ्क्य तत्परभाष्याभिप्रायविवरणमुखेन सङ्गतिमाह—अनन्तरचिन्तापर्यन्तेनेति । वाक्यमुखाक्षेपसमाध्यनन्तरं वाक्यविषयसमाख्याप्राप्तनिरासात्तदानन्तर्यमित्यर्थः । ननु पौरुषेयत्वानुमाने निरस्तेऽर्थसिद्धः समाख्यानिरास इत्याशङ्कयाधिकशङ्कोद्भावनेन पूर्वपक्षमाह—पूर्वपक्षस्त्विति । कर्त्रस्मृतिहेतुकालौकिकार्थत्वं प्राक् पौरुषेयत्वानुमानविरोध्युक्तम्, समाख्यायास्तु तत्स्मृत्यात्मकत्वाल्लौकिकार्थत्वमेव वेदस्येति न पूर्वपक्षासिद्धिरित्यर्थः । ननु समाख्यायाः कर्तृस्मृतिरूपत्वं कृतिनिमित्तत्वनिश्चय एव स्यात्; "तेन प्रोक्तम्" इत्यपि स्मृतौ न तन्निश्चय इति चोदयति— ननु यथा कृते ग्रन्थ इतीति । परिहरति—तन्न असाधारणेनेति । विशेषणस्य अन्यव्यावर्तकत्वनियमात् कृत्यपेक्षयैव तत्सम्भवात् तन्निमित्तत्वनिश्चय इत्यर्थः । नन्वेवं "तेन प्रोक्तम्" इति सूत्रं निर्विषयं स्यादित्यत्राह—न च सूत्रं निर्विषयमिति ।

१. वदना. क.   २. मेकवाक्य. क.

त्कम्' इति यदुक्तं तत्प्रकृतपरम् । कृततानुगुणं च वेदे दर्शनं प्रावाहणिरित्यपत्यार्थप्रातिपदिकोक्ततद्धितान्तं प्रावाहणिजन्मनः पूर्वं नासीद्वेद इत्येवमनुगुणम् ॥

राद्धान्तस्तु—कर्तृस्मृतिः साक्षान्नास्ति । मानान्तरावेद्ये चार्थे नानुमानार्हः कर्ता । समाख्यास्मिन्नेव विषये प्रवचनात् समर्था ; प्रकृष्टं वचनं कस्यचिदेव क्वचिदन्यत्वेऽपीत्यसाधारण्यात् निर्देशः । प्रावाहणिरित्याद्यन्यार्थे गुणवादादर्थे लक्षणोक्तकृतदिकारादिस्वीकारो वक्ष्यतेऽर्थवादपादे । यद्भाष्ये वक्ष्यमाणं व्याहृतम् 'वक्ष्यमः' इत्येवं नोक्तम्, तदसम्बद्धार्थमेवमाद्युन्मत्तवाक्य-

मानान्तरसंवादापेक्षमेव तद्विषयनिर्धारणम्, तदभावे कृतिनियम उक्तहेतुबलादित्यर्थः । वेदनिर्देशोऽपि पौरुषेयत्वसूचकोऽस्तीत्याह—कृतकतानुगुणं चेति ॥

राद्धान्तमाह — राद्धान्तस्त्विति । साक्षात्कर्तृस्मृतिरेव समभिव्याहारप्राप्तालौकिकार्थत्वबाधेन पौरुषेयत्वापादिका, तदभावात्तु कर्त्रनुमानप्रचाराच्च प्रामाण्यक्षितिरित्यर्थः । ननु समाख्याप्युक्तविधया तद्बाधेन तदापादनसमर्थेत्यत्राह—समाख्यास्मिन्नेवेति । वचनप्रकर्षापेक्षयान्यव्यवच्छेदेनैकव्यपदेश्यत्वमेकस्याद्यापि बहूनां सहपाठे दृश्यते ; तद्दर्शनादन्येऽपि तथैव व्यपदिशन्तीति पूर्वकालेऽपि नानुपपत्तिरिति न कृतिनियमसिद्धिरित्यर्थः । वेदान्तर्गतानित्यतोपस्थापकबबरप्रावाहण्यादिगतिर्विधिवाक्यशेषार्थवादेषु विध्यनुसारेण जघन्यार्थग्रहस्य वक्ष्यमाणत्वात् इहापि तद्धितप्रत्ययानुपगमेन कृत्प्रत्ययोपगत्या नित्यार्थानुसारिण्येव स्यादिति नानित्यताहेतुरित्याह— प्रावाहणिरित्यादीति । स्वस्थानव्याख्यास्यमानजघन्यवृत्तेरत्रैव व्याख्याने प्रयोजनमाह—यद्भाष्ये वक्ष्यमाणमिति । जघन्यार्थग्रहोक्तिप्रसङ्गादुन्मत्तवाक्यतुल्यवनस्पतिसर्पकर्तृकसत्रक्रियाद्यर्थकवाक्यानि चोदाहृत्य तच्छङ्कातपरिहारयोरिहैव कर्तुमुचितत्वात्तदर्थमिहैव तद्व्याख्यानमित्यर्थः । "अपि च अविप्रगीतः सुहृदुपदेशः कथमिवाशङ्क्येतोन्मत्तबालवाक्यसदृशः" इति भाष्यम् कथं शङ्कितदोषार्थवादे हेत्वन्तरपरं घटत इत्याशङ्क्य चोदनाविषयमेव तदुच्यते, नानन्तरार्थवादविषयमिति परिहारस्तत्रापि प्रामाण्यदार्ढ्यमात्रपरमिति न स्वरूप-

तुल्यमस्त्वित्युपन्यस्य निरस्यमिति । गुणवादव्याहृतिः, "अपिच अविप्रगीतः, सुहृदुपदेशः" इत्यादि भाष्यम् । तत्सर्वजनाविपर्ययाच्चोदनाप्रामाण्यदार्ढ्यार्थम् ॥

इति महोपाध्यायश्रीभवनाथमिश्रकृतौ नयविवेके
प्रथमस्याध्यायस्य
प्रथमः पादः ॥

साधनार्थम्, बुध्युत्पत्तिमात्रेण तस्य स्वतःप्रामाण्यनयसिद्धत्वादित्याह—तत्सर्वजनाविपर्ययादिति । कतिपयार्थवादमात्राकृष्टमप्युन्मत्तादिकृतत्वं तुल्याध्ययनकृत्स्नवाक्यव्यापकमेव स्यादिति चोदनायामपि तत्प्रसङ्गे तन्निरासोऽभ्युच्चयोक्त्यापि क्रियत इति चोदनाप्रामाण्यदार्ढ्यार्थं तदित्यर्थः ॥

इति रविदेवकृते विवेकतत्त्वे
प्रथमस्याध्यायस्य
प्रथमः पादः ॥

श्रीः

नयविवेकविवेकतत्त्वोद्धाराणामकाराद्यनुक्रमणी ॥
